श्रीवृद्धि–नेमि–अमृत–ग्रन्थमाला–ग्रन्थाङ्कः ॥५४॥

महामहोपाध्यायश्रीमेघविजयगणिवरविरचितं,

श्रीनैषधीयचरितमहाकाव्य–प्रथमसर्गसम्पूर्णपादपूर्तिरूपं

# श्री-शा-न्ति-ना-थ-च-रि-त्र-म् ।

( जैननैषधीय–महाकाव्यम् )

卐

तच्च शासनसम्राट्–सर्वतन्त्रस्वतन्त्र–बालब्रह्मचारि–तीर्थोद्धारक–तपागच्छाधिपति–भट्टारकाचार्य–महाराज श्री श्री श्री १००८ श्रीविजयनेमिसूरीश्वरमहाराजानां पट्टालङ्कारैः शास्त्रविशारद–कविरत्न–पीयूषपाणि–पूज्यपादाचार्यमहाराजश्रीविजयामृतसूरीश्वरमहाराजैर्विरचितया 'विद्वद्विनोदिनी'*नाम्न्या समलङ्कृतम्*

卐

प्रकाशितं चेदं राजनगर–अहम्मदावादस्थ–
श्रीजैनसाहित्यवर्धकसभया

श्री वीर नि. सं. २४९२ | वि० संवत् २०२२ | ईस्वी सन् १९६५

श्रीवृद्धि–नेमि–अमृत–ग्रन्थमाला–ग्रन्थाङ्कः ॥५४॥

महामहोपाध्यायश्रीमेघविजयगणिवरविरचितं,

श्रीनैषधीयचरितमहाकाव्य–प्रथमसर्गसम्पूर्णपादपूर्तिरूपं

# श्री-शा-न्ति-ना-थ-च-रि-त्र-म् ।

( जैननैषधीय–महाकाव्यम् )

卐

तब शासनसम्राट्–सर्वतन्त्रस्वतन्त्र–बालब्रह्मचारि–तीर्थोद्धारक–तपागच्छाधिपति–भट्टारकाचार्य–
महाराज श्री श्री श्री १००८ श्रीविजयनेमिसूरीश्वरमहाराजानां पट्टालङ्कारैः शास्त्रविशारद–
कविरत्न–पीयूषपाणि–पूज्यपादाचार्यमहाराजश्रीविजयामृतसूरीश्वरमहाराजैर्विरचितया
'विद्वद्विनोदिनी'नाम्न्या विवृत्या समलङ्कृतम्

卐

प्रकाशितं चेदं राजनगर–अहम्मदाबादस्थ–

श्रीजैनसाहित्यवर्धकसभया

| श्री वीर नि. सं. | वि० संवत् | ईस्वी सन् |
| --- | --- | --- |
| २४९२ | २०२२ | १९६५ |

प्रकाशक—
सेठ श्री सुरेन्द्रभाई साराभाई
श्री जैन साहित्य वर्धक सभा
अहमदाबाद ( गुजरात )

●

मूल्यम्
रु० १०-००

●

प्राप्तिस्थानानि—
१. श्री अमृतसूरीश्वरजी ज्ञानमंदिर
दौलतनगर, बोरीवली ( पूर्व )
मुंबई-६६ N. B.

२. भूरालाल कालीदास पंडित
सरस्वती पुस्तक भण्डार
हाथीखाना, रतनपोल, अहम्मदाबाद

३. सोमचन्द डी. शाह
पालीताणा ( सौराष्ट्र )

मुद्रक—
पंडित परमेष्ठीदास जैन न्यायतीर्थ
जैनेन्द्र प्रेस
ललितपुर ( झाँसी ) उ. प्र.

# शासनसम्राट्



सम्राट् श्री· नेमिसूरिः परमुदयदयो नन्दनो नन्दनानां
विज्ञानज्ञानपद्मै-र्लसदमृतकरः कस्थतूरो जितेन्द्रः ।
मुक्ताभाराममेरु-प्रभासितहितदक्षो यशोभद्रदेवः,
सौशीलः सजया नन्दन जनमनसां धर्मधौरन्धरः स्तात् ॥ १ ॥

# પ્રકાશકીયમ્

મહામહોપાધ્યાય શ્રી મેઘવિજયજીગણિ પુરંદર વિરચિત **શ્રી શાંતિનાથ ચરિત્ર**-
કે-જે શ્રી હર્ષરચિત નૈષધીય મહાકાવ્યના પ્રથમસર્ગની સંપૂર્ણ પાદપૂર્તિ રૂપે
છે, મૂળમાત્ર અને આવશ્યક થોડી થોડી ટિપ્પણી સાથે આ પુસ્તક પ્રથમ
પ્રકાશિત થયેલ છે. આ ગ્રન્થ વિશેષ વાચનમાં આવે અને કાવ્ય-
રસિકોને અધિક ઉપયોગી બને એ આશયથી અતિશય
પરિશ્રમપૂર્વક **'વિદ્વદ્વિનોદિની'** નામે ટીકા પૂજ્યપાદ
આચાર્ય મહારાજ શ્રી **વિજયામૃતસૂરીશ્વરજી**
મહારાજશ્રીએ રચી છે. આ પૂર્વે પૂજ્યશ્રી
મેઘવિજયજી ઉપાધ્યાયજી રચિત
સપ્ત સંધાન મહાકાવ્ય પર 'સરણિ' નામે ટીકા
પણ પૂજ્યપાદ આચાર્ય મહારાજશ્રીએ
રચી છે અને તે આ સભા
તરફથી પ્રકટ પણ થયેલ છે.

આ શ્રી જૈન સાહિત્ય વર્ધક સભા તરફથી અનેક વિશિષ્ટ ગ્રન્થો પ્રકાશિત થયા છે.
એ ગ્રન્થો ભવ્યજીવોની જ્ઞાનોપાસનામાં પૂરક બનવા સાથે વિશિષ્ટ ક્ષયોપશમમાં
કારણરૂપ બન્યા છે. આ સર્વમાં અમને જે લાભ મળે છે તે માટે અમે
અમને અહોભાગ્ય સમજીએ છીએ અને એ માટે પૂજ્યપાદ આચાર્ય
મહારાજશ્રીજીનો પરમ ઉપકાર માનીએ છીએ.

આ કાર્યમાં સહાયભૂત થતા—અને થયેલા સર્વના અમે આભારી છીએ.
વિશેષે કરીને આ પ્રકારના કાર્યો કરવાની સદ્‌ભૂત ભાવના રાખીએ છીએ.

—પ્રકાશક.

# પરિચય

## ( ૧ ) વર્તમાન ચોવીશીમાં પાંચ પ્રભુ અને તેમાં પણ શ્રીશાન્તિનાથ પ્રભુની વિશેષ વિખ્યાતિ.

વર્તમાન ચોવીશીમાં થયેલા ચોવીશ તીર્થંકરોમાં પહેલા, સોળમા, બાવીસમા, તેવીસમા અને ચોવીસમા એમ પાંચ તીર્થંકર પરમાત્માના જીવનચરિત્રો વિશેષ આકર્ષક છે. એ હકીકત છે અને તે સહેતુક છે.

પ્રથમ શ્રી ઋષભદેવ પરમાત્માનું જીવન રોચક તો છે જ સાથે વિધવિધ પ્રકારની અનેક બોધપ્રદ વાતોથી ભૂરપૂર છે. સોળમા શ્રી શાન્તિનાથ ભગવાનના જીવનની વિશિષ્ટતાઓ ઘણી છે, તેમાં પણ શ્રી શાન્તિ અંગેનું સામર્થ્ય ખાસ તરી આવે એવું છે, એજ કારણે વિધિ વિધાનોમાં, અનુષ્ઠાનોમાં, સ્તોત્રોમાં, એ પ્રભુનું સાન્નિધ્ય નામથી, આકૃતિથી, મંત્રથી અને ભાવનાથી અનિવાર્યપણે સેવવામાં આવે છે.

ઐતિહાસિક પ્રમાણો પણ જેઓની વિશિષ્ટ સ્થિતિને પ્રમાણીત કરે છે તે બાવીસમાં બાલબ્રહ્મચારી શ્રી નેમિનાથ ભગવાન, તેવીસમાં પુરુષાદાનીય શ્રી પાર્શ્વનાથ પ્રભુ અને ચોવીસમાં ચરમ તીર્થંકર શ્રી વર્ધમાન-મહાવીરસ્વામીજી છે. તે ત્રણે જિનવરોના જીવનની વિશેષતાઓ વિખ્યાત જ છે. આ કારણે આ અવસર્પિણીમાં થયેલા ચોવીશ જિનો પૈકી પાંચ પ્રભુના નામ-જીવન આદિ અધિક પ્રસિદ્ધિને પામ્યા છે. તેમાં પણ અપેક્ષા-વિશેષથી સોળમાં શ્રી શાન્તિનાથ ભગવાન વિશેષે વિખ્યાતિ પામ્યા છે અને તેમનાં ચરિત્રો પણ અનેક વિશિષ્ટતાઓથી પૂર્ણ વિદ્વાન્ સૂરિવરોએ રચ્યા છે.

## ( ૨ ) શ્રી શાન્તિનાથ પ્રભુના જુદા જુદા ચરિત્રોનો ટૂંક પરિચય.

શ્રી શાન્તિનાથ પ્રભુના જીવન ચરિત્રને વર્ણવતા ગદ્ય-પદ્ય કાવ્ય-મહાકાવ્યો સંસ્કૃત-પ્રાકૃતમાં રચાયેલા અનેક છે. તેમાંના કેટલાકની ટૂંક વિગતો આ પ્રમાણે છે. જે ગ્રન્થોની કેટલીક હકીકતો મળી આવે છે એવા પ્રસ્તુત ચરિત્રને વર્ણવતા સાત-આઠ કાવ્યગ્રન્થો છે. તેમાંથી ત્રણ-ચાર ચરિત્રો વ્યાપક રીતે પ્રચલિત છે. દરેક ચરિત્રમાં સાહિત્યદૃષ્ટિએ વિવિધતાઓ જોવા મળે છે. કોઈમાં કથારસ પુષ્ટ થયો છે તો કોઈમાં અલંકારાદિની રમણીયતા પુષ્ટ થઈ છે. તેમાં—

### ૧—પ્રાકૃત શ્રી શાન્તિનાથ ચરિત્ર

આ ચરિત્રના કર્તા શ્રી દેવચન્દ્રસૂરિજી મહારાજ છે. તેઓશ્રીજી કલિકાલ સર્વજ્ઞ શ્રીહેમચન્દ્રસૂરિજી મહારાજના ગુરુવર્ય છે. તેમનો સત્તા સમય વિક્રમની બારમી શતાબ્દી છે. ત્રિષષ્ટિશલાકા પુરુષ ચરિત્રની પ્રશસ્તિમાં શ્રી હેમચન્દ્રસૂરિજીએ પ્રસ્તુત રચનાનો સ્પષ્ટ ઉલ્લેખ કર્યો છે. તે આ પ્રમાણે—

शिष्यस्तस्य च तीर्थमेकमवनेः पावित्र्यकृज्जङ्गमं,
स्याद्वादत्रिदशापगाहिमगिरि-र्विश्वप्रबोधार्यमा ।
कृत्वा स्थानकवृत्तिशान्तिचरिते, प्राप्तः प्रसिद्धिं परां,
सूरिर्भूरितपःप्रभाववसतिः, श्रीदेवचन्द्रोऽभवत् ॥१४॥
आचार्यो हेमचन्द्रोऽभूत्, तत्पदाम्भोजषट्पदः ।
तत्प्रसादादधिगत-ज्ञानसम्पन्महोदयः ॥१५॥

શ્રી દેવચન્દ્રસૂરિજી મહારાજશ્રીજીના જીવનની કેટલીક વાતો મળે છે, પણ બહુ વિગતવાર વૃતાન્ત ઉપલબ્ધ નથી. તેઓશ્રી વિદ્વાન્, પવિત્ર, તપસ્વી, ઓજસ્વી, જ્ઞાની, નિમિત્તના વિશેષ જાણકાર, સાથે વિશિષ્ટ ગ્રન્થકાર હતા. તેઓશ્રીએ સ્થાનક-વૃત્તિની રચના કરી છે. તે પણ ઉપરના ઉલ્લેખમાં સ્પષ્ટ છે.

## ૨—શ્રી શાન્તિનાથ ચરિત્ર.

આ ચરિત્રના રચયિતા કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય છે. તેઓશ્રીનો સત્તા સમય પણ વિક્રમની બારમી શતાબ્દીનો મુખ્યત્વે છે. આમ તો આ ચરિત્ર ત્રિષષ્ટિશલાકા પુરુષ ચરિત્રના એક ખંડસ્વરૂપ છે. છતાં પણ ૨૦૪૩ શ્લોક પ્રમાણ આ ચરિત્ર છે. તેમાં સાંગોપાંગ સર્વ હકીકતો વર્ણવી છે. કાવ્ય દૃષ્ટિએ પણ બહુમૂલ્ય આ રચના છે. ત્રિષષ્ટિના પાંચમા પર્વમાં પંચસર્ગાત્મક પંચમચક્રવર્તીનું આ ચરિત્ર પંચ અંકનો સુમેળ સાધે છે. સાથે સાથે અનેક પ્રકારના બોધને સમૃદ્ધ બનાવે છે. રાજમાર્ગ પર આવેલા વિશાળ સરોવરના એક વિશિષ્ટ ઘાટ જેવું આ ચરિત્ર સંખ્યાબંધ જીવોને વિમળતા– શીતળતા આપવા સાથે પિપાસાને પણ શાંત કરે છે.

## ૩—શ્રી શાન્તિનાથ ચરિત્ર

આ ચરિત્ર સંસ્કૃત છે ને તેના કર્તા આચાર્યશ્રી માણિક્યચન્દ્રસૂરિજી છે. તેઓશ્રી 'રાજગચ્છીય' હતા. તેઓશ્રી સાહિત્યના સારા વિદ્વાન્ હતા તે હકીકત – સાહિત્યમાં લબ્ધપ્રતિષ્ઠ–મમ્મટકૃત 'કાવ્યપ્રકાશ' ગ્રન્થની તેઓશ્રીએ કરેલી 'સંકેત' નામની અર્થગંભીર ટીકાથી–સ્પષ્ટ છે. તેઓશ્રીએ એક શ્રીપાર્શ્વનાથ ચરિત્રની પણ રચના કરી છે. તેમાં ૧૨૭૬ ની સાલ છે તેથી તેઓશ્રી વિક્રમની તેરમી શતાબ્દીમાં થયા છે. તે ઉલ્લેખ આ પ્રમાણે છે.

'रसर्षिरविसंख्यायां, समायां दीपपर्वणि ।
समर्थितमिदं वेला – कूले श्रीदेवकूपके ॥१॥'

## ૪-શ્રી શાન્તિનાથ ચરિત્ર

આ ચરિત્રના રચયિતા શ્રીમુનિદેવસૂરિજી મહારાજ છે. તેઓશ્રીજી શ્રીવાદિદેવસૂરિજી મહારાજ શ્રીના પ્રશિષ્ય છે. આ પ્રસ્તુત ચરિત્રનું સંશોધન સમરાદિત્ય સંક્ષેપના કર્તા સમર્થ વિદ્વાન્ શ્રીપ્રદ્યુમ્નસૂરિજી મહારાજે કર્યું છે. એ અંગે કર્તા પોતે જ કહે છે કે—

"यो वादीश्वरदेवसूरिसुगुरो-र्मूलक्रमे सूरिणा,
चक्रे श्रीमदनेन्दुना निजपदे, वेलाप्रवृत्तश्रिता ।

काव्ये श्रीमुनिदेवसूरिकविना, श्रीशान्तिवृत्ते कृते,
श्रीप्रद्युम्नमुनीन्द्रधीरुचिशुचिः, सर्गोऽगमत् सप्तमः ॥ (५)"

શ્રીમુનિભદ્રસૂરિજીએ પણ સ્વરચિત શ્રીશાન્તિનાથ મહાકાવ્યની પ્રશસ્તિમાં જણાવ્યું છે કે—

"पूज्यश्रीमुनिदेवसूरिरचित - श्रीशान्तितीर्थेश्वर-
प्रख्याताद्भुतकाव्यदर्शनतया, काव्यं मयेदं कृतम् ।"

આ કાવ્ય અંગે હર્મન-જેકોબીએ બે ક્ષતિઓ કરી છે. **H. Jacobi** શ્રી સમરાદિત્ય સંક્ષેપની પ્રસ્તાવનામાં લખે છે કે—

**"Devasuri his Upamiti bhava prapancha Katha saroddhara ( in samvat. 1298 ) and his Shantinath Charitra."** ઈત્યાદિ ઉલ્લેખ કરીને તેઓ આ ચરિત્રના કર્તાનું નામ 'શ્રી દેવસૂરિજી' જણાવે છે. વળી તે દેવસૂરિજી ઉપમિતિ ભવ પ્રપંચ કથા સારોદ્ધારના કર્તા છે—એમ પણ કહે છે. આ બન્ને તેમની ભ્રમણા છે. એક તો મુનિ શબ્દને છૂટો પાડીને દેવસૂરિ એ પ્રમાણે કર્યું, એ બરાબર નથી, એટલું જ નહિ પણ ઉપમિતિ ભવ પ્રપંચ કથા સારોદ્ધારના કર્તા જે દેવેન્દ્રસૂરિજી છે તેમને પણ ઈન્દ્ર શબ્દ તરફ લક્ષ્ય રાખ્યા વગર દેવસૂરિ સમજીને બન્નેને એક ગણ્યા. અને એમ થતાં સંવતમાં ગોટાળો કર્યો.

હર્મન્ જેકોબીએ આવી રભસ વૃત્તિથી સંખ્યાબંધ અક્ષંતવ્ય ક્ષતિઓ સાહિત્ય ક્ષેત્રમાં કરી છે. એ સર્વનું પરિમાર્જન કરતાં અનેક લખાણો પણ થયાં છે. અહિં તો પ્રાસંગિક હોવાથી સામાન્ય નિર્દેશ માત્ર કરેલ છે.

## ૫—શ્રી શાન્તિનાથ ચરિત્ર

૪૮૯૦ એટલે પાંચ હજાર શ્લોક પ્રમાણ આ ચરિત્ર છે. આના કર્તા પૂર્ણિમાગચ્છીય શ્રીઅજિતપ્રભસૂરિજી મહારાજ છે. શ્લોકબદ્ધ આ ચરિત્રમાં પ્રાસંગિક અવાન્તર કથાઓ પણ સારા પ્રમાણમાં છે. આ ચરિત્ર ૭ સર્ગમાં છે. પઠન-પાઠન, વાચન, વ્યાખ્યાન આદિમાં આ ચરિત્ર સારી રીતે પ્રચલિત છે. આ પ્રસ્તુત પુસ્તકના બીજા પરિશિષ્ટમાં આ ચરિત્રમાંથી ઉપયોગી શ્રી શાંતિનાથ પ્રભુના જીવનચરિત્રનો ભાગ આપ્યો છે. આ ચરિત્રની રચના વિ૦ સં૦ ૧૩૦૭ માં થઈ છે.

## ૬—શ્રી શાંતિનાથ ચરિત્ર

આ ચરિત્ર એક મહાકાવ્ય છે. ૧૯ સર્ગમાં વહેંચાયેલા આ ચરિત્રના શ્લોકો ૬૨૭૨ છે. આના કર્તા આચાર્ય શ્રી મુનિભદ્રસૂરિજી છે. એમની વિદ્વત્તા અને કવિત્વ શક્તિનો સુન્દર પરિચય આ ચરિત્રથી સ્પષ્ટ થાય છે. આ મહાકાવ્ય રચવાનું મુખ્ય પ્રયોજન તેઓશ્રીએજ છેવટે પ્રશસ્તિમાં જણાવ્યું છે. તેમના સમયમાં પણ સંસ્કૃતની વ્યુત્પત્તિ માટે રઘુવંશ, કુમારસંભવ, કિરાત, શિશુપાલવધ, અને નૈષધીય ચરિતનો અભ્યાસ પ્રચલિત હતો. એ અભ્યાસથી ઈતર દોષ આવવાની સંભાવના હતી—તેથી જો જૈન શાસનમાં વ્યુત્પત્તિ માટે આ મહાકાવ્ય ભણાવવામાં આવે તો એક સાથે બે કાર્ય સરે. આ હકીકત તેઓશ્રીએ આ પ્રમાણે કહી છે.

"ये दोषान् प्रतिपादयन्ति सुधियः श्रीकालिदासोक्तिषु,
श्रीमद्भारविमाघपण्डितमहा–काव्यद्वयेऽप्यन्वहम् ।
श्रीहर्षामृतसूक्तिनैषधमहाकाव्येऽपि ते केवलं,
यावद्वृत्तविवर्णनेन भगवच्छान्तेश्चरित्रे गुणान् ॥१३॥
मिथ्यात्वाश्रितकाव्यपञ्चकमिदं व्याचक्षते सूरयो,
यद्वत् प्राथमकल्पिकाय सततं व्युत्पत्तिसंप्राप्तये ।
तद्वच्छान्तिजिनाधिनाथचरितं सम्यक्त्वसंवासना–
वासावासितमानसा यदि ततः किं स्यान्नवा वाञ्छितम् ॥१४॥"

આ મહાકાવ્યની રચના સં૦ ૧૪૧૦ માં થઈ છે. પૂજ્ય આચાર્યશ્રી વિજયદર્શનસૂરિજી મહારાજે આ મહાકાવ્યની 'પ્રબોધિની' નામે સુન્દર ટીકા રચી છે. ચાર સર્ગ સુધીનો પ્રથમ વિભાગ મુદ્રિત થઈને પ્રકટ થયો છે. બીજું મુદ્રણ ચાલુ છે. તેથી આ મહાકાવ્યના અભ્યાસમાં સુકરતા વધશે એ સ્પષ્ટ છે.

### ૭—શ્રી શાન્તિનાથ ચરિત્ર.

આ ચરિત્ર ગદ્ય છે. આના રચયિતા શ્રી ભાવચન્દ્રસૂરિજી છે. સંસ્કૃતના પ્રાથમિક અભ્યાસીઓને વ્યુત્પત્તિ માટે આશીર્વાદ સમાન આ ચરિત્ર છે. ભાષાનો સુન્દર રસમય પ્રવાહ અહિં વહે છે. વ્યાખ્યાનમાં આ ચરિત્ર સારા પ્રમાણમાં પ્રચલિત છે અને તેથી શ્રોતાઓને સારો રસ રહે છે.

### ૮—શ્રી શાન્તિનાથ ચરિત્ર.

શ્રી વત્સરાજ મુનિ કૃત આ ચરિત્ર શ્લોકબદ્ધ અને સુન્દર છે. માત્ર સાતસો શ્લોક પ્રમાણ આ ચરિત્ર ઠીક ઠીક અભ્યાસી એક બેઠકે વાંચી લે એવું છે.

## ( ૩ ) પ્રસ્તુત શ્રીશાન્તિનાથ ચરિત્રનો પરિચય અને વિશેષતાઓ.

ઉપરોક્ત સર્વ ચરિત્રો કરતાં જુદી જ ભાત પાડતું મહામહોપાધ્યાય શ્રીમેઘવિજયજી ગણિવર્ય વિરચિત આ ચરિત્ર છે. આ ચરિત્રમાં મુખ્ય છન્દ વંશસ્થ છે. અને ૫૯૧ સૂક્તો છે. શ્રીશાન્તિનાથપ્રભુનું કેવળ જીવન જાણવાની ઇચ્છાથી જો કોઈ આ ચરિત્ર વાંચવા જાય તો તો તેની ઇચ્છા ઇચ્છામાત્ર જ રહે એવું આ ચરિત્ર છે. આ ચરિત્રની મજા માણવા માટે કાવ્યોનોસારો પરિચય હોય, વિશિષ્ટ કોટિની વ્યુત્પત્તિ હોય, શબ્દાલંકાર પ્રત્યે પક્ષપાત કેળવાયો હોય, તો જ આ ચરિત્રથી રસાસ્વાદ લઈ શકાય એવું છે. બીજા ગ્રન્થોની જેમ આ ચરિત્ર વાંચતા જઈએ ને સમજતા જઈએ એવું નથી. કેટલેક સ્થળે તો એક એક શ્લોક સમજવા માટે સારો એવો સમય આપવો પડે એવુંછે. આ ચરિત્ર અંગેની કેટલીક વિશિષ્ટ હકીકતો લક્ષ્યમાં રાખવા જેવી છે—તે આ પ્રમાણે.

૧. સંસ્કૃત સાહિત્યમાં શ્રીહર્ષકૃત નૈષધીય ચરિત્રનું સ્થાન વિશિષ્ટ છે. એ ચરિત્ર વિદ્વાનોના મસ્તક ડોલાવે એવું છે, સંસ્કૃતજ્ઞોની સૃષ્ટિમાં એવા કેટલાક સૂક્તો પ્રચલિત છે કે જે ઉક્ત ચરિતનું સારું ગૌરવ પુષ્ટ કરે છે.

"उपमा कालिदासस्य, भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः ॥

**उदिते नैषधे काव्ये, क्व माघो क्व च भारविः ।"**

આવા પ્રકારની ઉક્તિઓ નૈષધીયના રસાસ્વાદ કરનારાઓને અત્યુક્તિ જેવી જણાતી નથી. તેમાં પણ તેનો પ્રથમ સર્ગ ખૂબ રસસભર છે. શાકુંતલ માટે તેનો ચોથો અંક જેમ વખણાય છે તેમ નૈષધનો પ્રથમ સર્ગ વખણાય છે, તે પ્રથમ સર્ગના દરેક શ્લોકના પ્રત્યેક ચરણ લઈને તેની પાદપૂર્તિ કરીને આ **શ્રીશાન્તિનાથ ચરિત** ની રચના કરવામાં આવી છે.

૨. ચરિત્રને અનુરૂપ અનુક્રમે શ્લોકોની રચના કરવી એ એક વાત છે અને પાદપૂર્તિ કરીને રચના કરવી એ બીજી વાત છે. સંસ્કૃત વાઙ્મયમાં પાદપૂર્તિ રૂપે રચાયેલું સાહિત્ય પણ પુષ્કળ છે. તેનાં કાલિદાસ કવિના મેઘદૂતના ઘણી પાદપૂર્તિઓ થઈ છે. ભક્તામર સ્તોત્રની પણ ઘણી પાદપૂર્તિઓ પ્રકટ છે. પાદપૂર્તિ કરનારા કવિઓનાં ઉપાધ્યાયજી શ્રી મેઘવિજયજી મહારાજનું સ્થાન સર્વ પ્રથમ આવે એવું છે. એ હકીકત તેઓશ્રીએ કરેલા પાદપૂર્તિ રૂપ કાવ્યોથી સ્પષ્ટ સમજાય એવી છે.

૩. કોઈ થોડી થોડી પાદપૂર્તિ કરે—તો કોઈ વધારે પાદપૂર્તિ કરે પણ ઉપાધ્યાયજી શ્રીમેઘવિજયજી મહારાજે હજારો પાદપૂર્તિઓ કરી છે. મેઘદૂત–માઘ–અને નૈષધીયની પાદપૂર્તિઓ તેઓ શ્રીએ કરી છે ને તે પ્રસિદ્ધ પણ છે. આ કાર્યની કઠિનતા તો તેના અનુભવીઓ જ જાણી શકે. આ પ્રકારની પાદપૂર્તિ રૂપે રચાયેલા કાવ્યોમાં જો કવિની કુશળતા ન હોય તો રસપ્રવાહ સ્ખલિત થઈ જાય છે—અહિ પણ એવું દર્શન જરૂર થશે—છતાં પણ કવિએ કેટલેક સ્થળે તો સરસ રસ પ્રવાહ વહેતો કર્યો છે તે પણ જોવા મળશે. નીચેના એક શ્લોકથી એ હકીકતની પ્રતીતિ થશે—

न चार्हतोऽनुत्तरवासिनः सुरा, विधातुमङ्गुष्ठमपि क्षमाः क्रमात् ।
असंशयस्तेन मनःशयोऽस्ति मे, 'न तन्मुखस्य प्रतिमा चराचरे' ॥१॥९३॥

ઉપરની પાદપૂર્તિ કેટલી સુન્દર પ્રાસાદિક છે. આવા અનેક ઉદાહરણો પ્રસ્તુત કાવ્યમાં છે. બાકી તો પાદપૂર્તિને કારણે આમાં કાઠનતા છે—એટલે આ કાવ્યના અભ્યાસીએ એ કઠિનતાથી કંટાળ્યા વગર તેનો રસાસ્વાદ લેવા તત્પર બનવું જરૂરી છે.

૪. આ કાવ્યના ૭ સર્ગો છે. તેમાં પ્રથમ સર્ગમાં, હસ્તિનાપુર નગર, વિશ્વસેન રાજા, અચિરા રાણી, શ્રીશાન્તિનાથ પ્રભુનો જન્મ, પ્રભુનું સૌંદર્ય, વગેરે વર્ણવ્યું છે. બીજાને ત્રીજા સર્ગમાં પ્રભુનો વિવાહ, ચક્રાદિ રત્નો, ષટ્ ખંડના વિજય માટે પ્રયાણ, અશ્વોની ચાલ, તેથી ઊડતી ધૂળ–વગેરે વર્ણન અનેક ઉત્પ્રેક્ષાઓથી ભરપૂર છે. અહિ પ્રાસંગિક કેટલુંક ઋતુ વર્ણન પણ કર્યું છે. ચોથા સર્ગમાં ચક્રવર્તિપણાનો અભિષેક, રાજ્યસ્થિતિ, વૈરાગ્યવાસિત થઈ વનમાં જવું–ઈત્યાદિ નિરૂપણ છે. પાંચમા સર્ગમાં દીક્ષા, તપસ્યા કૈવલ્ય પ્રાપ્તિ, તીર્થસ્થાપના, દેશના, પરિવાર અને છઠ્ઠા સર્ગમાં નિર્વાણ, ગણધરોની ખિન્નતા, તેનું શમન, શાસનનું સચાલન આદિ વિશિષ્ટ રીતે પ્રરૂપ્યા છે.

૫. આ કાવ્યમાં એક અપેક્ષાએ શબ્દાલંકાર પ્રધાન છે—છતાં પણ નૈષધની પાદપૂર્તિ હોવાને કારણે તદનુરૂપ અર્થાલંકારો પણ ઓછા નથી. શબ્દાલંકારોમાં વિવિધ અનુપ્રાસો તો પદે પદે છે. છઠ્ઠા સર્ગમાંના કેટલાક ઉદાહરણ આ પ્રમાણે છે.

"परम्परार्थीव परम्परार्थतः"
"मितायुषा दृढ् जनिता जनाङ्गनै-र्न बाधिका स्यान्नभसो नवाधिका"
"सदादिनाथार्चनिकादिना दिना-गमे समेता सधनंजनोऽर्जनैः"
"मृषा कषायानपि मा कृथा वृथा" ઇત્યાદિ.

આમ આ કાવ્ય ઉચ્ચ કક્ષાનો રસાસ્વાદ કરાવવા સાથે વિશિષ્ટ વ્યુત્પત્તિનું પૂર્ણ પોષક છે.

## ( ૪ ) પ્રસ્તુત કાવ્યના કર્તાનો ટૂંક પરિચય.

આ ચરિત્રના કર્તા ઉપાધ્યાયપ્રવરશ્રી મેઘવિજયજી મહારાજનું વિગતવાર ચરિત્ર ખાસ મળતું નથી, પણ તેઓશ્રીએ રચેલા તે તે ગ્રન્થોની પ્રશસ્તિ ઉપરથી નીચે પ્રમાણેની હકીકતો તારવી શકાય છે.

(૧) તેઓશ્રીનો સત્તાકાળ અઢારમી શતાબ્દી છે. (૨) તેઓશ્રી સત્તરમી શતાબ્દીમાં થયેલા સૌભાગ્ય સમ્પન્ન આચાર્યશ્રી વિજયહીરસૂરીશ્વરજી મહારાજની પરંપરામાં થયા છે. (૩) તે પરંપરા આ પ્રમાણે છે.

શ્રીહીરસૂરિજી.
|
શ્રીકનકવિજયજી
| | |
શ્રીશીલવિજયજી શ્રીકમલવિજયજી શ્રીચારિત્રવિજયજી
|
શ્રીકૃપાવિજયજી
|
ઉપા૦ મેઘવિજયજી

ઉપર-જણાવેલા શ્રીશીલવિજયજી આદિ ત્રણે સહોદર બન્ધુઓ હતા. ( ૪ ) ગુરુકૃપાથી પ્રાપ્ત ચિંતામણિ મંત્રની સુન્દર આરાધના-સાધના ઉપાધ્યાયજીએ કરી હતી. ( ૫ ) તેઓશ્રીનું પાંડિત્ય પરિતઃ પ્રસરિત હતું તે તે તે વિષયનાં રચેલા તેમનાં ગ્રન્થોથી સ્પષ્ટ જણાય છે. ( ૬ ) તેઓશ્રીએ અનેક વિષયોના ગ્રન્થોની રચના કરી છે. તેમાં કાવ્યગ્રન્થો વિશેષે રચ્યા છે. તે તે ગ્રન્થોની યાદિ આ પ્રમાણે છે. ૧-ચંદ્રપ્રભાવ્યાકરણ. ૨-હેમચન્દ્રિકા, ૩-સપ્તસંધાનમહાકાવ્યમ્, ૪-દેવાનંદાભ્યુદયમ્. ૫-મેઘદૂત સમસ્યા લેખ, ૬-શ્રીશાન્તિનાથચરિત્રમ્, ૭-વર્ષપ્રબોધ, ૮-માતૃકાપ્રસાદ, ૯-શ્રીવિજયદેવમાહાત્મ્ય-વિવરણ, ૧૦-યુક્તિપ્રબોધ નાટક, ૧૧-હસ્તસંજીવનમ્. આ સિવાય બીજા અનેક ગ્રન્થો પણ તેઓશ્રીએ રચ્યા હોવાની સંભાવના છે.

## ( ૫ ) પ્રસ્તુત કાવ્યનું પ્રકાશન અને ટીકા

પ્રસ્તુત કાવ્યનું મૂળ માત્ર પ્રકાશન વીર નિ. સં. ૨૪૪૪ માં 'જૈન વિવિધ સાહિત્ય શાસ્ત્રમાલાએ' કર્યું છે. બનારસથી બહાર પડેલ આ કાવ્યમાં નીચે થોડી થોડી ટિપ્પણીઓ પણ છે. તેના સમ્પાદકે જે પ્રતિ પરથી આ સંપાદન કર્યું છે તે પ્રતિના લેખકે જે શ્લોક અંતે લખ્યો છે તે રોચક અને સુન્દર છે. તે આ પ્રમાણે છે—

समस्यास्य शास्त्रस्य सच्चैषवस्य, कृता नूतना पाठकैः पाठकार्थः ।
सुपात्रैणभृच्छात्ररत्नाभिधेन, समुत्तारिता सत्प्रतिः सुन्दरीयम् ॥

એકન્દર શુદ્ધ અને સુવાચ્ય એ પુસ્તક પરથી આ ટીકા કરવામાં આવી છે. ટીકા કરતાં કોઈ કોઈ સ્થળે પાઠફેર કરેલ છે. ટીકા વગર આવા કાવ્યનું વાચન વિરલજ બને છે. જો ટીકા હોય તો વાચનમાં વધારો થાય એ સહજ છે. એટલે ટીકાયુક્ત આ પ્રકાશન અધિક ઉપયોગી બનશે એ નિર્વિવાદ છે. આવા કઠિન કાવ્યની ટીકા કરવાનું કાર્ય કેટલું વિષમ છે. તે તો તે વિષયના જાણકાર જાણી શકે એવું છે. અતિ પરિશ્રમે આ વૃત્તિ તૈયાર થયેલી છે. ટિપ્પણી આ કાર્યમાં અંશે અંશે પૂરક બની છે.

## ( ૬ ) ટીકાકારનો ટૂંક પરિચય

આ કાવ્યના ટીકાકાર પૂજ્યપાદ શાસ્ત્રવિશારદ–કવિરત્ન–પીયૂષપાણિ આચાર્યશ્રી વિજયામૃતસૂરીશ્વરજી મહારાજ છે. તેઓશ્રીજી વીસમી સદીના સમર્થ વિદ્વાન્ અને પૂર્ણ પ્રતાપી શાસનસમ્રાટ્ સૂરિચક્રચક્રવર્તિ-સર્વતન્ત્રસ્વતન્ત્ર આચાર્ય મહારાજ શ્રીવિજયનેમિસૂરીશ્વરજી મહારાજશ્રીના પટ્ટધર છે. તેઓશ્રીએ વિદ્વત્તાપૂર્ણ વ્યાપક અનેક ગ્રન્થોની રચના કરી છે. તે ગ્રન્થોની સંક્ષિપ્ત યાદિ આ પ્રમાણે છે—

૧. સ્તવન ચતુર્વિંશતિકા,
૨. સ્તુતિ ચતુર્વિંશતિકા,
૩. ચૈત્યવન્દન ચતુર્વિંશતિકા,
૪. વૈરાગ્યશતકમ્,
૫. દૃષ્ટાન્તાવલિ,
૬. આત્મનિન્દા દ્વાત્રિંશિકા–અનુવાદ,
૭. સપ્તસન્ધાન મહાકાવ્ય, સરણિ ટીકા,
૮. કલ્પલતાવતારિકા,
૯. સર્વજ્ઞસિદ્ધિ–સર્વહિતા ટીકા.

આ પ્રસ્તુત કાવ્યની ટીકાનું નામ 'વિદ્વદ્વિનોદિની' છે. આ કાવ્યની ટીકામાં અર્થ ઉદ્ઘાટન પ્રત્યે અધિક લક્ષ્ય આપવામાં આવ્યું છે. એથી કાવ્યનો રસાસ્વાદ વિશેષે જળવાઈ રહે છે. કેટલીક ટીકામાં વ્યાકરણ વગેરેની અતિશય ચર્ચા કરવામાં આવે છે પણ તેથી કાવ્યની મજા મારી જાય છે. અહિં પ્રાસંગિક આવશ્યક જણાય તેટલું વ્યાકરણાદિનું નિરૂપણ કરવામાં આવ્યું છે. ઉપાધ્યાયજી શ્રીમેઘવિજયજી મહારાજના ગ્રન્થો પર ટીકા કરવાનું સૌભાગ્ય આચાર્યશ્રીજીને મળેલ છે,—આ પૂર્વે સપ્ત સંધાન મહાકાવ્ય પરની ટીકા પણ તેઓશ્રીજીએજ રચી છે. એથી ગ્રન્થકારના ભાવો વ્યક્ત કરવાનો અધિકાર તેઓશ્રીને વિશેષ પ્રાપ્ત થયો છે એ સ્પષ્ટ છે.

## ( ૭ ) ગ્રંથની ઉપયોગિતા

આવા ગ્રંથોની ઉપયોગિતા શું ? એવો પ્રશ્ન થાય એ સ્વાભાવિક છે. એનો ઉત્તર તો અનેક પ્રકારે આપી શકાય એમ છે. છતાં એટલું ચોક્કસ છે કે આવા ગ્રન્થને ઉપયોગમાં લેનારા ઘણાં ઓછા હોય છે. એમ તો બહુમૂલ્ય અલંકારને લેનારા પણ કેટલા હોય છે ? એવી કેટલીક અદ્દભુત વસ્તુઓ છે કે જેને જોઈને જ જનતા આશ્ચર્ય અને આનન્દ અનુભવે છે. થોડા વિદ્વાનો તો જરૂર આ ગ્રન્થના આસ્વાદથી આહ્લાદ અનુભવશે અને ગ્રન્થના સૌરભને સર્વતઃ પ્રસરાવશે. એટલું થાય તો પણ આવા ગ્રન્થોના પ્રકાશનની સાર્થકતા અને સફળતા છે એજ.

સં. ૨૦૨૧ આસો. શુ. ૪ મંગલ<br>
તા. ૨૮-૯-૧૯૬૫<br>
શેઠ જીવણ અબજી જ્ઞાનમંદિર<br>
માટુંગા, મુંબઈ-૧૯ ડી. ડી.

લિ.<br>
વિજયધુરન્ધરસૂરિ.



# श्रीजैन-साहित्यवर्धक-सभया

## प्रकाशमानीता ग्रन्थाः ।

| | क्रमांक | नाम | मूल्यम् |
|---|---|---|---|
| * | १ | परमोत्तमसंगीतरसस्रोतस्विनी | ०-५० |
| * | २ | सप्तसन्धानमहाकाव्यम् ( सटीकम् ) | ४-०० |
| * | ३ | साहित्य शिक्षा मञ्जरी | २-०० |
| | ४ | वैराग्यशतकम् ( स-विवेकम् ) | १-२५ |
| * | ५ | श्रीतत्त्वार्थाधिगमसूत्रम् ( अनुवाद-विवेचन-युक्तम् ) | ३-०० |
| | ६ | श्री आदिजिनपंचकल्याणक पूजा | ०-४० |
| * | ७ | श्री गिरनारजी तीर्थनो परिचय | ०-२५ |
| * | ८ | संगीतस्रोतस्विनी | ०-३७ |
| | ९ | इन्दुदूतम् ( खण्डकाव्यम्-सटीकम् ) | १-०० |
| * | १० | निह्नववाद | ३-०० |
| * | ११ | शिवभूति | ०-१९ |
| * | १२ | नयवाद | ०-२५ |
| * | १३ | आत्मवाद | ०-६२ |
| * | १४ | विचारसौरभ | ०-२५ |
| * | १५ | श्रीतत्त्वार्थ स्वाध्याय | ०-२५ |
| | १६ | सिरिजंबूसामीचरितं | १-२५ |
| * | १७ | सुपात्रदाननो महिमा | ०-२५ |
| * | १८ | श्रीसिद्धचक्रनवपदाराधनविधि | ३-०० |
| * | १९ | श्रीसिद्धचक्रस्वरूपदर्शन | ०-५० |
| | २० | श्री अर्हत्प्रार्थना | ०-२५ |
| | २१ | स्वाध्यायरत्नावलि ( खण्ड-१ ) | १-२५ |
| | २२ | श्रीवज्रस्वामी-आख्यान | ०-३७ |
| | २३ | श्रीचन्द्रप्रभजिनपंचकल्याणकपूजा | ०-२५ |
| * | २४ | पुण्यप्रकाशस्तवनादि | ०-३७ |
| | २५ | श्रीमोहनविजयजीकृत चोवीशी ( सार्थ ) | १-२५ |
| | २६ | संस्कारनुं वावेतर | ०-२५ |
| | २७ | स्वाध्यायरत्नावलि ( खण्ड-२ ) | १-२५ |
| * | २८ | दर्शनरत्नरत्नाकर ( भाग-१ ) | ८-०० |
| * | २९ | रत्नत्रपूजादि ( सार्थ ) | ०-३७ |

| | | | |
|---|---|---|---|
| | ३० | अष्टापदजीनी पूजा ( सार्थ ) | • |
| | ३१ | नव्वाणुं अभिषेकनी पूजा ( सार्थ ) | ० |
| * | ३२ | दर्शनरत्नरत्नाकर ( भाग-२ ) | ८-०० |
| | ३३ | श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ( सिद्धहेमसरस्वतीसमन्वितम् ) प्रथमः खण्डः | ५-०० |
| | ३४ | श्रीकल्पलतावतारिका | ५-०० |
| | ३५ | श्रीहितशिक्षाछत्रीशी | १-२५ |
| * | अ ३६ | दर्शनरत्नरत्नाकर ( भाग ३ ) | ६-०० |
| * | आ ३६ | देवसीराई प्रतिक्रमणादिसूत्र | ०-६२ |
| | अ ३७ | शंबल | १-५० |
| * | आ ३७ | पंचप्रतिक्रमणादिसूत्र | १-५० |
| * | ३८ | कल्पसूत्र ( खीमशाही ) | १२-५० |
| | ३९ } ४० | श्रीशान्तिस्नात्रादिविधिसमुच्चय<br>श्रीसिद्धचक्रयंत्रोद्धारपूजनविधि | ५-०० |
| | ४१ | श्रीपर्युषणाष्टाह्निका व्याख्यानम् | २-०० |
| | ४२ | हितचिंतन | १-२५ |
| | अ ४३ | श्रीवर्द्धमानमहावीराष्टकम् | ०-२५ |
| | आ ४३ | प्रतिष्ठादि-विधिसमुच्चय ( भाग-२ ) | ५-०० |
| | ४४ | लक्षणविलास | २-०० |
| | ४५ | श्रीगोडीपार्श्वनाथस्तव | ३-०० |
| | ४६ } ४७ | पंचकारणनुं स्तवन ( सार्थ )<br>त्रैलोक्यप्रकाश चैत्यवंदनचोवीशी ( सार्थ ) | १-२५ |
| | ४८ | सन्धिविनोदपंचदशी | ०-५० |
| | ४९ | विमर्श | १-२५ |
| | ५० | उन्मेष | १-२५ |
| | ५१ | सर्वज्ञसिद्धि | ५-०० |
| | ५२ | श्रीशान्तिनाथपंचकल्याणक पूजा | ०-२५ |
| | ५३ | द्रव्यगुणपर्यायनो रास ( द्रव्यानुयोगनीमहत्ता साथे ) | ७-०० |
| | ५४ | श्रीशान्तिनाथचरितम् जैननैषधीयमहाकाव्यम् | १०-०० |


* एतच्चिह्नान्तर्गता ग्रन्था दुर्लभाः ।



# शास्त्रविशारद - कविरत्न पीयूषपाणि
# आचार्य महाराज श्रीविजयामृतसूरीश्वरजी महाराज

जन्म
१९५२
बोटाद

卐

दीक्षा
१९७१
जावाल

卐

पंन्यासपद
१९८५
महुवा

શાસ્ત્રવિશારદ કવિરત્ન પીયૂષપાણિ



આચાર્યશ્રી વિજયામૃતસૂરીશ્વરજી મહારાજ.
જન્મ સં:૧૯૫૨. આચાર્ય પદવી ૧૯૯૨

उपाध्यायपद
१९९१
महुवा

卐

आचार्यपद
१९९२
अमदावाद
( राजनगर )

येन श्रावकसम्भृतेऽत्र नगरे, श्रीदौलताख्ये श्रुते,
श्रीशंखेश्वरपार्श्वनाथभगवान्, नीतः प्रतिष्ठां पराम्
नानाधर्मविधानतो नतजनाः, पुण्यालयं लम्भिताः,
सोऽयं श्रीविजयामृताभिधवरः सूरीश्वरः स्तात् श्रिये ॥ १ ॥

❋ ओँ ह्रीँ अर्हँ नमः ❋

महामहोपाध्यायश्रीमेघविजयजिद्गणिवर्यविरचितं

श्रीनैषधीयमहाकाव्यपादपूर्तिरूपं

# श्रीशान्तिनाथचरित्रम् ।

( जैननैषधीयमहाकाव्यम् )

तच्चेदं शास्त्रविशारद–कविरत्न–पीयूषपाणिपूज्यपादाचार्यमहाराज-

श्रीविजयामृतसूरीश्वरमहाराजविरचितया

'विद्वद्विनोदिनी' नाम्न्या 'विवृत्या' समलङ्कृतम् ।

---

निपीय यस्य क्षितिरक्षिणः कथा, निसर्गतोऽनर्गलमर्गमाश्रिताः ।
जना जनुःपूर्णफलार्थमुद्यता, नमोऽस्तु तस्मै प्रथमार्हतेऽनिशम् ॥१॥

विधाय कर्णातिथि यद्वचो हितास्तथाद्रियन्ते न बुधाः सुधामपि ।
दयानिधिः सद्विधिवारिधिर्जिने–श्वरः स शान्तिर्दिशतात् समस्थितिम् ॥२॥

गलग्रहध्वस्तवपुर्मनःखलश्चलाचलात्मार्पितसर्वनिर्मलः ।
नलः सितच्छत्रितकीर्तिमण्डलः, कलस्वनो नेमिजनोऽस्तु शंबलः ॥३॥

यदोनसैवाग्नितपःकरालतां, विनीय सम्यक्त्वमवापि दुर्मठः ।
दशावतारो ननु पार्श्वतीर्थकृत्, स राशिरासीन्महसां महोज्ज्वलः ॥४॥

यदीयचिद्दर्शनमात्रसंश्रयान्मृगास्त्यजन्तीह गतिं स्वपाशवीम् ।
नरो न रोगाश्रितचित्तविप्लवाः, श्रिये स भूयाच्चरमोऽर्हतां सताम् ॥५॥

ददातु मङ्गं गणभृत् स गौतमः, क्षमीश्वरो नेमिगुरूत्तमः पुनः ।
सरस्वती देवनदीव पावना, स वाचको मेघगणी च मेघवत् ॥६॥

चरित्रमत्रारचि येन नैषधीयपादपूर्तिक्रमभङ्गिभाजनम् ।
विधीयते तद्विवृतिर्विवेकिनां, विवेचनायायमृतेन सूरिणा ॥७॥

काव्यमिदं महाकाव्यं, विदुषां सद्विनोददम् ।
वृत्त्या 'विद्वद्विनोदिन्या' भूयाद्भूयो लसद्रसम् ॥८॥

अथ तत्रभवतां साहित्यादिविविधवाङ्मयविशारदानां समुपासितशारदानां शारदशशाङ्कवर्णानां सुवर्णसवर्णवर्णाङ्कनकुशलानामुत्तमवर्णाविर्भावानां श्रीमतां महोपाध्यायानां मेघविजयजिद्गणिवर्याणां सहृदय-चेतश्चमत्कृतिसञ्जननं नयनाञ्जनमिव नैषधीयपादपूर्तिरूपं श्रीशान्तिनाथचरित्रमिदं पुरोवर्ति वरीवर्ति । यत्किल प्रसिद्धिं गतेष्वनेकेष्वपि शान्तिनाथमहाकाव्येषु सत्स्वपि सचेतसां विगलितवेद्यान्तरानन्दातिशयाधिगतये निबद्धं कामपि नैसर्गिकीं मनोहारितामावहदिव दृश्यते । पादपूर्त्यादिबन्धपारवश्येन रसमयभावनासन्तानान्दोलनतः क्वचित् रसभङ्गकरीमभितः समापतन्तीं क्लिष्टतां निसर्गसुन्दरेण चक्रिणो धर्मचक्रिणश्च श्रीशान्तिनाथस्य चरित्रेणैव सचेता दूरीकरिष्यतीति चेतसि समवधार्य्य, कार्यञ्चेदमसामान्यमिति मत्वा शिष्टाचारपरम्पराप्राप्तामन्तरायविघटिकां परमात्मनः स्तुतिं प्रारभन्ते श्रियामिति—

**श्रियामभिव्यक्तमनोऽनुरक्तता, विशालसालत्रितयश्रिया स्फुटा ।**
**तया बभासे स जगत्त्रयीविभु-<u>र्ज्वलत्प्रतापावलिकीर्तिमण्डलः</u> ॥१॥**

अन्वयः—( *यस्मिन्* ) *विशालसालत्रितयश्रिया, श्रियाम्, अभिव्यक्तमनोऽनुरक्तता, स्फुटा, ज्वलत्प्रतापावलिकीर्तिमण्डलः, सः, जगत्त्रयीविभुः, तया, बभासे ॥१॥*

वृत्तिः—( यस्मिन् भगवति-शान्तिनाथे ) **विशालसालत्रितयश्रिया**-त्रयोऽवयवा अस्येति त्रितयम्, विशालो-विस्तीर्णश्चासौ सालः—प्राकारः-विशालशालः, तस्य त्रितयम् विशालसालत्रितयम् । 'विशालं तु विशङ्कटम् । स्फारं वरिष्ठं विस्तीर्णम्', ६-६५+६६ । 'प्राकारो वरणः साले' ४-४६ । इत्युभयत्राभिधान-चिन्तामणिः । तस्य श्रीः—शोभा विशालसालत्रितयश्रीस्तया तथा, 'शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव कथ्यते' इति यादवः । **श्रियाम्**-लक्ष्म्याम् । **अभिव्यक्तमनोऽनुरक्तता**-अनुरक्तता, अनुरागः, प्रकृतिजन्यबोधे प्रकारीभूतस्य भावप्रत्ययार्थत्वात् मनसो अन्तःकरणस्य अनुरक्तता मनोऽनुरक्तता, अभिव्यक्ता चासौ मनोऽनुरक्तता, अभिव्यक्तमनोऽनुरक्तता **स्फुटा**-स्पष्टा । 'स्फुटे स्पष्टं प्रकाशं प्रकटोल्बणे' ६-१०३ ।

इत्यभिधानचिन्तामणिः । अथवा श्रियाम् अभिव्यक्तम्–शुद्धम् मनउज्ज्वलम्, श्रियां धवलत्वम् पवित्रत्वात्, अनुरक्तता चानुरागः, प्रणय इति यावत्, स च रक्तः लोहित इति यावत्। मनोऽनुरागयोः शुक्लत्व-रक्तत्वे च साहित्यदर्पणोक्तदिशाऽवसेये । एवञ्च सितपीतयोरैक्यात् पीतत्वमपि सूचितम्, वप्रत्रये रूप्य-रै-रत्नमये वर्णत्रयस्योचितत्वं स्पष्टमेव । श्रियामिति बहुत्वं जिने सर्वज्ञत्वेन सर्वश्रीणामनुरागसूचकम् । **ज्वलत्प्रतापावलिकीर्तिमण्डलः**–कीर्त्तेर्यशसः मण्डलम्-समूहः कीर्तिमण्डलम्, प्रतापानाम् तेजसाम् प्रभावाणामिति यावत्, आवलिः—श्रेणी प्रतापावलिः, ज्वलन्ती–प्रकाशमाना चासौ प्रतापावलिः ज्वलत्प्रतापावलिः, ज्वलत्प्रतापावलिः कीर्तिमण्डलं यस्य स ज्वलत्प्रतापावलिकीर्तिमडलः । 'यत्कोशदण्डजं तेजः स प्रभावः प्रतापवत्' ३–४०४ । 'राजिर्लेखा ततिर्वीथीमालाल्यावलिपङ्क्तयः । धोरणी श्रेणी' ६–५९ । 'समूहश्चयः कूटं मण्डलचक्रवाकपटलस्तोमाः' ६–४७ । इति त्रिष्वप्यभिधानचिन्तामणिः । **सः**–सर्वज्ञत्वेन प्रसिद्धः । **जगत्त्रयीविभुः**–त्रयोऽवयवा अस्या इति त्रयी, जगताम्–भुवनानाम् त्रयी–जगत्त्रयी, तत्र विभुः भर्ता, जगत्त्रयीविभुः अर्हन्निति यावत् । **तया**–श्रिया । **बभासे**–दिदीपे, शुशुभइति यावत् ॥१॥ ( अत्र हेतूत्प्रेक्षाऽलङ्कारः । वृत्तं वंशस्थम् । )

निपीय यस्य क्षितिरक्षिणः कथाः, सुराः सुराज्यादिसुखं बहिर्मुखम् ।
प्रपेदिरेऽन्तःस्थिरतन्मयाशयाः, सदा सदानन्दभृतः प्रशंसया ॥२॥

**अन्वयः**—*क्षितिरक्षिणः, यस्य, कथाः, निपीय, अन्तःस्थिरतन्मयाशयाः, सुराः, प्रशंसया, सदा, सदानन्दभृतः, सुराज्यादिसुखम्, बहिर्मुखम्, प्रपेदिरे ॥२॥*

**वृत्तिः**—**क्षितिरक्षिणः**–क्षितिं पृथिवीं रक्षति पालयतीति क्षितिरक्षी 'अजातेः शीले' ५।१।१५४। इत्यनेन णिन् प्रत्ययः, तस्य तथा पृथिवीपालकस्येति यावत् । **यस्य**–भगवतः शान्तिनाथस्य । **कथाः**–गोष्ठीः, ऐहिकामुष्मिकप्रत्यूहव्यूहोपशामकमोक्षादिजनकोपदेशवाक्यानीति यावत् । **निपीय**–सादरं सम्यगाकर्ण्य । **अन्तःस्थिरतन्मयाशयाः**–अन्तः–अन्तःकरणे हृदये इति यावत् । स्थिरः–दृढसंस्कारसंस्कारितः । तन्मयः–कथाविषयकः, आशयोऽभिप्रायविशेषो येषान्ते तथाः । **सुराः**–इन्द्रादिप्रमुखा देवाः । **प्रशंसया**–तदीयशौर्य-वीर्योदार्यादिवर्णनेन । **सदा**–सर्वदैव "सर्वं वाक्यं सावधारणम् भवतीति" नियमात् । **सदानन्दभृतः**–सत् समीचीनश्चासावानन्दो हर्षः सदानन्दस्तं बिभ्रति धारयन्तीति सदानन्दभृतः । ( सन्तः ) **सुराज्यादि-सुखम्**–हस्त्यश्वरथपादातिचतुरङ्गबलान्वितसौराज्यादिर्जनितानन्दम् । **बहिर्मुखम्**–मुखादाननात् बहिः–बाह्यम् बहिर्मुखम् । 'पर्यपाङ्बहिरच्पञ्चम्याः' १।३।३२। इत्यव्ययीभावः । सातिशयप्रयोजनाभाववत्त्वेनोपेक्षणीयमित्यर्थः । **प्रपेदिरे**–प्राप्तवन्तः, ज्ञातवन्त इति यावत् ॥२॥

यथा श्रुतस्येह निपीततत्कथास्तथाऽऽद्रियन्ते न बुधाः सुधामपि ।
सुधाभुजां जन्म न तन्मनःप्रियं, भवेद् भवे यत्र न तत्कथाप्रथा ॥३॥

**अन्वयः**—*इह, निपीततत्कथाः, श्रुतस्य, यथा ( आद्रियन्ते ) तथा बुधाः, सुधाम्, अपि, न आद्रियन्ते, यत्र भवे तत्कथाप्रथा, न, भवेत्, तत्, सुधाभुजाम्, जन्म, मनःप्रियम्, न ॥३॥*

**वृत्तिः**—**इह**—संसारेऽस्मिन्। **निपीततत्कथाः**—निपीता निःशेषेणाकर्णिताः, तत्कथाः-तदीयवाक्यानि यैस्ते निपीततत्कथाः, श्रुततत्कथाः सभ्यजना इत्यर्थः। **श्रुतस्य**—समवसरणादावाकर्णितस्य आगमश्रुतस्य इति यावत्। **यथा**—येन प्रकारेण। (**आद्रियन्ते**—संस्मरन्ति) **तथा**—तेन प्रकारेण। **बुधाः**—पण्डिताः "बुधः सौम्ये च पण्डिते" इति मेदिनी। **सुधाम्**-अमृतम्। "अन्धः पीयूषममृतं सुधा" २-३ इत्यभिधानचिन्तामणिः। **अपि**—खलु। **न**—नहि। **आद्रियन्ते**-आदरभाजनीक्रियन्ते। **यत्र**—यस्मिन्। 'सप्तम्याः' ७।२।९४। इति त्रप्रत्ययः। **भवे**—जन्मनि। **तत्कथाप्रथा**—तस्य भगवतः शान्तिनाथस्य कथाप्रथा-कथाप्रचारः तत्कथाप्रथा। **न**—नहि। **भवेत्**—जायेत। **तत्**—तादृशम्, तदीयकथाप्रथारहितमिति यावत्। **सुधाभुजाम्**—सुधाममृतं भुञ्जते भक्षयन्तीति सुधाभुजो देवास्तेषां तथा। **जन्म**—जनिः, उत्पत्तिरिति यावत्। **मनःप्रियम्**—मनःप्रमोदजनकम्। **न**—नैव। "सर्वं वाक्यं सावधारणमिति न्यायात् विदुषामिति शेषः ॥३॥

## यदीयपादाम्बुजभक्तिनिर्भरात्, प्रभावतस्तुल्यतया प्रभावतः।
## नलः सितच्छत्रितकीर्तिमण्डलः, क्षमापतिः प्राप यशःप्रशस्यताम् ॥४॥

**अन्वयः**—*यदीयपादाम्बुजभक्तिनिर्भरात्, प्रभावतः, प्रभावतः, तुल्यतया, क्षमापतिः, नलः सितच्छत्रितकीर्तिमण्डलः, सन्, यशःप्रशस्यताम् प्राप ॥४॥*

**वृत्तिः**—**यदीयपादाम्बुजभक्तिनिर्भरात्**-यस्य भगवतः शान्तिनाथस्य इमौ यदीयौ, तौ च पादौ चरणौ, यदीयपादौ, तावम्बुजे इवेति यदीयपादाम्बुजे, तयोर्भक्तिः सेवा यदीयपादाम्बुजभक्तिस्तया निर्भरः समधिकः यदीयपादाम्बुजभक्तिनिर्भरस्तस्मात्तथा। **प्रभावतः**—प्रतापतः सामर्थ्यविशेषादिति यावत्। **प्रभावतः**—प्रभाः किरणानि सन्त्यस्येति प्रभावान् तस्य तथा सूर्यस्येत्यर्थः "रुग्विरोकःकिरणत्विषि त्विषः। भाः प्रभा वसुगभस्ति भानवो भा" २।१४॥ इत्यभिधानचिन्तामणिः। **तुल्यतया**—सदृशतया समानतयेति यावत्। **क्षमापतिः**—क्षमायाः पृथिव्याः पतिः स्वामी क्षमापतिः "भूर्भूमिः पृथिवी पृथ्वी...... क्षितिः क्षोणी क्षमाऽनन्ता" ४।१।२ इत्यभिधानचिन्तामणिः। **नलः**—स्वनामप्रसिद्धभूपतिः पुण्यश्लोक इति, प्रसिद्ध इति यावत्। तथाहि—"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च। ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम्" इति। **सितच्छत्रितकीर्तिमण्डलः**—सितं श्वेतञ्च तच्छत्रमातपवारणं सितच्छत्रम्, तद्वदाचरितमिति सितच्छत्रितम्, सितच्छत्रितं कीर्तिमण्डलं यशःसमूहो यस्य स सितच्छत्रितकीर्तिमण्डलः "श्वेतः श्येतः सितः शुक्लो हरिणो विशदः शुचिः" ६।२८॥ "छत्रमातपवारणम्" ३। ३८१॥ इत्युभयत्राभिधानचिन्तामणिः ( सन् )

**यशःप्रशस्यताम्**—यशसः कीर्त्तेः प्रशस्यता श्रेष्ठता यशःप्रशस्यता तान्तथा । **प्राप**—प्राप्तवान् । भगवतः शान्तिनाथस्य कृपाभाजनतयैव नलः पुण्यश्लोको भवन्नद्यापि यशः कदम्बकशालितयाऽनामिकाधिष्ठितलया गण्यते लोके ॥४॥

**द्विधाऽपि धर्मानुगतिर्महीपतिर्दृढावधेः शैशव एव सेवधिः ।**
**क्रमेण चक्री विजये दिशां जिनः, स राशिरासीन्महसां महोज्ज्वलः ॥५॥**

*अन्वयः—द्विधा, अपि, धर्मानुगतिः, दृढावधेः, शैशवे, एव सेवधिः, क्रमेण, दिशाम्, विजये, चक्री, महीपतिः, सः, जिनः, महोज्ज्वलः, महसाम्, राशिः, आसीत् ॥५॥*

**वृत्तिः—द्विधाऽपि**—द्वाभ्यां प्रकाराभ्यां खलु न्यायोपनिषद्भ्यामपीत्यर्थः । **धर्मानुगतिः**—धर्मस्य पुण्यस्य अनुगतिरनुव्रजनं यस्मिन् स तथा,धर्मकर्तृकानुगमनवानिति यावत् । "धर्मो यमोपमापुण्यस्वभावाचारधन्वसु । सत्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपी" त्यनेकार्थः । **दृढावधेः**—दृढः—सर्वदा स्थायी, आकेवलज्ञानमवस्थायीति यावत् चासौ, अवधिस्तज्ज्ञानम् दृढावधिस्तस्मात्; दृढावधिरिति पाठोऽत्र समीचीनः प्रतिभाति, दृढशब्दोऽवधिशब्दश्च पूर्वार्थः, दृढोऽवधिर्यस्य स तथा । **शैशवे**—बाल्यावस्थायाम् । **एव**—खलु । **सेवधिः**—सेवा—भक्तजनकर्तृकशुश्रूषा धीयतेऽस्मिन्निति सेवधिः "व्याप्याद्दाधारे" ५।३।८८॥ इत्यनेन आधारे किः प्रत्ययः । भक्तजनकर्तृकसेवाभाजनमित्यर्थः । यद्वा **शैशवे**—बाल्येऽपि । एव—नियमतः । **दृढावधेः**—प्रबलावधिज्ञानस्य । **सेवधिः**—निधिः—'निधानं तु कुनाभिः शेवधिर्निधिः' २।१०६। इति हैमः, सेवधिरित्यपि । **क्रमेण**—क्रमशः । **दिशाम्**—आशानाम् । "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" १।३।१॥ इत्यमरकोशः । **विजये**—जये । **चक्री**—चक्रं, चक्ररत्नमस्यास्तीति चक्री । **महीपतिः**—पृथिवीश्वरः । **सः**—प्रसिद्धः शान्तिनाथः । **जिनः**—अर्हन् । **महोज्ज्वलः**—महैरुत्सवैरुज्ज्वलो दीप्यमानः महोज्ज्वलः, एतेनोत्साहयुक्तत्वं व्यज्यते । यद्वा—महसा तेजसा प्रतापेन ज्वलतीति महोज्वलः । "अथोत्सवे । महः क्षणोद्धवोद्धर्षाः" ६।१४३॥ इत्यभिधानचिन्तामणिः । **महसां**—तेजसां प्रतापानामिति यावत् राशिराश्रयः । यद्वा—महसां तेजसां राशिः सूर्य इव स्थितः । लुप्तोपमा । "महस्तूत्सव तेजसोः" इत्यमरः । **आसीत्**—अभूत् ॥५॥

**रसैः कथा यस्य सुधावधीरिणी, कृता सकृत् कृतन्ति दुष्कृतं नृणाम् ।**
**हिमाद्रिजाता लहरी नभस्वतः, क्षमातले तापमिवागता स्वतः ॥६॥**

*अन्वयः—यस्य, कथा, रसैः, सुधावधीरिणी, सकृत्, कृता, नृणाम्, दुष्कृतम्, कृन्तति, हिमाद्रिजाता, स्वतः आगता, नभस्वतः, लहरी, क्षमातले, तापम्, इव ॥६॥*

**वृत्तिः**—**यस्य**—भगवतः शान्तिनाथस्य । **कथा**—श्रवणात् कीर्तनाद्वा मोक्षादिप्रापकं, चरित्रम् । **रसैः**—श्रृङ्गारादिभिर्नवभी रसैः । **सुधावधीरिणी**—षड्रसां सुधाम् अमृतम् अवधीरयति तिरस्करोतीत्येवं-शीला, सुधावधीरिणी 'अजातेः शीले' इत्यनेन शीलेऽर्थे णिन् प्रत्ययः, सुधायाः षड्रसत्वं व्याख्यातृप्रसिद्धया मन्तव्यम्, मधुररसयुक्तैव वा यस्य कथा स्वादैः कृत्वा सुधाया अवधिम् उत्कृष्टसुधामिति यावत्, तामीरयति क्षिपतीत्येवंशीला । **सकृत्**—एकवारमपि । **कृता**—विहिता श्रुता वर्णिता वा । **नृणाम्**—मनुष्याणाम् । **दुष्कृतम्**—पापम् । "अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् । कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम्" १।४।२३॥ इत्यमरकोशः । **कृन्तति**—छिनत्ति, निवारयति, दूरीकरोतीति यावत् ।

**हिमाद्रिजाता**—हिमाचलसंभूता । **स्वतः**—आत्मनैव । **आगता**—समायाता । **नभस्वतः**—पवनस्य, वायोरिति यावत् "नभस्वद्वातपवनपवमानप्रभञ्जनाः" ।१।१।६३॥ इत्यमरकोशः । **लहरी**—प्रवाहः । **क्षमातले**—भूमण्डले । **तापम्**—सूर्यप्रखरकिरणसम्पर्कादिजनितसन्तापम् । **इव**— तुल्यम् । हिमाचलसम्बन्धिलघुतुषारसम्पृक्तपवनो यथा पृथ्वीतले ग्रीष्मादिजनितसन्तापसन्दोहमपनयति तथा सकृदपि कृतैतत्कथा जन्मजन्मान्तरोपार्जितकायिकवाचिकमानसिकनानाविधपापकदम्बकं मनुष्येभ्यो निवारयतीति भावः । दृष्टान्तलङ्कारः ॥६॥

## अमुष्य संसेवनया नयाश्रयात्, नलः स भूजानिरभूद् गुणाद्भुतः ।
## रयात् समुत्तीर्य दुरोदरादराद्, दुरापदं चन्द्र इव ग्रहोदिताम् ॥७॥

**अन्वयः**—*अमुष्य, संसेवनया, नयाश्रयात्, ग्रहोदिताम्, दुरापदम्, चन्द्रः, इव, दुरोदरादरात्, ( दुरापदम् ) रयात्, समुत्तीर्य, सः नलः, गुणाद्भुतः, भूजानिः, अभूत् ॥७॥*

**वृत्तिः**—**अमुष्य**—भगवतः शान्तिनाथस्य । **संसेवनया**—मनोवाक्कायद्वारा समीचीनप्रकारेण सेवयेत्यर्थः । **नयाश्रयात्**—नयस्य नीतिमार्गस्य आश्रयः अवलम्बनम् नयाश्रयस्तस्मात्तथा । यद्वा—नयाश्रयात्, अमुष्य, संसेवनया, इत्येवमन्वयः कार्यः । नीतिमार्गमवलम्ब्य तस्य भगवतः शुश्रूषयेति पदत्रयसमुदितार्थः । **ग्रहोदिताम्**—ग्रहणजाताम् । **दुरापदम्**—दुर्दुष्टा चासौ आपद् विपत्तिर्दुरापत् तान्तथा । **चन्द्रः**—चन्द्रमाः । **इव**—तुल्यः । **दुरोदरादरात्**—दुरोदरे-द्यूते आदरः— सत्कारः स्पृहेति यावत् दुरोदरादरस्तस्मात् । पञ्चम्यर्थो जन्यत्वम् दुरोदरादरजन्यामित्यर्थः । ( दुरापदम्—अतिशयदुःखदायिनीं विपत्तिम् ) । **रयात्**—वेगात्, झटित्येवेत्यर्थः । **समुत्तीर्य**—पारयित्वा । विपदर्णवं तरीत्वेत्यर्थः । **सः**—प्रसिद्धः । **नलः**—स्वाभिधेयप्रसिद्धो भूपतिः । **गुणाद्भुतः**—गुणैः सौन्दर्यादिभिः सन्धिविग्रहादिभिर्वा अद्भुत आश्चर्यरूपो गुणाद्भुतः । **भूजानिः**—भूः-पृथिवी जाया भार्या यस्य स तथा 'जायाया जानिः' ७।३।१६४। इति जायाशब्दस्य जानिरित्यादेशो बहुव्रीहौ । **अभूत्**—जातः । "सर्वं वाक्यं सावधारणं भवतीति" न्यायात्स नल एव भूजानिरभूत् नान्य इत्यर्थः ॥७॥

**स वर्णनीयस्तत एव लक्षणै–र्विचक्षणैः संप्रति सन्निधानतः ।**
**सुवर्णदण्डैकसितातपत्रित – प्रभावकीर्त्योर्जनचित्तचित्रितः ॥८॥**

**अन्वयः**—*सः, ततः, एव, विचक्षणैः, लक्षणैः, संनिधानतः, वर्णनीयः, ( अथ च ) सम्प्रति, सुवर्णदण्डैकसितातपत्रितप्रभावकीर्त्योः, जनचित्तचित्रितः ॥८॥*

**वृत्तिः**—**सः**–प्रसिद्धो नलः । **ततः**–भगवतः शान्तिनाथस्य चरणारविन्दसंसेवनात् नयाभयाच्च हेतोः । **एव**–खलु । **विचक्षणैः**–विशेषेण गुणादिकं चक्षते कथयंतीति विचक्षणानि, तैस्तथा । विलक्षणैरिति पाठः साधीयान् । **लक्षणैः**–लक्ष्मभिः । असाधारणधर्मादिभिरिति यावत् । **सन्निधानतः**–सान्निध्यात् । प्रसङ्गवशादिति यावत् । **वर्णनीयः**–प्राशस्त्यवत्त्वेन निरूपणीयः । ( अथ च ) **सम्प्रति**–अद्यापि । **स्वर्णदण्डैकसितातपत्रितप्रभावकीर्त्योः**–सुवर्णस्य दण्डः सुवर्णदण्डः, एकञ्च तत्सितञ्च तदातपत्रञ्चैकसितातपत्रम्, सुवर्णदण्डश्च एकसितातपत्रञ्च सुवर्णदण्डैकसितातपत्रे, सुवर्णदण्डैकसितातपत्रे कृते तद्वदाचरिते वा सुवर्णदण्डैकसितातपत्रिते, प्रभावः–प्रतापश्च कीर्तियशश्चेति प्रभावकीर्ती, सुवर्णदण्डैकसितातपत्रिते चेमे प्रभावकीर्ती, सुवर्णदण्डैकसितातपत्रितप्रभावकीर्ती तयोस्तथा, सप्तमी चात्र वैषयिकी बोध्या, तथा च तादृशप्रभावकीर्तिविषये इत्यर्थः । **जनचित्तचित्रितः**–जनानां लोकानाम् चित्तानि जनचित्तानि तेषु चित्रितः प्रतिमायितः जनचित्तचित्रितः, लोके स्मरणीय इत्यर्थः । यद्वा–अत्र श्लोके विचक्षणैरिति पदं न करणतृतीयान्तम्, किन्तु कर्तृतृतीयान्तमेव तथा च सः तत एव हेतोः लक्षणैः करणैः सन्निधानतः, विचक्षणैः–कर्तृभिः–विद्वद्भिः, वर्णनीय इत्येवमन्वयोऽवसेयः ॥८॥

**रसाद्दशास्योऽप्यदसीयसेवनेऽवनेः प्रभुर्भास्वरकान्तिभास्करः ।**
**बभूव भूवल्लभदेवजित्वरज्ज्वलत्प्रतापावलिकीर्तिमण्डलः ॥९॥**

**अन्वयः**—*दशास्यः, अपि, अदसीयसेवने, रसात्, भास्वरकान्तिभास्करः, भूवल्लभदेवजित्वरज्ज्वलत्प्रतापावलिकीर्तिमण्डलः, ( सन् ) अवनेः प्रभुः, बभूव ॥९॥*

**वृत्तिः**—**दशास्यः**–दश दशत्वसङ्ख्याकानि आस्यानि मुखानि यस्य स दशास्यः, स्वनामप्रसिद्धलङ्काराजो लोकरावणो रावणः । **अपि**–खलु । **अदसीयसेवने**–अमुष्य भगवतः शान्तिनाथस्य इदम् अदसीयम्, तत्सम्बन्धीत्यर्थः, अदसीयञ्च तत्सेवनमदसीयसेवनम्, तस्मिन् तथा । **रसात्**–आवेशात्, समुत्कण्ठिततया प्रवृत्तेरिति यावत् । **भास्वरकान्तिभास्करः**–भास्वरा देदीप्यमाना चासौ कान्तिः प्रभा भास्वरकान्तिस्तया भास्करः सूर्य्य इति भास्वरकान्तिभास्करः । **भूवल्लभदेवजित्वरज्ज्वलत्प्रतापावलिकीर्तिमण्डलः**–भुवः–पृथिव्या वल्लभः पतिः भूपतिः, "प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया" ३।१७९।। अ० चि० इत्यनन्तरम् "प्रेयस्याद्याः पुंसि पत्यौ" इति दर्शनात् वल्लभशब्दस्यापि पतिवाचकत्वात्, जयति तच्छीलो जित्वरः "सृ–

जीणन्शष्ट्वरम्" ५।२।७७।। इत्यनेन जिधातोष्ट्वरप् प्रत्ययः। देवानां जित्वरो देवजित्वरः, भूवल्लभश्चासौ देवजित्वरो भूवल्लभदेवजित्वरः, कीर्तेर्मण्डलम् कीर्तिमण्डलम्, ज्वलन्ती चासौ प्रतापावलिर्ज्वलत्प्रतापावलिः, ज्वलत्प्रतापावलिः कीर्तिमण्डलं यस्य स ज्वलत्प्रतापावलिकीर्तिमण्डलः, भूवल्लभदेवजित्वरश्चासौ ज्वलत्प्रतापावलिकीर्तिमण्डलः भूवल्लभदेवजित्वरज्वलत्प्रतापावलिकीर्तिमण्डलः ( सन् ) अवनेः–पृथिव्याः। "भूर्भूमिः पृथिवी पृथ्वी...... गन्धमाताऽचलाऽवनिः" ४।१।२ इत्याभिधानचिन्तामणिः। प्रभुः–ईश्वरः। बभूव–अभवत् ॥९॥

पवित्रमत्रातनुते जगद्युगे–ऽभिधा विधानैर्बहुधा स्मृता विभोः।
अरिष्टशान्तेर्नलिनीशपेशल–द्युतेः सतेजोऽनुभवेन सङ्गतेः ॥१०॥

**अन्वयः**—*विभोः, अभिधा, विधानैः, अत्र युगे, स्मृता, ( सती ) बहुधा, जगत्, सा, पवित्रम्, तनुते, अरिष्टशान्तेः, नलिनीशपेशलद्युतेः, सतेजोऽनुभवेन, सङ्गतेः (च) ॥१०॥*

**वृत्तिः**—**विभोः**–विशेषेण भवतीति विभुः, "शंसंस्वयंविप्राद् भुवो डुः" ५।२।७४।। इत्यनेन डुः प्रत्ययः, तस्य विभोः, भगवतः शान्तिनाथस्येति यावत्। **अभिधा**–अभिधीयते कथ्यतेऽनयेत्यभिधा, नामेत्यर्थः "अथाऽऽह्वयोऽभिधा। गोत्रसंज्ञानामधेयाऽऽख्याऽऽह्वाऽभिख्याश्च नाम च" २।१७४।। इत्यभिधानचिन्तामणिः। **स्मृता**–स्मरणपथमानीता, चिन्तिताऽऽकर्णितोच्चारिता वेति यावत्। (सती) **अत्र–युगे** अस्मिन् कलियुगे। **बहुधा**–बहुभिः प्रकारैः। **जगत्**–भुवनम्। **आ**–सामस्त्येन। **पवित्रम्**–पूतम्। **तनुते**–करोति। बहुभिः प्रकारैरित्युक्तम्, तानेव प्रकारान् दर्शयति "अरिष्टशान्तेरित्यादिना **अरिष्टशान्तेः**–नास्ति रिष्टं क्षेममत्रेत्यरिष्टम् उपसर्ग उपद्रव इति यावत् तस्य शान्तिः प्रशमनम् अरिष्टशान्तिस्तस्यास्तथा," उपलिङ्गं त्वरिष्टं स्यादुपसर्ग उपद्रवः २।३९।। इत्यभिधानचिन्तामणिः। **नलिनीशपेशलद्युतेः**–नलिन्यः कमलिन्यस्तासामीशः स्वामी सूर्यस्तद्वत्, पेशला–पिंशत्येकदेशेन सर्वं करोतीति पेशला "मृदिकन्दि" ( उणादि ४३५ ) इत्यनेन अलः प्रत्ययः, सूत्थानेत्यर्थः, द्युतिः कान्तिः–नलिनीशपेशलद्युतिस्तस्यास्तथा। "दक्षस्तु पेशलः। पटूष्णोष्णकसूत्थानचतुराश्च" ३।४८।। इत्यभिधानचिन्तामणिः। **सतेजोऽनुभवेन**–समानं तेजः–प्रभावः प्रतापो वा, सतेजस्तस्यानुभवः सतेजोऽनुभवस्तेन तथा। **सङ्गतेः**–मिलनाच्च ॥१०॥

बहुश्रुतानां वदनादनाश्रवैः, श्रुता रसक्षालनयेव यत्कथा।
ददाति सोच्चैःश्रवसो नियोजना–ज्जनेऽनिमेषाद्विबुधक्रियां शुचिम्॥११॥

**अन्वयः**—*यत्कथा, बहुश्रुतानाम्, वदनात्, रसक्षालनया, इव, अनाश्रवैः, श्रुता, सा, जने, उच्चैःश्रवसः, नियोजनात्, अनिमेषात्, (च) शुचिम्, विबुधक्रियाम्, ददाति ॥११॥*

वृत्तिः—यत्कथा—यस्य भगवतः शान्तिनाथस्य कथा यत्कथा, यत्सम्बन्धिनी कथेत्यर्थः। यदीयं चरित्रमिति यावत्। बहुश्रुतानाम्—बहूनि श्रुतानि शास्त्राणि श्रुतज्ञानानि वा येषान्ते बहुश्रुतास्तेषान्तथा गीतार्थानामिति यावत्। वदनात्—आननात् मुखादिति यावत्। रसक्षालनया—रसैः शृङ्गारादिभिः क्षालना उज्ज्वलीकरणम् रसक्षालना, तया तथा। इव—तुल्यम्। अनाश्रवैः—न आश्रवस्तन्नामककर्मविशेषो येषान्तेऽनाश्रवास्तैस्तथा, आश्रवेऽलग्नमनोभिः सावधानैरिति यावत्। श्रुता—आकर्णिता, श्रावणप्रत्यक्षविषयीकृतेति यावत्। सा—यत्कथा। जने—श्रावकजने। उच्चैःश्रवसः—उच्चैःश्रवाः—श्रावकजनपक्षे उत्कर्णता, विबुध-पक्षे च समुद्रमन्थनोत्पन्नोऽश्वः, तस्य। नियोजनात्—विधानात् करणादिति यावत्। अनिमेषात्—निमेषो-नयननिमीलनम्, स च देवानां न भवतीति पुराणप्रसिद्धिः कविसमयश्च, तथा च देवपक्षे अनिमेषो निमील-नराहित्यम्, श्रावकजनपक्षे च अनिमेषः—चरित्रश्रवणजनितानन्दविशेषान्निमीलननिरोधस्तस्मात् (च)। शुचिम्—पवित्राम्। विबुधक्रियाम्—देवचर्य्याम्। ददाति—वितरति।

अथवा अनिमेषादिति पदस्य न विबुधक्रियादातृत्वहेतुत्वेनोपन्यासः किन्तु तस्य न निमेषोऽक्षिनि-मीलनमपि यत्र सोऽनिमेषोऽतिशयितसूक्ष्मकालविशेष इत्यर्थस्तथा च, अनिमेषादित्यस्य पदस्य अत्यन्तसूक्ष्म-कालविशेषादेवेत्यर्थः। सर्वस्य वाक्यस्य सावधारणत्वादेवकारोऽर्थो न विरुध्यते श्लेषालङ्कृतिः ॥११॥

## समाधुरीका न कटुः श्रुतावपि, निशामनाद् याऽऽन्तरकश्मलापहा। कथं न सा मद्गिरमाविलामपि, न शोधयेन्नाथकथा यथास्थिता? ॥१२॥

**अन्वयः**—*या, समाधुरीका, अपि, श्रुतौ, न, कटुः, निशामनात्, आन्तरकश्मलापहा, यथा-स्थिता, सा, नाथकथा, आविलाम्, अपि, मद्गिरम्, कथम्, न, न, शोधयेत् ॥१२॥*

वृत्तिः—या—भगवतः शान्तिनाथस्य कथा। समाधुरीका—माधुर्यं मधुरतया, माधुर्येणेति यावत् सहिता समाधुरीका 'सहस्तेन' ३।१।२४॥ इत्यनेन बहुव्रीहिसमासः। सहशब्दस्य सादेशः। अपि—खलु। श्रुतौ—श्रवणे, अवच्छिन्नत्वं सप्तम्यर्थः, श्रवणावच्छेदेनेति यावत्। न—नहि। कटुः—तीक्ष्णा, पीडाकरी इति यावत्। निशामनात् श्रवणात्, "निशमनं निशामनं निरीक्षणश्रवणयोः" इत्यनेकार्थः। आन्तरक-श्मलापहा—अन्तः—अन्तःकरणे भवमान्तरम्, तच्च तत्कश्मलम्, पापम्, मोह इति यावत्, आन्तरकश्मलम्, तदपहन्ति विनाशयतीति आन्तरकश्मलापहा "क्लेशादिभ्योऽपात्" ५।१।८१॥ इत्यनेन हन्तेर्डः प्रत्ययः। "मोहो मूर्च्छा च कश्मलम्" ३।४।६५॥ इत्यभिधानचिन्तामणिः। यथास्थिता—यथायथमवस्थिता। सा—प्रसिद्धा। नाथकथा—नाथस्य स्वामिनः शान्तिनाथस्य कथा चरित्रमिति नाथकथा। आविलाम्—सदोषाम्। अपि—खलु। मद्गिरम्—मम वाणीमित्यर्थः। कथम्—केन प्रकारेण। नन—नहीत्यर्थः। वीप्सायामेकस्यैव न शब्दस्य द्वित्वाद् "नन" इति रूपमवसेयम्, तथा च नद्वयस्यापि केवलं विशिष्टनिषेध एवार्थः। शोधयेत्—विशुद्धयेत्, वाण्यां दोषराहित्यं कथन्नापादयेदपित्वापादयेदेवेति ॥१२॥

यया॒ऽऽख्यया भव्यनृणां शुचीकृतं, स्मृतेर्मनो भावनया जगद्गुरोः ।
इयं विशेषात् प्रतिभां कथं न मे, स्वसेविनीमेव पवित्रयिष्यति ॥१३॥

**अन्वयः**—*यया, आख्यया, जगद्गुरोः, भावनया, स्मृतेः भव्यनृणाम्, मनः, शुचीकृतम्, इयम्, विशेषात्, स्वसेविनीम्, एव, मे, प्रतिभाम्, कथम्, न, पवित्रयिष्यति ॥१३॥*

**वृत्तिः**—**यया–आख्यया**–येन–भगवतः शान्तिनाथस्य नाम्ना । **जगद्गुरोः**–जगताम् भुवनानाम् गुरुर्धर्मोपदेशको जगद्गुरुः तस्य तथा, सर्वज्ञस्य भगवतः शान्तिनाथस्य । "गुरुर्धर्मोपदेशकः" १।७७॥ इत्यभिधानचिन्तामणिः । **भावनया**–चिन्तनया, संस्कारविशेषेणेति यावत् । **स्मृतेः**–स्मरणात् । भावना–जन्यस्मृतेरिति यावत्, संस्कारजन्यज्ञानस्य स्मृतित्वात् । **भव्यनृणाम्**–भव्याः–मोक्षगमनयोग्याश्च ते नरो मनुष्याः भव्यनरस्तेषान्तथा, भव्यात्मनामिति यावत्, **मनः**–स्वान्तम् अन्तःकरणमिति यावत् । **शुचीकृतम्**–शुचि–पवित्रम्, न शुचि अशुचि, अशुचि शुचिकृतं शुचीकृतम् "कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः" ७।२।१२६। इत्यनेनाभूततद्भावे च्विः प्रत्ययः "दीर्घश्च्वियङ्यक्क्येषु च" ४।३।१०८॥ इत्यनेन च्वौ परे इकारस्य दीर्घता च ।

**इयम्**–आख्या । **विशेषात्**–विशेषतः । अन्यसेवाराहित्येन स्वसेवित्वादिति यावत् । **स्वसेविनीम्**–स्वसेवानुरक्ताम् । **एव**–खलु । **मे**–मम । **प्रतिभाम्**–नवनवोन्मेषशालिनीं बुद्धिम् । "बुद्धिर्नवनवोन्मेषशालिनी प्रतिभा मता ।" इति साहित्यदर्पणोक्तेः । **कथम्**–केन प्रकारेण । **न**–नहि । **पवित्रयिष्यति**–पवित्रीकरिष्यति ॥१३॥

अधीतिबोधाचरणप्रचारणैः, श्रुताम्बुधिर्ज्ञानगभीरनीरवान् ।
प्रभुर्विहारेण चतुर्दिगन्तरे, विमोहपङ्कं कुरुते स्म दूरतः ॥१४॥

**अन्वयः**—*अधीतिबोधाचरणप्रचारणैः, श्रुताम्बुधिः, ज्ञानगभीरनीरवान्, प्रभुः, चतुर्दिगन्तरे, विहारेण, विमोहपङ्कम्, दूरतः, कुरुते, स्म ॥१४॥*

**वृत्तिः**—**अधीतिबोधाचरणप्रचारणैः**–बोधोऽर्थज्ञानञ्च, आचरणं कर्मानुष्ठानञ्च प्रचारणमध्यापनञ्च बोधाचरणप्रचारणानि, अधीतिरध्ययनञ्च बोधाचरणप्रचारणानि च अधीतिबोधाचरणप्रचारणानि तैस्तथेत्येवं बोधशब्दस्योत्तरेण समासं कृत्वाऽधीतिशब्देन समासः करणीयः, अन्यथा बोधशब्दस्य पूर्वनिपातः स्यात्, वस्तुतस्तु बोधाद्यपेक्षयाऽधीतेरभ्यर्हितत्वात्, अधीतिश्च बोधश्च आचरणञ्च प्रचारणञ्चेत्येवमधीतिशब्दपूर्वपदक–समासकरणेऽप्यधीतिशब्दस्य पूर्वनिपातः सूपपाद एव । **श्रुताम्बुधिः**–श्रुतं शास्त्रम् अवधिज्ञानं वा तदेव अम्बु जलम् श्रुताम्बु, तत् धीयतेऽस्मिन्निति श्रुताम्बुधिः "व्याप्यादाधारे" ५।३।८८॥ इत्यनेन धा धातोः किः प्रत्ययः । **ज्ञानगभीरनीरवान्**–गभीरं गम्भीरञ्च तन्नीरं जलम् गभीरनीरम्, ज्ञानमेव गभीरनीरम् ज्ञान–

गभीरनीरमस्त्यस्येति ज्ञानगभीरनीरवान् 'अतोऽनेकस्वरात्' ७।२।६।। इत्यनेन मत्वर्थे वत् प्रत्ययः । प्रभुः—प्रकर्षेण भवतीति प्रभुः परमेश्वरः षोडशस्तीर्थकृत् शान्तिनाथ इति यावत् 'शं-सं-स्वयं वि-प्राद् भुवो डुः' ५।२।८४।। इत्यनेन प्रपूर्वकभूधातोर्डुः प्रयत्यः । चतुर्दिगन्तरे—चतस्रश्च ता दिशश्चतुर्दिशस्तासामन्तरम्—मध्यम् चतुर्दिगन्तरम्, तस्मिँस्तथा, चतुर्दिक्ष्विति यावत्, अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ।३।३।१८।। इत्यमरकोशः । विहारेण—उपदेशार्थं भ्रमणेन । विमोहपङ्कम्—वि-विशिष्टो मोहोऽज्ञानम्, विमोहः, स एव पङ्कः—पापम् विमोहपङ्कस्तन्तथा । "दुष्कृतं दुरितं पापं ..... अंहः कल्कमघं पङ्कः" ६।१६-१७।। इत्यभिधानचिन्तामणिः ।। दूरतः कुरुते स्म—दूरीकृतवानिति ।।१४।।

**नयेष्वधीत्याचरणानयेन स, दशाश्चतस्रः प्रणयन्नुपाधिभिः ।**
**रसाधिकत्वाद् द्विगुणत्वमादधे, चतुर्दशासँस्तत एव तत्प्रभाः ।।१५।।**

अन्वयः—*सः, उपाधिभिः, चतस्रः, दशाः, प्रणयन्, नयेषु, अधीत्याचरणानयेन, रसाधिकत्वात्, द्विगुणत्वम्, आदधे, ततः, एव, तत्प्रभाः, चतुर्दश, आसन् ।।१५।।*

वृत्तिः—सः—भगवान् शान्तिनाथः । उपाधिभिः—कौमारे राज्ये चक्रिभावे तीर्थकरत्वे च प्रत्येकं पञ्चविंशतिसहस्रवर्षभोगादिप्रकारैः । "उपाधिर्धर्मचिन्तायां कैतवेऽपि विशेषणे" इति विश्वः । चतस्रः—चतुःसङ्ख्याकाः । दशाः—अवस्थाः । प्रणयन्—कुर्वन् । नयेषु—प्रसिद्धसप्तनयेषु । अधीत्याचरणानयेन—आनयनमानयः, अधीतिश्चाचरणञ्चाऽधीत्याचरणे, तयोरानयः संप्रापणम् अधीत्याचरणानयस्तेन तथा । रसाधिकत्वात्—रसाधिक्यात् रसविशेषात् रसवर्द्धनादिति यावत् । द्विगुणत्वम्—द्विगुणाधिकत्वम् । आदधे—व्यदधात्, कृतवानित्यर्थः । तत एव—तस्मात् कारणादेव नयेषु द्विगुणत्वसम्पादनादेवेति यावत् । तत्प्रभाः—तस्य भगवतः शान्तिनाथस्य प्रभाः—त्विषः, विभा वा, तत्प्रभाः । "त्विषि त्विषः । भाः प्रभा वसुगभस्ति भानवो भा-मयूखमहसी छविर्विभा" २।१४।। इत्यभिधानचिन्तामणिः । चतुर्दश—दशाधिकाश्चत्वारस्तथा । आसन्—अभूवन् ।।१५।।

**स नैषधीभावमुपेत्य भूभुजां, व्रजस्य रेमे हृदि तद्गुणस्पृशि ।**
**चतुर्दशत्वं कृतवान् कुतः स्वयं, निजात्मनोऽनन्तविबोधनेऽधिकः ।।१६।।**

अन्वयः—*सः, नैषधीभावम्, उपेत्य, भूभुजाम्, व्रजस्य, तद्गुणस्पृशि, हृदि, रेमे, अनन्तविबोधने, अधिकः, स्वयम्, निजात्मनः, चतुर्दशत्वम्, कुतः, कृतवान् ? ।।१६।।*

वृत्तिः—सः—भगवान्, शान्तिनाथ इत्यर्थः । नैषधीभावम्—निषधा हि अयोध्याश्रितकोशलदेशान्तर्गता

काचन प्रसिद्धा नगरी, तत्र भवो नैषधः, श्रीऋषभदेव इत्यर्थः। अनैषधस्य नैषधस्य भावः सम्पत्तिर्नैषधीभावस्तन्तथा "कृभ्वस्तिभ्यां कर्मकर्तृभ्यां" ७।२।१२६॥ इत्यनेन च्विः प्रत्ययः। च्वावकारस्येत्वञ्च। उपेत्य–सम्प्राप्य। भूभुजाम्–भुवं पृथिवीं भुञ्जन्तीति भूभुजो राजानस्तेषान्तथा। व्रजस्य–समुदयस्य समूहस्येति यावत् "समूहश्चयः कलापो व्रजः... ...वृन्दं चक्रकदम्बकं समुदयः" ६।४७॥ इत्यभिधानचिन्तामणिः। तद्गुणस्पृशि–तस्य भगवतः शान्तिनाथस्य गुणाः शौर्यवीर्यौदार्यवैकल्याद्यस्तद्गुणाः तान् स्पृशति धारयतीति तद्गुणस्पृक् तस्मिंस्तथा। हृदि–हृदये। "हृच्चेतो हृदयं चित्तम्" ६।५॥ इत्यभिधानचिन्तामणिः॥ रेमे–अरमत। अनन्तविबोधने–विबोधनं विबोधः, विशिष्टज्ञानमिति यावत्, अनन्तमपरिमितञ्च तद् विबोधनमनन्तविबोधनम् तस्मिंस्तथा। अधिकः–सर्वतः, समभ्यधिकः। स्वयम्–आत्मना। निजात्मनः–स्वस्य। चतुर्दशत्वम्–चतस्रो दशा अवस्था अस्येति चतुर्दशस्तस्य भावश्चतुर्दशत्वम्। कुतः–कस्मात् केन हेतुना वा। कृतवान्–अकार्षीत् ॥१६॥

**प्रभामयीं स्वीयपुरीं तथाऽतनोत्, पुराजिनोऽर्हत्स्वपि पूर्वचक्रभृत्।**
**जनो न यस्यामिति गीरदः पदं, न वेद्मि विद्यासु चतुर्दशस्वयम् ॥१७॥**

**अन्वयः**—*पुराजिनः, (यथा) स्वीयपुरीम्, प्रभामयीम्, अतनोत्, अर्हत्सु, पूर्वचक्रभृत्, अयम्, अपि, तथा, (अतनोत्) इति गीः, जनः, यस्याम्, न, अदः, पदम्, चतुर्दशसु, विद्यासु न वेद्मि ॥१७॥*

**वृत्तिः**—पुराजिनः–प्रथमोऽर्हन्, युगादिदेवः श्रीऋषभदेव इत्यर्थः। (यथा–येन प्रकारेण) स्वीयपुरीम्–आत्मीयनगरीम्। प्रभामयीम्–कान्तिप्रचुराम्। अतनोत्–व्यदधात्। अर्हत्सु–जिनेषु। पूर्वचक्रभृत्–प्रथमचक्रवर्ती। भगवतः शान्तिनाथस्य चक्रवर्तिषु पञ्चमत्वात्प्रथमचक्रवर्तित्वकथनं कथं सङ्गच्छत इति तु न वाच्यम्, चक्रवर्तिपञ्चमत्वेऽपि जिनेषु प्रथमचक्रवर्तित्वेऽविरोधात्। अयम्–प्रकृतवर्णनीयः शान्तिनाथ इति यावत्। अपि–खलु। तथा–तेन प्रकारेण। स्वीयपुरीं प्रभामयीमतनोदिति। इतिगीः–इत्येवं वक्तेत्यर्थः। जनः–लोकः। यस्याम्–नगर्याम्। न–नहि। अदः–एतत्। पदम्–अधिकारम् चक्रवर्तित्वादिरूपम् विभक्त्यन्तादिरूपमर्हत्सु प्रथमचक्रवर्तित्वादिबोधकं पदं वा। चतुर्दशसु–चतुर्दशत्वसङ्ख्याविशिष्टासु। विद्यासु–वेत्ति जानात्याभिरिति विद्याः ज्ञानानि शास्त्राणि वा तासु।

"पुराणन्यायमीमांसा–धर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"
—इति याज्ञवल्क्यः ॥

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्यास्त्वेताश्चतुर्दश ॥"
—इति मनुः ॥

न–नहि। वेद्मि–जाने ॥१७॥

अमुष्य विद्या रसनाग्रनर्तकी, भविष्यतीत्येव विमर्शपूर्वकम् ।
विधिः पुरे तानुदपादि सज्जनान्, प्रबोधशुद्धाम्बुधिजातमज्जनान् ॥१८॥

**अन्वयः**—*अमुष्य, एव, विद्या, रसनाग्रनर्तकी, भविष्यति, इति, विमर्शपूर्वकम्, विधिः, प्रबोधशुद्धाम्बुधिजातमज्जनान्, तान्, सज्जनान्, पुरे, उदपादि ॥१८॥*

**वृत्तिः**—**अमुष्य**–भगवतः शान्तिनाथस्य । **एव**–खलु । **विद्या**–वेत्त्यनयेति विद्या शास्त्रादिज्ञानमित्यर्थः । **रसनाग्रनर्तकी**–रसनाग्रे–जिह्वाग्रे नर्तकीव नर्तकी स्फुरद्रूपेति रसनाग्रनर्तकी । नान्यस्येत्यर्थः । **भविष्यति**–भविता । **इति**–इत्येवम् । **विमर्शपूर्वकम्**–विचारपुरःसरम् । **विधिः**–ब्रह्मा, विधातेत्यर्थः । "धाता विधाता विधिर्वेधसौ ध्रुवः पुराणगोहंसगविश्वरेतसौ । प्रजापतिर्ब्रह्मचतुर्मुखः" । २।१२६॥ इत्यभिधानचिन्तामणिः । **प्रबोधशुद्धाम्बुधिजातमज्जनान्**–प्रकृष्टो बोधो ज्ञानम् प्रबोधः, सम्यक्त्वज्ञानादिः, शुद्धो विशुद्धश्चासावम्बुधिः समुद्रः शुद्धाम्बुधिः, प्रबोध एव शुद्धाम्बुधिः प्रबोधशुद्धाम्बुधिः, तत्र जातं वृत्तं मज्जनमवगाहनं सम्यगालोडनमिति यावत् येषान्ते प्रबोधशुद्धाम्बुधिजातमज्जनास्तांस्तथा । **तान्**–प्रसिद्धान् । **सज्जनान्**–सन्तः साधवश्च ते जना मनुष्याः सज्जनास्तांस्तथा । **पुरे**–भगवतः शान्तिनाथस्य नगरे । **उदपादि**–उत्पादयामास, ससर्जेति यावत् । अथवा अमुष्य एव विद्या ( तेषाम् ) रसनाग्रनर्तकी भविष्यति इति विमर्शपूर्वकम् । पुरे प्रबोधशुद्धाम्बुधिजातमज्जनान् तान् सज्जनान् उदपादीत्येवमन्वयः करणीयः, तेषामिति पदस्य प्रबोधशुद्धाम्बुधिजातमज्जनानां सज्जनानामित्यर्थः, ऊह्यः ॥१८॥

पुरन्दरस्यापि पुरापुरासखी, त्रयीव नीताऽङ्गगुणेन विस्तरम् ।
ससंहिताऽप्याह्निकवृत्तिसोदया, पुरी स्वशाखाबहुलद्विजाश्रया ॥१९॥
चतुर्दशत्वं दधती शुभाश्रमै-स्तथैव वर्णैः ककुभो जनागमैः ।
अगाहताष्टादशतामपीप्सया, पृथग्दशाशाजनरङ्गसङ्गमैः ॥२०॥ (युग्मम्)

**अन्वयः**—*पुरन्दरस्य, अपि, पुरापुरासखी, त्रयी, इव, अङ्गगुणेन, विस्तरम्, नीता, ससंहिता, अपि, आन्हिकवृत्तिसोदया, स्वशाखाबहुलद्विजाश्रया, पुरी, शुभाश्रमैः, वर्णैः, तथैव ककुभः जनागमैः; चतुर्दशत्वम्, दधती, अपि, ईप्सया, पृथग्दशाशाजनरङ्गसङ्गमैः, अष्टादशताम्, अगाहत ॥१९–२०॥*

**वृत्तिः**—**पुरन्दरस्य**–पुराणि अरीणां दारयति, त्रिपुरं वेति पुरन्दर इन्द्रः "पुरन्दरभगन्दरौ" ५।१।११४॥ इत्यनेन खान्तो निपात्यते । तस्य तथा, इन्द्रस्येत्यर्थः । "इन्द्रो हरिर्दुश्च्यवनोऽच्युताग्रजो वज्री बिडौजा मघवान् पुरन्दरः" २।८५॥ इत्यभिधानचिन्तामणिः । **अपि**–समुच्चये । "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि" ३।३।२४७॥ इत्यमरकोशः ॥ **पुरापुरासखी**–अत्यन्तप्राचीनसहचरी । **त्रयी**–श्रुतिः, वेद इत्यर्थः ।

इव–तुल्यम्। "त्रयी पुनः। ऋग्यजुःसामवेदाः स्युः" २।१६३॥ इत्यभिधानचिन्तामणिः। अङ्गगुणेन–गुणनं गुण आवृत्तिरित्यर्थः, अङ्गानामवयवानाम् गुणोऽङ्गगुणस्तेन तथा। विस्तरम्–विस्तारम् विस्तीर्णतामिति यावत्। नीता–सम्प्राप्ता। त्रयीपक्षे च "अङ्गानां शिक्षादिषट्सङ्ख्याकानाम् गुण आवृत्तिरङ्गगुणस्तेन तथा। अन्यच्चोभयत्र समानम्।" शिक्षा कल्पो व्याकरणं छन्दोज्योतिर्निरुक्तयः। षडङ्गानि २।१६४॥ इत्यभिधानचिन्तामणिः। "शिक्ष्यते वर्णविवेकोऽनयेति शिक्षा" यदुवाचस्पतिः "शिक्षा वर्णविवेचिका" कर्मणां सिद्धरूपः प्रयोगः कल्प्यतेऽवगम्यतेऽनेनेति कल्पः, यद् वाचस्पतिः "सिद्धरूपः प्रयोगो यैः कर्मणामवगम्यते। ते कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते"। व्याक्रियन्तेऽन्वाख्यायन्ते शब्दा अनेनेति व्याकरणम् यदाह–"प्रकृतिप्रत्ययोपाधिनिपातादिविभागशः। पदान्वाख्यानकरणं शास्त्रं व्याकरणं विदुः।" छाद्यतेऽनेन प्रस्ताराद् भूरितिच्छन्दः। ज्योतिषां ग्रहाणां गतिज्ञानहेतुर्ग्रन्थो ज्योतिः ज्योतिषम् वर्णागमादिभिर्निर्वचनं निरुक्तिर्निरुक्तम्। अङ्ग्यते ज्ञायतेऽमीभिरित्यङ्गानि उपकारकाणि।

ससंहिता–संहिता लोकानां परस्परं सांगत्यम् तया सहिता ससंहिता, त्रयी पक्षे च चत्वारिंशद्ध्यायपरिमितो वेदभागः संहिता तया सहिता तथा। अपि–समुच्चयेऽव्ययम्। आह्निकवृत्तिसोदया–उदयेन धन–धान्यसाम्राज्यप्राचुर्याद्यभ्युन्नत्या सहिता सोदया आह्निकमधिकारविशेषः, वृत्तिः–प्रतिदिनमाजीविका, आह्निकञ्च वृत्तिश्चाऽऽह्निकवृत्ती, वृत्तिशब्दस्याऽऽह्निकशब्दापेक्षयाऽल्पस्वरत्वेऽपि तदपेक्षयाऽऽह्निकस्याऽभ्यर्हितत्वेन तस्य पूर्वनिपाते नानौचिती, आह्निकवृत्तिभ्यां सोदया आह्निकवृत्तिसोदया। त्रयीपक्षे च अह्नि दिने भवाऽऽह्निका सा चासौ वृत्तिर्वर्तनम् आह्निकवृत्तिः सन्ध्यावन्दनादिनित्यकर्म, तया ( आह्निकवृत्तिप्रदर्शकतया ) सोदया–अभ्युदयवती, आह्निकवृत्तिसोदया। स्वशाखाबहुलद्विजाश्रया–बहुला–बहवश्च ते द्विजाः पक्षिणो बहुलद्विजास्तेषां आश्रया–आधारा बहुलद्विजाश्रयाः, स्वशाखाः–वृक्षादिशाखा बहुलद्विजाश्रया यस्यां सा स्वशाखाबहुलद्विजाश्रया, त्रयीपक्षे च बहुला बहवश्च ते द्विजा ब्राह्मणाः गौतमपिप्पलादाऽऽश्वलायनादयो बहुलद्विजास्तेषामाश्रयाः प्रतिपादकत्वेऽऽधारभूताः बहुलद्विजाश्रयाः, स्वशाखाः कठकौथुमादयो बहुलद्विजाश्रया यस्याः सा स्वशाखाबहुलद्विजाश्रया। पुरी–नगरी, राजधानीत्यर्थः॥

शुभाश्रमैः–शुभाः समीचीनाश्च ते आश्रमाः ब्रह्मचर्यादयश्चत्वारः शुभाश्रमास्तैस्तथा। तथा चाभिधानचिन्तामणिः "ब्रह्मचारी गृही वानप्रस्थो भिक्षुरिति क्रमात्। चत्वार आश्रमाः" इति ।३।४७२॥ वर्णैः–ब्रह्मक्षत्रियविट्शूद्रैश्चतुर्भिः। तथैव–तेन प्रकारेणैव। ककुभः–दिशः सकाशात्। जनागमैः–आगमनानि आगमाः, जनानां लोकानामागमा जनागमास्तैस्तथा, षड्भिर्जनागमैरित्यर्थः, दिग्गतषट्त्वस्य जनागमेष्वपि उपचारतः सत्त्वात्। चतुर्दशत्वम्–चत्वारोऽधिका दश चतुर्दश तेषां भावश्चतुर्दशत्वम्, चतुर्दशत्वसङ्ख्याकत्वमित्यर्थः। दधती–धारयन्ती। अपि–सम्भावनायामव्ययम्। गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपीत्यमरकोशनानार्थः। ईप्सया–आप्तुं सम्प्राप्तुमिच्छा—ईप्सा तया तथा, अष्टादशत्वस्येति शेषः। पृथग्दशाशाजनरङ्गसङ्गमैः–रमते जनोऽत्रेति रङ्गः "गम्यमि" ( उणादि ९२ ) इति गः प्रत्ययः रजत्यस्मिन् जन इति वा, रङ्गे सङ्गमाः सम्मेलनानि रङ्गसङ्गमाः, पृथक्–षड्भ्यः पृथग्भूताश्च ता दशाशाः—दश दिशः

पृथग्देशाशाः, तासान्ताभ्य आगता वा जनाः पृथग्देशाशाजनास्तेषां रङ्गसङ्गमाः पृथग्देशाशाजनरङ्गसङ्गमास्तैस्तथा। यद्स्थाने दशदिशां गणनात् चतुर्णामाश्रमाणां चतुर्णां वर्णानां गणनाच। अष्टादशताम्—अष्टाधिका दश अष्टादश तेषां भावोऽष्टादशता तान्तथा, अष्टाधिकदशत्वसङ्ख्याकत्वमित्यर्थः। अगाहत—प्राप, सम्प्राप्तवतीत्यर्थः ॥१९-२०॥

अनेकवस्तुप्रचयैर्नृपस्तुतैः, स्ववास्तवैः प्राज्ञजनस्य संस्तवैः ।
पुरी सुरीणां रमणीयतां ययौ, नवद्वयद्वीपपृथग्जयश्रियाम् ॥२१॥

**अन्वयः**—*अनेकवस्तुप्रचयैः, नृपस्तुतैः, प्राज्ञजनस्य, स्ववास्तवैः, संस्तवैः, पुरी, नवद्वयद्वीपपृथग्जयश्रियाम्, सुरीणाम्, रमणीयताम्, ययौ ॥२१॥*

**वृत्तिः**—**अनेकवस्तुप्रचयैः**—अनेकानि बहूनि च तानि वस्तूनि पदार्थाः, अनेकवस्तूनि तेषां प्रचया उपचया वृद्धय इति यावत्, अनेकवस्तुप्रचयास्तैस्तथा। **नृपस्तुतैः**—नृपै राजभिः स्तुताः नृपस्तुतास्तैस्तथा। **प्राज्ञजनस्य**—प्रज्ञ एव प्राज्ञः, प्रज्ञादित्वादण् प्रत्ययः, प्राज्ञश्चासौ जनः प्राज्ञजनस्तस्य तथा, विदुषो लोकस्येत्यर्थः। **स्ववास्तवैः**—पराप्रयुज्यमानैरेव यथार्थैः। **संस्तवैः**—स्तोत्रैः। **पुरी**—भगवतः शान्तिनाथस्य नगरी। **नवद्वयद्वीपपृथग्जयश्रियाम्**—नवानां द्वयमष्टादश नवद्वयञ्च ते द्वीपाश्च नवद्वयद्वीपास्तेषां पृथक् भिन्ना या जयश्रियः विजयसूचिका श्रियस्तासाम्, यद्वा जयन्तीति जयाः सर्वोत्कर्षेण वर्त्तमाना या श्रियस्ता जयश्रियस्तासान्तथा। **सुरीणाम्**—देवाङ्गनानाम्। (च) **रमणीयताम्**—रामणीयकम्, कमनीयतामिति यावत्। **ययौ**—जगाम, संप्राप्तवतीत्यर्थः। यद्वा-सुरीणामित्येतत्पदम् रमणीयतामिति पदस्य समानाधिकरणतया द्वितीयान्तम् तथा च सु-सम्यक् रीणा-स्रवन्ती सुरीणा तान्तथा। निर्झरवतीमित्यर्थः। एवञ्च सुरसां रमणीयतामधिगतवतीति भावः ॥२१॥

दिगीशवृन्दांशविभूतिरीशिता, जनस्य सर्वस्य सुशिक्षया पिता ।
पितामहस्तच्चतुराननश्रिया, प्रशास्ति यां शान्तिविभोः पिता पुरीम् ॥२२॥

**अन्वयः**—*दिगीशवृन्दांशविभूतिः, ईशिता, सुशिक्षया, सर्वस्य, जनस्य, पिता, तच्चतुराननश्रिया, पितामहः, शान्तिविभोः, पिता, याम्, पुरीम्, प्रशास्ति ॥२२॥*

**वृत्तिः**—**दिगीशवृन्दांशविभूतिः**—दिशामाशानामीशा दिगीशा इन्द्रादयोऽष्टौ लोकपालास्तेषां वृन्दानि कदम्बकानि, दिगीशवृन्दानि, तेषु अंशेन लेशेन विभूतिरैश्वर्य्यं यस्य स दिगीशवृन्दांशविभूतिः। (यतः) **ईशिता**—भुवनस्य दिशां वा शासिता। एतेन भुवने दिक्षु च तदीयमाधिपत्यं द्योतितम्। **सुशिक्षया**—सु-सुष्ठु शोभना चासौ शिक्षा उपदेशः सुशिक्षा तया तथा, भवसागरपारकरसमीचीनोपदेशेनेति भावः।

**सर्वस्य**–निखिलस्य । **जनस्य**–लोकस्य, लोकसमुदयस्येति यावत् । **पिता**–जनकः । पाति रक्षतीति व्युत्पत्त्या पितृशब्दस्य रक्षकार्थकत्वात् उपदेशादिना रक्षकत्वस्य तस्मिन्नपि सत्त्वात् जनसमुदयपितृत्वस्य तत्राक्षतत्वात् । **तच्चतुराननश्रिया**–तस्यां शिक्षायां चतुरं निपुणं यदाननं वदनं मुखमिति यावत् तच्चतुराननन्तस्य श्रीः शोभा तया । **पितामहः**–पितृपिता । यद्वा–चत्वारि आननानि यस्य स चतुराननो ब्रह्मा तस्य श्रीः–प्रजापालक-त्वादिना शोभासम्पत्तिस्तया वा । पितामह इति शेषः । **शान्तिविभोः**–शान्तिनाथप्रभोः । **पिता**–श्रीविश्वसेन-नामा भूपालः । **याम्**–यशास्विनीम् । **पुरीम्**–नगरीम् । **प्रशास्ति**–अनुशासयति, अधिकरोतीति यावत् ॥२२॥

**विवेचने वा वचनेऽञ्चने वा, दिशां स कामप्रसरावरोधिनीम् ।**
**प्रवृत्तिमाधाय धिया नयाश्रयां, स्वबोधिशोधिप्रभुतां दधेऽधिपः ॥२३॥**

**अन्वयः**—*सः, अधिपः, विवेचने, वा, वचने, वा, दिशाम्, अञ्चने, कामप्रसरावरोधिनीम्, नयाश्रयाम्, प्रवृत्तिम्, आधाय, स्वबोधिशोधिप्रभुताम्, दधे ॥२३॥*

**वृत्तिः**—**सः**–प्रसिद्धः । **अधिपः**–अधि अधिकं पाति रक्षतीति अधिपः–भूपालः, श्रीविश्वसेन इत्यर्थः । **विवेचने**–तत्त्वाऽतत्त्वविचारणे । **वा**–अथवा । **वचने**–निगदने । **वा**–अथवा । **दिशाम्**–आशानाम्, दिशानामिति यावत् । **अञ्चने**–गमने । अधिकरणस्य शेषत्वविवक्षायां षष्ठी दिगधिकरणकगमने इत्यर्थः । **कामप्रसरावरोधिनीम्**–कामस्य-स्वेच्छाचारस्य प्रसरः प्राबल्यम् कामप्रसरस्तमवरोधयति निवारयति दूरी-करोतीति कामप्रसरावरोधिनी "अजातेः शीले" ५।१।१५४॥ इत्यनेन णिन् प्रत्ययः तान्तथा । **नयाश्रयाम्**–नयो नीतिः शास्त्रं वा आश्रय आधारो मूलं वा यस्याः सा नयाश्रया तान्तथा । **प्रवृत्तिम्**–व्यवसायम् । **आधाय**–विधाय, समाश्रित्येति यावत् । **स्वबोधिशोधिप्रभुताम्**–स्वस्य निजस्य आत्मनो वा बोधिः सम्यक्-त्वम्, सज्ज्ञानमिति यावत् तं शोधयति सम्मार्जयति वर्धयतीति यावत् स्वबोधिशोधिनी, सा चासौ प्रभुता विभुता सामर्थ्यमिति यावत् स्वबोधिशोधिप्रभुता, तान्तथा । **दधे**–धृतवान्, जग्राहेति यावत् ॥२३॥

**प्रतिप्रभाताध्ययनैर्नवैः स्तवैर्जिनेन्द्रपूजाजनने महोत्सवैः ।**
**बभार शास्त्राणि दशां द्वयाधिका–मतुल्यकुल्याचरणैः पुरीजनः ॥२४॥**

**अन्वयः**—*पुरीजनः, प्रतिप्रभाताध्ययनैः, नवैः, स्तवैः, जिनेन्द्रपूजाजनने, महोत्सवैः, (च) अतुल्यकुल्याचरणैः शास्त्राणि (एव) द्वयाधिकाम्, दशाम् बभार ॥२४॥*

**वृत्तिः**—**प्रतिप्रभाताध्ययनैः**–प्रभातं प्रभातं प्रति प्रतिप्रभातम्, वीप्सायामव्ययीभावः, प्रतिप्रभाते-ऽध्ययनानि प्रतिप्रभाताध्ययनानि तैस्तथा । **नवैः**–नूतनैः, अपूर्वैरित्यर्थः । **स्तवैः**–स्तोत्रैः । **जिनेन्द्रपूजाजनने**–

जिनानामर्हतां जिनेष्वर्हत्सु वा इन्द्रो जिनेन्द्रः, जिनेश्वर इत्यर्थः, तस्य पूजा अष्टप्रकाराऽष्टोत्तरशतप्रकारा वाऽर्चा जिनेन्द्रपूजा, तस्या जननं सम्पादनं जिनेन्द्रपूजाजननं तस्मिंस्तथा। **महोत्सवैः**—महान्तश्च ते उत्सवा उद्धवा महोत्सवास्तैस्तथा। ( च—पुनः ) **अतुल्यकुल्याचरणैः**—कुले वंशे भवानि कुल्यानि तानि च आचरणानि कुल्याचरणानि, अतुल्यानि अनुपमानि च तानि कुल्याचरणानि अतुल्यकुल्याचरणानि तैस्तथा। अथवा कुल्या नदी, तस्या आचरणानि कुल्याचरणानि, अतुल्यानि च तानि कुल्याचरणानि अतुल्यकुल्याचरणानि तैः शास्त्राणां पावित्र्यं सरसत्वञ्च नद्याचरणकथनात्। **शास्त्राणि**—चतुर्दशाष्टादश वा विद्याः। ( एव ) **द्वयाधिकाम्**—द्वावयवावस्येति द्वयम्, तेन अधिका अतिरिक्ता द्वयाधिका तान्तथा। शास्त्रलक्षणां द्वयाधिकां चक्षुरविषयभूतस्याप्यर्थस्य ग्रहणादप्यत्राप्यवहितत्वात्तृतीयामित्यर्थः। **दृशम्**—दृश्यतेऽनेनेति दृक् तान्तथा, नेत्रमित्यर्थः। **बभार**—धृतवान् धारयामासेति यावत् ॥२४॥

**त्रिधा प्रभासंगतमस्ति हस्तिना-पुरं पुरन्ध्रीजनविश्वरञ्जनम्।**
**दृशं दधे गोधिकृतामिहावसन्, निजत्रिनेत्रावतरत्वबोधिकाम् ॥२५॥**

**अन्वयः**—*त्रिधा, प्रभासं गतम्, पुरन्ध्रीजनविश्वरञ्जनम्, हस्तिनापुरम्, अस्ति, इह, आवसन्, निजत्रिनेत्रावातरत्वबोधिकाम्, गोधिकृताम्, दृशम्, दधे ॥२५॥*

**वृत्तिः**—**त्रिधा**—त्रिभिः, प्रकारैरिति त्रिधा। **प्रभासङ्गतम्**—प्रभासम्, तन्नामकतीर्थं गतं प्राप्तम्। प्रभया—अलकया कुबेरनगर्या संगतं मैत्री यस्य तत्, यद्वा—प्रभा—तेजो द्युतिर्वा तया सङ्गतं सहितम्। **पुरन्ध्रीजनविश्वरञ्जनम्**—पुरन्ध्र्यः सुचरित्रा एव जनाः पुरन्ध्रीजनाः, विश्वे जगति रञ्जनमामोदप्रदम् विश्वरञ्जनम्, तेषां ( पुरन्ध्रीजनानाम् ) विश्वरञ्जनम्, पुरन्ध्रीजनविश्वरञ्जनम्। **हस्तिनापुरम्**—तदाख्यनगरम्। **अस्ति**—वर्तते। **इह**—अत्र। अस्मिन् हस्तिनापुरे इति यावत्। **आवसन्**—निवसन्-कृताऽऽवासस्थान इति यावत्। **निजत्रिनेत्रावतरत्वबोधिकाम्**—निजस्य-आत्मनः त्रिनेत्रावतरत्वस्य-त्रिनेत्रस्य शङ्करस्यैवावतार उत्पत्तिरित्यर्थस्य बोधिकां ज्ञापिकाम्। **गोधिकृताम्**—गवि-स्वर्गे अधिकृता-प्रशंसिता परीक्षिता वा गोधिकृता तान्तथा, देवैरिति शेषः, यद्वा गोधौ—भाले कृता गोधिकृता तान्तथा। "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले" इत्यमरनानार्थः। "भाले गोध्यलिकालीकललाटानि" ३।२३७। इत्यभिधानचिन्तामणिः। **दृशम्**—पश्यति दृश्यतेऽनया वा दृक् तान्तथा लोचनम्। **दधे**—दधार, धृतवानिति यावत् ॥२५॥

**पदैश्चतुर्भिः सुकृते स्थिरीकृते, पुरे विशङ्कोऽपि न कोऽपि तामयेत्।**
**सविद्रुमाभे भवने वनेऽपि वा, दिवानिशं देवनतः सभावनः ॥२६॥**

**अन्वयः**—*चतुर्भिः, पदैः, सुकृते, स्थिरीकृते, ( सति ) पुरे, सविद्रुमाभे, भवने, वा, वनेऽपि दिवानिशम्, देवनतः, सभावनः, विशङ्कः, अपि, कोऽपि, कश्चिदपि, न, तामयेत् ॥२६॥*

**वृत्तिः**—**चतुर्भिः**-चतुःसङ्ख्याकैः। **पदैः**-चरणैः। **सुकृते**-धर्मे। "धर्मः पुण्यं वृषः श्रेयःसुकृते" ६।१४॥ इत्यभिधानचिन्तामणिः। **स्थिरीकृते**-अस्थिरः स्थिरः कृत इति स्थिरीकृतस्तस्मिँस्तथा। "कृभ्व-स्तिभ्या" मित्यादिना च्विप्रत्ययः "ईश्च्वाववर्णस्याऽनव्ययस्य" ४।३।१११॥ इत्यनेन च्वौपरे अकारस्येकार आदेशः। ( सति ) राज्ञा श्रीविश्वसेनेनेति शेषः। **पुरे**-नगरे। **सविद्रुमाभे**-विद्रुमस्य प्रवालस्य आभा-कान्तिर्विद्रुमाभा, तया सहितम्, सविद्रुमाभम्, तस्मिंस्तथा। "अथ विद्रुमः। रक्ताङ्गो रक्तकन्दश्च प्रवालं हेमकन्दलः" ४।१३२॥ इत्यभिधानचिन्तामणिः। **भवने**-सदने। **वा**-अथवा। **वनेऽपि**-काननेऽपि। **दिवानिशम्**-अहोरात्रम्। **देवनतः**-देवे-जिने नतः-प्रणत इति देवनतः। **सभावनः**-सभायाः समितेरवनो रक्षकः सभावनः, भावनया सहितो वा सभावनः, अथवा—भावनैः-भवनपतिभिः सहितः सभावनः। **विशङ्कोऽपि**-वि-विशिष्टा शङ्का अनिष्टोत्प्रेक्षणं यस्य तथा, अपि, "शङ्काऽनिष्टोत्प्रेक्षणं स्यात्" २।२२९॥ इत्य-भिधानचिन्तामणिः। **कोऽपि** कश्चिदपि जनः। ( कश्चिन्न्-कञ्चनापि जनम् ) **न**-नहि। **तामयेत्**-क्लामयेत्, सन्तापयेदिति यावत् "तामयादिति पाठे च विशङ्कोऽपि कोपिताम्, न अयात्" इत्येवमन्वयः कार्य्यः। **विशङ्कः**-विशिष्टशङ्कः, शङ्कापङ्ककलङ्कितोऽपि। **कोपिताम्**-कोपः-क्रोधोऽस्त्यस्येति कोपी-क्रोधी, तस्य भावः कोपिता, तान्तथा, कोपमित्यर्थः, प्रकृतिजन्यबोधे प्रकारीभूतस्य भावप्रत्ययार्थत्वेन तल्प्रत्ययप्रकृतिः 'कोपि' शब्दजन्ये कोपप्रकारकाऽऽश्रयविशेष्यकबोधे प्रकारीभूतस्य कोपस्य प्रकृते तत्त्वात्। **न**-नहि। **अयात्**-अगच्छत् प्राप्नोदित्यर्थः ॥२६॥

जनेन यूना विषयप्रयोजने, कृतेऽमुना के न तपः प्रपेदिरे ? ।
प्रपन्नमासन्नवने सभावने-ऽवनेर्नृपान्नामयता यतात्मना ॥२७॥

**अन्वयः**—*यूना, जनेन, विषयप्रयोजने, कृते, के, तपः, न, प्रपेदिरे, अवनेः, नृपान् नामयता, यतात्मना, अमुना, सभावने, आसन्नवने ( तपः ) प्रपन्नम्* ॥२७॥

**वृत्तिः**—**यूना**-तरुणेन, सम्प्राप्तयुवत्वेनेति यावत्। **जनेन**-मानवेन। **विषयप्रयोजने**-विषयस्य स्त्रीसम्भोगादिविषयवासनायाः प्रयोजनं-पुत्राद्युत्पादनादि विषयप्रयोजनम्, तस्मिंस्तथा। **कृते**-सम्पादिते। **के**-के जनाः। **तपः**-तपस्याम्। **न**-नहि। **प्रपेदिरे**-प्रापुः, प्राप्तवन्त इति यावत्। **अवनेः**-पृथिव्याः। **नृपान्**-राज्ञः। **नामयता**-नम्रीकुर्वता, स्वाधीनीकुर्वतेति यावत्। **यतात्मना**-यतः संयत आत्मा चेतनो यस्य स यतात्मा तेन तथा। **अमुना**-अनेन, राजमणिना श्रीविश्वसेनेनेति यावत्। **सभावने**-भावयन्ति ध्यायन्ति परमात्मानमिति भावना ज्ञानध्यानतत्परास्तैः सहितं सभावनन्तस्मिंस्तथा। **आसन्नवने**-आसन्नं सन्निकटवर्ति च तद्वनं काननमासन्नवनम् तस्मिंस्तथा। ( तपः-तपस्याम् ) **प्रपन्नम्**-समधिगतम् ॥२७॥

पिनाकिवन्नाकिविनायकार्चितस्तपोवने तप्यति योगिनां गणः ।
भुवं यदेकांह्रिकनिष्ठया स्पृश-न्नुपादिशन्नूर्ध्वदिशः प्रवेशनम् ॥२८॥

**अन्वयः**—*योगिनाम्, गणः, यत्, एकांह्रिकनिष्ठया, भुवम्, स्पृशन्, ऊर्ध्वदिशः, प्रवेशनम्, उपादिशत् ( अतः ) पिनाकिवत् नाकिविनायकार्चितः, ( सन् ) तपोवने, तप्यति ॥२८॥*

**वृत्तिः**—**योगिनाम्**—योगः संयमादिसमन्वितश्चित्तवृत्तिनिरोधोऽस्त्येषामिति योगिनस्तेषान्तथा । व्रतीनामित्यर्थः । **गणः**—समूहः । **यत्**—यस्माद्धेतोः । "हेतौ यत्तद्यतस्ततः" ६।१७३॥ इत्यभिधानचिन्तामणिः । **एकांह्रिकनिष्ठया**—एकोऽङ्घ्रिश्चरणो यस्या सा एकांह्रिका, सा चासौ निष्ठा स्थितिः, एकांह्रिकनिष्ठा, तया तथा एकचरणकनिष्ठिकयेत्यर्थः । **भुवम्**—पृथिवीम् । **स्पृशन्**—अवलम्बमानः । **ऊर्ध्वदिशः**—मुक्तिमार्गस्य । **प्रवेशनम्**—सम्प्राप्तिलक्षणप्रवेशम् । **उपादिशत्**—उपदिदेश, उपदिष्टवानित्यर्थः लोकेभ्य इति शेषः । ( **अतः**—अस्मात् कारणात् ) **पिनाकिवत्**—पिनष्टि शत्रून् इति पिनाकम्—आजगवम्, तदस्त्यस्येति पिनाकी शङ्करस्तेन तुल्यः पिनाकिवत् । "पिनाकं स्यादाजगवमजकावं च तद्धनुः" २।११५॥ इत्यभिधानचिन्तामणिः । **नाकिविनायकार्चितः**—नाकः स्वर्गोऽस्ति निवासस्थानत्वेनैषामिति नाकिनो देवाः, वि-विशिष्टो नायको नेताऽग्रणीरिति यावत् विनायकः, नाकिनां विनायको नाकिविनायक इन्द्रस्तेन अर्चितः पूजितः, नाकिविनायकार्चितः इन्द्रसंपूजितः सन्निति यावत् । **तपोवने**—तपःप्रधानं वनं काननम् तपोवनम् तस्मिंस्तपोवने । **तप्यति**—तपश्चर्यामादधाति, यद्वा पिनाकिवत्, नाकिविनायकार्चितः, योगिनां गणः, यत्, एकांह्रिकनिष्ठया, भुवम्, स्पृशन् तपोवने तप्यति ( अतः ) ( लोकेभ्यः ) । **ऊर्ध्वदिशः**—प्रवेशनम्, उपादिशदित्येवमन्वयः करणीयः । शब्दार्थस्तु पूर्वपदेवेति पुनर्नोक्तः ॥२८॥

तदीर्ष्ययेवोदयमत्र धार्मिकं, विमृश्य मन्ये बहुमन्युना ज्वलन् ।
फलेन हीनां स्वत एव पित्समया, दधावधर्मोऽपि कृशस्तपस्विताम् ॥२९॥

**अन्वयः**—*अत्र, धार्मिकम्, उदयम्, विमृश्य, तदीर्ष्यया, इव, बहुमन्युना, ज्वलन्, कृशः, अधर्मः, अपि, पित्समया, स्वत एव, फलेन हीनाम्, तपस्विताम्, दधौ ( इति ) मन्ये ॥२९॥*

**वृत्तिः**—**अत्र**—श्रीविश्वसेनस्य नगरे, 'हस्तिनापुरे' योगिजनाधिष्ठिततपोवने वा । **धार्मिकम्**—धर्मस्य सुकृतस्य अयं धार्मिकस्तन्तथा । धर्मसम्बन्धिनमित्यर्थः । **उदयम्**—अभ्युदयम्, समुन्नतिमिति यावत् । **विमृश्य**—विचार्य । **तदीर्ष्यया इव**—तदक्षान्त्या इव । "अक्षान्तिरीर्ष्या" ३।५५॥ इत्यभिधानचिन्तामणिः । **बहुमन्युना**—बहुरधिकश्चासौ मन्युः क्रोधः शोको वा बहुमन्युस्तेन, अतिशयक्रोधेन, अतिशयशोकेन वा "मन्युः पुमान् क्रुधि । दैन्ये शोके च यज्ञे च" इति मेदिनी । **ज्वलन्**—सन्तप्यन्, सन्तापमापद्यमान

इति यावत् । (अत एव) कृश:—कृश्यति स्मेति कृशः दुर्बल इत्यर्थः । "अनुपसर्गाः क्षीब" ४।२।८०॥ इत्यनेन क्ते निपात्यते । अधर्मः—धर्मविरुद्धः । अपि—समुच्चयेऽव्ययम् । पित्सया—पत्तुं संप्राप्तुमिच्छा पित्सा तया तथा । उदयस्येति शेषः । स्वत एव—आत्मनैव । फलेन—प्रयोजनेन लाभेन वा । हीनाम्—रहिताम् । निष्फलामिति यावत् । तपस्विताम्—तपस्याम् तपस्विताशब्दस्य तपः पर्य्यवसितार्थत्वेन तत्पर्य्यायतया तपस्याशब्दस्योपन्यासे न क्षतिः, प्रकृतिजन्यबोधे प्रकारीभूतस्यैव भावप्रत्ययार्थत्वात् । दधौ—धृतवान् (इति) मन्ये—अवगच्छामि, जानामीति यावत्, वाक्यार्थः कर्म ॥२९॥

यदस्य यात्रासु बलोद्धतं रजः, प्रजाव्रजे ध्वान्तभिये भविष्यति ।
इतीव वेधा विदधे मणीमया-ञ्जनालयांस्तत्र नृपस्य पश्यतः ॥३०॥

*अन्वयः—यत्, अस्य यात्रासु, बलोद्धतम्, रजः, प्रजाव्रजे, ध्वान्तभिये, भविष्यति, इतीव, वेधाः, पश्यतः, नृपस्य, तत्र, मणीमयान्, जनालयान्, विदधे ॥३०॥*

वृत्तिः—यत्—यस्मात् । अस्य—लोकस्य, योगिगणस्य, राज्ञो वा । यात्रासु—दिग्विजयादिकमुद्दिश्य प्रयाणेषु । बलोद्धतम्—बलैः सैन्यैरुद्धतं प्रक्षिप्तम् बलोद्धतम् । रजः—धूलिः । "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः" इति मेदिनी । "अथ रजांसि स्युर्धूलीपांशुरेणवः । ४।३६॥ इत्यभिधानचिन्तामणिः । प्रजाव्रजे—लोकसमुदाये, जनसमूहे इति यावत् । "लोको जनः प्रजा" ३।१६५॥ इत्यभिधानचिन्तामणिः । "समूहव्रयः । सन्दोहः समुदायराशिविसरव्राताः कलापो व्रजः" ६।४७॥ इति च । ध्वान्तभिये—ध्वान्तं तमोऽन्धकार इति यावत् तस्माद् भीर्भयम् ध्वान्तभीस्तस्यै तथा, अन्धकाराधिक्यप्रयुक्तभयसम्पादकमिति यावत् । भविष्यति—भविता । इतीव—इत्येवं मनसि कृत्वेत्यर्थः । वेधाः—विधाता । पश्यतः—अवलोकयतः । नृपस्य—राज्ञः । तत्र हस्तिनापुरे । मणीमयान्—मणीनां रत्नानां विकाराः मणीमयास्तांस्तथा । जनालयान्—जनानां लोकानामालया गृहा जनालयास्तांस्तथा । विदधे—कृतवान् । उत्प्रेक्षालङ्कारः । "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना" इति साहित्यदर्पणः ॥३०॥

पुरोऽप्यमुष्या नृपतेः प्रयाणजं, स्फुरत्प्रतापानलधूममञ्जिम ।
रजश्चलद्वाजिखुराहतं द्विषां, पुरस्तदास्यातुमिव स्थितं मुखे ॥३१॥

*अन्वयः—अमुष्याः, पुरः, नृपतेः, अपि, प्रयाणजम्, स्फुरत्प्रतापानलधूममञ्जिम, चलद्वाजिखुराहतम्, रजः, द्विषाम्, पुरः, तदास्यातुम्, इव, मुखे, स्थितम् ॥३१॥*

**वृत्तिः**—**अमुष्याः**–अस्याः । **पुरः**–नगरस्य । **नृपतेः**–नृणां पतिर्नृपतिस्तस्य तथा राज्ञः श्रीविश्वसेनस्येत्यर्थः । **अपि**–सम्भावनायामव्ययम् । "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपी"त्यमरः । **प्रयाणजम्**–प्रयाणं दिग्विजयादिक्रमेण प्रस्थानम् तस्माज्जातं प्रयाणजम् प्रयाणजन्यमिति यावत् । **स्फुरत्प्रतापानलधूममञ्जिम**–स्फुरत्–प्रकाशमानश्चासौ प्रतापः प्रभावस्तेज इति यावत् स्फुरत्प्रतापः, स एवासह्यत्वादनलोऽग्निः स्फुरत्प्रतापानलः, तस्य धूमो वायुवाहः स्फुरत्प्रतापानलधूमस्तस्य मञ्जिमेव सौन्दर्यमिव मञ्जिमा यस्य तत् स्फुरत्प्रतापानलधूममञ्जिम । "धूमः स्याद्वायुवाहोऽग्निवाहो दहनकेतनम् । अम्भःसूः करमालश्चस्तरीर्जीमूतवाह्यपि ४।१६९॥" इत्यभिधानचिन्तामणिः । **चलद्वाजिखुराहतम्**–चलन्तो धावन्तश्च ते वाजिनोऽश्वाः चलद्वाजिनस्तेषां खुराः शफाश्चलद्वाजिखुराः, तैर्हतम् अभिहतम् ताडितमिति यावत्तथा । **रजः**–धूलिः । **द्विषाम्**–शत्रूणां । **पुरः**–अग्रे । "पुरः पुरस्तात् पुरतोऽग्रतः ६।१६५॥" इत्यभिधानचिन्तामणिः । **तदाख्यातुम्**–श्रीविश्वसेनप्रयाणवृत्तान्तं कथयितुमिव । **मुखे**–आनने । **स्थितम्**–अतिष्ठत् । यद्वा–तादृशं रजः । **तत्**–प्रयाणवृत्तान्तम् । **आख्यातुमिव**–कथयितुमिव । **द्विषाम्**–शत्रूणाम् । **पुरः**–नगरस्य । **मुखे**–अग्रभागे । **स्थितम्**–अतिष्ठत्, इत्येवमन्वयो विधातव्यः ॥३१॥

## पुरेऽर्थिभिश्चार्थिजनाय दित्सुभिरदापि नीरं क्रमवृद्धवीचिभिः ।
## तदेव गत्वा पतितं सुधाम्बुधौ, विधोर्ग्रहानन्तरशौचकर्मणे ॥३२॥

**अन्वयः**—*पुरे, क्रमवृद्धवीचिभिः, दित्सुभिः, अर्थिभिः च, अर्थिजनाय, नीरम्, अदापि, तदेव, गत्वा, सुधाम्बुधौ, पतितम्, विधोः, ग्रहानन्तरशौचकर्मणे (उपयुज्यते)*

**वृत्तिः**—**पुरे**–हस्तिनापुरनामके नगरे । **क्रमवृद्धवीचिभिः**–क्रमेण दानोत्तरोत्तरक्रमेण वृद्धा उपचयमापन्ना वीचिरुत्सर्गजलतरङ्गो येषान्ते क्रमवृद्धवीचयस्तैस्तथा । "तरङ्गे भङ्गवीच्यूर्म्युत्कलिकाः ४।१३१॥" इत्यभिधानचिन्तामणिः । **दित्सुभिः**–दित्सन्ति दातुमिच्छन्ति तच्छीला दित्सवः "सन्–भिक्षाऽऽशंसेरुः ५।२।३३।" इति सूत्रेण उः प्रत्ययः, तैस्तथा, दातुकामैरिति यावत् । **अर्थिभिः**–अर्थो धनमस्त्येषामित्यर्थिनस्तैस्तथा "अर्थो विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये च शब्दानां निवृत्तौ च प्रयोजने" इति मेदिनी । **च**–पादपूरणे । **अर्थिजनाय**–अर्थयति याचते तच्छीलमस्यस्येति अर्थी याचकः, स चासौ जनो लोकोऽर्थिजनस्तस्मै तथा । **नीरम्**–जलम् । **अदापि**–दाप्यते स्म । **राज्ञा**–विश्वसेनेनेति शेषः । **तदेव**–उत्सर्गार्थंदीयमानं जलमेव । **गत्वा**–प्रगत्य । **सुधाम्बुधौ**–अमृतसिन्धौ । **पतितम्**–पतनक्रियाश्रयीभूतम् । **विधोः**–चन्द्रस्य । **ग्रहानन्तरशौचकर्मणे**–शौचाय पवित्रतायै शुद्धयर्थमिति यावत् कर्म क्रिया शौचकर्म ग्रहो ग्रहणम्, राहूपराग इति यावत्, तस्य अनन्तरम् तदुत्तरकालः ग्रहानन्तरम् तस्मिन् शौचकर्म ग्रहानन्तरशौचकर्म तस्मै तथा । **उपयुज्यते**–उपयुक्तं भवति । **केवलं**–जलस्यैव शौचकर्मसम्पादनशीलत्वेन । **सुधाम्बुधौ**–सुधा–

समुद्रे तदभावाद् ग्रहणसमये चन्द्रस्यापि अशौचकवलितत्वेन तच्छुद्धिसाधनीभूतं जलं सुधाम्बुधौ पतितं सत्तदुपयोगाय जातमिति ॥३२॥

यशः स्वरूपाददसीयनागर–प्रदानजन्यं कृतविश्रमं दिवि ।
जगद्भ्रमात्तत्क्रमचारजं रजो, दधाति पङ्कीभवदङ्कतां विधौ ॥३३॥

**अन्वयः**—*अदसीयनागरप्रदानजन्यम्, यशः, स्वरूपात्, दिवि, कृतविश्रमम्, जगद्भ्रमात्, तत्क्रमचारजम्, रजः, पङ्कीभवत्, विधौ, अङ्कताम् दधाति ॥३३॥*

**वृत्तिः**—**अदसीयनागरप्रदानजन्यम्**–एतदीयनागरिकलोकप्रदानसमुद्भूतम् । **यशः**–कीर्तिः । **स्वरूपात्**–स्वभावात् । **दिवि**–स्वर्गे, आकाशे वा । **कृतविश्रमम्**–विहितविरामम् । **जगद्भ्रमात्**–भुवन-परिभ्रमणात् । **तत्क्रमचारजम्**–तदीयपादसञ्चारजनितम् । **रजः**–धूलिः । **पङ्कीभवत्**–कर्दमीभवत् । **विधौ**–चन्द्रे । **अङ्कताम्**–कलङ्कताम् । **दधाति**–धारयति । "कलङ्काङ्कौ लाञ्छनं च चिन्हं लक्ष्म च लक्षणम्" इत्यमरः । अतिशयोक्तिरलङ्कारः ॥३३॥

स्फुरद्धनुर्निस्वनतद्घनाशुग–प्रवर्षणैर्भूमिपतेर्यशस्तरुः ।
सपल्लवश्चित्रमिदं न किन्तु तद्,–रिपुस्तदा–पल्लवलक्षवानभूत् ॥३४॥

*अन्वयः*—*स्फुरद्धनुर्निस्वनतद्घनाशुगप्रवर्षणैः, भूमिपतेः, यशस्तरुः, सपल्लवः, इदम्, न चित्रम्, किन्तु, तदा, तद्रिपुः, आपल्लवलक्षवान्, अभूत् ॥३४॥*

**वृत्तिः**—**स्फुरद्धनुर्निस्वनतद्घनाशुगप्रवर्षणैः**–स्फुरन् प्रकाशमानो धनुर्निस्वनः कोदण्डशब्दो यस्य एवंविधश्चासौ स विश्वसेनश्च स्फुरद्धनुर्निस्वनसः । घना–निबिडाश्च ते आशु–शीघ्रं गच्छन्तीत्याशुगा बाणाश्च घनाशुगाः, स्फुरद्धनुर्निस्वनतस्य–श्रीविश्वसेनस्य घनाशुगाः स्फुरद्धनुर्निस्वनतद्घनाशुगास्तेषां प्रवर्षणानि स्फुरद्धनुर्निस्वनतद्घनाशुगप्रवर्षणानि, तैस्तथा । भूमिपतेः–भूम्याः पृथिव्याः पतिरीश्वरः, भूमिपतिस्तस्य तथा राज्ञो विश्वसेनस्येत्यर्थः । **यशस्तरुः**–यशसः कीर्तेस्तरुर्वृक्षो यशस्तरुः, कीर्तिपादप इति यावत् । **सपल्लवः**–पल्लवैः किसलयैः, नूतनदलैरिति यावत् "पत्रं पलाशं छदनं बर्हं पर्णं छदं दलम् । नवे तस्मिन् किसलयं किसलं पल्लवः" ४।१७९। इत्यभिधानचिन्तामणिः । **इदम्**–तद्घनाशुगप्रवर्षणैर्यशस्तरोः पल्लवसाहित्यम् । **चित्रम्**–आश्चर्यकरम् । **न**–नहि । **किन्तु**–परन्तु । **तदा**–श्रीविश्वसेनघनाशुगप्रवर्षणकाले । **तद्रिपुः**–तस्य श्रीविश्वसेनस्य रिपुः शत्रुः तद्रिपुः । **आपल्लवलक्षवान्**–आपदां विपत्तीनां लवा लेशा आपल्लवास्तेषां लक्षः आपल्लवलक्षः, योऽस्त्यस्येति आपल्लवलक्षवान् "तदस्यास्त्यस्मिन्निति मतुः ।७।२।१" इत्यनेन मतुः प्रत्ययः । **अभूत्**–अभवत् ॥३४॥

अहर्निशं दातुरनन्तरोदक-प्रगल्भवृष्टिव्ययितस्य सङ्गरे ।
नृणां मनस्तापविभावसोरभूत्, स धूमभूमा कृपणानने स्थिरः ॥३५॥

**अन्वयः**—*सङ्गरे, अहर्निशम्, दातुः, अनन्तरोदकप्रगल्भवृष्टिव्ययितस्य, नृणाम्, मनस्ताप-विभावसोः, सः, धूमभूमा, कृपणानने, स्थिरः, अभूत् ॥३५॥*

**वृत्तिः**—**सङ्गरे**–अङ्गीकृते प्रतिश्रुते इति यावत् । "सङ्गरोऽङ्गीकृते युद्धे क्रियाकारे विषापदोः । सङ्गरं तु फले शम्याः" इत्यनेकार्थः । **दातुः**–प्रदातुः, दानशीलस्य जनस्येति यावत् । **अनन्तरोदकप्रगल्भवृष्टिव्ययितस्य**–प्रगल्भा प्रौढाऽसह्येति वृष्टिर्वर्षणं प्रगल्भवृष्टिः, उदकस्य उत्सर्गजलस्य प्रगल्भवृष्टिरुदक-प्रगल्भवृष्टिः, अनन्तराऽव्यवहिताऽविच्छिन्नेति यावत् चासौ उदकप्रगल्भवृष्टिरनन्तरोदकप्रगल्भवृष्टिः तया व्ययितो निर्वापितोऽनन्तरोदकप्रगल्भवृष्टिव्ययितस्तस्य तथा । **नृणाम्**–दीनजनानाम् । **मनस्तापविभावसोः**–मनसोऽन्तःकरणस्य ताप आर्थिकक्लेशजनितसन्तापो मनस्तापः, स विभावसुरग्निरिवेति मनस्तापविभाव-सुस्तस्य तथा । **सः**–प्रसिद्धः । **धूमभूमा**–अतिशयेन बहुर्भूमा, बहुशब्दादिमनि प्रत्यये सति "भूर्लुक् चेवर्णस्य" ७।४।४१॥ इत्यनेन "बहुशब्दस्य भूः" इत्यादेशः, इमनइकारस्य लुक् च । भूमा-भूयान् चासौ "धूमः, धूमभूमा" राजदन्तादित्वात् पूर्वनिपाताहस्य भूमशब्दस्य परनिपातः । वस्तुतस्तु "स भूमधूमः कृपणानने स्थिरः" इत्येव पाठः समादरणीयः, राजदन्तादिगणपाठकल्पनलाघवात् भूमा चासौ धूमो भूम-धूमः इति । **कृपणानने**–कृपणानाम् कदर्य्याणाम् दानशक्तिविरहितानामिति यावत्, आननम्–मुखम् कृपणा-ननम् तस्मिंस्तथा । **स्थिरः**–दृढमवस्थितः । **अभूत्**–अभवत् ॥३५॥

अदःपुरः क्ष्मापबहुप्रतापजै-र्दिवाकरः प्रादुरभूत् कराकरैः ।
निजस्य तेजः शिखिनः परःशताः परे रुचिभ्रंशमिहाभिलेभिरे ॥३६॥

**अन्वयः**—*अदःपुरः, क्ष्मापबहुप्रतापजैः, कराकरैः, दिवाकरः, प्रादुरभूत्, इह, परःशताः, परे, शिखिनः, निजस्य, रुचिभ्रंशम्, तेजः, अभिलेभिरे ॥३६॥*

**वृत्तिः**—**अदःपुरः**–असौ चासौ पूर्नगरी अदःपूस्तस्या अदःपुरः । **क्ष्मापबहुप्रतापजैः**–क्ष्मां पृथिवीं पाति रक्षतीति क्ष्मापो राजा तस्य बहुप्रतापः क्ष्मापबहुप्रतापस्तस्माज्जाताः क्ष्मापबहुप्रतापजास्तैस्तथा । **कराकरैः**–कराणां किरणानामाकराः खनयः कराकरास्तैस्तथा । **दिवाकरः**–सूर्य्यः । **प्रादुरभूत्**–प्रादुर्भूतो जातः । **इह**–लोकेऽस्मिन् । **परःशताः**–शतात्परेऽनन्ताः । **परे**–अन्ये । **शिखिनः**–अग्नयः । **निजस्य**–आत्मनः । **रुचिभ्रंशम्**–भ्रश्यत इति भ्रंशः, रुच्या कान्त्या भ्रंशो रुचिभ्रंशस्तम् तथा । यद्वा रुचेर्भ्रंशो यस्य तद् तथा । **तेजः**–प्रतापम् । **आलेभिरे**–प्राप्तवन्तः ॥३६॥

**द्विषन्मनः काननदाहसाहसी, प्रतापवह्निः प्रससार भूपतेः ।**
**तदीर्ष्ययेवात्र विशिष्य भूतले, वितेनुरङ्गारमिवाऽयशः परे ॥३७॥**

**अन्वयः**—*भूपतेः, द्विषन्मनःकाननदाहसाहसी, प्रतापवह्निः, प्रससार, परे, तदीर्ष्यया, इव, विशिष्य, अत्र, भूतले, अंगारम्, इव, अयशः, वितेनुः ॥३७॥*

**वृत्तिः**—**भूपतेः**—भुवः पृथिव्याः पतिः स्वामी भूपतिः श्रीविश्वसेनस्तस्य तथा । **द्विषन्मनःकानन-दाहसाहसी**—द्विषतां शत्रूणां मनश्चित्तमन्तःकरणमिति यावत् द्विषन्मनः, "अन्तःकरणं मानसं मनः । हृच्चेतो हृदयं स्वान्तं चित्तं गूढपथोबले" ६।५॥ इत्यभिधानचिन्तामणिः । द्विषन्मन एव काननं वनम् द्विषन्मनःकाननम्, तस्य दाहः—प्लोषः, भस्मीकरणमिति यावत् द्विषन्मनःकाननदाहस्तत्र साहसी—आग्रहवान् इति द्विषन्मनःकाननदाहसाहसी । **प्रतापवह्निः**—प्रतापः प्रभावः, तेज इति यावत् एव वह्निर्हुताशनः प्रतापवह्निः । **प्रससार**—प्रासरत् प्रसृतवानिति यावत् । त्रिभुवने इति शेषः । **परे**—शत्रवः, प्रतिपक्षभूता राजान इत्यर्थः । **तदीर्ष्यया**—तस्य तादृशप्रतापवह्निविस्तारस्य ईर्ष्या अक्षान्तिः असहिष्णुता, तदीर्ष्या, तया तथा । **इव**—यथा । **विशिष्य**—विशेषतः । **अत्र**—अस्मिन् । **भूतले**—पृथिव्याम्, भूमण्डले इति यावत् । **अङ्गारम्**—अप्रशान्तज्वालदहनावलीढकाष्ठांशम्, दग्धप्रायकाष्ठमिति यावत् ( कोयला–हिन्दीप्रसिद्धः ) ( कोलसा–गुर्जरप्रसिद्धः ) **तुल्यम्** । **अयशः**—अकीर्तिम् । **वितेनुः**—विस्तारयामासुः ॥३७॥

**अनल्पदग्धारिपुरानलोज्ज्वलैः, प्रतापरोचिर्निचयैर्भुवः पतिः ।**
**रराज राजन्यसमाजमध्यगः, स विश्वसेनः स्वरसेन तत्पुरे ॥३८॥**

**अन्वयः**—*भुवः, पतिः, सः, विश्वसेनः, अनल्पदग्धारिपुरानलोज्ज्वलैः, प्रतापरोचिर्निचयैः, स्वरसेन, तत्पुरे, रराज ॥३८॥*

**वृत्तिः**—**भुवः**—पृथिव्याः । **पतिः**—स्वामी । **सः**—प्रसिद्धः । **विश्वसेनः**—तदाख्यः शान्तिनाथपिता । **अनल्पदग्धारिपुरानलोज्ज्वलैः**—अनल्पानि बहूनि दग्धानि ज्वलितानि भस्मीकृतानीति यावत् अरिपुराणि शत्रुनगराणि यैस्तेऽनल्पदग्धारिपुराः, ते च तेऽनला वह्नयोऽनल्पदग्धारिपुरानलास्तैरुज्ज्वला दीप्यमाना अनल्पदग्धारिपुरानलोज्ज्वलास्तैस्तथा । **प्रतापरोचिर्निचयैः**—प्रतापस्य तेजसो रोचिर्ज्योतिः प्रतापरोचिस्तस्य निचयाः समूहाः प्रतापरोचिर्निचयास्तैस्तथा । 'रोचिरुस्रुचिशोचिरंशुगो ज्योतिरर्चिरूपधृत्यभीशवः' २।१३॥ इत्यभिधानचिन्तामणिः । **स्वरसेन**—स्वस्य निजस्य रसो रागः स्वरसस्तेन तथा "रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये, तिक्तादौ द्रवरागयोः" इति मेदिनी । **तत्पुरे**—तन्नगरे, हस्तिनापुरे इति यावत् । **रराज**—विरराज, शुशुभे इति यावत् ॥३८॥

## द्विधा क्षमापस्य चिरस्य तापतो, निजप्रतापैर्वलयं ज्वलद् भुवः ।
## स्वतः परित्यज्य गताः क्वचिद् वने, वनेचराभाः क्षितिपा द्विधाऽरयः ॥३९॥

**अन्वयः**—*निजप्रतापैः, द्विधा, चिरस्य, क्षमापस्य, तापतः, द्विधाऽरयः, वनेचराभाः क्षितिपाः, भुवः, ज्वलत्, वलयम्, स्वतः, परित्यज्य, क्वचिद् वने, गताः ॥३९॥*

**वृत्तिः**—**निजप्रतापैः**–निजस्य–आत्मनः, प्रतापाः, प्रभावाः, तेजांसीति यावत्, निजप्रतापाः, तैस्तथा । **द्विधा**–द्वाभ्यां प्रकाराभ्यामिति द्विधा, धर्मन्यायाभ्यामित्यर्थः । **चिरस्य**–चिरात् । **क्षमापस्य**–क्षमां पृथिवीं पाति रक्षतीति क्षमापा राजा तस्य तथा पक्षे च क्षमां तितिक्षां पातीति क्षमापः श्रीविश्व-सेनन्नृपतिस्तस्य तथा । **तापतः**–पराभवादिजनितसंतापादित्यर्थः । **द्विधा**–द्वाभ्यां प्रकाराभ्यां द्विधाः, आन्तराः प्रकटाश्च । **अरयः**–शत्रवः, । **वनेचराभाः**–वने कानने चरन्तीति वनेचराः किरातादिम्लेच्छजातयः तेषा-माभेव आभा कान्तिर्येषान्ते वनेचराभाः । उष्ट्रमुखमित्यादिवदुष्ट्रमुखादित्वात्समासः । **क्षितिपाः**–क्षितिं पृथिवीं क्षयञ्च पान्ति रक्षन्तीति क्षितिपा राजानः । **भुवः**–पृथिव्याः । **ज्वलत्**–देदीप्यमानम् । **वलयम्**–मण्डलम् । **स्वतः**–स्वयमेव । **परित्यज्य**–सन्त्यज्य, विहायेति यावत् । **क्वचिद्वने**–कस्मिंश्चित्कानने । **गताः**–गतवन्तः ।

यद्वा, द्विधा, क्षमापस्य, चिरस्य, तापतः, द्विधा, अरयः, वनेचराः, क्षितिपाः, निजप्रतापैः, ज्वलत् भुवः, वलयम् स्वतः, परित्यज्य, क्वचिद् वने गताः ॥ इत्येवमन्वयः कार्यः, शब्दार्थस्तूक्त एव ॥३९॥

## क्व विश्वसेनस्य विनश्यदापदः, पदं सुराज्यस्य सुरासुरार्चितम् ।
## प्रदक्षिणीकृत्य जयाय–सृष्टया, यशः श्रियाऽलम्भि यतो जगत्त्रयम् ॥४०॥

**अन्वयः**—*विनश्यदापदः, सुराज्यस्य, विश्वसेनस्य, सुरासुरार्चितम्, पदम्, क्व, यतः, जयाय-सृष्टया, यशः श्रिया, प्रदक्षिणीकृत्य, जगत्त्रयम् अलम्भि ॥४०॥*

**वृत्तिः**—**विनश्यदापदः**–विनश्यन्त्यः–विनाशमुपगच्छन्त्य आपदो विपत्तयो यस्य स विनश्यदापद् तस्य तथा । **सुराज्यस्य**–सुष्ठु शोभनं राज्यं प्रजापालनादि राजकर्म यस्य सः, सुराज्यस्तस्य तथा । **विश्वसेनस्य**–तदाख्यस्य भगवच्छान्तिनाथपितू राज्ञः । **सुरासुरार्चितम्**–सुरा देवाश्च असुरा दैत्याश्च सुरासुराः, तैरर्चितम्–पूजितम्, सुरासुरार्चितम् । **पदम्**–आस्पदम् । **क्व**–कुत्र अतिविलक्षणं प्रतिष्ठितञ्चेति भावः । **यतः**–यस्माद्धेतोः । **जयायसृष्टया**–जयो विजयश्च आयो लाभश्च जयायौ, ताभ्यां सृष्टा रचिता सम्पादितेति यावत् जयायसृष्टा तया तथा । **यशःश्रिया**–कीर्तिलक्ष्म्या । **प्रदक्षिणीकृत्य**–प्रगतं दक्षिणम् प्रदक्षिणम्, अप्रदक्षिणं प्रदक्षिणं सम्पद्यमानं कृत्वा प्रदक्षिणीकृत्य । अभूततद्भावेऽर्थे च्विप्रत्ययः । च्वौ परे अकारस्य

ईकारादेशश्च । पूर्वोक्तविशेषणं पदमिति शेषः । जगत्त्रयम्-त्रयोऽवयवा अस्येति त्रयम् जगतां त्रयं जगत्त्रयं त्रिभुवनमित्यर्थः, अलम्भि-प्रापि, लब्धमिति यावत् ॥४०॥

क्व कौशिकस्य प्रभुताऽसुराद्धियाऽनिमेषभाजोऽक्षिसहस्रसङ्गमे ।
अतोऽत्र राजाऽनुपमस्त्रिविष्टपे रराज नीराजनयासराजघः ॥४१॥

**अन्वयः**—*अक्षिसहस्रसङ्गमे, अनिमेषभाजः, कौशिकस्य, असुराद्धिया, प्रभुता, क्व, अतः, त्रिविष्टपे, अनुपमः, नीराजनयासराजघः, राजा, अत्र, रराज* ॥४१॥

**वृत्तिः**—**असुराद्धिया**-दैत्याद्भयेन । **अक्षिसहस्रसङ्गमे**-अक्ष्णां नेत्राणां सहस्रम् अक्षिसहस्रम्, तस्य सङ्गमः सङ्गः अक्षिसहस्रसङ्गमस्तस्मिंस्तथा । **अनिमेषभाजः**-निमेषो निमीलनम्, न निमेषोऽनिमेषस्तं भजते समाश्रयतीति अनिमेषभाक् तस्य तथा । **कौशिकस्य**-कुशिकस्य गोत्रापत्यं पुमान् कौशिक इन्द्रस्तस्य तथा । **प्रभुता**-सामर्थ्यम् । **क्व**-कुत्र । कुत्रापि नास्तीत्यर्थः । **अतः**-अस्मात् कारणात् । **त्रिविष्टपे**-स्वर्गे त्रयाणां विष्टपानां-लोकानां समाहारस्त्रिविष्टपम् तस्मिंस्तथेति व्युत्पत्त्या त्रैलोक्ये वा । "स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः । सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्" इत्यमरः । "स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत्" ६।१॥ इत्यभिधानचिन्तामणिः ॥ **अनुपमः**-न उपमातुलना, सादृश्यमिति यावद्यस्य सोऽनुपमः । **नीराजनयासराजघः**-राजानं हतवानिति राजघः, नितरां राजनये आस्ते इति निराजनयासः, स चासौ राजघो नीराजनयासराजघः । यद्वा-निर्गतो राजनयोऽस्मादिति नीराजनयस्तमस्यतिक्षिपतीति नीराजनयासः, स चासौ राजघस्तथा । **राजा**-नृपतिः, श्रीविश्वसेनः । **अत्र**-अस्मिन् मर्त्यलोके । **रराज**-विरराज, दिदीपे, शुशुभे इति यावत् ॥४१॥

निवारितास्तेन महीतलेऽखिलेऽप्यनीतयो नीतिकरेण भूभुजा ।
कुतो भवेत्तद्विषयेऽप्यदृष्टवद् भयं नु दृष्टं परिशिष्टमप्यतः ॥४२॥

**अन्वयः**—*नीतिकरेण, तेन, भूभुजा, अखिलेऽपि, महीतले, अनीतयः, निवारिताः, नु, अतः, परिशिष्टमपि, अदृष्टवत्, दृष्टम्, भयम्, तद्विषये, कुतः, भवेत्* ॥४२॥

**वृत्तिः**—**नीतिकरेण**-करोति विदधातीति करः, नीतेर्न्यायस्य करो नीतिकरस्तेन तथा, न्यायशालिनेत्यर्थः । **तेन**-प्रसिद्धेन । **भूभुजा**-भुवं पृथिवीं भुनक्तीति भूभुक् तेन तथा, राज्ञा श्रीविश्वसेनेत्यर्थः । **अखिलेऽपि**-सम्पूर्णेऽपि । **महीतले**-भूमण्डले । **अनीतयः**-न्याय्यबहिर्भूतपापाचरणादयः । **निवारिताः**-अपसारिताः, दूरीकृता इति यावत् । **नु**-वितर्के । **अतः**-अस्माद्धेतोः । **परिशिष्टमपि**-अवशिष्टं खलु ।

**अदृष्टवत्**—दैवायत्तवत् वह्नितोयादिजनितम् । तुल्यमिति यावत् । **द्वयम्**—स्व-परचक्रजम् । **भयम्**—साध्वसम् । "भयं भीर्भीतिरातङ्कः आशङ्का साध्वसं" तद्विषये—तदीयदेशे "नीवृज्जनपदौ देशविषयौ तूपवर्तनम्" इत्यमरः । **कुतः**—कस्मात् कारणात् । **भवेत्**—जायेत । अपि तु कुतोऽपि कारणादेतस्य नृपते राज्ये किञ्चिदपि भयादिकं नास्तीति भावः ॥४२॥

**द्विधा क्षमायाः प्रतिपायिना जने, निरीतिभावं गमितेऽतिवृष्टयः ।**
**जहुर्न ताः स्विन्नवपुर्जलच्छलाद्, भयद्रुतद्विड्नृपसङ्गमं श्रमात् ॥४३॥**

**अन्वयः**—*द्विधा क्षमायाः प्रतिपायिना, (तेन) जने, निरीतिभावम्, गमिते, ताः अतिवृष्टयः, श्रमात्, स्विन्नवपुर्जलच्छलात्, भयद्रुतद्विड्नृपसङ्गमम् न जहुः ॥४३॥*

**वृत्तिः**—**द्विधा**—द्वाभ्यां प्रकाराभ्यामिति द्विधा, धर्मन्यायाभ्यामित्यर्थः । **क्षमायाः**—पृथिव्यास्तितिक्षाया वा । "भूर्भूमिः पृथिवी पृथ्वी वसुधोर्वी वसुन्धरा । ...क्षितिः क्षोणी क्षमाऽनन्ता" ४।१। इत्यभिधानचिन्तामणिः । "तितिक्षा सहनं क्षमा" ३।५५॥ इति च । **प्रतिपायिना**—प्रतिपाति प्रतिपालयति तच्छीलमस्त्यस्येति प्रतिपायी "अजातेः शीले" ५।१।१५४॥ इत्यनेन तच्छीलेऽर्थे णिन् प्रत्ययः । ( **तेन**—प्रसिद्धेन राज्ञा श्रीमता विश्वसेनेन । ) **जने**—लोके । **निरीतिभावम्**—निर्गता ईतयो यस्मात्तन्निरीति तस्य भावो निरीतिभावस्तन्तथा । "अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः स्वचक्रं परचक्रञ्च षडेता ईतयः स्मृताः" ॥ **गमिते**—प्रापिते सति **ताः**—प्रसिद्धाः । **अतिवृष्टयः**—वृष्टयो वर्षणानि अत्यन्तं वृष्टयोऽतिवृष्टयः प्रचुरजलवर्षणानीत्यर्थः । **श्रमात्**—श्री विश्वसेनपराजिततया समराङ्गणं विहाय पलायनादिपरिश्रमात् । **स्विन्नवपुर्जलच्छलात्**—स्विन्नं स्वेदान्वितञ्च वपुः शरीरम् स्विन्नवपुस्तस्मात् जलं सलिलम् स्विन्नवपुर्जलम् तस्य छलं व्याजः स्विन्नवपुर्जलच्छलम् तस्मात्तथा । "कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम् । व्याजो मिषं लक्ष्यं निभं व्याजः" ३।४२॥ इत्यभिधानचिन्तामणिः । **भयद्रुतद्विड्नृपसङ्गमम्**—भयेन भीत्या द्रुताः पलायिताः भयद्रुताः द्विषन्तीति द्विषः शत्रवः द्विषश्च ते नृपा राजानो द्विड्नृपाः भयद्रुताश्च ते द्विड्नृपाः भयद्रुतद्विड्नृपाः, तैस्तेषां वा सङ्गमः सङ्गः सहवास इति यावत् भयद्रुतद्विड्नृपसंगमस्तन्तथा । भयविह्वलशत्रुराजसहवासमित्यर्थः । **न**—नहि । **जहुः**—तत्यजुः । त्यक्तवन्त इति यावत् ॥४३॥

**विनाशनं नाशनमेव केवलं, कुशासनं वा न पुनः कुशासनम् ।**
**न तत्यजुर्नूनमनन्यविश्रमा, अमी श्रमास्तस्य नृपस्य विद्विषः ॥४४॥**

**अन्वयः**—*विनाशनम्, केवलम्, नाशनम्, एव, वा, पुनः, कुशासनम्, कुशासनम् न, तस्य, नृपस्य, अनन्यविश्रमाः, अमी, श्रमाः, विद्विषः, नूनम्, न, तत्यजुः ॥४४॥*

**वृत्तिः**—**विनाशनम्**-विध्वंसनम्। **केवलम्**-कृत्स्नम् सर्वांशं विहायेत्यर्थः। **नाशनम्**-पलायनम्, राजसिंहासनाद् दूरीकरणमिति यावत्। **एव**-निर्धारणार्थकमव्ययम्। **वा**-पादपूरणे। 'वा स्याद्विकल्पोपमयोर्वितर्के पादपूरणे। समुच्चये च विस्रम्भे नानार्थातीतयोरपि' इति मेदिनी। **पुनः**-किञ्चेत्यर्थः। **कुशासनम्**-कोः पृथिव्याः शासनम्-अनुशासनम् कुशासनम्। 'भूर्भूमिः पृथिवी पृथ्वी ···ज्या कुर्वसुमती-मही" ४।२॥ इत्यभिधानचिन्तामणिः। **कुशासनम्**-कु-कुत्सित शासनं कुशासनम् यद्वा कुशस्य तृणस्य आसनम्। **न**-नहि। **तस्य**-श्री विश्वसेनस्य। **नृपस्य**-राज्ञः। **अनन्यविश्रमाः**-न अन्यत्र प्रजापालनादि-रूपशासनादन्यत्र विश्रम आरामो येषान्ते तथा। **अमी**-अदश्शब्दवाच्याः। **श्रमाः**-परिश्रमाः। **विद्विषः**-शत्रव्। **न**-नहि। **तत्यजुः**-जहुः, त्यक्तवन्त इत्यर्थः।

यद्वा-तस्य नृपस्य, अनन्यविश्रमाः, अमी, विद्विषः, नूनम्, श्रमान्-पराजयजनिताऽऽयासान्। न, तत्यजुः, "इत्येवमन्वयः करणीयः, पूर्वकल्पे अनन्यविश्रमाः इत्यत्र श्रमाणामन्यपदार्थतया तत्र च विभ्रमादि-चेतनधर्माणामसम्भवाद् द्वितीयः कल्प आश्रित इति बोध्यम् ॥४४॥

**हृदि भ्रमो नो भुवि विभ्रमाः श्रवः-पुटेऽपटुत्वे न तथा ध्वनिग्रहाः !**
**बभूवुरन्यत्तिमिरेण साञ्जनाः, प्रतीपभूपालमृगीदृशां दृशः ॥४५॥**

**अन्वयः**—*हृदि, भ्रमाः, भुवि, विभ्रमाः, नो, श्रवःपुटे, अपटुत्वे तथा ध्वनिग्रहाः, न, अन्यत्तिमिरेण, प्रतीपभूपालमृगीदृशाम्, दृशः, साञ्जनाः बभूवुः ॥४५॥*

**वृत्तिः**—**हृदि**-हृदये। मानसे इति यावत्। "अन्तःकरणं मानसं मनः। हृच्चेतो हृदयं स्वान्तं चित्तं गूढपथोच्चले" ६।५॥ इत्यभिधानचिन्तामणिः। **भ्रमाः**-आक्रमणजनितभीत्या पराजयादिजनितशोकेन च भ्रान्तयः। "भ्रमोऽम्बुनिर्गमे भ्रान्तौ" इति मेदिनी। **भुवि**-पृथिव्याम्। **विभ्रमाः**-विलासाः। **नो**-नहि। प्रतिपक्षराजरमणीनामिति शेषः। लीला विलासो विच्छित्तिर्बिब्बोकः किलिकिञ्चितम्। मोट्टायितं कुट्टमितं ललितं विहृतं तथा। विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश १।३।१६२॥ 'अभावे त्वननो नहि' ६।१७५॥ इत्युभयत्राभिधानचिन्तामणिः। **श्रवःपुटे**-श्रवसोः कर्णयोः पुटम् श्रवःपुटम् तस्मिँस्तथा, कर्णविवरे इति यावत् "श्रुतौ श्रवः। शब्दाधिष्ठानपैञ्जूषमहानादध्वनिग्रहाः। कर्णः श्रोत्रः श्रवणं च"३।२३६॥ इत्यभिधानचिन्तामणिः। **पटुः**-स्वविषयग्रहणसमर्थः, न पटुरपटुस्तस्य भावोऽपटुत्वन्तस्मिन्नपटुत्वे। **तथा**-यथा पूर्वं तथा, पूर्ववदितियावत्। **ध्वनिग्रहाः**-ध्वनीनाम् अस्फुटशब्दानामपि ग्रहाः ग्रहणानि ध्वनिग्रहाः। **न**-नहि। **अन्यत्तिमिरेण**-धूल्यादिजात-स्वाभाविकान्यान्धकारेण। तमिस्रं तिमिरं तमः। ध्वान्तं भूच्छायान्धकारं तमसं समवान्धतः" २।५९॥ इत्यभिधानचिन्तामणिः। समासे अन्यशब्दस्य दान्तादेविधायकयोः "अषष्ठीतृतीयादन्याद् दोऽर्थे" ३।२।११९॥ "आशीराशाऽऽस्थिताऽऽस्थोत्सुकोतिरागे" ३।२।१२०॥ इत्यनयोर्द्वयोस्तिमिरशब्दे चत्तरपदेऽप्राप्त्या "अन्यत्तिमिरेण" इति प्रयोगश्चिन्त्यः सुधीभिरिति। **प्रतीपभूपाल-**

**मृगीदृशाम्**–मृगीणां हरिणानां दृशौ नयने मृगीदृशौ ते इव दृशौ नयने यासान्ता मृगीदृशः, मृगनयना रमण्यः, प्रतीपा प्रतिकूलाः इतियावत् विरुद्धा ते भूपालाः प्रतीपभूपालास्तेषां मृगीदृशः प्रतीपभूपालमृगीदृशस्तासान्तथा। 'प्रतिकूलं तु विलोममपसव्यमपष्ठुरम्। वामं प्रसव्यं प्रतीपं प्रतिलोममपष्ठु च" ६।१०१॥ इत्यभिधानचिन्तामणिः। **दृशः**–नेत्राणि। "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम्। लोचनं दर्शनं दृक् च" ३।२३९॥ इत्यभिधानचिन्तामणिः। **साञ्जनाः**–अञ्जनेन कज्जलेन सहिताः साञ्जनाः।" "अञ्जनं कज्जले चाक्तौ सौवीरे च रसाञ्जने" इति मेदिनी। **बभूवुः**–अभूवन् सञ्जाता इति यावत् ।४५॥

## सितांशुवर्णैर्वयति स्म तद्गुणै–र्यशोऽम्बरं त्वम्बरभागवाससे ।
## तदीयजाड्यक्षतये महीशितुः, प्रतापवह्निं विधिना विधिर्व्यधात् ॥४६॥

**अन्वयः**—*तु, अम्बरभाक्, अवाससे, सितांशुवर्णैः, तद्गुणैः, यशोऽम्बरम्, वयति स्म, तदीय जाड्यक्षतये, विधिः, विधिना, महीशितुः प्रतापवह्निम् व्यधात् ॥४६॥*

**वृत्तिः**—**तु**–पादपूरणे, प्रशंसायां वा। "तु पादपूरणे भेदे समुच्चयेऽवधारणे" इति मेदिनी। **अम्बरभाक्**–अम्बरमाकाशं भजते सेवते आश्रयतीति यावद् अम्बरभाक् देवः, अम्बरं वस्त्रं भजते इत्यम्बरभाक् सवस्त्रो जनः। 'अम्बरं न द्वयोर्व्योम्नि सुगन्ध्यन्तरवस्त्रयोः" इति मेदिनी। **अवाससे**–न वासो वस्त्रं यस्य सोऽवासास्तस्मै तथा। "अंशुकं वस्त्रमम्बरम्। सिचयो वसनं चीराऽऽच्छादौ सिक्चेलवाससी" ३।३३०॥ इत्यभिधानचिन्तामणिः। **सितांशुवर्णैः**–सितः शुक्लोऽंशुः किरणो यस्य स शितांशुश्चन्द्रः, तद्वद् वर्णः सारूप्यं येषान्ते सितांशुवर्णास्तैस्तथा, चन्द्रवद्धवलैरित्यर्थः। **तद्गुणैः**–तस्य महीपतेः श्रीविश्वसेनस्य गुणाः शौर्य्यवीर्य्यौदार्य्यगाम्भीर्य्यादयस्तद्गुणास्तैस्तथा। **यशोऽम्बरम्**–यशः श्लोकः कीर्तिरिति यावत् एव अम्बरं वस्त्रं यशोऽम्बरम् तथा। **वयति स्म**–उवाय निरमासीदिति यावत्। **तदीयजाड्यक्षतये**–तस्य अवासस इदं तदीयं तच्च तज्जाड्यं शैत्यं तदीयजाड्यम् तस्य क्षतिर्विनाशस्तदीयजाड्यक्षतिस्तस्यै तथा वस्त्राभाववतो जनस्य शैत्यापनोदनार्थमिति यावत्। **विधिः**–विधाता, ब्रह्मेति यावत्। **विधिना**–विधिपूर्वकम्। **महीशितुः**–महीं पृथिवीमीशिता शासिता महीशिता महीश्वित्, तस्य महीशितुः। **प्रतापवह्निम्**–प्रतापः-प्रभावस्तेज इति यावत् एव वह्निरग्निः प्रतापवह्निस्तन्तथा। "यत्कोश-दण्डजं तेजः स प्रभावः प्रतापवत्" ३।४०४॥ इत्यभिधानचिन्तामणिः। **व्यधात्**–अकार्षीत् ॥४६॥

## नृपेण देशे धृतसूत्रसञ्चयै-र्महासिवेम्नः सह कृत्वरी बहुम् ।
## स्वदोस्तुरीयं चपला शितांशुक-प्रभाविशेषं जनयां बभूव तम् ॥४७॥

**अन्वयः**—*देशे, नृपेण, धृतसूत्रसञ्चयैः, महासिवेम्नः, सहकृत्वरी, चपला, इयम्, स्वदोस्तुरी, बहुम्, तम्, सितांशुकप्रभाविशेषम्, जनयांबभूव ॥४७॥*

**वृत्तिः**—**देशे**–जनपदे, राष्ट्रे इति यावत् । "देशो जनपदो नीवृद् राष्ट्रं निर्गश्च मण्डलम्" ४।१३॥ इत्यभिधानचिन्तामणिः । **नृपेण**–राज्ञा श्रीविश्वसेनेनेत्यर्थः । **धृतसूत्रसञ्चयैः**–सूत्राणां सञ्चया राशयः सूत्रसञ्चयाः धृताश्च ते सूत्रसञ्चया धृतसूत्रसञ्चयास्तैस्तथा । सापेक्षत्वेऽपि नित्यसाकाङ्क्षत्वात्समास उपपादनीयः । **महासिवेम्नः**–महान् विशालश्चासावसिः करवालश्चन्द्रहास इति यावद् महासिः स एव वेमा वयनकाष्ठम् महासिवेमा तस्य तथा । "अथ चन्द्रहासः । करवालनिस्त्रिंशकृपाणखड्गाः । तरवारिकौक्षेयकमण्डलाग्रा असिऋष्टिरिष्टिः" ३।४४६॥ इत्यभिधानचिन्तामणिः । **सहकृत्वरी**–सहकृतवती सहकृत्वरी सहकारणीत्यर्थः । 'सहराजभ्यां कृग्युधेः ५।१।१६७॥ इत्यनेन कनिप्प्रत्ययः । **चपला**–चञ्चला । **इयम्**–एषा । **स्वदोस्तुरी**–स्वस्य निजस्य दोर्बाहुः स्वदोस्तदेव तुरी निष्पन्नवस्त्रवेष्टनदण्डः स्वदोस्तुरी । **बहुम्**–अतिशयितम् । **तम्**–प्रसिद्धम् । **सितांशुकप्रभाविशेषम्**–सितं श्वेतञ्च तदंशुकम् अम्बरम्, वस्त्रमिति यावत् सितांशुकम् तस्य प्रभाविशेषः विभाऽतिशयः सितांशुकप्रभाविशेषस्तन्तथा **जनयांबभूव**–उत्पादयामास ॥ "अंशुकं वस्त्रमम्बरम्" ३।३३०॥ "भुजो बाहुः प्रवेष्टो दोर्बाहा" ३।२५३॥ इत्युभयत्राभिधानचिन्तामणिः ॥४७॥

विपक्षपक्षस्य पतद्भिरंशुकैः, पलायितौ केवलगात्रपालनात् ।
दिशां गणस्याऽऽवरणं रणांगणे, बभूव भूवल्लभरागशालिनः ॥४८॥

**अन्वयः**—*रणाङ्गणे, भूवल्लभरागशालिनः, विपक्षपक्षस्य, केवलगात्रपालनात्, पलायितौ, पतद्भिः, अंशुकैः, दिशाम्, गणस्य, आवरणम्, बभूव, ॥४८॥*

**वृत्तिः**—**रणाङ्गणे**–रणस्य युद्धस्य अङ्गणं प्राङ्गणं रणाङ्गणम् रणभूमिरित्यर्थः तस्मिँस्तथा ! "रणः कोणे क्वणे पुंसि, समरे पुन्नपुंसकम्" इति मेदिनी । "अजिरं प्राङ्गणं चत्वराऽङ्गणे" ४।७०॥ इत्यभिधानचिन्तामणिः "अङ्गणमित्यपि" तट्टीका । **भूवल्लभरागशालिनः**–भुवः पृथिव्या वल्लभः प्रियो दयित इति भूवल्लभः, भूपतिरित्यर्थः, श्रीविश्वसेन इति यावद्, तेन रागो मात्सर्यम्, भूवल्लभरागस्तेन शालते तच्छीलः भूवल्लभरागशाली "अजातेः शीले" ५।१।१५४॥ इत्यनेन णिन् प्रत्ययः, तस्य तथा । **विपक्षपक्षस्य**–शत्रुदलस्य । **केवलगात्रपालनात्**–गात्रस्य शरीरस्य पालनं रक्षणं गात्रपालनम् केवलम् गात्रपालनम् केवलगात्रपालनम्, तदुद्दिश्य इति केवलगात्रपालनाद् "गम्ययपः कर्माऽऽधारे" २।२।७४॥ इत्यनेन पञ्चमी । **पलायितौ**–नाशे । **पतद्भिः**–पातशीलैः । **अंशुकैः**–अम्बरैः वस्त्रैरिति यावत् । **दिशाम्**–आशानाम्, दिशानामिति यावद् । "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरकोशः । **गणस्य**–समूहस्य । "समूहश्चयः । कूटम् मण्डलचक्रवालपटलस्तोमा गणः" ६।४७॥ इत्यभिधानचिन्तामणिः । **आवरणम्**–आच्छादकम् । **बभूव**–अभवद् । सर्वेऽपि प्रतिपक्षाः पराजिता एतेनेति भावः ॥ ४८ ॥

शशाक कर्तुं नृपकेतुवायुभि-स्त्रुटद्भिरेवाहितसूत्रजालकैः ।
इतस्ततो नो चरणाद् रणान्तराद्, यशःपटं तद्भटचातुरी तुरी ॥४९॥

**अन्वयः**—*तद्भटचातुरी, तुरी, रणान्तरात्, इतस्ततः, चरणात्, नृपकेतुवायुभिः, एव, त्रुटद्भिः, आहितसूत्रजालकैः, यशःपटम्, कर्तुम्, नो, शशाक, ॥४९॥*

**वृत्तिः**—**तद्भटचातुरी**–तस्य विपक्षपक्षस्य भटा योधाः वीरा इति यावत्,तद्भटास्तेषां चातुरी चातुर्य्यम् तद्भटचातुरी'भटः स्यात्पुंसि वीरे च विशेषे पामरस्य च"इति मेदिनी। **तुरी**–निष्पन्नवस्त्रवेष्टनदण्डः,तद्भटचातुरी तुरीत्यर्थः। **रणान्तरात्**–अन्यो रणो युद्धम् रणान्तरन्तस्मात्तथा "मयूरव्यंसकेत्यादयः" ३।१।११६॥ इत्यनेन समासः। **इतस्ततः**–यत्र तत्र,अस्मात्स्थानात्तत्र तस्माच्च स्थानादत्रेत्येव रीत्येति भावः। **चरणात्**–चलनात् गमनादित्यावत्। **नृपकेतुवायुभिः**–नृपस्य श्रीविश्वसेनस्य केतवः पताकाः नृपकेतवस्तेषां वायवः समीरणा नृपकेतुवायवस्तैस्तथा। "केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि" इति मेदिनी। **एव**–अवधारणार्थकमव्ययम्। **त्रुटद्भिः**–खण्डितैः, भङ्गमाप्नुवद्भिरिति यावत्। **आहितसूत्रजालकैः**–सूत्राणां तन्तूनां जालकानि समुदयाः सूत्रजालकानि आहितानि स्थापितानि च तानि सूत्रजालकानि आहितसूत्रजालकानि पक्षे प्रतिपक्षाणामायोजितयुद्धार्थोपायद्दम्भकानीति यावत् तैस्तथा। **यशःपटम्**–यशो विजयाऽऽख्यकीर्तिरेव पटो वस्त्रम् यशः पटस्तन्तथा। **कर्तुम्**–विधातुम् विजयलक्ष्मीमासादितुमिति यावत्। **नो**–नहि। **शशाक**–अशकत्, शक्तोऽभूदिति यावत्। "अंशुकं वस्त्रमम्बरम्। पटः प्रोतः" ३।३३१॥ "अभावे त्वननो नहि', ६।१७५॥ ॥४९॥

प्रतीपभूपैरिव किं ततो भिया, विरुद्धताऽन्यैर्विषयैर्न्यषेध्यत।
तदर्तवोऽन्योन्यगुणानुगुण्यतः, सुखाय भूभृद्विषये बभूविरे ॥५०॥

**अन्वयः**—*प्रतीपभूपैः, इव, अन्यैः, विषयैः, ततः, भिया, विरुद्धता, न्यषेध्यत, किम्? तदा, ऋतवः, अन्योन्यगुणानुगुण्यतः, सुखाय, बभूविरे, ॥५०॥*

**वृत्तिः**—**प्रतीपभूपैः**–प्रतीपाः प्रतिकूलाश्च ते भूपा मेदिनीपतयः प्रतीपभूपास्तैस्तथा। **इव**–तुल्यैः। **अन्यैः**–अपरैः। **विषयैः**–विसिन्वन्ति बध्नन्ति विषयाः स्पर्शादय इन्द्रियार्था इति यावत् तैस्तथा। "स्पर्शादयस्त्विन्द्रियार्था विषया गोचरा अपि" ६।२०॥ इत्यभिधानचिन्तामणिः। अपीतिशेषः। **विरुद्धता**–विरुद्धस्य विपरीतस्य भावो विरुद्धता, विरुद्धधर्मत्वमिति यावत्। **न्यषेध्यत**–न्यवार्यत, निवारिता इति यावत्। **तदा**–श्रीविश्वसेनस्य राज्यकाले, प्रजां शासति विश्वसेने इति वा। **ऋतवः**–वसन्तप्रमुखा षडृतवः। "द्वौ द्वौ मार्गादिकावृतुः' २।६९॥ इत्यभिधानचिन्तामणिः। **अन्योन्यगुणानुगुण्यतः**–अन्योन्यस्य परस्परस्य गुणा धर्माः पुष्पविकासकामोद्दीपकत्वादयोऽन्योन्यगुणास्तेषामानुगुण्यमानुकूल्यम् अन्योन्यगुणानुगुण्यम् तस्मात्तथा। **सुखाय**–शर्म्मणे, सौख्यायेति यावत्। 'अथो शर्म निर्वृत्तिः। सातं सौख्यं सुखम्' ६।६॥

इत्यभिधानचिन्तामणिः । बभूविरे–जाताः । अतः परस्परगुणानुगुण्येन नृपतिं श्रीविश्वसेनमानन्दातिशयं प्रापयामासुरिति भावः ॥५०॥

मिथः सुरैरप्यसुरैर्भयातुरै–र्विरुध्धधर्मैरपि भेतृतोज्झिता ।
मणीगणच्छायमिहातपेऽप्यदो, विरोचते चैकपदे दिवि द्युतेः ॥५१॥

*अन्वयः—भयातुरैः, सुरैः, असुरैः, अपि, विरुद्धधर्मैः, अपि, मिथः, भेतृता, उज्झिता, च, इह, आतपे, अपि, अदः, मणीगणच्छायम्, द्युतेः, एकपदे, दिवि, विरोचते ॥५१॥*

वृत्तिः—भयातुरैः–भयेन भीत्या आतुरा विह्वला कातरा इति यावत्, भयातुरास्तैस्तथा । "भयं भीर्भीतिरातङ्क आशङ्का साध्वसं दरः" २।२१४॥ सुरैः–देवैः । असुरैः–सुरविरुद्धैर्दैत्यैर्दानवैः । अपि–समुच्चये । "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी । विरुद्धधर्मैः–विरुद्धः प्रतिकूलः धर्मोः स्वभावः कृत्यमिति यावद्, येषान्ते विरुद्धधर्मास्तैस्तथा । मिथः–परस्परम् । भेतृता–उपजापकारित्वम् भेद इति यावत् । उज्झिता–त्यक्ता । स्वाभाविकं वैरमपि विमुच्य समानभावमापन्नाः सञ्जाता इति भावः । च–पुनः । इह–नृपस्य राजधानीभूते हस्तिनापुरे । आतपे–दिवाकराऽऽलोके । "प्रकाशस्तेज उद्योत आलोको वर्चं आतपः २।१५॥ इत्यभिधानचिन्तामणिः । अपि–सम्भावनायाम् । अदः–किञ्चिद्विप्रकृष्टदृश्यमानम् । "अदसस्तु विप्रकृष्टे" इत्यभियुक्तोक्तेः । मणीगणच्छायम्–मणीनां रत्नानां गणः समूहो मणीगणस्तस्य छाया कान्तिः मणीगणच्छायम् । "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" इति मेदिनी । द्युतेः–विभातः, छवेरिति यावत् । "पाददीधितिकरद्युतिघृणी रुग्विरोककिरणत्विषित्विषः । भाःप्रभास्सुगभरितभानवः, भा मयूखमहसी छविर्विभा" २।१४॥ इत्यभिधानचिन्तामणिः । एकपदे–सद्यः तत्क्षण इति यावत् । दिवि–आकाशे । "विहाय आकाशमनन्तपुष्करैः । खं द्यौ दिवौ विष्णुपदं वियन्नभः" २।७७॥ इत्यभिधानचिन्तामणिः । विरोचते–द्योतते ॥५१॥

बलानुषक्तोऽप्यबलानुरागवान्, कृतानुकम्पोऽननुकम्पशासनः ।
अमित्रजिन्मित्रजिदोजसा स य–ल्लसत्प्रभावोऽनलसत्प्रभाववान् ॥५२॥

*अन्वयः—सः, यत्, बलानुषक्तः, अपि, अबलानुरागवान्, कृतानुकम्पः, अपि, अननुकम्पशासनः, लसत्प्रभावः, अपि, अनलसत्प्रभाववान्, (अतः) अमित्रजित्, (अपि) ओजसा, मित्रजित् ॥५२॥*

वृत्तिः—सः–प्रसिद्धः, श्रीविश्वसेन इत्यर्थः । यत्–यस्माद्धेतोः । बलानुषक्तः–बलेन सारेण शक्त्येत्यर्थः, सामर्थ्यविशेषेणेति यावत् अनुषक्तः, सम्बद्धः समन्वित इति यावत् बलानुषक्तः । "सारो बले स्थिरांशे च मज्जिन पुंसि जले धने । न्याय्ये क्लीबं त्रिषु वरे" इति मेदिनी । अपि–सम्भावनायाम् ।

**अबलानुरागवान्**–न बलं येषान्ते अबला दुर्बलास्तेषामनुरागः स्नेहः प्रेमेति यावत् अबलानुरागः, सोऽस्त्यस्येति अबलानुरागवान् "अतोऽनेकस्वरात्" ७।२।६।। इत्यनेन मत्वर्थे मतुप्रत्ययः । आर्तभयोपशान्तये बलवानित्यर्थः, अबलायां रमण्याम् वनितायामिति यावत् अनुरागोऽबलानुरागस्तद्वान् वा तथा "स्त्री नारी वनिता वधू. । वशा सीमन्तिनी वामा वर्णिनी महिलाऽबला । ३।१६८।। इत्यभिधानचिन्तामणिः । **कृतानुकम्पः**–कृता विहिता अनुकम्पा दया येन स कृतानुकम्पः–"अथ दया शूकः कारुण्यं करुणा घृणा । कृपाऽनुकम्पानुक्रोशः" ३।३३।। इत्यभिधानचिन्तामणिः । **अपि**–खलु । **अननुकम्पशासनः**–अनु पश्चात् कम्पते इत्यनुकम्पम् अस्थिरमित्यर्थः । न अनुकम्पमननुकम्पम्, अननुकम्पम् शासनम् अनुशासनम् साम्राज्यमिति यावत् यस्य सोऽननुकम्पशासनः । समयोचितदानशीलतया षाड्गुण्यप्रयोगेण शासनस्य व्यवस्थिततया सुस्थिरसाम्राज्यशालीतियावत् । **लसत्प्रभावः**–लसत् विलसत् शोभमान इति यावत् प्रभावस्तेजः प्रतापो वा अस्य स लसत्प्रभावः 'यत्कोशदण्डजं तेजः स प्रभावः प्रतापवत्" ३।४०४।। इत्यभिधानचिन्तामणिः । **अपि**–खलु । **अनलसत्प्रभाववान्**–अनलसन् आलस्यमप्राप्नुवन् स्फूर्तिमानिति यावत् प्रभावो यस्य सोऽनलसत्प्रभाववान्; अनलोऽग्निरिव सद् समीचीनः प्रभावस्तेजो यस्य सोऽनलसत्प्रभाववानिति वा । (अतः) **अमित्रजित्**–अमित्रान् प्रतिपक्षान् जयतीति अमित्रजित्–तादृशः (अपि) । **ओजसा**–बलेन तेजसा सामर्थ्येनेति यावत् । **मित्रजित्**–मित्रं सूर्यं जयतीति मित्रजित्, विरोधाभासालङ्कारः, विरुद्धमिव भासेत विरोधोऽसौ' इति साहित्यदर्पणः । आपाततो विरुद्धार्थावभासनम् "विरोधाभासः" इत्यर्थः । यः अमित्रजित् स मित्रजित्, कथम् असुहृदं यो जयति स सूर्यं कथं जयतीति विरोधः, परिहारस्तु पूर्वव्याख्यानादवसेयः ।।५२।।

क्षितीश्वरोऽप्यक्षितिभृद्धने जनेऽञ्जनेन मुक्तोऽपि जनेन संहितः ।
अमुक्तशूरोऽपि स मुक्तधीरधो–र्विचारदृक् चारदृगप्यवर्तत ।।५३।।

**अन्वयः**—*सः, क्षितीश्वरः, अपि, धने, जने, अक्षितिभृत्, अञ्जनेन, मुक्तः, अपि, जनेन, संहितः, अमुक्तशूरः, अपि, मुक्तधीरधीः, चारदृक् अपि, विचारदृक्, अवर्तत ।।५३।।*

**वृत्तिः**—**सः**–शान्तिनाथपिता, श्रीविश्वसेनः । **क्षितीश्वरः**–क्षितेः पृथिव्या ईश्वरः प्रभुः क्षितीश्वरः, "भूर्भूमिः पृथिवी पृथ्वी...क्षितिः क्षोणी क्षमाऽनन्ता" ४।२।। इत्यभिधानचिन्तामणिः । **अपि**–खलु । **धने**–अर्थे, वित्ते इति यावत् "धनं तु गोधने वित्ते" "अर्थो विषयार्थनयोर्धनकारणवस्तुषु" इत्युभयत्र मेदिनी । **जने**–लोके "प्रजायां वा लोको जनः प्रजा" ३।१६५।। इत्यभिधानचिन्तामणिः । धने जने इत्युभयत्र सप्तम्यर्थो विषयत्वम् अयं भावः—सप्तमी त्रिविधा नैमित्तिकी वैषयिका अभिव्यापिका च, तास्वत्र वैषयिका बोध्या, धनविषये जनविषये चेत्यर्थः । **अक्षितिभृत्**–क्षितिः क्षयोऽपचय इति यावत् "क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम्" इति मेदिनी । न क्षितिरक्षितिः, तां बिभर्ति धारयतीति अक्षितिभृत्, धनजनविषये परिपूर्ण इति भावः । **अञ्जनेन**–कज्जलेन । "अञ्जनं कज्जले चाक्तौ सौवीरे च रसाञ्जने" इति मेदिनी । **मुक्तः**–रहितः । **अपि**–खलु । **जनेन**–लोकेन प्रजया वा । **संहितः**–सहितः । **अमुक्तशूरः**–न मुक्तास्त्यक्ता

अमुक्ताः, अमुक्ताः शूरा भटाः वीरा इतियावद् येन स अमुक्तशूरः "शूरः स्याद् यादवे भटे" इति मेदिनी। **अपि**–खलु। **मुक्तधीरधीः**–मुक्तमित्यत्र भावे क्तप्रत्ययः, तथा च मुक्तपदस्य मुक्तिरित्यर्थः। एवञ्च मुक्ते मुक्तौ धीरा प्रवणा धीर्बुद्धिर्यस्य स मुक्तधीरधीः "धीरो धैर्य्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे। स्त्रियां प्रवण-तुल्यायाम्" इति मेदिनी। **चारदृक्**–चरन्ति गुप्तवेषेण वसुधामटन्तीति चराः, चरा एव चाराः स्वार्थि-कोऽणप्रत्ययः गूढचरा इत्यर्थः, त एव दृक् दृष्टिर्नयनमिति यावत् यस्य स चारदृक्। **अपि**–खलु। **विचारदृक्**–विगता चारा एव दृग्यस्य स विचारदृक् न केवलं चारचक्षुरपितु स्वयमपि सर्वराज्यतन्त्रवेत्ते-तिभावः। विचारं पश्यतीति विचारदृग्वा "चारैः पश्यन्ति राजानः" इति एतेन शास्त्रमर्मदर्शित्वं शत्रुजित्वं तेजस्वित्वञ्च दर्शितम्, विजिगीषुत्वञ्च द्योतितम् 'अरिर्मित्रमरेर्मित्रं मित्रमित्रमितः परम्। तथाऽरिमित्रमित्रञ्च विजिगीषोः पुरःसराः। पार्ष्णिग्राहस्ततः पश्चादास्कंदस्तदनन्तरम्। आसारावनयोश्चैव विजिगीषोश्च पृष्ठतः। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अनुग्रहे संहतानां व्यस्तानाञ्च वधे प्रभुः"॥ इति द्वादशराज-मण्डली, यस्य चारा दृक् तस्य विचाराः चारविरुद्धाः कथं दृगिति विरोधः, परीहारस्तु दर्शितदिशा द्रष्टव्यः ॥५३॥

**तदोजसस्तद्यशसः स्थिताविमौ, जगत्कृताऽऽगृह्य नियोजितौ हरी।**
**सुरासुरेशौ तदसारभावतः, समीरनुन्नौ दिवि वा गतौ भुवि ॥५४॥**

**अन्वयः**—*तदोजसः, तद्यशसः, स्थितौ, जगत्कृता, ता, आगृह्य, इमौ, हरी, नियोजितौ, तत् असारभावतः, सुरासुरेशौ, समीरनुन्नौ, (सन्तौ) दिवि, वा, भुवि, गतौ ॥५४॥*

**वृत्तिः**—**तदोजसः**–तस्य श्रीविश्वसेनस्य ओजो बलम् तेज इति यावत् तदोजस्तस्य तथा, श्री-विश्वसेनप्रतापस्येति यावत्। **तद्यशसः**–तस्य श्रीविश्वसेनस्य यशः कीर्तिस्तद्यशस्तस्य तथा। **स्थितौ**–अवस्थितौ। सत्यामितिशेषः। **जगत्कृता**–जगत् संसारं करोति विदधाति विरचयतीति यावद् जगत्कृत् "क्विप्" ५।१।१४८॥ इत्यनेन क्विप् प्रत्ययः, तेन तथा विधात्रा ब्रह्मणेति यावत्। **आगृह्य**–आ सर्वतोभावेन तेजः पदार्थं गृहीत्वेत्यर्थः। **इमौ**–सन्निकृष्टाविव दृश्यमानौ। "इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदोरूपम्" इत्याद्यभियुक्तोक्तेः। **हरी**–सूर्य्याचन्द्रमसौ। "हरिश्चन्द्रार्कवाताऽश्वशुकभेकयमाहिषु"। इति मेदिनी। **नियोजितौ**–नियुक्तीकृतौ। **तत्**–तस्माद्धेतोः। "हेतौ यत्तद्यतस्ततः" ६।१७३॥ इत्यभिधानचिन्तामणिः। **असारभावतः**–सारो बलम् न सारोऽसारस्तस्य भावोऽसारभावस्तस्मात्तथा बलराहित्येनेत्यर्थः। "सारो बले स्थिरांशे च, मज्जिनपुंसि जले धने। न्याय्ये क्लीबं त्रिषु वरे"। इति मेदिनी। **सुरासुरेशौ**–सुरा देवाश्च असुरा दैत्याश्च सुरासुराः, तेषामीशौ प्रभू सुरासुरेशौ "द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभि-सम्बद्ध्यते इति नियमात् सुरेशः, असुरेशश्चेत्यर्थः। **समीरनुन्नौ**–समीरेण वायुना नुन्नौ प्रक्षिप्तौ समीर-

तुलौ । वायुः समीरसमिरौ पवनाशुगौ नभःश्वासो नभस्वदऽनिलश्वसनाः समीरणः" ४।१७२।। इत्यभिधानचिन्तामणिः । ( सन्तौ ) दिवि–आकाशे । वा–अथवा । भुवि–पृथिव्याम् । गतौ–गतवन्तौ । गत्यर्थत्वात् कर्तरि क्तः प्रत्ययः ।।५४।।

**विधिः परे भूमिभृतः कृता मया, वृथेति चित्ते कुरुते यदा तदा ।**
**तदीयसाराश्रितविश्वसेनया, नयेन नित्यं व्रियते स भूपतिः ।।५५।।**

**अन्वयः**—*विधिः, "मया, परे, भूमिभृतः, वृथा, कृताः" इति, यदा, चित्ते, कुरुते, तदा, सः, भूपतिः, नयेन, तदीयसाराश्रितविश्वसेनया, नित्यम्, व्रियते ।।५५।।*

**वृत्तिः**—**विधिः**–विधाता, ब्रह्मेत्यर्थः । **मया**–मल्लक्षणेन, जगत्कर्त्रेत्यर्थः । **परे**–अन्ये 'परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले" इति मेदिनी । **भूमिभृतः**–भूमिं पृथिवीं बिभ्रति धारयन्तीति भूमिभृतो राजानः । **वृथा**–मुधा, निष्फलमित्यर्थः । "निष्फले तु वृथा मुधा" ६।१७०।। इत्यभिधानचिन्तामणिः । **कृताः**–विहिताः । **इति**–इत्येवंप्रकारेण । **यदा**–यस्मिन् काले । **चित्ते**–हृदये, अन्तःकरणे इति यावत् । "अन्तःकरणं मानसं मनः । हृच्चेतो हृदयं चित्तं स्वान्तं गूढपथोच्चले" ६।५।। इत्यभिधानचिन्तामणिः । **कुरुते**–करोति । **तदा**–तस्मिन् समये । **सः**–प्रसिद्धः । **भूपतिः**–राजा विश्वसेनः । **नयेन**–नीत्या । 'अथ नयो । नीतिद्यूतविशेषयोः" इति मेदिनी । **तदीयसाराश्रितविश्वसेनया**–विश्वा सर्वा च सेना कटकम् विश्वसेना, विश्वस्य जगतः सेना वा विश्वसेना । विश्वशब्दस्य सर्वजगदुभयार्थत्वात् तथा चाभिधानचिन्तामणिः—"सर्वं समस्तमन्यूनं समग्रं सकलं समम् । विश्वाशेषाखण्ड" ६।६८।। स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत् ६।१।। आश्रिता चासौ विश्वसेना आश्रितविश्वसेना, तेषां राज्ञामयम् तदीयः स चासौ सारो बलम् तदीयसारः, तेन आश्रितविश्वसेना तदीयसाराश्रितविश्वसेना तया । **नित्यम्**–ध्रुवम् । **व्रियते**–स्वामित्वेन स्वीक्रियते ।।५५।।

**यदारुणस्तापयतेऽतिदारुण–स्तलं भुवस्तत्र विधिः स्मृतावधिः ।**
**तनोति भानोः परिवेषकैतवाद्, निबन्धनम् तन्महसांऽहसाऽवशी ।।५६।।**

**अन्वयः**—*यदा, अरुणः, अतिदारुणः (सन्) भुवः, तलम्, तापयते, (तदा) अवशी, स्मृतावधिः, विधिः, भानोः, अंहसा, परिवेषकैतवात् तन्महसा, निबन्धनम्, तनोति ।।५६।।*

**वृत्तिः**—**यदा**–यस्मिन् समये । **अरुणः**–आदित्यः, सूर्य इति यावत् "आदित्यः सवितार्यमा-खरमहस्रोष्णांशुरंशुरविर्मार्तण्डस्तरणिर्गभस्तिररुणो भानुर्नभोऽहर्मणिः" २।९।। इत्यभिधानचिन्तामणिः । **अतिदारुणः**–अतिशयक्रूरः । ( सन् ) **भुवः**–पृथिव्याः । **तलम्**–अनूर्ध्वभागम् । "तलं स्वरूपेऽनूर्ध्वेऽस्त्री"

इति मेदिनी । तापयते—सन्तापयति । ( तदा—तस्मिन् समये ) अवशी—स्वतन्त्रः । स्मृतावधिः—स्मृतः—स्मरणविषयीकृतोवधिरवधिज्ञानं येन स तथा । विधिः—विधाता । भानोः—सूर्य्यस्य । अंहसा—पापेन । "दुष्कृतं दुरितं पापमेनः पाप्मा च पातकम्" ६।१६॥ इत्यभिधानचिन्तामणिः । परिवेषकैतवात्—परिवेषस्य परिधेः कैतवं छलं परिवेषकैतवन्तस्मात्तथा । "मण्डलं तूपसूर्य्यकम् । परिधिः परिवेषश्च" २।१५॥ "कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम्" ३।४२॥ इत्यभिधानचिन्तामणिः । तन्महसा—तस्य राज्ञो विश्वसेनस्य महस्तेजः तन्महस्तेन तथा । "मह उत्सवतेजसोः" । इति मेदिनी । निबन्धनम्—बन्धनम् । नेरुपसर्गस्यार्थोऽविवक्षितः । भानोरेवेति शेषः । तनोति—विस्तारयति, करोतीतियावत् ॥५६॥

भृशं यशःस्पर्धितया, तथाऽऽख्यया,-प्यधिक्रुधाऽऽकृष्टभरूपरूप्यकः ।
रुरुत्सुरुच्छृङ्खलतां करोत्ययं, तदा विधिः कुण्डलनां विधोरपि ॥५७॥

**अन्वयः**—*तथाऽऽख्यया, अपि, भृशम्, यशःस्पर्धितया, अधिक्रुधा, आकृष्टभरूपरूप्यका, उच्छृङ्खलताम्, रुरुत्सुः, अयम्, विधिः, तदा, विधोः, अपि, कुण्डलनाम्, करोति ॥५७॥*

**वृत्तिः**—तथाऽऽख्यया—तथानाम्ना, "गोत्रसंज्ञानामधेयाऽऽख्याऽऽह्वाऽभिख्याश्च नाम च २।१७४॥ इत्यभिधानचिन्तामणिः । अपि—सम्भावनायाम् । "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी । श्रीविश्वसेनो राजा, चन्द्रोऽपि नाम्ना राजा, अतः समाननाम्नाऽपि । राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ" इति मेदिनी । रजनीपतिश्चन्द्र एवेति । भृशम्—अतिशयेन । यशःस्पर्धितया—यशः कीर्तिं स्पर्धते तच्छीलमस्यस्येति यशःस्पर्धी "अजातेः शीले" ५।१।१५४॥ इत्यनेन ताच्छील्ये णिन् प्रत्ययः, तस्य भावो यशःस्पर्धिता, तया तथा, यशःस्पर्धयेति भावः । प्रकृतिजन्यबोधे प्रकारीभूतस्यैव भावप्रत्ययार्थत्वात् । चन्द्रस्येति शेषः । अतिक्रुधा—अतिशयक्रोधेन । क्रोधो मन्युः क्रुधा रुषः । क्रुत् कोपः प्रतिघो रोषो रुट् च २।२१३॥ इत्यभिधानचिन्तामणिः । आकृष्टभरूपरूप्यकः—आकृष्टाः—अपहृताः बलाद्धृता इति यावत् भरूपाः नक्षत्रात्मका रूप्यका येन स तथा । अन्योऽपि क्रुद्धः सन् पूर्वं समर्पितं वस्तु गृह्णाति, तथा विधिः पूर्वं चन्द्रमसे नक्षत्ररूपरूप्यकान् दत्तवानासीदधुना राजराजस्य श्रीविश्वसेनस्य यशःस्पर्धितया तस्मै कुप्यन् पुनस्ततो नक्षत्रात्मकरूप्यकानाकर्षतीति युक्तमेव । उच्छृङ्खलताम्—उद्गता शृङ्खला यतः स उच्छृङ्खलस्तस्य भाव उच्छृङ्खलता तान्तथा । रुरुत्सुः—रोद्धुमवरोद्धुमिच्छतीति रुरुत्सुः, निवारयितुकाम इति यावत् । अयम्—एषः । विधिः—विधाता ब्रह्मेति यावत् । तदा—विधोरौद्धत्यस्य परिहारकाले । विधोः—चन्द्रस्य । कुण्डलनाम्—वैयर्थ्यसूचकं रेखाविशेषम् । करोति—विदधाति । वृथालिखितग्रन्थस्य कुण्डलनया यथा लोपः क्रियते तथा विधिरपि श्रीविश्वसेनस्य स्थितौ वृथा प्रयोजनस्य चन्द्रस्य लोपं विधत्ते इति भावः । "कुण्डलनम्" इति यथामुद्रितपाठेऽपि न कश्चिदर्थे तात्पर्य्ये वा भेद इति बोध्यम् ॥५७॥

**अयं दरिद्रो भवितेति वैधसीं, क्रियां परामृश्य विशिष्य जापतः ।**
**विधेः प्रसत्त्या स्ववदान्यताकृते, नृपः सदार्थी भवितेत्यलीलिखत् ॥५८॥**

**अन्वयः**—"*अयम्, दरिद्रः, भविता*", *इति, वैधसीम्, क्रियाम्, विशिष्य, जापतः, परामृश्य, विधेः, प्रसत्त्या, स्ववदान्यताकृते, नृपः,* "*सदा, अर्थी, भविता*", *इति, अलीलिखत्* ॥५८॥

**वृत्तिः**—**अयम्**—सन्निकृष्टतया दृश्यमानो जनः । "इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्" इत्याद्यभियुक्तोक्तेः । **दरिद्रः**—दरिद्राति दुर्गतिमधिगच्छतीति दरिद्रः, दुर्विधः, अकिञ्चन इति यावत् । दरिद्रो दुर्विधो दुःस्थो दुर्गतो निःस्वकीकटौ । अकिञ्चनः" ३।२२॥ इत्यभिधानचिन्तामणिः । **भविता**—भविष्यति । **इति**—इत्येवंप्रकारेण । **वैधसीम्**—वेधसो ब्रह्मण इयं वेधसी तान्तथा । विधिसम्बन्धिनीमित्यर्थः । **क्रियाम्**—भाग्यरेखासूचनव्यापारम् । **विशिष्य**—विशेषतः । **जापतः**—इष्टमन्त्रादिजपक्रियातः । **परामृश्य**—सम्यगालोच्य । **विधेः**—ब्रह्मणः । **प्रसत्त्या**—प्रसादेन, प्रसन्नतयेति यावत् । **स्ववदान्यताकृते**—स्वस्य आत्मनो वदान्यता दानशीलता स्ववदान्यता, तस्याः कृते स्ववदान्यताकृते । "दानशीलः स वदान्यो वदन्योऽपि" ३।१५॥ इत्यभिधानचिन्तामणिः **नृपः**—नॄन् जनान् पाति रक्षतीति नृपो राजा, श्रीविश्वसेन इति यावत् । **सदा**—सर्वदा । **अर्थी**—अर्थो धनमस्त्यस्येत्यर्थी धनवान् । **भविता**—भविष्यति, "अर्थो विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये च शब्दानां निवृत्तौ च प्रयोजने" इति मेदिनी । **इति**—इत्येवंप्रकारेण । **अलीलिखत्**—विलिखितवान् ॥५८॥

**करात् करेऽर्थं निदधन् नृपोऽर्थिता-लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।**
**वदेत् सुधीर्योऽप्यवधीर्य्य तन्मतिं, दृढीचकार स्वमतं स्वतन्त्रधीः ॥५९॥**

**अन्वयः**—*अर्थिजनस्य, ललाटे, जाग्रतीम्, अर्थितालिपिम्, यः, सुधीः, वदेत्, करात्, करे, अर्थम्, निदधत्, स्वतन्त्रधीः, नृपः, तन्मतिम्, अपि, अवधीर्य्य, स्वमतम्, दृढीचकार* ॥५९॥

**वृत्तिः**—**अर्थिजनस्य**—अर्थोऽर्थनम् याचनमिति यावदस्त्यस्येत्यर्थी याचकः, स चासौ जनो लोकोऽर्थिजनः तस्य तथा । "अर्थी पुमान् याचके स्यात् सेवके च विवादिनि" 'अर्थो विषयार्थनयोः', इत्युभयत्र मेदिनी । "लोको जनः प्रजा" ३।१६४॥ इत्यभिधानचिन्तामणिः । **ललाटे**—भाले, भालस्थले इति यावत् "भाले गोध्यलिकाळीकललाटानि" ३।२३८॥ इत्यभिधानचिन्तामणिः । **जाग्रतीम्**—विलसन्तीम्, अवस्थितामिति यावत् । **अर्थितालिपिम्**—अर्थिताया याचनस्य बोधिकाऽर्थिताबोधिका सा चासौ लिपिरर्थितालिपिस्तान्तथा । अर्थिताबोधकवर्णविन्यासमिति यावत् । **यः**—यः कश्चित् । **सुधीः**—सु–शोभना धीर्बुद्धिर्यस्य स तथा । **वदेत्**—कथयेत् । ललाटे दृश्यमानेयं रेखा न किन्तु जाग्रती अर्थितालिपिरियमित्येवं यः पण्डितो

मन्यते कथयति वा । **करात्**–स्वहस्तात् । "पञ्चशाखः शयः शमः । हस्तः पाणिः करः" । ३।२५५॥ इत्यभिधानचिन्तामणिः । **करे**–निर्धनस्य हस्ते । **अर्थम्**–धनम् । 'अर्थो विषयार्थनयोर्धनकारणवस्तुषु' । इति मेदिनी । **निदधत्**–स्थापयन् । **स्वतन्त्रधीः**–स्वतन्त्राऽपरतन्त्रा धीर्बुद्धिर्यस्य स स्वतन्त्रधीः । **नृपः**–राजा श्रीविश्वसेनः । **तन्मतिम्**–तस्य ललाटेऽर्थितालिपिं मन्यमानस्य पण्डितस्य मतिर्बुद्धिस्तन्मतिस्तान्तथा । "मतिर्मनीषा बुद्धिर्धीर्धिषणा ज्ञप्तिश्चेतना" २।२२२॥ इत्यभिधानचिन्तामणिः । **अपि**–खलु । **अवधीर्य्य**–अवगणय्य, अवमान्येति यावत् । **स्वमतम्**–स्वस्य-निजस्य मतं सम्मतम् सिद्धान्तमिति यावत् स्वमतम् तत्तथा, "मतं तु सम्मते ज्ञाते" इति मेदिनी । **दृढीचकार**–सुस्थिरीकृतवान् ॥५९॥

## अलीकवृत्तेस्तदलीकवृत्तितां, नृपोऽर्थिनामक्षरसंततेस्ततः ।
## मृषा न चक्रेऽल्पितकल्पपादपः, स धातुधार्य्यार्थविपर्य्ययादिव ॥६०॥

**अन्वयः**—*ततः, अल्पितकल्पपादपः, सः नृपः, धातुधार्य्यार्थविपर्य्ययात् इव, अर्थिनाम्, अलीकवृत्तेः, अक्षरसंततेः, तदलीकवृत्तिताम्, मृषा, न, चक्रे ॥६०॥*

**वृत्तिः**—**ततः**–पूर्वोक्तदानप्राचुर्य्यवर्णनाद्धेतोः । **अल्पितकल्पपादपः**–अल्पितोऽल्पीकृतः कल्पपादपः कल्पवृक्षो येन सोऽल्पितकल्पपादपः पराजितकल्पवृक्ष इति यावत् । **सः**–प्रसिद्धः । **नृपः**–राजा, श्रीविश्वसेनः । **धातुधार्य्यार्थविपर्य्ययात्**–धातुना अर्थधातुना धार्य्यः धरितुं योग्यः धातुधार्य्यः स चासौ अर्थोऽभिधेयः धातुधार्य्यार्थः, अर्थधातुधार्य्ययाचनरूपोऽर्थः, तस्य विपर्य्ययो वैपरीत्यम् अयाचनमित्यर्थः धातुधार्य्यार्थविपर्य्ययस्तस्मात्तथा । अथवा धातुना रूप्यकादिना धार्य्यः करणीयो धातुधार्य्यः, अर्थस्य याच्ञारूपस्य विपर्य्ययोऽर्थविपर्य्ययः, धातुधार्य्यश्च सार्थविपर्य्ययो धातुधार्य्यार्थविपर्य्ययस्तस्मात्तथा इव यथेत्येवमर्थोऽप्यवसेयः । यद्वा–"अयं दरिद्रो भविता" इत्यत्र धातुधार्य्यस्य दारिद्र्यभवनरूपस्यार्थस्य विपर्य्ययो धातुधार्य्यार्थविपर्य्ययो दारिद्र्यस्य अभवनमित्येवंरूपस्तस्मात्तथेवेति । **इव**–यथा । **अर्थिनाम्**–याचकानाम् । **अलीकवृत्तेः**-अल्यते भूष्यते तिलकादिभिरित्यलीकं ललाटम् । तत्र वृत्तिर्वर्तनमवस्थानं यस्याः साऽलीकवृत्तिस्तस्यास्तथा । "भाले गोध्यलिकालीकललाटानि" ३।२३७॥ इत्यभिधानचिन्तामणिः । **अक्षरसंततेः**–अक्षराणां वर्णानां संततिर्विस्तरोऽक्षरसंततिस्तस्यास्तथा । **तदलीकवृत्तिताम्**–तत्र भालेऽलीकमसत्यं वृत्तिर्वर्तनं स्थितिरिति यावत् तदलीकवृत्तिस्तस्याभावस्तदलीकवृत्तिता तान्तथा । "अलीकमप्रियेऽपि स्याद् दिव्यसत्ये नपुंसकम्" इति मेदिनी । **मृषा**–मिथ्या । **न**–नहि । **चक्रे**–कृतवान् ॥६०॥

## भवेन्न संसारपदं ममाश्रये, कदापि संसारवतां विदूरतः ।
## कृतः क्षितीशेन धनी वनीपकः, प्रणीय दारिद्र्यदरिद्रतां नरः ॥६१॥

*अन्वयः—मम, आश्रये, कदापि, विदूरतः ( अपि ) संसारवताम्, संसारपदम्, न, भवेत्, क्षितीशेन, दारिद्र्यदरिद्रताम्, प्रणीय, वनीपकः, नरः, धनी, कृतः ॥६१॥*

**वृत्तिः—मम**–राज्ञो विश्वसेनस्य । **आश्रये**–आश्रयणम् आश्रयः, संश्रयणम् सेवनमिति यावत् तस्मिँस्तथा। **कदापि**–कस्मिंश्चित्समयेऽपि । **विदूरतः**–विशेषण दूरं विदूरन्तस्मात्तथा । ( अपि ) **संसारवताम्**–संसरणं संसारः सोऽस्त्येषामिति संसारवन्तस्तेषान्तथा। **संसारपदम्**–संसार एव पदम् आस्पदम् स्थानमिति यावत् ससारपदम् "स्थानन्तु पदमास्पदम्" ४।५४॥ इत्यभिधानचिन्तामणिः। **न**–नहि **भवेत्**–स्यात् । **क्षितीशेन**–क्षितेः पृथिव्या ईशः क्षितीशस्तेन तथा, राज्ञा श्रीविश्वसेनेनेति यावत् । **दारिद्र्यदरिद्रताम्**–दरिद्रस्य भावो दारिद्र्यन्तस्यैव दरिद्रताऽकिञ्चनत्वमिति दारिद्र्यदरिद्रता तान्तथा । **प्रणीय**–सम्पाद्य । **वनीपकः**–वनुते याचते इति वनीपकः "कीचकपेचक" ( उणादि ३३ ) इत्यादिशब्दादकान्तो निपात्यते याचक इत्यर्थः । "याचकस्तु वनीपकः" ३।५११॥ इत्यभिधानचिन्तामणिः । **नरः**–मानवः । **धनी**–धनं वित्तमस्त्यस्येति धनी "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे इन्प्रत्ययः । **कृतः**–विहितः । दानप्राचुर्य्येण दारिद्र्यस्यैव दरिद्रतामभावरूपतां विधाय याचकचरोऽपि जनस्तेन धनधान्यसम्पत्समन्वितः कृत एवञ्च सुखीभूतः स निराबाधं धर्मं विधाय निर्वृतो भवेदथ चार्थार्थं गृहाद् गृहमपि संसरणं न कुर्यादिति भावः ॥ ६१ ॥

## विभज्य मेरुर्न यदर्थिसात्कृतो, मया रयाद् दिग्विजयान्तरायकृत् । इतीव विज्ञप्य विधौ महोदधौ, निमज्जयामास गिरिर्गिरिं दिवः ॥६२॥

*अन्वयः—यत्, मया, रयात्, दिग्विजयान्तरायकृत्, मेरुः, विभज्य, अर्थिसात्, न कृतः, इतीव, विधौ, विज्ञप्य, गिरिः, दिवः, गिरिम्, महोदधौ, निमज्जयामास ॥६३॥*

**वृत्तिः—यत्**–यस्मात्कारणात् । 'हेतौ यत्तद्यतस्ततः" ६।१७३॥ इत्यभिधानचिन्तामणिः । **मया**–मल्लक्षणेनापि वदान्येन । **रयात्**–वेगात् । "रंहस्तरसी तु रयः स्यदः" इत्यमरकोशः । **दिग्विजयान्तरायकृत्**–दिक्षु दिशासु विजयो दिग्विजयस्तत्र अन्तरायो विघ्नो दिग्विजयान्तरायस्तं करोतीति दिग्विजयान्तरायकृत् । **मेरुः**–सुमेरुपर्वतः । विभज्य-खण्डशो विधाय । **अर्थिसात्**–याचकायत्तः, अर्थ्यधीनो देयो वा । **न**–नहि **कृतः**–विहितः । **इतीव**–इत्येवं खलु । **विधौ**–ब्रह्मणि विधातरीति यावत् । "विधिर्ना नियतौ काले विधाने परमेष्ठिनि" इति मेदिनी । **विज्ञप्य**–विनिवेद्य । **गिरिः**–पूज्यः, श्रीविश्वसेन इति यावत्, "गिरिः पूज्येऽक्षिरुजि कन्दुके शैले गैरेयके गीर्णवपि" इत्यनेकार्थः । **दिवः**–स्वर्गस्य । "स्वर्गस्त्रिविष्टपं द्योदिवौ" २।१॥ इत्यभिधानचिन्तामणिः । **गिरिम्**–पर्वतम् । स्वर्गसम्बन्धिपर्वतम् रत्नसानुमिति यावत् । **महोदधौ**–महांश्चासावुदधिः समुद्रो महोदधिस्तस्मिँस्तथा । **निमज्जयामास**–न्यमज्जयत् ॥६२॥

**कलङ्कितः प्रागपि सेतुकेतुना-न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।**
**कृतो निवासाय महीस्पृशामतो, व्यशोषयत्तं वडवाग्निना नृपः ॥६३॥**

**अन्वयः**—*प्राक्, सेतुकेतुना, कलङ्कितः, अपि, सिन्धुः, उत्सर्गजलव्ययैः, महीस्पृशाम्, निवासाय, मरुः, न, कृतः, अतः, नृपः, तम्, वडवाग्निना, व्यशोषयत् ॥६३॥*

**वृत्तिः**—**प्राक्**-पूर्वम् । **सेतुकेतुना**-सेतुरालिरेव केतुर्लक्ष्म यस्यासौ वा सेतुकेतुस्तेन तथा । "सेतुर्नाली कुमारके" इति मेदिनी "केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि" इति च । "कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्" इत्यमरकोशः । **कलङ्कितः**-कलङ्कश्चिह्नम्, अपवादो वा सञ्जातोऽस्येति कलङ्कितः" तदस्य सञ्जातं तारकादिभ्य इतः" ७।१।१३८। इत्यनेन इतः प्रत्ययः । **अपि**-खलु । **सिन्धुः**-समुद्रः । "सिन्धूदन्वन्तौ मितद्रुः समुद्रः" ४।१३९। इत्यभिधानचिन्तामणिः । **उत्सर्गजलव्ययैः**-जलानां व्यया जलव्ययाः, उत्सर्गे दाने क्रियमाणे जलव्यया उत्सर्गजलव्ययास्तैस्तथा । **महीस्पृशाम्**-महीं पृथिवीं स्पृशन्तीति महीस्पृशस्तेषान्तथा प्राणिनामित्यर्थः । **निवासाय**-निवसनहेतवे, समवस्थानायेत्यर्थः । **मरुः**-धन्वा, मरुप्रदेशः इत्यर्थः । "मरुर्धन्वा" ४।६। इत्यभिधानचिन्तामणिः । **न**-नहि । **कृतः**-विहितः । **अतः**-अस्माद्धेतोः । **नृपः**-राजा । श्रीविश्वसेन इत्यर्थः । **तम्**-सेतुकेतुना कलङ्कितम् प्रसिद्धमिति वा । **वडवाग्निना**-वाडवेन, वडवानलेनेतियावत् । "और्वस्तु वाडवो वडवानलः" इत्यमरकोशः । **व्यशोषयत्**-विशोषितवान् ॥ ६३ ॥

**न चौर्य्यचर्य्यापहृताभिधानतः, पुराणवृत्तौ न दरिद्रमुद्रणा ।**
**अमानि तत्तेन निजायशोयुगं, भ्रुवोर्द्वयस्य व्यपदेशलेशतः ॥६४॥**

**अन्वयः**—*अभिधानतः, चौर्य्यचर्य्या, न, अपहृता, पुराणवृत्तौ दरिद्रमुद्रणा, न, तेन, तत्, भ्रुवोः, द्वयस्य, व्यपदेशलेशतः, निजायशोयुगम्, अमानि, ॥६४॥*

**वृत्तिः**—**अभिधानतः**-अभिधीयते कथ्यतेऽनेनेत्यभिधानम् नाम, श्रीविश्वसेनेतिनामधेयम् तस्मात्तथा । "आख्याऽऽह्वे अभिधानञ्च नामधेयञ्च नाम च" इत्यमरकोशः । नाममात्रेणेत्यर्थः । **अभिधानतः**-नामतः । यथा "चौर्य्यचर्य्या" इति पदमथ कोऽपि न जानीयादित्यर्थः । **चौर्य्यचर्य्या**-चरणं चर्या आचरणमित्यर्थः "समज-निपत्-निषद्-शीङ-सुग्-विदि-चरि-मनीणः" ५।३।९९। इत्यनेन क्यप्प्रत्ययः, चौरस्य स्तेनस्य भावश्चौर्य्यम् तस्य चर्या चौर्य्यचर्य्या । "चौरस्तु प्रतिरोधकः । दस्युः पाटच्चरः स्तेनस्तस्करः पारिपन्थिकः" ३।४५। इत्यभिधानचिन्तामणिः । **न**-नहि । **अपहृता**-दूरीकृता, तन्नामप्रभावादेव चौर्य्यचर्य्या न विनष्टेति भावः । **पुराणवृत्तौ**-पुरापि न नवं पुराणम्, सर्गादिपञ्चलक्षणम् "सर्गश्च प्रतिसर्गश्च

वंशो मन्वन्तराणि च । वंशानुवंशचरितं पुराणं पञ्चलक्षणम्" ।२।१६६।। इत्यभिधानचिन्तामणिः । तदेव-वृत्तिर्निबन्धः पुराणवृत्तिस्तस्यान्तथा "निबन्धवृत्ती अन्वर्थे २।१६१।। इत्यभिधानचिन्तामणिः । दरिद्रमुद्रणा-भावप्रधानत्वात् दारिद्र्यमुद्रा । न–नहि । अपहृतेतिशेषः । तेन–राज्ञा श्रीविश्वसेनेनेत्यर्थः । तत्–चोर्य्यचर्य्यापहरणदरिद्रमुद्रणाभावैतद्द्वयम् । भ्रुवोः–नेत्रोपरिस्थितयो रोमपद्धत्योः । द्वयस्य–द्वावयवावस्येति द्वयम् द्वितयमित्यर्थः तस्य तथा । व्यपदेशलेशतः–व्यपदिश्यते इति व्यपदेशोऽतद्रूपस्य ताद्रूप्यम् छलमित्यर्थः तस्य लेशः कणो व्यपदेशलेशस्तस्मात्तथा । "कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम् । व्यपदेशो मिषं लक्षं निभं व्याजः" ३।४२।। इत्यभिधानचिन्तामणिः । निजायशोयुगम्–निजस्य स्वस्य अयशोऽकीर्तिर्निजा-यशस्तस्य युगम्–द्वयम् निजायशोयुगन्तत्तथा । "निजः पुनः । आत्मीयः स्वः स्वकीयश्च" ३।२२६।। इत्य-भिधानचिन्तामणिः । अमानि–मेने । स्वीकृतमिति यावत् ।।६४।।

**यशःप्रतापानुगपुष्पदन्तयोर्मयो–र्जितेनापहृतं न दुस्तमः ।**
**तदेव मेने नृपतिः स्वदुर्यशो, द्विफालबद्धाश्चिकुराः शिरस्थितम् ।।६५।।**

**अन्वयः**—*ऊर्जितेन, मया, यशःप्रतापानुगपुष्पदन्तयोः, दुस्तमः, न, अपहृतम्, नृपतिः, तत्, द्विफालबद्धाः, चिकुराः, एव, शिरःस्थितम्, स्वदुर्यशः, मेने, ।।६५।।*

**वृत्तिः**—ऊर्जितेन–ऊर्जं बलं सञ्जातमस्येत्यूर्जितः "तदस्य सञ्जातं तारकादिभ्य इतः" ७।१।१३८।। "इत्यनेन इतः प्रत्ययः, तेन तथा सर्वविधसामर्थ्यशालिनेत्यर्थः । मया–मल्लक्षणेन जनेन । यशःप्रतापानुग-पुष्पदन्तयोः–पुष्पे इव पुष्पे दन्ताविव दन्तौ, पुष्पे च ते दन्तौ च पुष्पदन्तौ, शशिभास्करौ, सूर्याचन्द्र-मसाविति यावत् "पुष्पदन्तौ पुष्पवन्तावेकोक्त्या शशिभास्करौ" २।३८।। इत्यभिधानचिन्तामणिः, यद्विश्व-वस्तः-"रविशशिनौ पुष्पदन्ताख्याविति" इति तदुक्तं कोषाभिधानचिन्तामणिटीका । यशः कीर्तिः प्रतापः प्रभावश्च यशःप्रतापौ तावनुगच्छतोऽनुसरत इति यशःप्रतापानुगौ तौ च तौ पुष्पदन्तौ यशःप्रतापानुगपुष्प-दन्तौ तयोस्तथा मदीययशःप्रतापानुगामिनोः सूर्याचन्द्रमसोरित्यर्थः । दुस्तमः, "स्वर्भाणुस्तु विधुन्तुदः । तमो राहुःसैंहिकेयो भरणीभूः" २।३५।। इत्यभिधानचिन्तामणिः । न–नहि । अपहृतम्–दूरीकृतमित्यर्थः । दुष्टमहाग्राहोः सकाशात्तौ नाभिरक्षिताविति भावः । तत्–तस्मात् कारणात् यशःप्रतापानुगत्वेन स्वाश्रितयोरपि शशिभास्करयो राहोरभिरक्षणाभावादिति यावत् । नृपतिः–नृणां नराणाम् मनुष्याणामिति यावत् पतिः स्वामी नृपतिः, नरेन्द्र इत्यर्थः । "अधिपस्त्वीशो नेता परिवृढोऽधिभूः । पतीन्द्रस्वामिनाथार्य्याः" ३।२२।। इत्यभिधानचिन्तामणिः । द्विफालबद्धाः–द्वाभ्यां फालाभ्याम् भागाभ्याम् बद्धाः संयमिता द्विफालबद्धाः । चिकुराः–केशाः । "तज्जाः केशास्तीर्थवाकाश्चिकुराः कुन्तलाः कचाः" ३।२३१।। इत्यभिधानचिन्तामणिः । एव–अवधारणार्थकमव्ययम् । शिरःस्थितम्–शिरसि सीमन्तस्योभयभागे स्थितमवस्थितम् विराजितमिति यावत् । स्वदुर्यशः–दुष्टं यशो दुर्यशः, अकीर्तिरित्यर्थः, स्वस्य आत्मनो दुर्यशः स्वदुर्यशस्तत्तथा । "स्वो

ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्यमरनानार्थः । मेने-मन्यते स्म । सीमन्तस्योभयभागे स्थिताः केशा न भवन्ति किन्त्वकीर्तिरेवेतिभावः ॥६५॥

**अजस्रमभ्यासमुपेयुषा समं, कलत्ररत्नेन मुदाऽचिराह्वया ।**
**यथेच्छयाऽसौ विषयोपभोगत-श्चिराय राज्यं विदधे भुजौजसा ॥६६॥**

**अन्वयः**—*असौ, अजस्रम्, अभ्यासम्, उपेयुषा, अचिराह्वया, कलत्ररत्नेन, मुदा, यथेच्छया, विषयोपभोगतः, भुजौजसा, चिराय, राज्यम्, विदधे, ॥६६॥*

**वृत्तिः**—**असौ**—अयम् भगवतः श्रीशान्तिनाथस्य पिता राजाधिराजः श्रीमान् विश्वसेन इत्यर्थः । **अजस्रम्**—न जस्यतीत्येवंशीलमजस्रम् 'रम्यजस' ५।२।७९॥ इत्यादिना रः प्रत्ययः । सततमित्यर्थः । "अनारतं त्वविरतं संसक्तं सततानिशे । नित्यानवरताजस्रास्यकाश्रान्तानि" ६।१०७॥ इत्यभिधानचिन्तामणिः । **अभ्यासम्**—काव्यकवनशास्त्रमननव्यसनम् । **उपेयुषा**—समाधिगतवता प्राप्तवतेतियावत् "अभ्याशम्" इति पाठे श्रीविश्वसेनसान्निध्यमित्यर्थः । "पार्श्वं समीपं सविधं ससीमाभ्याशं सवेशान्तिकसन्निकर्षाः । सन्निकृष्टसमर्य्यादाभ्यर्णान्यासन्नसन्निधी" ६।८६॥ इत्यभिधानचिन्तामणिः । "सन्निधिरेव सान्निध्यम्" स्वार्थेऽण् प्रत्यय इति बोध्यम् । **अचिराह्वया**—"अचिरा" इत्याह्वा अभिधानं यस्याः सा अचिराह्वा तया तथा । "आख्याह्वे अभिधानञ्च, नामधेयञ्च नाम च' इत्यमरकोशः । **कलत्ररत्नेन**—कडति माद्यतीति कडत्रम् लत्वे कलत्रम् पत्नीत्यर्थः, कलत्रं रत्नमिवेति कलत्ररत्नम् "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२॥ इत्यनेन समासः तेन तथा । पत्नीश्रेष्ठेनेति यावत् । "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" इति मेदिनी, "पत्नी सहचरी पाणिगृहीती गृहिणी गृहा द्वितयोढा कलत्रं च" ३।१७७॥ इत्यभिधानचिन्तामणिः । **मुदा**—हर्षेण । संमदेनेतियावत् "मुत्प्रीतिः प्रमदो हर्षः प्रमोदानन्दसम्मदाः" इत्यमरकोशः । **यथेच्छया**—यथाकामम् । **विषयोपभोगतः**—विषयाणां स्रक्चन्दनवनितादीनामुपभोगोविषयोपभोगस्तस्मात्तथा । **भुजौजसा**—भुजयोर्बाह्वोरोजो बलम् भुजौजस्तेन तथा । "ओजस्दीप्रावष्टम्भे प्रकाशबलयोरपि" इति मेदिनी । **चिराय**—दीर्घकालम् यावत् । "चिराय चिररात्राय चिरस्य च चिराच्चिरम् । चिरेण दीर्घकालेऽर्थे" ६।१६८॥ इत्यभिधानचिन्तामणिः । **राज्यम्**—राज्ञः कर्म राज्यम् सौराज्यमिति यावत् । **विदधे**—धारयामास अचिराह्वया समं चिराय कथं स्यादुपभोग इति विरोधः परिहारस्तु स्पष्ट एव ॥६६॥

**नियोगिनीं न्यस्य धुरं भुवः प्रभु-र्मुदैव देवः कविना बुधेन च ।**
**यथागमं भावनया नयानयं, पुपोष सर्वत्र पवित्रचेतसा ॥६७॥**

**अन्वयः**—*प्रभुः, देवः, कविना च बुधेन (सह) मुदा, एव, भुवः, नियोगिनीम्, धुरम्, न्यस्य, (स्थितः) अयम्, पवित्रचेतसा, भावनया, नयान्, सर्वत्र, यथागमम्, पुपोष, ॥६७॥*

**वृत्तिः**—**प्रभुः**—प्रभवति सर्वोत्कृष्टतया भवतीति प्रभुः स्वामी जगत इतिशेषः । "शंसंस्वयंविप्राद् भुवो डुः" ५।२।८४।। इत्यनेन डुः प्रत्ययः । "पतीन्द्रस्वामिनाथार्याः प्रभुर्भर्तेश्वरः विभुः" ३।२३।। इत्यभिधानचिन्तामणिः । **देवः**—राजा श्रीविश्वसेन इत्यर्थः । **कविना**—कौति कुवतीति वा कविः । काव्यकर्ता विचक्षण इति यावत् तेन तथा "विद्वान् सुधीः कविर्विचक्षणलब्धवर्णाः" ३।५।। इत्यभिधानचिन्तामणिः । **च**—पुनः । "चान्वाचयसमाहारेऽप्यन्योन्यार्थे समुच्चये" इति मेदिनी । **बुधेन**—बुध्यते शब्दार्थतत्त्वमिति बुधो वैयाकरणः पण्डित इत्यर्थस्तेन तथा । ( सह ) तैः सहवासादिजनितयेत्यर्थः । **मुदा**—प्रीत्या । आनन्देनेत्यर्थः । **एव**—अवधारणार्थकमव्ययम् । **भुवः**—पृथिव्याः । **नियोगिनीम्**—नियन्त्रिणीम् सञ्चालिकामिति यावत् । **धुरम्**—भारम् । **न्यस्य**—संस्थाप्य । ( स्थितः ) **अयम्**—एषः, श्रीमान् विश्वसेन इत्यर्थः । **पवित्रचेतसा**—पवित्रं विशुद्धं चेतोऽन्तःकरणं यस्यां सा पवित्रचेतास्तया तथा "अन्तःकरणं मानसं मनः । हृच्चेतो हृदयं चित्तं स्वान्तं गूढपथोच्चले" ६।५।। इत्यभिधानचिन्तामणिः । **भावनया**—अन्तःकरणवृत्तिसंस्कारविशेषेण वृत्तिरत्र सामानाधिकरण्यसम्बन्धेनावगन्तव्यम् । यद्वा—भावना परमेश्वरविषयकं ध्यानम् मुक्तिमार्गपर्यालोचनं वा तया तथा । "भावना तु नवा ध्याने पर्यालोचेऽधिवासने" इति मेदिनी । **नयान्**—नीतीः । न्यायानिति यावत् । "अथ नयो नीतिद्यूतविशेषयो" इति मेदिनी । **सर्वत्र**—स्वस्मिन् स्थाने विषये वा । **यथागमम्**—आगमं शास्त्रमनतिक्रम्य यथागमम् "योग्यतावीप्साऽर्थानतिवृत्तिसादृश्ये" ३।१।४०।। इत्यनेन अव्ययीभावसमासः । "आगमः शास्त्र आगतौ" इति मेदिनी । **पुपोष**—अपुषत् पोषितवानितियावत् । कविबुधौ शुक्रशशिजौ महावपि राज्यरक्षकावत्रेति व्यज्यते ।।६७।।

## निरन्तरं स्निग्धतरान्तरात्मना, तया रमण्याऽनुभवन् सुखं रतेः ।
## दधौ पटीयान् समयं नयन्नयं, रसेन केलिं कलहंसवद् मधौ ।।६८।।

**अन्वयः**—*स्निग्धतरान्तरात्मना, तया, रमण्या, निरन्तरम्, रतेः, सुखम्, अनुभवन्, रसेन, समयम्, नयन्, पटीयान्, अयम्, मधौ, कलहंसवत्, केलिम्, दधौ ।।०।।*

**वृत्तिः**-**स्निग्धतरान्तरात्मना**—अतिशयेन स्निग्धो वत्सलः, स्नेहान्वितो वा स्निग्धतरः, अन्तर्भव आन्तरः, स्निग्धतर आन्तर आत्मा स्वभावो यस्याः सा स्निग्धतरान्तरात्मा तया तथा । "स्निग्धस्तु वत्सलः" ३।१४२।। इत्यभिधानचिन्तामणिः । "आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि" **तया**—प्रसिद्धया अचिराख्यया । **रमण्या**—कान्तया नितम्बिन्या वा । "विशेषास्तु कान्ता भीरुर्नितम्बिनी । प्रमदा सुन्दरी रामा रमणी ललनाङ्गना" ३।१६६।। इत्यभिधानचिन्तामणिः । **निरन्तरम्**—अनवरतम्, सततमिति यावत् । **रतेः**-अनुरागस्य सुरतस्य वा । "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः" इति मेदिनी । **सुखम्**—सौख्यम् । **अनुभवन्**—सम्प्राप्नुवन् । **रसेन**—अनुरागेण । "रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रव-

रागयोः" इति मेदिनी । **समयम्**—कालम् । "समयाः शपथा-चारकालसिद्धान्तसंविदः" इत्यमरकोशः । **नयन्**—अतिवाहयन् । **पटीयान्**—अतिशयेन कविस्वाद्यभ्यासवान् इत्यर्थः । पटुश्चतुरः पटीयान् । **अयम्**—असौ । श्रीविश्वसेननृपतिः । **मधौ**—वसन्ते । "मधुः पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्य-भिच्चैत्रे" इति मेदिनी । **कलहंसवत्**—कलध्वनयो हंसाः कलहंसाः कादम्बास्तैस्तुल्यः कलहंसवत् । "काद-म्बास्तु कलहंसाः पक्षैः स्युरतिधूसरैः" ४।३९३॥ इत्यभिधानचिन्तामणिः । **केलिम्**—लीलाम् । "केलिर्द्रवः परीहासः क्रीडा लीला च नर्म च" ३।२१६॥ इत्यभिधानचिन्तामणिः । **दधौ**—धारयामास ॥६८॥

## ददद् धनं स्वेष्टमयं महाशयः, स्वयं कलाकेलिरसालयीभवन् ।
## श्रिया चकारापरपद्मया समं, दिनेश्वरश्रीरुदयं दिने दिने ॥६९॥

**अन्वयः**—*स्वेष्टम्, धनम्, ददत्, स्वयम्, कलाकेलिरसालयीभवन्, महाशयः, अयम्, दिनेश्वरश्रीः ( सन् ) अपरपद्मया, श्रिया, समम्, दिने दिने, उदयम्, चकार ॥०॥*

**वृत्तिः**—**स्वेष्टम्**—स्वस्य आत्मन इष्टमभिमतं स्वेष्टन्तत्तथा । **धनम्**—वित्तम् । **ददत्**—याचकेभ्यो वितरन् । **स्वयम्**—आत्मना । **कलाकेलिरसालयीभवन्**—कला विज्ञानञ्च केलिर्लीला च कलाकेली तयो रसोऽनुरागः कलाकेलिरसः आलीयतेऽत्रेति आलयः आश्रयः न आलयः-अनालयः अनालय आलयः सम्पद्यमानः आलयीभवन्, कलाकेलिरसस्य आलयीभवन् कलाकेलिरसालयीभवन् । **महाशयः**—महान् विशाल आशयोऽभिप्रायो यस्य स महाशयः । "आशयः स्यादभिप्राये पनसाधारयोरपि" इति मेदिनी । **अयम्**—एषः । **दिनेश्वरश्रीः**—दिनस्य दिवसस्य ईश्वरः प्रभुर्दिनेश्वरः सूर्य्यः, तद्वत् श्रीः शोभा यस्य स दिनेश्वरश्रीः सूर्य्य-समानकान्तिमानित्यर्थः । **अपरपद्मया**—अपरा द्वितीया पद्मा लक्ष्मीः अपरपद्मा तया तथा । "लक्ष्मीः पद्मा रमा या मा ता सा श्रीः कमलेन्दिरा" २।१४०॥ इत्यभिधानचिन्तामणिः । **श्रिया**—सहधर्मिण्या अचिराख्यया भार्य्यया । **समम्**—सह । **दिनेदिने**—प्रतिदिनम् । वीप्सायां द्विर्भावः । **उदयः**—अभ्युदयम् समुन्नतिमिति यावत् "उदयस्तु पुमान् पूर्वपर्वते च समुन्नतौ" इति मेदिनी । **चकार**—कृतवान् विदधाविति यावत् ॥६९॥

## अधोविधानात् कमलप्रवालयोः, फणागणैः स्वैर्मृदुलैर्भुवं वहन् ।
## अहस्यतेलापतिना सुभोगिना-मशेषशेषः खलु सैष शेषराट् ॥७०॥

**अन्वयः**—*कमलप्रवालयोः, अधोविधानात् स्वैः, मृदुलैः, फणागणैः, भुवम्, वहन्, सुभोगिनाम्, अशेषशेषः, सः, एषः, शेषराट्, खलु, इलापतिना, अहस्यत ॥*

**वृत्तिः**—**कमलप्रवालयोः**—कमलं पद्मम् प्रवालो नवपल्लवो विद्रुमो वा कमलञ्च प्रवालश्च कमलप्रवालौ तयोस्तथा । **अधोविधानात्**—अरुणत्वस्निग्धत्वमृदुत्वैरधःकरणात् तिरस्करणात् जयादिति यावत् "प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे" इति मेदिनी । **स्वैः**—निजैः स्वकीयैरितियावत् । "निजः पुनः । आत्मीयः स्वः स्वकीयश्च" ३।२२।६।। इत्यभिधानचिन्तामणिः । **मृदुलैः**—कोमलैः । **फणागणैः**—फणानां सटानां गणाः समूहाः फणागणास्तैस्तथा । **भुवम्**—पृथिवीम् । **वहन्**—धारयन् । **सुभोगिनाम्**—सु अतिशयाश्च ते भोगिनः पन्नगाः सुभोगिनस्तेषान्तथा सकलभोगिनामितियावत् "सुः पूजायां भृषार्थानुमतिकृच्छ्रसमृद्धिषु" इति मेदिनी। "स्वत्यतीव च निर्भरे" इत्यमरकोशश्च । **अशेषशेषः**—अशेषस्य समग्रस्य निखिलस्येति यावत् शेषोऽनुचरः अशेषशेषः । **सः**—प्रसिद्धः । **एषः**—अयम् । **शेषराट्**—शेषोऽनन्त एव राट् राजा शेषराट् । ( इति ) **इलापतिना**—इलायाः पृथिव्याः पतिः स्वामी इलापतिर्धरणीपालः श्रीशान्तिनाथपिता श्रीविश्वसेनः तेन तथा । "भूर्भूमिः पृथिवी पृथ्वी···काश्यपी पर्वताधारा स्थिरेला रत्नबीजसूः" ४।३।। इत्यभिधानचिन्तामणिः । **अहस्यत**—विहस्यते स्म ।।७०।।

## प्रसादमापाद्य सुवर्णवाससां, शिरःसु दानादखिलक्ष्माभुजाम् ।
## नतैः पुनस्तैर्वसुधां प्रसाधयन्, स्वयं स रेमे विषयेषु तन्मयः ।।७१।।

*अन्वयः—दानात्, सुवर्णवाससाम्, अखिलक्ष्माभुजाम्, प्रसादम्, आपाद्य, शिरःसु नतैः पुनः, तैः, वसुधाम्, प्रसाधयन्, सः, स्वयम्, तन्मयः, विषयेषु, रेमे ।।७१।।*

**वृत्तिः**—**सुवर्णवाससाम्**—सुवर्णानि काञ्चनानि च वासांसि वस्त्राणि च सुवर्णवासांसि तेषान्तथा अभ्यर्हितत्वात् सुवर्णपदस्य पूर्वनिपातः । "अंशुकं वस्त्रमम्बरम् । सिचयो वसनं चीराऽऽच्छादौ सिक् चेलवाससी" ३।३३०।। इत्यभिधानचिन्तामणिः । **दानात्**—वितरणात् । **अखिलक्ष्माभुजाम्**—क्ष्मां पृथिवीं भुञ्जन्ति पालयन्तीति क्ष्माभुजो राजानः, अखिलाश्च ते क्ष्माभुजः, अखिलक्ष्माभुजस्तेषान्तथा । **प्रसादम्**—प्रसन्नताम् । "प्रसादस्तु प्रसन्नता" इत्यमरः । **आपाद्य**—सम्पाद्य विधायेति यावत् । **शिरःसु**—मौलिषु । अवच्छिन्नत्वं सप्तम्यर्थः, शिरोऽवच्छेदेनेत्यर्थः । **नतैः**—नम्रैः । **तैः**—नृपतिभिः । **पुनः वसुधाम्**—पृथिवीम् । **प्रसाधयन्**—संभूषयन् नियोजयन्निति वा । **सः**—प्रसिद्धः नृपतिर्विश्वसेन इत्यर्थः । **स्वयम्**—आत्मना । **तन्मयः**—तल्लीनः, विषयवासनारक्त इत्यर्थः । **विषयेषु**—स्रक्चन्दनवनितादित्वङ्मनोनयनादिनिखिलेन्द्रियार्थेषु **रेमे**—अरमत रत इति यावत् ।।७१।।

## सतीषु सत्यार्थयशस्वती स्वतः, शचीव रूपादचिरा गुणाङ्गणम् ।
## पुरेदमूर्ध्वं भवतीति वेधसा, कलत्ररत्नं विदधेऽस्य तुष्टये ।।७२।।

**अन्वयः**—*सतीषु, सत्यार्थयशस्वती, स्वतः, रूपात्, शची, इव, अचिरा, ऊर्ध्वम्, गुणाङ्गणम्, पुरा, भवति, इति, वेधसा, अस्य, तुष्ट्ये, इदम्, कलत्ररत्नम्, विदधे ॥०॥*

**वृत्तिः**—**सतीषु**—पतिव्रतासु, पतिसेवापरायणास्वित्यर्थः। **सत्यार्थयशस्वती**—सत्यम् तथ्यमेव अर्थः प्रयोजनम् सत्यार्थस्तेन यशः कीर्तिः सत्यार्थयशः, तदस्त्यस्या इति सत्यार्थयशस्वती। **स्वतः**—सहजात्। न तु कृत्रिमादित्यर्थः। **रूपात्**—सौन्दर्यात् स्वभावाद्वा। "रूपं स्वभावे सौन्दर्ये" इति विश्वः। **शची**—इन्द्राणी। **इव**—तुल्या। **अचिरा**—तदाख्यप्रमदा। **ऊर्ध्वम्**—उत्कृष्टम्। **गुणाङ्गणम्**—गुणानां सौन्दर्य्यौदार्य्यपातिव्रत्यादीनामङ्गणम्। प्राङ्गणम् आधार इति यावत् गुणाङ्गणम्। **पुरा भवति**—भविष्यति। भविष्यदर्थे पुराशब्दयोगे वर्तमानाविभक्तिः। **इति**—अस्माद्धेतोः। **वेधसा**—विधात्रा ब्रह्मणेतियावत्। **अस्य**—नृपस्य श्रीविश्वसेनस्य। **तुष्ट्ये**—सन्तोषार्थम्। **इदम्**—गुणाङ्गणमचिरारूपम्। **कलत्ररत्नम्**—कलत्रेषु भार्य्यासु रत्नम् रत्नमिव सर्वश्रेष्ठम् कलत्ररत्नम्। "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" इति मेदिनी। **विदधे**—चक्रे! कृतमिति यावत् ॥७२॥

# सतीषु रत्नं तदशेषलक्षणै-र्विचक्षणैः संस्तुतमस्ति यत्पदोः।
# पुरा मणीवेश्म सुरीशिरोऽस्त्वतः, पदं किमस्याङ्कितमूर्ध्वरेखया ॥७३॥

**अन्वयः**—*अशेषलक्षणैः, सतीषु, रत्नम्, तत्, विचक्षणैः, संस्तुतम्, अस्ति, यत्पदोः, पदम्, मणीवेश्म, सुरीशिरः, अस्तु, अतः, पुरा, अस्य, ( पदम् ) ऊर्ध्वरेखया, अङ्कितम्, किम् ॥७३॥*

**वृत्तिः**—**अशेषलक्षणैः**—अशेषाणि समस्तानि च तानि लक्षणानि भाग्यवत्त्वादिसूचकचिह्नानि अशेषलक्षणानि तैस्तथा। "लक्षणं नाम्नि चिह्ने च" इति मेदिनी। **सतीषु**—पतिव्रतासु, समीचीनासु वा। **रत्नम्**—रत्नमिव श्रेष्ठम्। **तत्**—अचिराख्यं कलत्रम्। **विचक्षणैः**—विचक्षते इति विचक्षणा विद्वांसः पण्डिता इत्यर्थस्तैस्तथा। "विद्वान् सुधीः कविविचक्षणलब्धवर्णो" ३।५॥ इत्यभिधानचिन्तामणिः। **संस्तुतम्**—सम्यक् प्रशंसितम्। **अस्ति**—विद्यते। **यत्पदोः**—यस्य अचिराख्यकलत्ररत्नस्य पदे चरणे यत्पदे तयोस्तथा। **पदम्**—स्थानम्। "पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः।" पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः। इति मेदिनी। **मणीवेश्म**—मणीनां रत्नानाम् वेश्म सदनम् मणीवेश्म। **सुरीशिरः**—सुराणां देवानां स्त्रियः सुर्य्यः जातावेकवचनम्। धवयोगे ङीः तासां शिरो मस्तकम् सुरीशिरः। **अस्तु**—भवतु। **अतः**—अस्मात् कारणात्। **पुरा**—पूर्वम्। **अस्य**—अचिराख्यकलत्ररत्नस्य। **पदम्**—चरणः, वामपाद इत्यर्थः, स्त्रिया वामाङ्गप्रधानत्वात्। **ऊर्ध्वरेखया**—उत्कृष्टभाग्यसूचकरेखाविशेषेण। **अङ्कितम्**—चिह्नितम् ॥७३॥

**जगज्जयन्तेन च कोशमक्षयं, समं दधानेन विडौजसा समा।**
**अलम्भि शोभा भुवि भूभुजा सुते–ऽसितेऽवतीर्णेऽश्वदिने नमस्यजे ॥७४॥**

**अन्वयः**—*भूभुजा, नमस्यजे, असिते, अश्वदिने, सुते, अवतीर्णे, (सति) भुवि, जयन्तेन, समम्, जगत्, च अक्षयम्, कोशम्, दधानेन, विडौजसा, समा, शोभा, अलम्भि ॥७४॥*

**वृत्तिः**—**भूभुजा**–भुवं पृथिवीं भुनक्तीति भूभुक् तेन तथा पृथ्वीपालकेन श्रीविश्वसेनेनेत्यर्थः। **नभस्यजे**–नभस्ये भाद्रपदे जातं नभस्यजम् नभस्यपूर्वाज्जन्धातोः "सप्तम्याः" ५।१।१६९॥ इत्यनेन डप्रत्ययः। तस्मिँस्तथा। **असिते**–कृष्णपक्षे। **अश्वदिने**–सप्तम्यां तिथौ। **सुते**–पुत्रे भगवच्छ्रीमच्छान्तिनाथात्मके तनूजे इत्यर्थः। **अवतीर्णे**–समुत्पन्ने। (सति) **भुवि**–पृथिव्याम्। **जयन्तेन**–इन्द्राख्यपुत्रेण। **समम्**–सह। **जगत्**–भुवनम्। **च**–पुनः। **अक्षयम्**–न क्षयोऽपचयः रिक्ततेति यावद्यस्य सोऽक्षयस्तन्तथा। **कोशम्**–भाण्डागारम् निधिमितियावत्। **दधानेन**–धारयता। **विडौजसा**–वेवेष्टि व्याप्नोति सर्वमिति विट्, विट् व्यापकमोजो बलं यस्य स विडौजा इन्द्रस्तेन तथा। "इन्द्रो हरिर्दुश्च्यवनोऽच्युताग्रजो वज्री विडौजा मघवान् पुरन्दरः" २।८५॥ इत्यभिधानचिन्तामणिः। **समा**–तुल्या। **शोभा**–कान्तिः। "शोभा कान्तीच्छयोर्मता" इति मेदिनी। **अलम्भि**–प्रापि। समधिगतेतियावत् ॥७४॥

**जगज्जयं तेन च कोशमक्षयं, प्रणेष्यता स्वप्नगसिन्धुरादिना।**
**मणीगणान्तेन सुरोऽत्र सूचितो–ऽचिराचिराकुक्षिमपि प्रपन्नवान् ॥७५॥**

**अन्वयः**—*जगज्जयम्, (प्रणेष्यता) च, तेन, अक्षयम्, कोशम्, प्रणेष्यता, मणीगणान्तेन, स्वप्नगसिन्धुरादिना, सूचितः, सुरः, अत्र, अचिराचिराकुक्षिम्, अपि, प्रपन्नवान् ॥७५॥*

**वृत्तिः**—**जगज्जयम्**–जगतः समग्रभुवनस्य जयो विजयः जगज्जयस्तन्तथा (प्रणेष्यतेत्यनेनान्वितम्) च–पुनः। **तेन**–जगज्जयेन। **अक्षयम्**–अनपचयम् परिपूर्णमित्यर्थः। **कोशम्**–भाण्डारगृहम्। **प्रणेष्यता**–विधास्यता। **मणीगणान्तेन**–मणीनां रत्नानां गणो मणीगणः, रत्नराशिः, सोऽन्तो यस्य स मणीगणान्तस्तेन तथा। **स्वप्नगसिन्धुरादिना**–स्वप्नगः–स्वप्नावस्थायामागतः चासौ सिन्धुरो हस्ती स्वप्नगसिन्धुरः, स आदिर्यस्य तेन तथा। "हस्ती मतङ्गजगजद्विपकर्य्यनेकपा मातङ्गवारणमहामृगसामयोनयः। स्तम्बेरमद्विरद–सिन्धुरनाग–दन्तिनः" ४।२८३। इत्यभिधानचिन्तामणिः। गजवृषभादिचतुर्दशस्वप्नैरितियावत्। **सूचितः**–विज्ञापितः। **सुरः**–देवः। **अत्र**–अस्मिँल्लोके। **अचिराचिराकुक्षिम्**–अचिरायाः तदाख्यश्रीविश्वसेनभार्य्यायाः कुक्षिर्गर्भः अचिराकुक्षिः अचिरं यथास्यात्तथा अचिराकुक्षिरचिराचिराकुक्षिस्तन्तथा। पाठोऽयं समासश्चापि कथञ्चि–

योजनीयः, "स्तोकनम्रा स्तनाभ्याम्" इत्यादिवत् क्रियाविशेषणेनापि समासः । अपि-सम्भावनायाम् । प्रपन्नवान्-प्राप्तवान् ॥७५॥

त्रयोदशाहेऽप्यसितेऽथ शुक्रजे, प्रणीतवान् शैशवशेषवानयम् ।
स लब्धजन्मा सकले कुलेऽतुले-प्यरिष्टशान्तिं भुवि शान्तिसंज्ञया ॥७६॥

**अन्वयः**—*अथ, शुक्रजे, असिते, त्रयोदशाऽहे, अतुले, सकले, कुले, लब्धजन्मा, शैशवशेषवान्, अपि, स, अयम्, शांतिसंज्ञया, भुवि, अरिष्टशान्तिम्, प्रणीतवान् ॥७६॥*

**वृत्तिः**—**अथ**—अनन्तरम् । **शुक्रजे**—शुक्रे ज्येष्ठे जातं शुक्रजस्तस्मिँस्तथा । "ज्येष्ठस्तु शुक्रः" २।६८ इत्यभिधानचिन्तामणिः । **असिते**—कृष्णे कृष्णपक्षे इत्यर्थः । **त्रयोदशाहे**—त्रयोदशानामह्नां समाहारस्त्रयोदशाहस्तस्मिँस्तथा । ज्येष्ठासितत्रयोदश्यामित्यर्थः । **अतुले**—न तुला उपमा यस्य तदतुलमतुलनीयमित्यर्थस्तस्मिँस्तथा । **सकले**—कलया सहितं सकलं तस्मिँस्तथा । **कुले**—अन्वये वंशे इति यावत् । **लब्धजन्मा**—लब्धं प्राप्तं जन्मोत्पत्तिर्येन स तथा । **शैशवशेषवान्**—शैशवं बाल्यं शेष उपयुक्तेतरो यस्य स शैशवशेषः, अतिबाल्यवानित्यर्थः । "शेषः सीरिण्युपयुक्तेतरेऽपि च" इत्यनेकार्थः । **अपि**—सम्भावनायामव्ययम् । "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी । **सः**—प्रसिद्धः । **अयम्**—एषः, भगवान् शान्तिनाथः । **शान्तिसंज्ञया**—शान्तिरिति संज्ञा नाम, शान्तिसंज्ञा, तया तथा । **भुवि**—पृथिव्याम् । सर्वस्मिन् स्थाने इति यावत् । "भूः स्थानमात्रे कथिता धरण्यामपि योषिति" इति मेदिनी । **अरिष्टशान्तिम्**—अरिष्टस्य-अशुभस्य शान्तिः प्रशमनम् अरिष्टशान्तिस्तान्तथा । "अरिष्टमशुभे तक्रे सूतिकागार आसवे" इति मेदिनी । **प्रणीतवान्**—कृतवान् जन्मादधान एवान्वर्थाभिधानत्वात् विघ्नव्यूहं समुन्मूलयाञ्चकारेत्यर्थः ।

कृताभिषेकोऽपि सुरैः सुराचले, प्रणीतवान् शैशवशेषवानयम् ।
भुजे भुवो भारसहस्य भूभुजः, क्रमेण विश्रामसुखे गतश्रमः ॥७७॥

**अन्वयः**—*सुरैः, सुराचले, कृताभिषेकः, शैशवशेषवान्, अपि, अयम्, भुवः, भारसहस्य, भूभुजः, भुजे, गतश्रमः, क्रमेण, विश्रामसुखे, प्रणीतवान् ॥७७॥*

**वृत्तिः**—**सुरैः**-देवैः । **सुराचले**—न चलतीत्यचलः पर्वतः सुराणां देवानाचलः सुराचलस्तस्मिँस्तथा, मेरुपर्वते इत्यर्थः । **कृताभिषेकः**—कृतो विहितः अभिषेकः संस्नापनं यस्य स कृताभिषेकः । **शैशवशेषवान्**-शैशवं शिशुत्वम् बाल्यमित्यर्थः शेष उपयुक्तेतरद्यस्य स शैशवशेषः, अतिबाल्यवानित्यर्थः । **अपि**—सम्भावनायाम् । **अयम्**—असौ भगवान् शान्तिनाथ इत्यर्थः । **भुवः**—पृथिव्याः । **भारसहस्य**—सहते इति सह

भारस्य सहो भारसहस्तस्य पृथिव्या भारं वोढुं समर्थस्येत्यर्थः । भूभुजः–राज्ञः श्री विश्वसेनस्येत्यर्थः । भुजे–बाहौ । गतश्रमः–गतो नष्टः श्रम आयासो यस्य स गतश्रमः । क्रमेण–क्रमशः । विश्रामसुखे–विश्राम आरामश्च सुखं सौख्यञ्च विश्रामसुखे । विश्रामस्य सुखजनकतयोपजीव्यत्वादभ्यर्हितत्वाद्धेतोः अल्पस्वरत्वेऽपि सुखशब्दस्य तस्यैव पूर्वनिपातः । प्रणीतवान्–आसादितवानित्यर्थः, धातूनामुपसर्गमहिम्नाऽन्यथाप्यनेकार्थत्वात् ॥७७॥

**प्रपद्य विद्या अनधीतवानपि, दधत् कुलीनाः सकलाः कलाः प्रभुः ।**
**सखा रतीशस्य ऋतुर्यथा वनं, विवेश पित्रोर्हृदयाब्जमात्मजः ॥७८॥**

अन्वयः—*अनधीतवान्, अपि, विद्याः, प्रपद्य, सकलाः, कुलीनाः, कलाः, दधत्, आत्मजः, प्रभुः, रतीशस्य सखा, ऋतुः, वनम्, यथा, पित्रोः, हृदयाब्जम् विवेश ॥७८॥*

वृत्तिः—अनधीतवान्–अपठितवान् । अपि–खलु । विद्याः–वेत्ति जानात्याभिरिति विद्याः ज्ञानानि शास्त्रज्ञानानीति यावत् । प्रपद्य–सम्प्राप्य । सकलाः–अखिलाः समस्ता इत्यर्थः । कुलीनाः–कुलाय वंशाय हिताः कुलीनाः "तस्मै हिते" ७।१।३५॥ इत्यनेन ईनप्रत्ययः । कलाः–विज्ञानानि । दधत्–धारयन् । आत्मजः–तनयः, श्रीविश्वसेनस्येतिशेषः । प्रभुः–विभुः, भगवान् शान्तिनाथः । रतीशस्य–रत्याः—कामदेवपत्न्या ईशः प्रभू रतीशः कामदेवः, तस्य तथा । सखा–मित्रम् । ऋतुः–वसन्ताख्यऋतुः । वनम्–काननम् । यथा–इव । "यथा तुल्यार्थमानयोः" इति मेदिनी । पित्रोः–जननीजनकयोः अचिराविश्वसेनयोरित्यर्थः । हृदयाब्जम्–हृदयमन्तःकरणम् अब्जं कमलमिवेति हृदयाब्जम् "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२॥ इत्यनेनोपमितसमासः । विवेशः–प्रविष्टवान् ॥७८॥

**विभोः स्वभावेन विभाविभावसौ, प्रसृत्वरे दुस्तमसो विजित्वरे ।**
**विपक्षपक्षस्त्वरया ययौ वनं, वपुस्तथाऽऽलिङ्गदथास्य यौवनम् ॥७९॥**

अन्वयः—*अथ, अस्य, वपुः, तथा यौवनम्, आलिङ्गत् ( यथा ) विभोः, दुस्तमसः विजित्वरे, स्वभावेन च, विभाविभावसौ, प्रसृत्वरे ( सति ) विपक्षपक्षः, त्वरया, वनम्, ययौ ॥७९॥*

वृत्तिः—अथ–अनन्तरम् । शैशवोत्तरकाले इति यावत् । अस्य–भगवतः श्रीमतः शान्तिनाथस्य । वपुः–शरीरम् । कर्तृ, तथा–तेन प्रकारेण । यौवनम्–यूनो भावो यौवनम् तारुण्यमित्यर्थः । आलिङ्गत्–प्रापत्, प्राप्तवानितियावत् । ( यथा–येन प्रकारेण । ) विभोः–प्रभोः । शान्तिनाथस्येत्यर्थः । दुस्तमसः–दुष्टं तमो दुस्तमो राहुस्तस्य तथा । विजित्वरे–विजेतरि । स्वभावेन–प्रकृत्या । विभावि-

भावसौ-विभा प्रभैव विभावसुः, सूर्य्यः विभाविभावसुस्तस्मिँस्तथा । प्रसृत्वरे-प्रसरणशीले । (सति) विपक्षपक्षः-विपक्षाणां विरोधिनां पक्षः सहायो बलं वा विपक्षपक्षः । "पक्षो मासार्द्धके पार्ष्णिग्राहे साध्यविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः" इति मेदिनी । त्वरया-वेगेन, शीघ्रतये-त्यर्थः । वनम्-काननम् । ययौ-गतवान् । प्राप्तप्रबले भगवति शान्तिनाथे तदीयतेजः सोढुमशक्नुवन्तः शत्रुपक्षीयाः स्वस्वराज्यं परित्यज्य काननमाश्रिता इति भावः ॥७९॥

अधारि पद्मेषु तदंह्रिणा घृणा, ततः श्रियाः स्थानपरिश्रमोऽप्यतः ।
स्वयं तदीयश्रियमेव बिभ्रता, न्यवारि वारिस्थिति-जाड्यमप्यदः ॥८०॥

अन्वयः—*तदंह्रिणा, पद्मेषु, घृणा, अधारि, ततः, श्रियाः, स्थानपरिश्रमः, अपि न्यवारि, अतः, स्वयम्, तदीयश्रियम्, बिभ्रता, एव, अदः, वारिस्थितिजाड्यम् अपि, ( न्यवारि )* ॥८०॥

वृत्तिः—तदंह्रिणा-तस्य भगवतः शान्तिनाथस्य अंह्रिश्चरणस्तदंह्रिस्तेन तथा । "चरणः क्रमणः पादः पदोऽङ्घ्रिश्चलनः क्रमः" ३।२८०॥ इत्यभिधानचिन्तामणिः । पद्मेषु-कमलेषु । घृणा-जुगुप्सा अनादर इति यावत् । अधारि-विहिता । "घृणा जुगुप्सा-कृपयोः" इति मेदिनी । ततः-तस्माद्धेतोः । श्रियाः-लक्ष्म्याः शोभाया वा । "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि कथ्यते" इति यादवः । स्थान-परिश्रमः-स्थानेन यत्र तत्र कमले अन्यराजादौ वा अवस्थानेन यः परिश्रम महानायासः स्थानपरिश्रमः । अपि-सम्भावनायामव्ययम् । न्यवारि-न्यषेधि दूरीकृत इति यावत् । अतः-अस्मात् । स्वयम्-स्वस्मिन् । तदीयश्रियम्-तदीयशोभाम् । बिभ्रता-धारयता । एव-खलु । अवधारणार्थक-मव्ययम् । अदः-एतत् । वारिस्थितिजाड्यम्-वारिणि जले स्थितिरवस्थानं वारिस्थितिस्तया जाड्यं शैत्यम् जडतेति यावत् । अपि-खलु ( न्यवारि-दूरीकृतम् ) भगवतः श्री शान्तिनाथस्य चरणे वारि-स्थितिजाड्यं नाभूदिति भावः ॥८०॥

श्रिया करग्राहविधेरिवाश्रयेत्, क तच्छयच्छायलवोऽपि पल्लवे ! ।
वनेचरे राजवधूजनो यतो, ह्यसूर्य्यदर्शी न पदं परं भजेत् ॥८१॥

अन्वयः—*श्रिया, करग्राहविधेः, इव, तच्छयच्छायलवः, अपि, पल्लवे, क, आश्रयेत्, यतः, असूर्य्यदर्शी, राजवधूजनः, वनेचरे, परम्, पदम्, न, भजेत्* ॥८१॥

वृत्तिः—श्रिया-लक्ष्म्या, शोभातिशयशालिन्या कमलयेति यावत् । "लक्ष्मीः पद्मा रमा या मा सा ता श्रीः कमलेन्दिरा" २।१४०॥ इत्यभिधानचिन्तामणिः । करग्राहविधेः-ग्रहणं ग्राहः करस्य पाणे-

ग्रहः करग्राहः स एव विधिः करग्राहविधिस्तस्मात्तथा । पाणिगृहीतश्रियो लोकस्य शोभासम्पत्तिभरता युक्तैव । इव–यथा । तच्छयच्छायलवः–तस्य भगवतः शान्तिनाथस्य शयौ हस्तौ तच्छयौ तयोश्छायाः कान्तयः सच्छोभा इति यावत् तच्छयच्छायम्–छाया बाहुल्ये इति क्लीबत्वमेकवचनञ्च तस्य लवो लेशः कणिकेति यावत् तच्छयच्छायलवः । "पञ्चशाखः शयः शमः । हस्तः पाणिः करः" ३।२५५।। इत्यभिधानचिन्तामणिः । "छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः । पालनोत्कोचयोर्दीप्तिसच्छोभापङ्क्तिषु स्त्रियाम्" । इति मेदिनी । अपि–सम्भावनायाम् । पल्लवे–नवकिसलयादौ । क्व–कुत्र । वस्तुतस्तु सार्वविभक्तिकेन तसाऽत्रभाव्यम् तथा च पल्लवे कुतः । आश्रयेत्–संश्रयेत् । तदीयकरकमलशोभाकणिकापि नवकिसलयादौ कुतः सम्भावनीयाऽपीत्यर्थः । यतः–यस्मात् कारणात् । असूर्य्यदर्शी–सूर्य्यस्याप्यनवलोककः । राजवधूजनः–राज्ञो वधू राजवधूः स एव जनो लोको राजवधूजनः । वनेचरे–वनेषु कानन्नेषु चरतीति वनेचरः पल्लवस्तस्मिँस्तथा । परम्–केवलम् । "परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले" इति मेदिनी । पदम्–चरणम् । (अपि) न–नहि । भजेत्–आश्रयेत् पल्लवादेर्वनेचरत्वात् राजवधूस्थानापन्नश्रियः संसर्गस्य बाधितत्वात् राजवधूनामसूर्य्यपश्यत्वात् श्रीसंसर्गाभावेन पल्लवे श्रीसम्बद्धभगवच्छान्तिनाथशयच्छायलवोऽप्यसम्भावनीय एवेति भावः ॥८१॥

## करेऽनुरागादिव नेतुरेतु किं, जडेऽस्थिरा श्रीः खलु पद्मसङ्गमम् ।
## तदास्यदास्येऽपि गतोऽधिकारितां, न तज्जनालीकभृदब्ज एव सः ॥८२॥

**अन्वयः**—नेतुः, करे, अनुरागात्, इव, जडे, अस्थिरा, श्रीः, खलु, पद्मसङ्गमम्, किम्, एतु । (यतः) तज्जनालीकभृत्, एव, सः, अब्जः, तदास्यदास्येऽपि, अधिकारिताम्, न, गतः ॥८२॥

**वृत्तिः**—नेतुः–नायकस्य, त्रिभुवनशासकस्य भगवतः श्रीशान्तिनाथस्य । करे–पाणौ । अनुरागात्–स्नेहात् प्रेमवशत इति यावत् । इव–यथा । जडे–जाड्यविशिष्टे । अस्थिरा–चञ्चला । श्रीः–लक्ष्मीः । खलु–निश्चयेन । पद्मसङ्गमम्–पद्मैः कमलैः सङ्गमः संसर्गः सहवास इति यावत् पद्मसङ्गमस्तन्तथा । किम्–कथम् । किमिति प्रश्नार्थकमव्ययम् । "किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि" इति मेदिनी । एतु–गच्छतु, प्राप्नोत्विति यावत् । (यतः) तज्जनालीकभृत्–तत्रैव पङ्के जातं तज्जम् तत्पूर्वकाज्जन्धातोर्डः प्रत्ययः, तदेव नालीकं बिसप्रसूनम् तज्जनालीकम् तद् बिभर्ति धारयति पोषयति वेति तज्जनालीकभृत् । एव–अवधारणार्थकमव्ययम् । सः–प्रसिद्धः । अब्जः–अप्सु जलेषु जातोऽब्जः कमलम् । तज्जनालीकभृत्–पञ्चम्यर्थे प्रथमा ते च ते जनास्तज्जनास्तेषु अलीकमसत्यं बिभर्ति पोषयतीति अलीकभृत्, भावप्रधानत्वात् तज्जनालीकभृत्त्वादित्यर्थः । तदास्यदास्येऽपि–तस्य भगवतः शान्तिनाथस्य आस्यं मुखम् तदास्यम् तस्य दास्यं किङ्करत्वम् तदास्यदास्यन्तस्मिन् तदास्यदास्ये । अपि–खलु । अधिकारिताम्–योग्यताम् । न–नहि । गतः–प्राप्तः ॥८२॥

**महीयसाऽसौ विधिनाऽऽधिनाकृतः, प्रभोर्मुखाम्भोरुहसाम्यधित्सया ।**
**शरत्प्रयत्नेऽपि तदाकृतौ प्रभु-र्न शारदः पार्वणशर्वरीश्वरः ॥८३॥**

अन्वयः—*विधिना, प्रभोः, मुखाम्भोरुहसाम्यधित्सया, महीयसा, आधिना, कृतः, असौ, शारदः, पार्वणशर्वरीश्वरः, शरत्प्रयत्नेऽपि, तदाकृतौ, न प्रभुः ॥८३॥*

वृत्तिः—विधिना-जगत्स्रष्ट्रा ब्रह्मणेत्यर्थः । प्रभोः-प्रकर्षेण भवतीति प्रभु-र्विभुः भगवान् शान्तिनाथ इत्यर्थस्तस्य तथा । "शं-सं-स्वयं-विप्राद् भुवो डुः" इत्यनेन डु-प्रत्ययः । "पतीन्द्रस्वामि-नाथार्य्याः प्रभुर्भर्तेश्वरः प्रभुः" ३।२३।। इत्यभिधानचिन्तामणिः । मुखाम्भोरुहसाम्यधित्सया-मुख-माननम् अम्भोरुहं कमलमिवेति "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२।। इत्यनेनोपमितसमासे मुखाम्भोरुहम्, तेन साम्यम् सादृश्यम् तुलनेति यावत् मुखाम्भोरुहसाम्यम् तस्य धित्सा-धातुमिच्छा धित्सा धारणेच्छा मुखाम्भोरुहसाम्यधित्सा तया तथा । महीयसा-अतिशयेन महान् महीयान् तेन तथा । आधिना-प्रत्याशया । "आधिः पुमान् चित्तपीडाप्रत्याशाबन्धकेषु च" इति मेदिनी । कृतः-रचितः । असौ-अयम् । शारदः-शरदि तदाख्यऋतौ भवः शारदः । पार्वणशर्वरीश्वरः-शृणाति चेष्टा इति शर्वरी निशा तस्या ईश्वरः प्रभुः शर्वरीश्वरश्चन्द्रः, पर्वणि पूर्णिमायां भवः पार्वणः स चासौ शर्वरीश्वरः पार्वणशर्वरीश्वरः । "निशा निशीथिनी रात्रिः शर्वरी क्षणदा क्षपा" २।५५।। "पक्षदशौ यज्ञकालौ पक्षान्तौ पर्वणी अपि" २।६२।। इत्युभयत्राभिधानचिन्तामणिः । शरत्प्रयत्नेऽपि-शरद्भिर्वर्षैः प्रयत्नः शरदः प्रयत्नो वा शरत्प्रयत्नः, अत्यन्तसंयोगे द्वितीया तस्मिन् शरत्प्रयत्ने, अपि-खलु । तदाकृतौ-तस्य प्रभोः श्रीशान्तिनाथस्य आकृतिराकारः स्वरूपमिति यावत्, तदाकृतिस्तस्यान्तथा । न-नैव । सर्वं वाक्यं सावधारणं भवतीतिनियमात् । प्रभुः-समर्थः । अत्र शक्तार्थवषडित्यादिना प्रभुपदस्य शक्तार्थत्वाच्चतुर्थ्या आवश्यकत्वे सप्तमी चिन्त्या । शान्तिनाथमुखाम्बुजसाम्यमाधातुं महीयसा प्रयत्ने-नापि ( करणेन ) विधिना ( कर्त्रा ) विनिर्मितश्चन्द्रो वर्षाणि यावत् कृतप्रयासोऽपि प्रभुमुखसाम्यमा-धातुमसमर्थ एवेति भावः ॥८३॥

**किमस्य लोम्नां कपटेन कोटिभि-र्द्विधापि गौणे गणनां व्यधाद् विधिः ।**
**परे त्वसङ्ख्येयदशैव तज्जिने, भवेदसंख्येयदशा स्वभावतः ॥८४॥**

अन्वयः—*विधिः, लोम्नाम्, कपटेन, अस्य, द्विधा, अपि, गौणे, कोटिभिः, गणनाम्, व्यधात्, किम्, तु, परे, असङ्ख्येयदशा, एव, तत्‌जिने, स्वभावतः, असङ्ख्येयदशा, भवेत् ॥८४॥*

वृत्तिः—विधिः-ब्रह्मा । लोम्नाम्-रोम्णाम । कपटेन-अपदेशेन, व्याजेनेत्यर्थः । अस्य-भगवतः शान्तिनाथस्य । द्विधापि-द्वाभ्यामपि प्रकाराभ्याम, अपि । गौणे-गुणभरे अप्रधाने सामान्ये

बहिष्ठे इति यावत् । कोटिभिः-अपरिमितैरित्यर्थः । कोटिसङ्ख्यकरोमभिरिति यावत् । गणनाम्-एको द्वौ त्रय इत्येवंरीत्या गणनक्रियाम् । व्यधात्-अकरोत् । किम्-वितर्केऽव्ययम् "किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि "इति मेदिनी" । अनेन सर्वगुणवत्त्वन्तस्य द्योतितम् बहिष्ठै रोमभिर्बहिष्ठानां गुणानां गणनासंभवेऽपि । तु-किन्तु । परे-मुख्ये श्रेष्ठे गुणभरे । "परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले" इति मेदिनी । असङ्ख्येयदशा-सङ्ख्यातुं गणयितुं योग्या संङ्ख्येया, न सङ्ख्येया असङ्ख्येया असङ्ख्येया चासौ दशा अवस्था असङ्ख्येयदशा । सङ्ख्याभाव इति यावत् । तत्र-अवधारणार्थकमव्ययम् । तत्-तस्मात् । जिने-अर्हति परमेष्ठिनि । स्वभावतः-निसर्गतः । असङ्ख्येदशा संचक्षतेऽत्रेति सङ्ख्यं युद्धम् "चक्षो वाचि" ४।४।४। इति ख्यादेशः, तद्योग्या सङ्ख्येया न सङ्ख्येया असङ्ख्येया सा चा सौ दशा अवस्था तथा । "युद्धं तु सङ्ख्यं कलिः" ३।४६०। इत्यभिधानचिन्तामणिः । "दशाऽवस्थादीपवस्त्योर्वस्त्रान्ते भूम्नि योषिति" इति मेदिनी । भवेत्-स्यात् । द्विधाऽपीत्यस्य असङ्ख्येयदशा इत्यत्र वाऽन्वयः करणीयः । द्वाभ्यामपि प्रकाराभ्याम् जिनेऽसङ्ख्येयदशा निर्बाधेति भावः ॥८४॥

## नभस्तले किं फलके खगार्चिषां, विधिर्न लेखाभिरजीगणद् गुणान् ।
## गुणेतराभावपरा विरेजिरे, ग्रहच्छलाद् बिन्दव एव केवलम् ॥८५॥

अन्वयः—*विधिः, नभस्तले, फलके, खगार्चिषाम्, लेखाभिः, ( अस्य ) गुणान्, न, अजीगणत्, किम्, ग्रहच्छलात्, गुणेतराभावपराः, बिन्दवः एव, केवलम्, विरेजिरे ॥८५॥*

वृत्तिः—विधिः-विधाता, जगत्स्रष्टेति यावत् । नभस्तले-नभःस्वरूपे, आकाशात्मके इति यावत् । "तलं स्वरूपेऽनूर्ध्वेऽस्त्री क्लीबं ज्याघातवारणे" इति मेदिनी । फलके-पीठिकायाम् पीठे वा । खगार्चिषाम्-खे आकाशे गच्छन्तीति खगा ग्रहनक्षत्रादयस्तेषामर्चींषि प्रभा ज्वाला इति यावत् खगार्चींषि तेषान्तथा । लेखाभिः-रलयोः साम्यात् रेखाभिः, लिपिभिः, राजिकाभिरिति यावत् "लेखा लिपिराजिकयोर्मता" इति मेदिनी । ( अस्य भगवतः शान्तिनाथस्य ) गुणान्-शौर्य्य-वीर्य्यौदार्य्यादीन् । न-न हि । अजीगणत्-संख्यातवान् । किम्-अपि तु संख्यातवानेवेति । ग्रहच्छलात्-ग्रहपदं तारादीनामप्युपलक्षकम्, अजहत्स्वार्थलक्षणया ग्रहनक्षत्रोभयबोधपरमिति यावत् । एवञ्च ग्रहाणां चन्द्रसूर्य्य-मङ्गलादीनां नक्षत्राणाञ्च छलं व्याजो ग्रहच्छलन्तस्मात्तथा । गुणेतराभावपराः-गुणान् शौर्यवीर्य्यौदार्य्यादेरितरे भिन्ना गुणेतरे दोषा इत्यर्थ तेषामभावो राहित्यम् शून्यतेति यावत् गुणेतराभावस्तत्परास्तथा दोषाभावबोधका इत्यर्थः । बिन्दवः-वर्तुलाकाररेखाविशेषाः । एव-अवधारणार्थकमव्ययम् । केवलम्-परम् । "परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले" इति मेदिनी । विरेजिरे-दिदीपिरे, संशोभिता इत्यर्थः ॥८५॥

**जिनस्य न स्विन्नवपुर्न खिन्नता, परेष्विति प्रत्ययनाय निर्मलाः ।**
**न रोमकूपौघमिषाज्जगत्कृता, जलार्द्रितास्तेऽवयवाः कृतास्ततः ॥८६॥**

अन्वयः—ततः, *जिनस्य, स्विन्नवपुः, न, खिन्नता, न, इति, परेषु, प्रत्ययनाय, निर्मलाः, ते, अवयवाः, रोमकूपौघमिषात्, जलार्द्रिताः, न, कृताः,* ॥८६॥

वृत्तिः—ततः-तादृग्गुणविशिष्टत्वाद्धेतोस्तदनन्तरं वा । जिनस्य-अर्हतः, तीर्थंकरस्येति यावत् । स्विन्नवपुः-स्विद्यते स्मेति स्विन्नम् स्वेदयुक्तम् घर्मार्द्रमिति यावत् स्विन्नं च तद्वपुः शरीरम् स्विन्नवपुः । न-नहि । खिन्नता-खिन्नस्य भावः खिन्नता खेद इत्यर्थः । न-नहि । इति-इत्येवं लक्षणद्वयस्य प्रभावद्वयस्येति यावत् । परेषु-अन्येषु सर्वसाधारणेष्वित्यर्थः । प्रत्ययनाय-बोधनाय । निर्मलाः-मलात्-मालिन्यान्निर्गता निर्मला मलरहिता इत्यर्थः । "प्रात्यवपरिनिरादयः" ३।१।४७॥ इत्यनेन समासः । ते-अपूर्वसौन्दर्य्यवत्त्वेन प्रसिद्धा इत्यर्थः । अवयवाः-अङ्गानि । रोमकूपौघमिषात्-रोम्णाम्-लोम्नाम् कूपाः वर्तुलाकारच्छिद्राणि रोमकूपास्तेषां मिषं व्याजो रोमकूपौघमिषन्तस्मात्तथा । "कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम् । व्यपदेशो मिषं लक्षं निभं व्याजः" ३।४२॥ इत्यभिधानचिन्तामणिः । जलार्द्रिताः-सलिलक्लिन्नाः । न-नहि । कृताः-विहिताः ॥८६॥

**मुखेऽस्य नालीकविभा प्रतिष्ठिता, शयद्वये वा चरणद्वयेऽपि च ।**
**ध्रुवेण लोम्नामिव मूलकैतवात्, कृताश्च किं दूषणशून्यबिन्दवः ॥८७॥**

अन्वयः—*अस्य, मुखे, वा, शयद्वये, च, चरणद्वये, अपि नालीकविभा, प्रतिष्ठिता, किञ्च, ध्रुवेण, लोम्नाम्, मूलकैतवात्, इव, दूषणशून्यबिन्दवः कृताः* ॥८७॥

वृत्तिः—अस्य-भगवतः शान्तिनाथस्य । मुखे-वदने । वा-समुच्चये । "वा स्याद्विकल्पोपमयोर्वितर्के पादपूरणे । समुच्चये च विस्रम्भे नानार्थातीतयोरपि" इति मेदिनी । शयद्वये-द्वाववयवावस्येति द्वयम् शययोर्हस्तयोर्द्वयम् शयद्वयम् तस्मिँस्तथा । "पञ्चशाखः शयः शमः । हस्तः पाणिः करः" ३।२५५॥ इत्यभिधानचिन्तामणिः । च-पुनः । चरणद्वये-पादयुगले । अपि-सम्भावनायाम् । नालीकविभा-नालीकं विसप्रसूनम् तस्य विभा प्रभा नालीकविभा । प्रतिष्ठिता-संस्थिता । विराजितेति यावत् । अत्र-मुखे बाह्याभ्यन्तरिकाऽऽशयद्वये ऐहलौकिकपारलौकिकाऽऽचरणद्वये च अलीकस्य असत्यस्य विभा प्रभा अलीकविभा नेत्यपि दृष्टव्यम् । किञ्च-अपि च । ध्रुवेण-स्थैर्य्यवता जगत्कर्त्रा ब्रह्मणेत्यर्थः । लोम्नाम्-रोम्णाम् । मूलकैतवात्-मूलस्य आधारस्थानस्य कैतवम् मूलकैतवन्तस्मात्तथा । इव-यथा । दूषणशून्यबिन्दवः-दूषणैर्दोषैः पापैर्वा शून्या विरहिता दूषणशून्यास्ते च ते बिन्दवो दूषणशून्यबिन्दवः,

यद्वा-दूषणानां शून्यान्यभावा दूषणशून्यानि तेषां ज्ञापका दूषणशून्यज्ञापकाः ते च ते बिन्दवो दूषणशून्यबिन्दवः, "मयूरव्यंसकेत्यादयः" ३।१।११६॥ इत्यनेन समासः, शाकपार्थिवादेराकृतिगणत्वात् ज्ञापकपदस्य लोपश्च। "दोषः स्याद् दूषणे पापे" इति मेदिनी। कृताः-विहिताः। यत्र किमपि न तत्र ज्योतिर्विद्भिः शून्यसूचको बिन्दुः क्रियते तथा रोमकूपा अपि वर्तुला बिन्दुत्वेनोत्प्रेक्ष्यन्ते। अयं रोमकूपो न, किन्तु दोषराहित्यसूचका बिन्दवः एव लिखिताः। "तिस्रः कोट्योऽर्धकोटी च यानि रोमाणि मानुषे" इति तावन्तः कूपः इति रोमैकैकं कूपके पार्थिवानाम्" इति सामुद्रिकलक्षणं सूच्यते॥८७॥

**अमुष्य दोर्भ्यामरिदुर्गलुण्टने, चमूचरैर्नोपशमाः समाश्रिताः।**
**प्रभावभारग्रहणे यशोग्रहे, सुवर्णचन्द्रद्युतिभासुरे पुरे ॥८८॥**

*अन्वयः—चमूचरैः, अरिदुर्गलुण्टने, अमुष्य, दोर्भ्याम् सुवर्णचन्द्रद्युतिभासुरे, पुरे, प्रभावभारग्रहणे, यशोग्रहे, उपशमाः, न समाश्रिताः ॥८८॥*

वृत्ति—चमूचरैः-चमूषु सेनासु चरन्ति विचरन्तीति चमूचराः तैस्तथा। सैनिकैरित्यर्थः। अरिदुर्गलुण्टने-अरीणां शत्रुणाम् (दुःखेन गम्यन्ते इति) दुर्गाणि कोट्टानि अरिदुर्गाणि तेषां लुण्टनं लुण्ठनमरिदुर्गलुण्टनम् तस्मिँस्तथा। अमुष्य-भगवतः श्रीशान्तिनाथस्य। दोर्भ्याम्-बाहुभ्याम्। सुवर्णचन्द्रद्युतिभासुरे-सुवर्णं काञ्चनञ्च चन्द्रश्चन्द्रमाः सुवर्णचन्द्रौ तयोर्द्युतिश्छविः कान्तिरिति यावत्, सुवर्णचन्द्रद्युतिस्तया भासते द्योतते तच्छीलं सुवर्णचन्द्रद्युतिभासुरम् तस्मिँस्तथा। यद्वा-सुष्ठु शोभनः वर्णो रूपं यस्य स सुवर्णः, सुवर्णश्चासौ चन्द्रः सुवर्णचन्द्रस्तस्य द्युतिश्छविः सुवर्णचन्द्रद्युतिस्तया भासते तच्छीलमिति पूर्ववत् सुवर्णचन्द्रद्युतिभासुरन्तस्मिँस्तथा। पुरे-नगरे। प्रभावभारग्रहणे-प्रभावस्य प्रतापस्य तेजस इति यावत् भारः-आधिक्यमतिशयो वा प्रभावभारस्तस्य ग्रहणमपहरणम् आत्मसात्करणमिति यावत् प्रभावभारग्रहणम् तस्मिँस्तथा। अथवा प्रभावभारग्रहणे-इत्यत्र प्रभौ रिपौ अभमदीप्ति यत् आरम्-अरिसमूहः अभारम् तस्य ग्रहणमभारग्रहणन्तस्मिँस्तथा। यशोग्रहे-ग्रहणं ग्रहः, यशसः कीर्तेर्ग्रहो यशोग्रहस्तस्मिँस्तथा। उपशमाः-प्रशमाः शान्तय इत्यर्थः। न-नहि। समाश्रिताः-अवलम्बिताः सेविता इति यावत् ॥८८॥

**भुजद्वयी भागवती बभौ यया, ध्रुवं गृहीतार्गलदीर्घपीनता।**
**न्यषेधि तस्मिन् विषये भयागमः, प्रजासु दुर्नीतिगृहे समागमः ॥८९॥**

*अन्वयः—गृहीतार्गलदीर्घपीनता, भागवती, भुजद्वयी, बभौ, यया, दुर्नीतिगृहे, तस्मिन्, विषये, प्रजासु, समागमः, भयागमः, ध्रुवम्, न्यषेधि ॥८९॥*

वृत्तिः—गृहीतार्गलदीर्घपीनता–दीर्घं लम्बायमानञ्च पीनं स्थूलञ्च दीर्घपीने, तयोर्भावो दीर्घपीनता "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बद्ध्यते" इति नियमात् तलप्रत्ययस्योभयत्रान्वयात् दीर्घता पीनता चेति तदर्थः, गृहीता धृता अर्गलस्येव दीर्घपीनता यया सा गृहीतार्गलदीर्घपीनता। भागवती–भगवतः सर्वसामर्थ्यशालिनः श्रीमतः शान्तिनाथस्य इयम् भागवती, तस्येदमित्यणि स्त्रियां ङ्यां तथा, भगवच्छान्तिनाथसम्बन्धिनीत्यर्थः। भुजद्वयी–द्वाववयवौ स्तोऽस्या इति द्वयी भुजयोर्द्वयी। बभौ–शुशुभे। यया–पूर्वोक्तविशेषणया भुजद्वय्या। दुर्नीतिगृहे–दुष्टा चासौ नीतिर्न्यायो दुर्नीतिस्तस्या गृहमालयो दुर्नीतिगृहम् तस्मिँस्तथा। तस्मिन्–भगवच्छान्तिनाथविजिते। विषये–देशे। विषयस्तूपवर्तनम्। देशो जनपदो नीवृत् राष्ट्रं निर्गश्च मण्डलम् ४।१३॥ इत्यभिधानचिन्तामणिः। प्रजासु–लोकेषु जनतायामितियावत् "लोको जनः प्रजा" ३।१६५॥ इत्यभिधानचिन्तामणिः। समागमः–समागच्छतीति समागमः "अच्" ५।१।४९॥ इत्यनेन कर्तरि अच् प्रत्ययः। सम्प्राप्तः, समापतितो वा। भयागमः–साध्वसप्राप्तिः। "भयं भीर्भीतिरातङ्क आशङ्का साध्वसं दरः २।२१५॥ इत्यभिधानचिन्तामणिः। ध्रुवम्–निश्चयेन। न्यषेधि–न्यवारि, दूरीकृत इति यावत् ॥८९॥

**पुरं रिपूणाञ्च कुरङ्गसङ्गतं, कृतं भटैर्भागवतैस्त्रसज्जनम्।**
**उरःश्रिया तत्र च गोपुरस्फुर–त्कपाटताधायि विभोरसङ्गतम् ॥९०॥**

अन्वयः—च, *भागवतैः, भटैः, त्रसज्जनम्, रिपूणाम्, पुरम्, कुरङ्गसङ्गतम्, कृतम्, च, तत्र, विभोः, उरःश्रिया, असंगतम्, गोपुरस्फुरत्कपाटता, अधायि* ॥९०॥

वृत्तिः—च–पुनः। भागवतैः–भगवतः शान्तिनाथस्य इमे भागवतास्तैस्तथा, भगवच्छान्तिनाथसम्बन्धिभिरित्यर्थः। भटैः–वीरैः, योद्धृभिरित्यर्थः। त्रसज्जनम्–त्रसन्त उद्विजन्त उद्वेगमापन्ना इत्यर्थः जना लोका यस्मिँस्तत् त्रसज्जनम्। रिपूणाम्–शत्रूणाम्। पुरम्–नगरम्। कुरङ्गसङ्गतम्–कुरङ्गाणाम् मृगाणाम् सङ्गतं मित्रं कुरङ्गसङ्गतम्, कुरङ्गाः सङ्गता यत्र तादृशं वा। कृतम्–विहितम्। च–पुनः। तत्र–रिपुनगरे। विभोः–प्रभोः, शान्तिनाथस्येति यावत्। उरःश्रिया–वक्षःस्थलशोभया। असङ्गतम्–रिपुत्वं यथास्यात्तथा। गोपुरस्फुरत्कपाटता–स्फुरद्दीप्यमानञ्च तत्कपाटम् अररं स्फुरत्कपाटम् गोपुरे पुरद्वारे स्फुरत्कपाटं गोपुरस्फुरत्कपाटम् तस्य भावस्तथा। "अररं पुनः। कपाटोऽररिः कुपाटः" ४।७२॥ इत्यभिधानचिन्तामणिः। पुरद्वारं तु गोपुरम् इत्यमरकोशः। अधायि–धृता ॥९०॥

**प्रजासु वात्सल्यभरेऽपि शल्यवद्, द्विषां सपत्राकृतिकारके जिने।**
**प्रतापवह्निस्तदुरःस्थतोऽदहत्, कपाटदुर्धर्षतिरःप्रसारिताः ॥९१॥**

*अन्वयः—प्रजासु, वात्सल्यधरे, अपि, द्विषाम्, शल्यवत्, सपत्राकृतिकारके, जिने, कपाट-दुर्धर्षतिरःप्रसारिता(ः), तदुरःस्थितः, प्रतापवह्निः, अदहत् ॥९१॥*

वृत्तिः—प्रजासु–प्रकर्षेण जायन्ते इति प्रजाः, जनास्तासु तथा, प्रजाविषय इति यावत्, "लोको जनः प्रजा" ३।१५४॥ इत्यभिधानचिन्तामणिः। वात्सल्यधरे–धरतीति धरः, वात्सल्यस्य वत्सलभावस्य स्नेहविशेषस्येति यावत् धरो वात्सल्यधरस्तस्मिंस्तथा। अपि–संभावनायाम्। द्विषाम्–द्विषन्त्यात्मानमिति द्विष आन्तरशत्रवः कामादयस्तेषान्तथा। शल्यवत्–बाणावत्। सपत्राकृतिकारके–सह पत्रैर्वर्तते इति सपत्रो बाणस्तस्याऽऽकृतिराकारस्तस्य कारकः कर्ता सपत्राकृतिकारकस्तस्मिँस्तथा। जिने–शान्तिनाथे। यद्वा–वाशब्दं पादपूरणार्थकं स्वीकृत्य–प्रजासु, आत्–सल्यधरे–अशल्यधरेऽपीत्येवं "वात्सल्यधरेऽपीति पदं व्याख्येयम् शकारसकारयोरैक्यस्य कचित्स्वीकृतत्वात् तथा च अशल्यधरेऽपि शल्यवत्" इत्यादितो विरोधाभासालङ्कारश्चमत्कृतिमादधाति। सतीति शेषः। कपाटदुर्धर्षतिरःप्रसारिता–तिरःप्रसारं मध्यमलोकव्यापनं करोतीति तिरःप्रसारति, तिरःप्रसारतीति तिरःप्रसारिता, कपाटवद्धर्षः कपाटदुर्धर्षः सचासौ तिरःप्रसारिता चेति तथा। तदुरःस्थितः–तदीयवक्षस्थलविहितावासः। प्रतापवह्निः–प्रभावानलः। "स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्" इति कोशः। अदहत्–भस्मीचकार। द्विष इति शेषः। यद्वा–"सविसर्गाविसर्गयोः" इत्युक्त्या प्रसारिता इत्यत्र सविसर्गान्तं पाठं प्रकल्प्य (द्विषाम्) तिरस्तिर्यग्लोकं प्रकर्षेण स्यते तनूकरोतीति तिरःप्रसाः, कपाट–दुर्धर्षा चासौ तिरःप्रसाः कपाटदुर्धर्षतिरःप्रसाः, सैरारिताः शत्रुताः कपाटदुर्धर्षतिरःप्रसारितास्तास्तथा। अदहत्–भस्मीचकारेति वा व्याख्येयम् ॥९१॥

**स्वकेलिलेशस्मितनिन्दितेन्दुनः, पुनर्नु चन्द्रेण मुखस्य सौहृदम्।**
**समिद्धतारारुचिहेतुनाऽर्हत–स्ततः स भालेऽर्धवपुः शशी स्थितः ॥९२॥**

*अन्वयः—स्वकेलिलेशस्मितनिन्दितेन्दुनः, अर्हतः, मुखस्य, समिद्धताराचिहेतुना, चन्द्रेण, पुनः, सौहृदम्, नु, ततः, अर्धवपुः, सः, शशी, भाले, स्थितः ॥९२॥*

वृत्तिः—स्वकेलिलेशस्मितनिन्दितेन्दुनः–स्वा स्वकीया चासौ केलिः क्रीडा स्वकेलिस्तस्या लेशः कणः स्वकेलिलेशः सचासौ स्मितमीषद्धासः स्वकेलिलेशस्मितम् तेन निन्दितो निर्जित इन्दुश्चन्द्रो येन तत् स्वकेलिलेशस्मितनिन्दितेन्दु तस्य तथा। "निजः पुनः। आत्मीयः स्वः स्वकीयश्च" ३।२२६॥ इत्यभिधानचिन्तामणिः। अर्हतः–पारगतस्य जिनेश्वरस्य भगवतः श्रीमच्छान्तिनाथस्य। मुखस्य–वदनस्य। समिद्धतारारुचिहेतुना–ताराणां तारकाणां कनीनिकानाञ्च रुचिः स्पृहा तारारुचिः, समिद्धा–प्रकाशमाना जाज्वल्यमानेति यावत् सा चासौ तारारुचिः समिद्धतारारुचिः सैव

हेतुः समिद्धताराहचिहेतुस्तेन तथा । चन्द्रेण-चन्द्रमसा । पुनः-किन्तु । सौहृदम्-मित्रता सौहार्दमितियावद् । "सख्यं तु सौहृदम् । सौहार्दसाप्तपदीनमैत्र्यजर्याणि सङ्गतम्" ३।३९४॥ इत्यभिधानचिन्तामणिः । नु-वितर्केऽव्ययम् । ततः-तस्माद्धेतोः "हेतौ यत्तद्यतस्ततः" ६।१७३॥ इत्यभिधानचिन्तामणिः । अर्धवपुः-अर्धं समार्द्धभागान्वितं वपुः शरीरं यस्य सोऽर्धवपुः । सः-प्रसिद्धः, शान्तिनाथमुखकेलिस्मितविजितः । शशी-शशः कलङ्कतयाऽस्त्यस्येति शशी चन्द्रः । "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे इन् प्रत्ययः । भाले-ललाटे । "भाले गोध्यलिकालीकललाटानि" ३ । २३७ ॥ इत्यभिधानचिन्तामणिः । स्थितः-स्थितवान् । पराजितश्चन्द्रोऽर्धवपुः सन् भालरूपेण परिणतः समुपास्ते श्रीशान्तिनाथम् । 'कृतः स्वभालेन समोऽर्धतः शशी' इति पाठे तु स्पष्ट एवोक्तोऽर्थः ॥९२॥

## विधौ श्रियार्हद्वदनस्य मित्रतां, निजांशदृक्तर्जितपद्मसंपदः ।
## विचार्य्य तद्योगबलात्कुशेशयं, तदालिमालाजटिलं वने स्थितम् ॥९३॥

अन्वयः—*श्रिया, निजांशदृक्तर्जितपद्मसंपदः, अर्हद्वदनस्य, विधौ, तद्योगबलात्, मित्रताम्, विचार्य्य, ( स्थितम् ) कुशेशयम्, अलिमालाजटिलम्, ( सत् ) सदा, वने, स्थितम् ॥९३॥*

वृत्तिः—श्रिया-शोभया । "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव कथ्यते" इति यादवः । करणे तृतीया । निजांशदृक्तर्जितपद्मसंपदः-निजः स्वकीयोऽशो भागो निजांशः, निजांशौ एव दृशौ नयने निजांशदृशौ, ताभ्यां तर्जिता निर्भर्त्सिता अधःकृतेतियावत् पद्मानां कमलानां सम्पत् समूहः सौभाग्यं वा येन तन्निजांशदृक्तर्जितपद्मसंपत्, तस्य तथा । "निजः पुनः । आत्मीयः स्वः स्वकीयश्च" ३।२२६॥ "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् । लोचनं दर्शनं दृक् च" ३।२३९॥ इत्युभयत्राभिधानचिन्तामणिः । अर्हद्वदनस्य-चतुस्त्रिंशतमतिशयान् सुरेन्द्रादिकृतां पूजां वार्हतीति अर्हन् "सुगद्विषार्हः सत्रिशत्रुस्तुत्ये" ५।२।२६॥ इत्यतृश्प्रत्ययः, अरिहननात् रजोहननात् रहस्याभावाच्चेति वा वृषोदरादित्वात्, तस्य वदनमाननम् मुखमितियावद् अर्हद्वदनम् तस्य तथा । विधौ-चन्द्रे । तद्योगबलात्-तत्सम्पर्कबलात् । योगबलतः । मित्रतां विचार्य्य, तत् कुशेशयमित्यन्वयो वा विधेयः । मित्रताम्-मित्रस्य सुहृदो भावो मित्रता, तान्तथा । विचार्य्य-समाकलय्य । ( स्थितम् ) कुशेशयम्-कुशे जले शेते कुशेशयम्-कमलम् "शयवासिवासेष्वकालात्" ३।२।२५॥ इत्यनेन सप्तम्यलुप् । "कमलं नलिनं पद्मनरविन्दं कुशेशयम्" ५।२२६॥ "नीरं वारि जलं दकं कमुदकं पानीयमम्भः कुशम्" ४।१३५॥ इत्यभिधानचिन्तामणिः । अलिमालाजटिलम्-अलीनां भ्रमराणां माला पङ्क्तिरलिमाला तया जटिलं व्याप्तमलिमालाजटिलम् । ( सत् ) सदा-तादृशविचारणोत्तरकाले । वने-कानने । स्थितम्-अतिष्ठत् ॥९३॥

**निशीन्दुरर्हद्वदनेऽस्तिसौहृद-स्तथा दिवाब्जं न सदा ससङ्गतम् ।**
**अतद्वयीजित्वरसुन्दरान्तरे, न साम्यधीः क्वापि सतां ततः परे ॥९४॥**

अन्वयः—*इन्दुः, निशि, अर्हद्वदने, अस्तिसौहृदः ( अस्ति ) अब्जम्, दिवा, तथा, सदा, ससङ्गतम्, न, ततः, अतद्वयीजित्वरसुन्दरान्तरे, परे, सताम्, क्वापि, साम्यधीः, न ॥९४॥*

वृत्तिः—इन्दुः–चन्द्रः । निशि–रात्रौ । अर्हद्वदने–अर्हतो जिनेश्वरस्य वदनमाननम् अर्हद्वदनम् तस्मिँस्तथा । अस्तिसौहृदः–अस्तीति विद्यमानार्थकमव्ययम् एतच्च अस्ति-विद्यमानं सौहृदं मैत्री यस्य स तथा । रात्रिकालिकेन चन्द्रमसाऽर्हद्वदनस्य कथञ्चित्सौहृदमस्तीति भावः । अब्जम्–कमलम् । दिवा–दिवसे । तथा–विद्यमानाऽ ( अस्य ) र्हद्वदनसौहृदम् । यद्वा–तथा अब्जम् दिवा अस्तिसौहृदमितिशेषः । सदा–सर्वदा । ससङ्गतम्–सङ्गतं मित्रता तेन सहितं ससङ्गतम्–मित्रतावत् । न–नहि । दिवसकालिककमलस्य कथञ्चिदर्हद्वदनसाम्यसद्भावेऽपि सार्वकालिकेन कमलेनापि नेत्यर्थः, अर्हद्वदनस्य विकासित्वान्निशायां चन्द्रस्य दिवा कमलस्य च विकासित्वात्तत्कालावच्छेदेन तदुभयेनापि साम्यमौपाधिकमव्याप्यवृत्ति वा जिनाननस्येति भावः । ततः–तस्माद्धेतोः । अतद्वयीजित्वरसुन्दरान्तरे–द्वौ अवयवौ अस्या इति द्वयी तयोश्चन्द्रपद्मयोर्द्वयी तद्द्वयी तस्या जित्वरं जयनशीलम् तद्वयीजित्वरम् न विद्यते तद्वयीजित्वरम् सुन्दरान्तरमन्यत् सुन्दरान्तरं वस्तु यस्मिन् तत्–अतद्वयीजित्वरसुन्दरान्तरम् तस्मिँस्तथा । परे–अन्यस्मिन् । "परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले" इति मेदिनी । सताम्–कोविदानाम् विदुषामितियावत् । "विद्वान् सुधीः कविर्विचक्षणलब्धवर्णो मेधाविकोविदविशारदसूरिदोषज्ञाः... व्यक्तो विपश्चित् सङ्ख्यावान् सन्" ३।५। इत्यभिधानचिन्तामणिः । क्वापि–कस्मिन्नपि वस्तुनि । साम्यधीः–सादृश्यबुद्धिः । न–नहि । जगति मुखस्योपमानं द्वयम् चन्द्रः पद्मं च तदतिरिक्तं वस्त्वन्तरं नास्ति तदुपमानमिति भावः ॥९४॥

**नचार्हतोऽनुत्तरवासिनः सुरा, विधातुमङ्गुष्ठमपि क्षमाः क्रमात् ।**
**असंशयस्तेन मनःशयोऽस्ति मे, न तन्मुखस्य प्रतिमा चराचरे ॥९५॥**

अन्वयः—*क्रमात्, अनुत्तरवासिनः, सुराः, अर्हतः, अङ्गुष्ठम्, अपि, विधातुम्, नच, क्षमाः, तेन, मे, मनःशयः, असंशयः, (अतः) चराचरे, तन्मुखस्य, प्रतिमा, न, अस्ति, ॥९५॥*

वृत्तिः—क्रमात्–क्रमशः । अनुत्तरवासिनः–अनुत्तरे तन्नामविश्रुतामरविमाने वसन्ति तच्छीलास्तथा । "अजातेः शीले" ५।१।१५४॥ इत्यनेन णिन् प्रत्ययः । सुराः–देवाः । अर्हतः–चतुस्त्रिंशदतिशययुक्तस्य पूज्यस्य परमेष्ठिनः । अङ्गुष्ठम्–करचरणान्यतरप्रथमाङ्गुलि विशेषम् । अपि–सम्भाव-

नायाम् । विधातुम्–निर्मातुम् । नच–नैव । क्षमाः–शक्ताः, प्रभवन्तीति यावत् । तेन–हेतुना । मे–मम । मते इति शेषः । मनःशयः–मदनः । "मदनो जराभीरु ''' विषमायुधो मकरकेतनह्नच्छयौ" २।१२१।। इत्यभिधानचिन्तामणिः । असंशयः–नास्ति संशयः तदङ्कुष्ठनिर्माणविषयको यस्मिन् स तथा । (अतः) चराचरे–स्थावरजङ्गमात्मके जगति । तन्मुखस्य–श्रीमदर्हद्वदनस्य । प्रतिमा–उपमानम् । नास्ति–न संभवतीति यावत् । अत्र चतुर्थपादवाक्यार्थं प्रति पादत्रयार्थस्य हेतुतयाऽभिधानात् काव्यलिङ्गमलङ्कारः ।।९५।।

सरोरुहं तस्य दृशैव तर्जितं, जले न्यमज्जद् बहुलज्जया जवात् ।
ततः स्फुरत्पद्मपदं तदञ्चितं, वृतं न जैनाननसंश्रयश्रिया ।।९६।।

अन्वयः—*तस्य, दृशा, एव, तर्जितम्, सरोरुहम्, बहुलज्जया, जवात्, जले, न्यमज्जत्, ततः, स्फुरत्पद्मपदम्, अञ्चितम्, तत्, जैनाननसंश्रयश्रिया, न वृतम् ।।९६।।*

वृत्तिः—तस्य–भगवतः श्रीमच्छान्तिनाथस्य । दृशा–नयनेन । एव–अवधारणार्थकमव्ययम् । तर्जितम्–भर्त्सितम्, निर्जितमितियावत् । सरोरुहम्–सरसि रोहत्युत्पद्यते इति सरोरुहम् कमलम् । बहुलज्जया–बह्वीचासौ लज्जा त्रपा बहुलज्जा तया तथा । जवात्–वेगेन । सहसेति यावत् । जले–सलिले । न्यमज्जत्–निमग्नम् । ततः–तस्मात् जलनिमज्जनाद्धेतोः । अञ्चितम्–प्रशस्तम् । स्फुरत्पद्मपदम्–स्फुरत्–विलसत् पद्मेति पदम् आस्पदम् प्रतिष्ठेतियावद्यस्य तत्तथा । तत्–कमलम् । जैनाननसंश्रयश्रिया–जिनस्य तीर्थकृतो भगवतः शान्तिनाथस्य इदम् जैनम् जैनञ्च तदाननम् वदनम् जैनाननम् तत्र संश्रयः संश्रयणम् समाश्रयणमिति यावत् जैनाननसंश्रयस्तस्मात्–तज्जनिता श्रीः शोभा जैनाननसंश्रयश्रीस्तया तथा । "शोभा सम्पत्तिपद्मासु लक्ष्मीः श्रीरिव कथ्यते" इति यादवः । न–नहि । वृतम्–अन्वितम् ।।९६।।

जडस्वरूपा जडजातजन्मना, जिताः स्मितेनैव विधोरपि श्रियः ।
जिनाननेन श्रुतिशालिनाऽमुना, मनाग् न साम्यं द्विजराजि राजते ।।९७।।

अन्वयः—*विधोः, अपि जडस्वरूपाः, श्रियः, जडजातजन्मना, स्मितेन, एव, जिताः, श्रुतिशालिना, अमुना, जिनाननेन, द्विजराजि, मनाक्, साम्यम्, न, राजते, ।।९७।।*

वृत्तिः—विधोः–चन्द्रस्य । अपि–सम्भावनायामव्ययम् । "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी । जडस्वरूपाः–जडतुल्याः । श्रियः–लक्ष्म्यः शोभा वा । जडजातजन्मना–

जडादचेतनात् मुखाज्जातम् जडजातम् जडजातं जन्मोत्पत्तिर्यस्य तत् जडजातजन्म तेन तथा । स्मितेन-ईषद्धासेन । एव-अवधारणार्थकमव्ययम् । जिताः-विजिताः पराजिता इति यावत् । श्रुतिशालिना-श्रुत्या आम्नायेन आगमेनेति यावत्, शालते शोभते तच्छीलमस्यस्य इति श्रुतिशालि "अजातेः शीले" ५।१।१५४।। इत्यनेन ताच्छील्ये णिन् प्रत्ययः । 'श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्तयोः स्त्रियाम्' इति मेदिनी । अमुना-अनेन । जिनाननेन-भगवत्तीर्थकृच्छान्तिनाथवदनेन । द्विजराजि-द्विजानाम्-ब्राह्मणानां क्षत्रियाणाम् विशाञ्च राट् राजा द्विजराट् तस्मिँस्तथा । मनाक्-ईषत् किञ्चिदिति यावत् "अल्पे किञ्चिन्मनागीषच्च किञ्चन" ६।१७२।। इत्यभिधानचिन्तामणिः । साम्यम्-समस्य तुल्यस्य भावः समता तुल्यतेति यावत् सादृश्यमिति परमार्थः । न-नहि । राजते-विराजते । चन्द्रे जिनाननसादृश्यलेशोऽपि नास्तीति भावः ।।९७।।

**मुखे सुधांशौ च, वरे सरोरुहे, कलातुला स्याद्विजराजयोगतः ।**
**अतः परं भव्यमहो महीयसी, सुवृत्तबोधोदयपल्लवप्रभा ।।९८।।**

अन्वयः—*मुखे, सुधांशौ, च, वरे, सरोरुहे, द्विजराजयोगतः, सुवृत्तबोधोदयपल्लवप्रभा महीयसी, कलातुला, स्यात्, अहो अतः, परम्, भव्यम्, ( कुतः ) ।।९८।।*

वृत्तिः—मुखे-भगवच्छान्तिनाथवदने । सुधांशौ-सुधयाऽमृतेन संवलितोंऽशुः किरणो यस्य स सुधांशुश्चन्द्रस्तस्मिँस्तथा । च-पुनः । वरे-श्रेष्ठे । "वरो जामातरि वृतौ देवतादेरभीप्सिते । षिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्" । सरोरुहे-सरसि कासारे रोहति समुत्पद्यते इति सरोरुहम् तस्मिँस्तथा, कमले इत्यर्थः । द्विजराजयोगतः-मुखपक्षे द्विजा दन्ता राजान इव द्विजराजाः, चन्द्रपक्षे च द्विजानां राजा द्विजराजश्चन्द्रः स्वयमेव, तृतीय-( सरोरुह )-पक्षे च द्विजराजः कलहंसः, तैस्तेन वा योगो सम्बन्धो द्विजराजयोगस्तस्मात्तथा "दन्तविप्राण्डजा द्विजाः" इत्यमरनानार्थः । सुवृत्तबोधोदयपल्लवप्रभा-मुखपक्षे सुष्ठु वृत्तबोधानां चरणज्ञानानामुदयो येभ्यस्ते सुवृत्तबोधोदयास्ते च ते पल्लवाः पदलेशाः सुवृत्तबोधोदयपल्लवास्तेषां प्रभा बुद्धिः सुवृत्तबोधोदयपल्लवप्रभा, "चरित्रं चरिताचारौ चारित्रचरणे अपि । वृत्तं शीलञ्च" ३।५०७।। इत्यभिधानचिन्तामणिः । चन्द्रपक्षे—सुष्ठु वृत्तः वर्तुलः सुवृत्तः स चासौ बोधः प्रकाशः सुवृत्तबोधस्तेन उदये पल्लववत् प्रभा सुवृत्तबोधोदयपल्लवप्रभा, सरोरुह-पक्षेऽपि सुष्ठु वृत्तः वर्तुलः सुवृत्तः सचासौ बोधः प्रकाशः सुवृत्तबोधस्तेन उदये पल्लवानां प्रभा तथेति विज्ञेयम् । महीयसी-अतिशयेन महती महीयसी "गुणाङ्गाद्वेष्ठेयसू" ७।३९।। इत्यनेन ईयसुः प्रत्ययः । कलातुला-कलायास्तुला तुलना कलातुला । स्यात्-भवेद् । अहो-आश्चर्येऽव्ययम् । "अहहेत्यद्भुते खेदे परिक्लेशप्रकम्पयोः" इति मेदिनी । अतः-एतस्मात् प्रदर्शितत्रयात् । परम्-अन्यत् । "परः श्रेष्ठारि-

दूरान्योत्तरे क्लीवन्तु केवले" इति मेदिनी । भव्यम्-भवतीति भव्यम्-भावुकम् "भव्यगेयजन्यरम्य" ५।१।७॥ इत्यनेन कर्तरि यः प्रत्ययः । "भावुकं भविकं भव्यम्" इत्यमरकोशः । कुतः-कस्मात् कुत्र क वा शेष्यम् । कुतोऽपि कुत्रापि वा नास्तीति भावः ॥९८॥

दिवा विबोधात्, यदि वाऽनिशोदयात्, त्रयेऽप्ययं स्याद् व्यतिरेकताश्रयः।
ततोऽन्वयाद्वा व्यतिरेकतः स्वत-स्तदाननस्योपमितौ दरिद्रता ॥९९॥

*अन्वयः—दिवा, विबोधात्, यदि वा, अनिशोदयात्, अयम्, त्रये, अपि, व्यतिरेकताश्रयः, स्यात्, ततः, अन्वयात्, वा व्यतिरेकतः, स्वतः, तदाननस्य, उपमितौ दरिद्रता ॥९९॥*

वृत्तिः—दिवा-दिवसे। विबोधात्-वि-विशिष्टो बोधः प्रकाशः विबोधस्तस्मात्तथा। यदि वा-अथवा। अनिशोदयात्-नास्ति निशाऽन्नेत्यनिशं सन्ततम् अनिशमुदयोऽनिशोदयस्तस्मात्तथा "अनारतं त्वविरतं संसक्तं सततानिशे। नित्याऽनवरताजस्रासक्ताश्रान्तानि सन्ततम्" ६।१०७॥ इत्यभिधानचिन्तामणिः। अयम्-दिवा विबोधः, अनिशोदयश्च। त्रये-मुखचन्द्रसरोरुहैतन्त्रितये। व्यतिरेकताश्रयः-व्यतिरेकस्य भेदस्य आश्रयः करणम् व्यतिरेकाश्रय। स्यात्-भवेत्। कमलस्य दिवाविबोधेऽपि रात्रौ तदभावः, चन्द्रस्य रात्रौ विबोधेऽपि दिवा कृष्णपक्षे शुक्लपक्षे चापि रात्रौ अपि सर्वदा प्रकाशाभावेन च कमलापेक्षया चन्द्रापेक्षया चापि भगवतः शान्तिनाथस्य वदने व्यतिरेकोऽसंशयं वर्तते एवेतिभावः। ततः-तस्माद्धेतोः। अन्वयात्-तत्सत्त्वे तत्सत्त्वमित्यन्वयात्। वा-अथवा। व्यतिरेकतः-तदभावे तदभाव इति व्यतिरेकाद्। स्वतः-स्वयमेव सुस्पष्टं यथास्यात्तथा। तदाननस्य-तस्य भगवतः शान्तिनाथस्य आननम् वदनम् तदाननम् तस्य तथा। उपमितौ-सादृश्ये। दरिद्रता-दारिद्र्यम्। अस्तीतिशेषः। नखाब्जे भगवद्वदनोपमानतामनुभवितुमलं भवत इति भावः ॥९९॥

अयुक्तमुक्तं यदि वा तुरातुरा-शयाऽऽशया पूर्वविपश्चितामतः।
समुद्रसारस्य धियाऽत्र येन सा, तदाननस्योपमितौ दरिद्रता ॥१००॥

*अन्वयः—यदि वा, येन, पूर्वविपश्चिता तुरातुराशयाऽऽशया, धिया, अत्र, समुद्रसारस्य, तदाननस्य, उपमितौ, सा, दरिद्रता, (अस्तीति) आमतः, उक्तम्, (तत्), अयुक्तम्, ॥१००॥*

वृत्तिः—यदि वा-पक्षान्तरे। येन-बुद्धिविषयीभूतेन। पूर्वविपश्चिता-प्राचीनमनीषिणा। तुरातुराशयाऽऽशया-तुरेण संभ्रमेण वेगेनेति यावत् आतुरो व्यग्रस्तुरातुरः स चासावाशयः अभिप्रायस्तस्य आशा अभिलाषस्तया तथा। धिया-बुद्ध्या। अत्र-लोकेऽस्मिन्। समुद्रसारस्य-मुदो हर्षस्य रस आस्वादो मुद्रसस्तस्य आरः प्राप्तिमुद्रसारस्तेन सह वर्तत इति समुद्रसारं तस्य तथा, यद्वा

मुद्रायाः सङ्कोचस्य सारो गमनं मुद्रासारस्तेन सह वर्तते तस्य तथा, यद्वा समुद्रस्य रत्नाकरस्य सारो धनं तस्य तद्रूपस्येति तदर्थः । तदाननस्य–तस्य श्रीशान्तिनाथस्य आननं वदनं तदाननं तस्य तथा । उपमितौ–सादृश्ये, उपमाने वा । मा–पूर्वकथिता, प्रसिद्धा । दरिद्रता–दारिद्रयम्, अस्तीतिशेषः । आमतः–दोषतः, ( यत् ) उक्तम्–कथितम् । ( तत् ) अयुक्तम्–अनुचितम्, वक्ष्यमाणप्रकारेण तत्साधनादिति भावः । "पूर्वविपश्चितामता" इति यथामुद्रितपाठे तु 'यदि वा येन पूर्वविपश्चिता तुरातुराशयाऽऽशयाधिया अत्र समुद्रसारस्य तदाननस्य उपमितौ सा दरिद्रता मता ( इति ) अयुक्तम् उक्तम्' इत्येवमन्वेयम्, पूर्वोदीरितप्रकारेण व्याख्येयञ्च ॥१००॥

दृशः प्रकाशात् सरसस्वभावतः, प्रपन्नसत्सौरभतस्त्रयी सदृक् ।
ततो न काचिद्विदुषां प्रभाजुषां, तदाननस्योपमितौ दरिद्रता ॥१०१॥

*अन्वयः—दृशः, प्रकाशात्, सरसस्वभावतः, (च) प्रपन्नसत्सौरभतः, त्रयी, सदृक्, ततः, प्रभाजुषाम्, विदुषाम्, तदाननस्य, उपमितौ, काचित्, दरिद्रता, न, ॥१०१॥*

वृत्तिः—मुखचन्द्रपद्मानां पारस्परिकं सादृश्यमेव न तु ननु वैसदृश्यमिति बोधयितुमाह दृश इति । दृशः–मुखे दृष्टे सम्यक्त्वस्य, चन्द्रे दृष्टे नेत्रस्य । प्रकाशात्–विकासात् । ( कमले दृष्टे च ) दृशः नेत्रस्य, प्रकाशात् स्वरूपप्रकटनात्; दृक्प्रकाशस्य त्रितयेऽपि सत्त्वात् । सरसस्वभावतः–रसैः शृङ्गारादिभिर्नवभिः सहितः सरसः स चासौ स्वभावः शीलं सरसस्वभावस्तस्मात् तथा चन्द्रपक्षे च रसेन जलेन सहितः सरसः सचासौ स्वभावः प्रकृतिः सरसस्वभावस्तस्मात्तथा। "रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्य्ये तिक्तादौ द्रवरागयोः" इति मेदिनी । कमलपक्षे च सरसस्वभावतः सरसस्तडागस्य इतिच्छेदः, स्वभावात्–स्व आत्मीयश्चासौ भावः स्वभावस्तस्मात्तथा, "निजः पुनः । आत्मीयः स्वः स्वभावश्च" ३।२२६॥ इत्यभिधानचिन्तामणिः कमलपक्षे सरसः इति पदस्य सविसर्गत्वेऽपि "सविसर्गाविसर्गयोः" इत्यभियुक्तोक्त्या क्षतिकरत्वाभावः, एवञ्च मुखचन्द्रकमलेषु त्रिष्वपि सरसस्वभावस्य धर्मस्य सादृश्यजनकस्य सत्त्वात् । ( च–पुनः ) प्रपन्नसत्सौरभतः–कमलमुखपक्षे प्रपन्नं समधिगतं सत् समीचीनं सौरभं सौगन्ध्यं येन तत् प्रपन्नसत्सौरभम् तस्मात्तथा, चन्द्रपक्षे च अमावास्यायां सूर्य्यस्य कान्तिश्चन्द्रेण प्रपन्ना इति सूरस्य इयं सौरी सौरी चासौ भा प्रभा सौरभा कर्मधारयसमासोत्तरं "पुँवत्कर्मधारये" ३।२।५७॥ इत्यनेन पुँवद्भावः प्रपन्ना सती सौरभा येन स प्रपन्नसत्सौरभस्तस्मात्तथा भावप्रधानोऽयं निर्देशः । त्रयी मुखचन्द्रकमलैतत्त्रयी । सदृक् समाना दृश्यते इति सदृक् । ततः–तस्माद्धेतोः । प्रभाजुषाम्–प्रभां प्रतिभां जुषन्ते सेवन्त इति प्रभाजुषस्तेषान्तथा । विदुषाम्–मेधाविनाम् । तदाननस्य–तस्य भगवतः शान्तिनाथस्य आननं वदनन्तदाननम् तस्य तथा । उपमितौ–सादृश्ये । काचित्–कापि । दरिद्रता–दारिद्रयम् । न–नहि । वर्तते इतिशेषः ॥१०१॥

स्वबालभारस्य तदुत्तमाङ्गजै-र्विधित्सतः साम्यमसम्यगाशयात् ।
पराङ्मुखत्वाद् धवलीभवन्मुख-क्रियां चमर्यां दिशति त्रपावशात् ॥१०२॥

अन्वयः—चमरी, तदुत्तमाङ्गजैः, साम्यम्, विधित्सतः, स्वबालभारस्य, असम्यगाशयात्, त्रपावशात्, पराङ्मुखत्वात्, धवलीभवन्मुखक्रियाम् आदिशति ॥१०२॥

वृत्तिः—चमरी–चमतीति चमरी, मृगीविशेषः । मृगभेदा–रुरुन्यङ्कु–रङ्कुगोकर्ण–शंवराः । चमूरुचीनचमरा समुरै–ण–र्श्यरौहिषाः । ४।३६०॥ इत्यभिधानचिन्तामणिः । तदुत्तमाङ्गजैः–उत्तमं मुत्कृष्टञ्च तदङ्गमुत्तमाङ्गम् शिरः, मस्तकमिति यावत्, तस्य भगवतः शान्तिनाथस्य उत्तमाङ्गम् तदुत्तमाङ्गं तस्माज्जातानि तदुत्तमाङ्गजानि शान्तिनाथीयकेशास्तैस्तथा । साम्यम्–तुलनाम् । विधित्सतः–कर्तुमभिलषतः । स्वबालभारस्य–स्वकीयकेशसमूहस्य । असम्यगाशयात्–न सम्यक् समीचीनोऽसम्यक् तादृशश्चासावाशयोऽभिप्रायोऽसम्यगाशयस्तस्मात्तथा । "सत्यं सम्यक् समीचीनमृतं तथ्यं यथातथम् । यथास्थितञ्च सद्भूते" २।१७८॥ इत्यभिधानचिन्तामणिः । त्रपावशात्–लज्जापराधीनतया । पराङ्मुखत्वात्–विमुखत्वात् । धवलीभवन्मुखक्रियाम्–धवलं विशदम् अधवलं धवलं सम्पद्यमानं धवलीभवत् तच्च तन्मुखं धवलीभवन्मुखम् तस्य क्रिया आचरणम् धवलीमुखक्रिया तान्तथा । आदिशति–आज्ञापयति आदधतीति यावद्धातूनामनेकार्थत्वात् । स्वबालभारस्य तदुत्तमाङ्गजैः साम्यविधित्सारूपान्महतोऽपराधाद्धेतोर्लज्जया पराङ्मुखीभूय स्वीयमाननमाच्छादयतीतिभावः ॥१०२॥

स्वबालभारस्य तदुत्तमाङ्गजैः, समं परिक्रीडयतोऽबुधः क्रुधः ।
प्रशान्तिकृन्नागरतः स्वसाक्षिकं, दधौ स राज्यं रुचिरं चिरं नयैः ॥१०३॥

अन्वयः—स्वसाक्षिकं, अबुधः, स्वबालभारस्य, तदुत्तमाङ्गजैः, समम्, परिक्रीडयतः, क्रुधः, नागरतः, प्रशान्तिकृत्, सः, नयैः, चिरम्, रुचिरम्, राज्यम्, दधौ ॥१०३॥

वृत्तिः—स्वसाक्षिकम्–स्वः साक्षी द्रष्टा यस्मिन् क्रीडात्मके कर्मणि तत्स्वसाक्षिकम् तद्यथा स्यात्तथा । अबुधः–बुध्यते इति बुध् ज्ञानं बुद्धिर्वा न विद्यते बुध् यत्र स, अबुध तस्य तथा, बाल्यादज्ञानस्येत्यर्थः, कोपविशेषणं चेदम् । स्वबालभारस्य–स्वकीयशिशुवर्गस्य । तदुत्तमाङ्गजैः–तस्मिन् पुरे उत्तमाः सत्पुरुषाः प्रतिष्ठिता इति यावत् तदुत्तमाः, तेषाम् अङ्गाज्जाता अङ्गजास्तनूजाः पुत्राः तदुत्तमाङ्गजास्तैस्तथा । समम्–सह । परिक्रीडयतः–परि–सर्वतो भावेन राजपुत्रत्वाद्यभिमानं विमुच्य नानाविधखेलामादधतः । सत इति शेषः । खेलाव्यासङ्गाज्जातायाः–क्रुधः–कोपस्य । नागरतः–नागर-

पक्षीभूय । "व्याश्रये तसुः" (७।२।८१) इति सूत्रेण 'देवा अर्जुनतोऽभवन्" इतिवत् तसुप्रत्ययः । स्थित इति शेषः। **प्रशान्तिकृत्**-प्रशान्तिं करोतीति प्रशान्तिकृत्। **सः**-भगवान् शान्तिनाथः । **नयैः**-नीतिभिः, न्यायपुरस्सरमिति यावत । **चिरम्**-दीर्घकालं यावत् । "चिराय चिररात्राय चिरस्य च चिराचिरम् । चिरेण दीर्घकालेऽर्थे" ६।१६८। इत्यभिधानचिन्तामणिः । **रुचिरम्**-सुन्दरम् । रमणीयमिति यावत् । "चारुहारि रुचिरं मनोहरं साधुरम्यमनोज्ञानि पेशलं हृद्यसुन्दरे ।" ६।८०॥ इत्यभिधानचिन्तामणिः । राज्यम्-कर्मराज्यम् सौराज्यमिति यावत् । **दधौ**-अधात् ॥१०३॥

## उपादिशन्नीतिभरं स्फुटं भटैः, समं चमर्य्येव तुलाभिलाषिणः ।
## नृपे प्रशान्ते पितरि स्वयं जिन-श्चकार राज्यं कतिचित् समाः क्रमात् ॥१०४

*अन्वयः—भटैः, समम्, तुलाभिलाषिणः, स्फुटम्, नीतिभरम्, उपादिशन्, एव, नृपे, पितरि, प्रशान्ते, चमरी, जिनः, स्वयम्, क्रमात्, कतिचित्, समाः, राज्यम्, चकार ॥१०४॥*

**वृत्तिः—भटैः**-वीरैः। "भटः स्यात्पुंसि वीरे च विशेषे पामरस्य च" इति मेदिनी। **समम्**-साकम् । "साकं सत्रा समं सार्द्धममा सह" ६।१६३॥ इत्यभिधानचिन्तामणिः । **तुलाभिलाषिणः**-तुलाम्-सादृश्यमभिलषिति तच्छीलमस्त्यस्येति तुलाभिलाषी तस्य तथा । "अजातेः शीले" ५।१।१५४॥ इत्यनेन ताच्छील्ये णिन् प्रत्ययः । **स्फुटम्**-व्यक्तं यथास्यात्तथा । **नीतिभरम्**-नयसमुदयम् । न्यायातिशयमिति यावत । **उपादिशन्**-उपआङ्पूर्वकाद्दिश्धातो शतृप्रत्यये साधु, प्रतिपादयन् । **एव**-अवधारणार्थकमव्ययम् । **नृपे**-राजनि । **पितरि**-जनके श्रीविश्वसेने । **प्रशान्ते**-प्रकर्षेण शान्तिमापन्ने । **चमरी**-चमराः सन्त्यस्येति चमरी, नृप इति यावत । **जिनः**-जयति रागद्वेषमोहानिति जिनोऽर्हन् भगवान् श्रीमान् शान्तिनाथः । **स्वयम्**-आत्मना । "स्वयमात्मना" इत्यमरः । **क्रमात्**-क्रमशः । **कतिचित्**-कियन्तीः । **समाः**-शरदः, वर्षाणीति यावत । "स संपर्यनूद्भ्यो वर्षं हायनोऽब्दं समाः शरत्" २।७३॥ इत्यभिधानचिन्तामणिः । **राज्यम्**-राजकर्म । **चकार**-कृतवान् ॥१०४॥

## अथाप्रयत्नोदितचक्ररत्नभृ-न्नृपाधिरोहेऽत्र हयश्चलन्निति ।
## अनागसे शंसति बालचापलं, परं पराकृत्य दिशां जयी भव ॥१०५॥

*अन्वयः—अथ, अप्रयत्नोदितचक्ररत्नभृन्नृपाधिरोहः, हयः, चलन्, परम्, बालचापलम्, पराकृत्य, अत्र दिशाम्, जयी, भव, इति, अनागसे, शंसति ॥१०५॥*

**वृत्तिः—अथ**-राज्यप्राप्तिसमनन्तरम् । **अप्रयत्नोदितचक्ररत्नभृन्नृपाधिरोहः**-अधिरुह्यते, आरुह्यते इत्यधिरोहः, अप्रयत्नेन प्रयासाभावेन उदितम् सम्प्राप्तम् अप्रयत्नोदितम् तच्च तच्चक्ररत्नं चक्र-

रूपं रत्नम् अप्रयत्नोदितचक्ररत्नम् तत् बिभर्ति धारयतीति अप्रयत्नोदितचक्ररत्नभृत स चासौ नृपो राजा अप्रयत्नोदितचक्ररत्नभृन्नृपस्तस्य अधिरोहस्तस्मिँस्तथा, सतीतिशेषः । **हयः**-अश्वः । **चलन्**-गच्छन् । **परम्**-केवलम् । परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले" इति मेदिनी । **बालचापलम्**-बालस्य कुमारस्य सहजम् तच्च तच्चापलं चाञ्चल्यं बालचापलम् "मयूरव्यंसकेत्यादयः" ३।१।११६।। इत्यनेन समासः शाकपार्थिवादेराकृतिगणत्वात् पूर्वसमासीयोत्तरपदलोपश्च । **पराकृत्य**-दूरीकृत्य । **अत्र**-अस्मिँल्लोके । **दिशाम्**-आशानाम् । **जयी**-विजयी । **भव**-जायस्व । **इति**-इत्येवंप्रकारेण । **अनागसे**-अपराधाभावाय । नीतिप्रवर्तनायेति यावत् । **शंसति**-कथयति ।।१०५।।

**श्रियोऽबला नाम चलाचला इमा,भ्रमान्न ताः स्थैर्य्यभृतः क्वचिन्मताः ।**
**इतीव वाहः किमिवाह भूभृते, पुनः पुनः पुच्छविलोलनच्छलात् ।।१०६।।**

**अन्वयः**—*नाम, इमाः, श्रियः, अबलाः,* चलाचलाः, *ताः, भ्रमात्, (अपि) क्वचित्, स्थैर्य्यभृतः, न, मताः, इतीव, वाहः, पुनः पुनः, पुच्छविलोलनच्छलात्, इव, भूभृते, आह, किम्* ।।१०६।।

**वृत्तिः**— **नाम**-कोमलामन्त्रणे । **इमाः**-प्रत्यक्षं दृश्यमाना इव । सन्निकृष्टतया दृश्यमाना वा । "इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्" इत्याद्यभियुक्तोक्त्या इदम्-शब्दस्य सन्निकृष्टार्थकत्वात् । **श्रियः**-लक्ष्म्यः सम्पत्तयो वा । "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव कथ्यते" इति यादवः । **अबलाः**-नास्ति बलमासामिति अबलाः नार्य्यः । अत एवेति शेषः । **चलाचलाः**-चलाः, चञ्चला इति यावत् । "स्त्री नारी वनिता वधूः । वशा समिन्तिनी वामा वर्णिनी महिलाऽबला" ३।१६८।। इत्यभिधानचिन्तामणिः । **ताः**-श्रियः । **भ्रमात्**-भ्रान्तेः । भ्रान्तिवशादपीति भावः । **क्वचित्**-कुत्रापि । कस्मिँश्चित् स्थलेऽपीति यावत् । **स्थैर्य्यभृतः**-स्थैर्य्यं स्थिरतां बिभ्रति धारयन्तीति स्थैर्य्यभृतः । स्थिरतयाऽवस्थानशीलाः इति यावत् । **न**-नहि । **मताः**-प्रतिपादिताः । विद्वद्भिरितिशेषः । **इतीव**-इत्येवं प्रकारेणेव । **वाहः**-अश्वः । "घोटकस्तुरगस्तार्क्ष्यस्तुरङ्गोऽश्वस्तुरङ्गमः । गन्धर्वोऽर्वा सप्तिवीती वाहो वाजी हयो हरिः" ४।२९९।। इत्यभिधानचिन्तामणिः । **पुनःपुनः**-मुहुर्मुहुः, वारंवारम्, अनेकधेतियावत् । **पुच्छविलोलनच्छलात्**-पवते दंशादीनुत्सारयतीति पुच्छम् वालधिः, लाङ्गूलमितियावत् , तस्य बिलोलनम् विशेषेण सञ्चालनम् पुच्छविलोलनम् तदेव तस्य वा छलम् व्याजः, व्यपदेश इति यावत् पुच्छविलोलनच्छलम् तस्मात्तथा "कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम् । व्यपदेशो मिषं लक्ष्यं निभं व्याजः" ३।४२।। इत्यभिधानचिन्तामणिः । **इव**-यथा । **भूभृते**-भुवं पृथिवीं बिभर्ति धारयति पालयतीति वा भूभृत् राजा तस्मै तथा । राजचक्रवर्तिने भगवते श्रीमच्छान्तिनाथायेति यावत् । **आह**-कथयति, ब्रवीतीति यावत् । **किम्**-वितर्केऽव्ययम् । 'किं कुत्सायां वितर्के च निषेधप्रश्नयोरपी'ति मेदिनी ।।१०६।।

**महीभृतस्तस्य च मन्मथश्रिया, विभूषितस्य स्वपुराद् विनिर्गमे ।**
**मृगेक्षणानां स्वगवाक्षपक्षतः, कटाक्षलक्षाः प्रकटीबभूविरे ॥१०७॥**

*अन्वयः—च, मन्मथश्रिया, विभूषितस्य, तस्य, महीभृतः, स्वपुरात्, विनिर्गमे, मृगेक्षणानाम्, स्वगवाक्षपक्षतः, कटाक्षलक्षाः, प्रकटीबभूविरे ॥१०७॥*

वृत्तिः—**च**—पादपूरणे । अवधारणार्थकत्वस्वीकारे च प्रकटीबभूविरे इत्यस्याग्रे च इत्यन्वेयम् । "चान्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे" इति मेदिनी । **मन्मथश्रिया**—मननं मत् शास्त्राद्यभ्यासजन्यं ज्ञानम् तत् मथ्नाति विलोडयति विनाशयतीति यावत् मन्मथो मदनः, काम इतियावत्, तस्य श्रीःशोभा मन्मथश्रीस्तया तथा । "मदनो जराभीरुरनङ्गमन्मथौ, कमनः कलाकेलिरनन्यजोऽङ्गजः । मधुदीपमारौमधुसारथिः स्मरो, विषमायुधो दर्पककामहृच्छयाः" २।१४१॥ इत्यभिधानचिन्तामणिः । **विभूषितस्य**—समलङ्कृतस्य, शुशोभितस्येति यावत् । **तस्य**—प्रस्तुतस्य महामहिमशालिनो भगवतः । **महीभृतः**—महीं पृथिवीं बिभर्ति धारयतीति महीभृत् तस्य तथा, राज्ञः श्रीमतः शान्तिनाथस्येति यावत् । **स्वपुरात्**—स्वस्य आत्मनः पुरम्—नगरम् राजधानी हस्तिनापुरमितियावत् स्वपुरम् तस्मात्तथा । **विनिर्गमे**—विनिर्गमनं बहिर्निःसरणमिति विनिर्गमस्तस्मिँस्तथा **मृगेक्षणानाम्**—मृगस्य हरिणस्य ईक्षणे नयने मृगेक्षणे, मृगेक्षणे इव ईक्षणे यासान्ता मृगेक्षणास्तासान्तथा । "उष्ट्रमुखादयः" ३।१।२३॥ इत्यनेन समासः, एकस्य ईक्षणपदस्य लोपश्च । **स्वगवाक्षपक्षतः**—गवां किरणानामक्षीव गवाक्षः "अक्ष्णोऽप्राण्यङ्गे" ७।३।८५॥ इत्यट्समासान्तः "गोर्नाम्न्यवोऽक्षे" १।२।२८॥ इत्यनेन अवादेशः, स्वस्य—आत्मनः स्वः—स्वीयो वा गवाक्षः स्वगवाक्षः, तस्य पक्षः पार्श्वः स्वगवाक्षपक्षस्तस्मात्तथा । "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्यमरनानार्थः । "पक्षो मासार्द्धके पार्ष्णिग्रहे साध्यविरोधयोः । केशादेः परतो वृन्दे, बले सखिसहाययोः चुल्लीरन्ध्रे पतत्रे च, वाजे कुञ्जरपार्श्वयोः" इति मेदिनी । "वातायनो गवाक्षश्च जालके" ४।७।८॥ इत्यभिधानचिन्तामणिः । **कटाक्षलक्षाः**—कटस्य कपोलस्याऽक्षि कटाक्षः "संकटाभ्याम्" ७।३।८६॥ इत्यत्समासान्तः तस्य लक्षाः—लक्षसंख्याः कटाक्षलक्षाः । "अथार्धवीक्षणम् । अपाङ्गदर्शनम् काक्षः कटाक्षोऽक्षिविकूणितम्" ३।२४२॥ इत्यभिधानचिन्तामणिः । **प्रकटीबभूविरे**—प्रकाशीभूता ॥१०७॥

**दृशाऽनिमेषेण पदास्पृशा पदा, निजस्य चित्तस्य च तं प्रतीच्छया ।**
**विलासिनीनां हृदये रतिः स्वतः, स्फुटीबभूवाद्भुतरूपसम्पदा ॥१०८॥**

*अन्वयः—अनिमेषेण, दृशा, पदास्पृशा, पदा, च निजस्य, चित्तस्य; तम्, प्रति; इच्छया, विलासिनीनाम्, हृदये, अद्भुतरूपसम्पदा, स्वतः रतिः, स्फुटीबभूव ॥१०८॥*

**वृत्तिः**—**अनिमेषेण**—निमेषो निमीलनम् न निमेषोऽनिमेषः, निमेषाभाव इत्यर्थस्तेन तथा । "निमेषस्तु निमीलनम्" ३।२४२॥ इत्यभिधानचिन्तामणिः । **दृशा**—पश्यति दृश्यते वाऽनयेति दृक् लोचनं नयनमिति यावत् तया तथा । "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् । लोचनं दर्शनं दृक् च" ३।२३९॥ इत्यभिधानचिन्तामणिः । **पदास्पृशा**—पदं स्थानं न स्पृशतीति पदास्पृक् तेन तथा । **पदा**—चरणेन । 'स्थानं तु पदमास्पदम्' ४।५४। इत्यभिधानचिन्तामणिः । "पदङ्घ्रिश्चरणोऽस्त्रियाम्" इत्यमरकोशः । **च**—पुनः । **निजस्य**—आत्मीयस्य "निजः पुनः आत्मीयः स्वः स्वकीयश्च" ३।२२६॥ इत्यभिधानचिन्तामणिः । **चित्तस्य**—चेतसः, हृदयस्य, अन्तःकरणस्येति यावत् । "अन्तःकरणं मानसं मनः । हृच्चेतो हृदयं चित्तं स्वान्तं गूढपथोच्चले" ६।५॥ इत्यभिधानचिन्तामणिः । **तम्**—प्रसिद्धं भगवन्तं श्रीमच्छान्तिनाथम् । **प्रति**—लक्ष्यीकृत्य । **इच्छया**—अभिलाषेण । **विलासिनीनाम्**—विलासो विभ्रमोऽस्त्यासामिति विलासिन्यस्तासान्तथा "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे इन्प्रत्ययः यद्वा विलसन्ति विच्छित्त्या शोभन्ते तच्छीलमासामिति विलासिन्यस्तासान्तथा "अजातेः शीले" ५।१।१५४॥ इत्यनेन ताच्छील्ये णिन्प्रत्ययः । विलासवतीनां रमणीनामिति यावत् । **हृदये**—मानसे चेतसीति यावत् । **अद्भुतरूपसम्पदा**—अद्भुतमाश्चर्य्यजनकञ्च तद्रूपं सौन्दर्यमद्भुतरूपम् तदेव संपत् संपत्तिरद्भुतरूपसंपत् तया तथा । करणेन । **स्वतः**—स्वयमेव अप्रेरितैवेति यावत् । **रतिः**—रागः अनुराग इति यावत् । "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः" इति मेदिनी । **स्फुटीबभूव**—अस्फुटा स्फुटा बभूव सम्पन्ना स्फुटीबभूव । अभूततद्भावेऽर्थे च्विप्रत्ययः ॥१०८॥

**पुरस्सरागा इव तत्पुरस्सरा, रमाः समा दिग्वलयात् समागमन् ।**
**द्विधा नृपे तत्र जगत्त्रयीभुवां, मनोरमाङ्गे विषमायुधाश्रये ॥१०९॥**

*अन्वयः—जगत्त्रयीभुवाम्, रमाः, इव, सरागाः, समाः, तत्पुरस्सराः, दिग्वलयात्, पुरः, समागमन्, विषमायुधाश्रये, मनोरमाङ्गे, तत्र, नृपे, द्विधा, ( तासां रतिः स्फुटीबभूवेति पूर्वश्लोकेन सम्बन्धः ) ॥१०९॥*

**वृत्तिः**—**जगत्त्रयीभुवाम्**—त्रयोऽवयवा अस्या इति त्रयी जगतां भुवनानां त्रयी जगत्त्रयी, तस्या भवन्त्युत्पद्यन्ते इति जगत्त्रयीभुवस्तेषान्तथा भुवनत्रयजातवस्तूनामित्यर्थः । "स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत्" ६।१॥ इत्यभिधानचिन्तामणिः । **रमाः**—श्रियः । "लक्ष्मीः पद्मा रमा या मा सा ता श्रीः कमलेन्दिरा" २।१४०॥ इत्यभिधानचिन्तामणिः । **इव**—यथा । **सरागाः**—रागेण अनुरागेण सहिताः सरागाः । "रागोऽनुरागे क्लेशादौ मात्सर्य्ये लोहितादिषु" इति शाश्वतः । **समाः**—सकलाः,

समस्ता इति यावत् । **तत्पुरस्सराः**–पुरोऽग्रे सरन्तीति पुरस्सराः, अग्रगामिनी, सा (ताः) पुरस्सरा यासान्तान्तत्पुरस्सराः । भुवनत्रयजातवस्तुलक्ष्मीप्रमुखा इति यावत् । **पुरः**–अग्रे पुरतः इति यावत् "पुरः पुरस्तात् पुरतोऽग्रतः" ६।१६८॥ इत्यभिधानचिन्तामणिः । राज्ञ इति शेषः । **समागमन्**–समागच्छन् , समागता इतियावत् । **विषमायुधाश्रये**–विषमं पञ्चात्मकमायुधमस्त्रविशेषो यस्य स विषमायुधः कामः तस्य आश्रयः ललनाचित्ते तदुत्पादकतया जनकः विषमायुधाश्रयस्तस्मिँस्तथा । **मनोरमाङ्गे**–मनोरमं मनोहरं रमणीयमितियावत् अङ्गं शरीरन्तदवयवविशेषो वा यस्य स मनोरमाङ्गस्तस्मिँस्तथा । अङ्गं गात्रं प्रतीकोपाययोः पुम्भूम्नि नीवृत्ति" इति मेदिनी । **तत्र**–तस्मिन् प्रसिद्धे भगवति शान्तिनाथ इतियावत् । **नृपे**–राजनि । **द्विधा**–द्वाभ्यां प्रकाराभ्याम् । तासां विलासिनीनां रतिः–अनुरागः प्रकटी बभूवेतिपूर्वश्लोकाद् सम्बन्धः ॥१०९॥

## अनङ्गभावादनिमेषदर्शना–दयं कलाकेलिमयाशयं भजन् ।
## द्विधाऽप्यतस्तत्समये रसाश्रये, नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥११०॥

**अन्वयः**—*कलाकेलिमयाशयम् , भजन् , अयम् , रसाश्रये, तत्समये, अनङ्गभावात्, अनिमेषदर्शनात् , द्विधा, अपि, नतभ्रुवाम् , मन्मथविभ्रमः, अभवत् ॥११०॥*

**वृत्तिः**—**कलाकेलिमयाशयम्**–कलानां चतुषष्टिकलानां केलिः कलाकेलिः सा प्रचुराऽस्मिन्निति कलाकेलिमयः प्राचुर्य्यार्थो मयट् "अन्नमयो यज्ञः" इत्यादिवत्, कलाकेलिमयश्चासावाशयोऽभिप्रायः कलाकेलिमयाशयस्तन्तथा । "आशयः स्यादभिप्राये पनसाधारयोरपि" इति मेदिनी । **भजन्**–सेवमानः । आश्रयन्नितियावत् । **अयम्**–राजचक्रचक्रवर्ती वैश्वसेनिर्भगवान् शान्तिनाथः । **रसाश्रये**–रसस्यानुरागस्य समुद्दीपकतया आश्रय आधारो रसाश्रयस्तस्मिँस्तथा । **तत्समये**–स प्रसिद्धश्चासौ समयः कालो वसन्तादिस्तत्समयस्तस्मिँस्तथा । रतिसमुत्पादकवसन्तादिकाले इत्यर्थः । **अनङ्गभावात्**–न अङ्गं शरीरं (शिवेन भस्मीकृतत्वात्) यस्य सोऽनङ्गः कामस्तस्य भावो भावना अनङ्गभावस्तस्मात्तथा कामदेवसमशोभाकत्वेन हेतुना कामभावनात इत्यर्थः । **अनिमेषदर्शनात्**–न निमेषो निमीलनं यस्मिन् कर्मणि तदनिमेषम् अनिमेषञ्च तद्दर्शनमनिमेषदर्शनन्तस्मात्तथा । **द्विधा**–द्विप्रकारः । **अपि**–खलु । **नतभ्रुवाम्**–नते नम्रे भ्रुवौ नेत्रोपरिविराजमानरोमपद्धती यासान्ता नतभ्रुवस्तासान्तथा, विलासनीनां रमणीनामिति यावत् । "भ्रूरूर्ध्वे रोमपद्धतिः" ३।२४३॥ इत्यभिधानचिन्तामणिः । **मन्मथविभ्रमः**–मन्मथस्य मदनस्य विभ्रमः–विशिष्टो भ्रमः, विलासश्च यस्माद् यस्मिन् वा स मन्मथविभ्रमः । **अभूत्**–अभवत् । अयं जिनो विलासिनीनां मन्मथभ्रमजनकस्तत्सम्बन्धिहावभावादिनानाविधविलासजनकश्चाभूदिति भावः ॥११०॥

निमीलनभ्रंशजुषा दृशा भृशं, सुरीगणे पश्यति सङ्गताङ्गना ।
पृथक् समालक्ष्यत तत्क्षणे चलैः, कटाक्षमोक्षैरतिशोणिताञ्चलैः ॥१११॥

अन्वयः—*सुरीगणे, निमीलनभ्रंशजुषा, दृशा, भृशम्, ( तम्, ) पश्यति, सङ्गता, अङ्गना, तत्क्षणे, अतिशोणिताञ्चलैः, चलैः, कटाक्षमोक्षैः, पृथक्, समालक्ष्यत ॥१११॥*

वृत्तिः—**सुरीगणे**—सुरीणां देवरमणीनां गणः समुदयः सुरीगणस्तस्मिँतथा । 'कूटं मण्डलचक्रवाकपटलास्तोमा गणः पेटकं, वृन्दं चक्रकदम्बके समुदयः पुञ्जोत्करौ संहतिः' । ६।४७॥ इति ( अभि० चि० ) । **निमीलनभ्रंशजुषा**—निमीलनस्य निमेषस्य भ्रंशो ध्वंसो निमीलनभ्रंशस्तं जुषति सेवते इति निमीलनभ्रंशजुट् तया तथा, निर्निमेषया निमेषरहितयेति यावत् । "निमेषस्तु निमीलनम्" ३।२४२॥ इत्यभिधानचिन्तामणिः । **दृशा**—पश्यति दृश्यते वाऽनयेति दृक् दृष्टिर्लोचनमितियावद् तया तथा । "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् । लोचनं दर्शनं दृक् च" ३।१३९॥ इत्यभिधानचिन्तामणिः **भृशम्**—अतिशयं यथास्यात्तथा । **तम्**—मानिनीमानभञ्जनसन्नाहशालिनं भगवन्तं श्रीमन्तं शान्तिनाथम् । **पश्यति**—सादरमवलोकयति । सतीतिशेषः । **सङ्गता**—सम्मिलिता एकत्रीभूतेतियावत् । **अङ्गना**-प्रशस्तान्यङ्गान्यस्याः सन्तीति अङ्गना, नितम्बिनी प्रमदेतियावत् "नोऽङ्गादेः" ७।२।२९॥ इत्यनेन मत्वर्थीयो नः प्रत्ययः । "विशेषास्तु कान्ता भीरुर्नितम्बिनी । प्रमदा सुन्दरी रामा रमणी ललनाङ्गना" ३।१६९॥ इत्यभिधानचिन्तामणिः । **तत्क्षणे**—स चासौ क्षणः सूक्ष्मकालविशेषः तत्क्षणस्तस्मिँस्तथा । **अतिशोणिताञ्चलैः**-शोणितं रक्तमतिक्रान्तोऽतिशोणितः "प्रात्यवपरिनिरादयः" ३।१।४७॥ इत्यनेन समासः, अतिशोणितः अञ्चलः प्रान्तभागो येषान्तेऽतिशोणिताञ्चलास्तैस्तथा । **चलैः**—चञ्चलैः । "अथ चञ्चलम् । चटुलं चपलं लोलं चलं पारिप्लवास्थिरे" ६।९१॥ इत्यभिधानचिन्तामणिः । **कटाक्षमोक्षैः**—कटस्य कपोलस्याऽक्षि कटाक्षः "संकटाभ्याम्" ७।३।८६॥ इत्यनेन अत्प्रत्ययः समासान्तः तस्य मोक्षाः पाताः कटाक्षमोक्षास्तैस्तथा । **पृथक्**—भिन्नाः । **समालक्ष्यत**—संलक्ष्यते स्म, संलक्षितेति यावद् ॥१११॥

अनन्यसाधारणरूपसम्पदं, निपीय तं यस्त्रिदशीभिरर्जितः ।
मनोऽनुरागः स फलेग्रहीभवन्, भुवि स्थितिं चातुरधुर्य्यदीधरत् ॥११२॥

अन्वयः—*त्रिदशीभिः, अनन्यसाधारणरूपसम्पदम्, तम्, निपीय, यः, अर्जितः, सः, मनोऽनुरागः, फलेग्रहीभवन्, भुवि, चातुरधुरि, स्थितिम्, अदीधरत् ॥११२॥*

वृत्तिः—**त्रिदशीभिः**—तिस्रो दशा वयोऽवस्था येषान्ते त्रिदशाः देवाः । त्रिंशद्वर्षा मनुष्ययुवानः त्रिदशा इव त्रिदशा इति वा तेषां स्त्रियस्त्रिदश्यो देवाङ्गनास्ताभिस्तथेति । "देवाः सुपर्वसुर-

निर्जरदेवतर्भुबर्हिर्मुखानिमिषदैवतनाकिलेखाः । वृन्दारकाः सुमनसस्त्रिदशा अमर्त्याः" २।२॥ इत्यभिधानचिन्तामणिः । अनन्यसाधारणरूपसम्पदम्—अन्यस्य परस्य द्वितीयस्येति यावत् साधारणं समानमन्यसाधारणम् तन्न भवतीत्यनन्यसाधारणम् तच्च तद्रूपं सौन्दर्य्यमनन्यसाधारणरूपम् तत् सम्पत् सम्पत्तिर्यस्य सोऽनन्यसाधारणरूपसम्पत् तन्तथा । "रूपं स्वभावे सौन्दर्य्ये नामगे पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि" इति मेदिनी । तम्—प्रसिद्धं भगवन्तं शान्तिनाथमित्यर्थः । निपीय—सादरमवलोक्य । यः—यादृशः मनोऽनुरागः । अर्जितः—उपार्जितः, समधिगत इतियावत् । सः—अनन्यसाधारणरूपसम्पदं शान्तिनाथं सादरमवलोक्य त्रिदशीभिः समुपार्जितः । मनोऽनुरागः—मनसश्चित्तस्य अनुरागः स्नेहः सात्त्विकभाव इति यावत् मनोऽनुरागः । फलेग्रहीभवन्—फलानि प्रयोजनानि गृह्णातीति फलेग्रहिः "रजःफलेमलाद् ग्रहः" ५।१।५८॥ इत्यनेन इः प्रत्ययः, फलेग्रहिः भवन् सम्पद्यमानः फलेग्रहीभवन् । अभूततद्भावेऽर्थे च्विप्रत्ययः च्विप्रत्यये परे पूर्वस्वरस्य दीर्घता च । भुवि—पृथिव्याम् मर्त्यलोकस्वर्गादिस्थानमात्रे वा । "भूः स्थानमात्रे कथिता धरण्यामपि योषिति" इति मेदिनी । चातुरधुरि—चतुरस्य दक्षिणस्य निपुणस्येति यावत् भावश्चातुरम् चातुर्य्यमित्यर्थस्तस्य धूश्चातुरधूस्तस्मिँस्तथा । समासान्तविधेरनित्यत्वात्समासान्तस्य अप्रत्ययस्याभावः । स्थितिम्—अवस्थानम् । अदीधरत्—धारयामास ॥११२॥

**पुरावतारादिदिने सुराङ्गना, वतेरुरर्हत्परमोत्सवे नवे ।**
**अमूस्तदभ्यासभरं विवृण्वते-ऽनिमेषभावेऽपि न ताः श्रमं गताः ॥११३॥**

अन्वयः—*पुरा,—अवतारादिदिने, नवे, अर्हत्परमोत्सवे, सुराङ्गनाः, वतेरुः, तत्, अनिमेषभावे, अपि, श्रमम्, न, गताः, ताः, अमूः, अभ्यासभरम्, विवृण्वते ॥११३॥*

वृत्तिः—पुरा—प्राचीनकाले पूर्वस्मिन् समये इतियावत् । अवतारादिदिने—अवतारः—धर्मसंस्थापनाद्यर्थमवतरणम् भूलोके जन्मग्रहणमिति यावत् आदिर्मुख्यो यस्मिँस्तदवतारादि तच्च तद्दिनं दिवसोऽवतारादिदिनन्तस्मिँस्तथा । नवे—नूतने, अभिनवे इतियावत् । अर्हत्परमोत्सवे—परम उत्कृष्टश्चासावुत्सव उद्धवः परमोत्सवः "सन्महत्परमोत्तमोत्कृष्टं पूजायाम्" ३।१।१०७॥ इत्यनेन समासः, अर्हतो जिनेश्वरस्य परमोत्सवोऽर्हत्परमोत्सवस्तस्मिँस्तथेति । सुराङ्गनाः—प्रशस्तान्यङ्गानि गात्राणि सन्त्यासामित्यङ्गनाः, सुराणां देवानामङ्गनाः प्रमदाः सुराङ्गनाः । वतेरुः—अवतेरुः, अवतीर्णा इति यावत् । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति भागुरिमते अवोपसर्गाद्यावयवीभूतस्याऽकारस्य लोपः । तत्—तस्माद्धेतोः । अनिमेषभावे—न निमेषो निमीलनं यासान्ता अनिमेषास्तासां भावोऽनिमेषभावस्तस्मिँस्तथा । "निमेषस्तु निमीलनम्" ३।२४२॥ इत्यभिधानचिन्तामणिः । अपि—सम्भावनायामव्ययम् ।

**श्रमम्**-परिश्रमम् आयासमितियावत् । **न**-नहि । **गताः**-प्राप्ताः । **ताः**-प्रसिद्धाः । **अमूः**-विप्रकृष्टतया लक्ष्यमाणा देवाङ्गनाः । **अभ्यासभरम्**-अभ्यासस्य भरोऽतिशयोऽभ्यासभरस्तन्तथा । **विवृण्वते**-प्रकटयन्ति ॥११३॥

**वशी जिनोऽपि स्ववशीभवेदयं चलेक्षणत्वादितिधीरिवोर्वशी ।**
**निनिन्द चित्ते स्वसुरावतारतां, निमेषनिःस्वैरधुनाऽपि लोचनैः ॥११४॥**

**अन्वयः**—*वशी, अपि, अयम्, जिनः, चलेक्षणत्वात्, स्ववशीभवेत्, इतिधीः, इव, उर्वशी, निमेषनिःस्वैः, लोचनैः, अधुना, अपि, चित्ते, स्वसुरावतारताम्, निनिन्द ॥११४॥*

**वृत्तिः**—**वशी**-स्वाधीनः, जितेन्द्रियचय इतियावत् । **अपि**-सम्भावनायामव्ययम् । "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी । **अयम्**-सन्निकृष्टतया दृश्यमानः । "इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्" इत्याद्यभियुक्तोक्तेः । **जिनः**-जयति रागद्वेषमोहानिति जिनोऽर्हन् भगवान् शान्तिनाथ इत्यर्थः । **चलेक्षणत्वात्**-चले चञ्चले ईक्षणे नयने यस्याः सा चलेक्षणा तस्या भावश्चलेक्षणत्वं तस्मात्तथा । "त्व-त्ते गुणः । ३।२।५९॥ इत्यनेन पुंवद्भावः । **स्ववशीभवेत्**-निजाधीनीभवेत् । **इतिधीः**-इति इत्येवंप्रकारा धीर्बुद्धिर्यस्याः सा इतिधीः । **इव**-यथा । **उर्वशी**-तदाख्याप्सरोविशेषः । **निमेषनिःस्वैः**-निमीलनदरिद्रैः । **लोचनैः**-नयनैः । **अधुना**-साम्प्रतम् । **अपि**-खलु । **चित्ते**-हृदये । **स्वसुरावतारताम्**-स्वस्य आत्मनः सुरावतारः सुरजन्म स्वसुरावतारस्तस्य भावः स्वसुरावतारता तान्तथा । **निनिन्द**-चिक्षेप निन्दयामासेति यावत् ॥११४॥

**अदस्तदाकर्णि फलाढ्यजीवितं द्वयं श्रुतेः साम्प्रतमीक्षितैर्दृशोः ।**
**वियुक्तितस्तप्यति तत्त्वगिन्द्रियं निनिन्दुरेवं भुजगाङ्गना निजम् ॥११५॥**

**अन्वयः**—*अदः ( नः ) तदाकर्णि, श्रुतेः, द्वयम्, ( च ) साम्प्रतम्, ईक्षितैः, दृशोः ( द्वयम् ) फलाढ्यजीवितम्, त्वगिन्द्रियम्, वियुक्तितः, तप्यति, एवम्, भुजगाङ्गनाः, निजम्, तत्, निनिन्दु ॥११५॥*

**वृत्तिः**—**अदः**-एतत्, किञ्चिद्विप्रकृष्टतया दृश्यमानम् । **नः**-अस्माकम् । **तदाकर्णि**-तं भगवन्तं श्रीमन्तं शान्तिनाथमाकर्णयति शृणोतीत्येवंशीलन्तथा "अजातेः शीले" ५।१।१५४॥ इत्यनेन ताच्छील्ये णिन्प्रत्ययः । सदितिशेषः । **श्रुतेः**-श्रूयते आकर्ण्यतेऽनयेतिश्रुतिः श्रवणम् कर्ण इति यावत् तस्यास्तथा । **द्वयम्**-द्वाववयवावस्येति द्वयम् द्वितयम् युगलमिति यावत् । "श्रुतौ श्रवः ।.......कर्णः श्रोत्रः श्रवणश्च" ३।२३७॥ इत्यभिधानचिन्तामणिः । ( च-पुनः ) **साम्प्रतम्**-अधुना । "पुरस्सरागा इव

तत्पुरस्सरा रमाः समा दिग्वलयात् समागमन्" इत्येवं पूर्वोक्तश्लोकबोधितदिक्कुमारीणां मर्त्यलोके समागमनकाले इति यावत् । ईक्षितैः–अवलोकनैः, भगवतः श्रीमच्छान्तिनाथस्येतिशेषः । दृशोः–पश्यति दृश्यते वाऽनयेति दृक् दृष्टिर्नयनमितियावत् तयोस्तथा । "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् । लोचनं दर्शनं दृक् च" ३।२३९॥ इत्यभिधानचिन्तामणिः । ( द्वयम्–युगलम् ) फलाढ्यजीवितम्–फलेन–श्रवणावलोकनात्मकेन आढ्यं भाग्यवत्त्वाद्यन्वितं जीवितं जीवनं यस्य तत्तथा सफलजीवितमित्यर्थः । ( परन्तु–सतोरपि श्रवणावलोकनयोः ) त्वगिन्द्रियम्–स्पर्शनेन्द्रियम् । वियुक्तितः–सम्भोगाद्यभावजनितवियोगात् । तप्यति–सन्तापमनुभवति । एवम्–अनेन प्रकारेण । भुजगाङ्गनाः–प्रशस्तान्यङ्गानि सन्त्यासामित्यङ्गनाः भुजगानां नागानामङ्गना भुजगाङ्गनाः । निजम्–आत्मीयम् । तत्–वियोगात् सन्तप्यमानं त्वगिन्द्रियम् । निनिन्दुः–निन्दयामासतुः, निर्भत्सयाञ्चक्रुरिति यावत् ॥११५॥

**पुरान्तरस्थायिमृगेक्षणास्तदा, दृशोर्द्वयं नस्तदवीक्षिचापलम् ।**
**श्रुतिप्रशंसां नु शशंसुराशयात्, शयालुभावेऽपि हितालिशालिनि ॥११६॥**

**अन्वयः**—*तदा, पुरान्तरस्थायिमृगेक्षणाः, हितालिशालिनि, नः, तदवीक्षि, दृशोः, द्वयम्, अफलम्, च ( इति ) आशयात्, हितालिशालिनि, शयालुभावे, अपि श्रुतिप्रशंसाम्, शशंसुः, नु ॥११६॥*

**वृत्तिः**—तदा–तस्मिन् समये । पुरान्तरस्थायिमृगेक्षणाः–मृगस्य हरिणस्य ईक्षणे नयने मृगेक्षणे, मृगेक्षणे इव ईक्षणे नयने यासान्ता मृगेक्षणाः । "उष्ट्रमुखादयः" इत्यनेन बहुव्रीहिसमासः, एकस्येक्षणपदस्य लोपश्च । अन्यत् अपरम् पुरम्–नगरम् पुरान्तरम् पुरान्तरे तिष्ठन्ति तच्छीलमस्यासामिति पुरान्तरस्थायिन्यः ताश्च ता मृगेक्षणाः पुरान्तरस्थायिमृगेक्षणाः । पुरान्तरमित्यत्र मयूरव्यंसकादित्वात् समासोऽवसेयः । नः–अस्माकम् । तदवीक्षि–न तम्–श्रीमन्तं शान्तिनाथं वीक्षितुं शीलमस्येति तदवीक्षि "अजातेः शीले" ५।१।१५४॥ इत्यनेन ताच्छील्ये णिन् प्रत्ययः, अश्राद्धभोजीत्यादिवत् प्रक्रियाऽवसेया । श्रीमच्छान्तिनाथानवलोकनशीलमिति यावत् । दृशोः–पश्यति दृश्यते वाऽऽभ्यामिति दृशौ नयने तयोस्तथा । "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् । लोचनं दर्शनं दृक् च" ३।२३९॥ इत्यभिधानचिन्तामणिः । द्वयम्–द्वाववयवावस्येति द्वयम्–द्वितयम् । अफलम्–न फलं लाभः प्रयोजनं वा यतस्तदफलम् "फलं जातिफले शस्ये हेतूत्थे व्युष्टिलाभयोः" इति मेदिनी । च–पादपूरणे । "चान्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे" इति मेदिनी । ( इति ) आशयात्–अभिप्रायात् । "आशयः स्यादभिप्राये पनसाधारयोरपि" इति मेदिनी । हितालिशालिनि–हिताः हितकारिकाश्च ता आलयः सख्यो हितालयस्तेन शालते शोभते तच्छीलो हितालिशाली तस्मिँस्तथा । शयालुभावे–शयालोर्निद्रालोर्भावश्चेष्टा शयालुभावस्तस्मिँस्तथा । "भावः सत्तास्वभावाभिप्राय-

चेष्टात्मजन्मसु" इति मेदिनी । अपि-सम्भावनायाम् । श्रुतिप्रशंसाम्-श्रूयते आभ्यामिति श्रुती कर्णौ तयोः प्रशंसा श्रुतिप्रशंसा तान्तथा । शशंसुः-कथयामासुः । नु-वितर्के ॥११६॥

निशम्य देवं वनपावनोद्यतं, प्रमोदते द्वैधफलस्पृशा दृशा ।
इति स्म चक्षुःश्रवसां प्रियाऽनले, स्मरस्वरूपे हृदयेऽधिदीपिते ॥११७॥

*अन्वयः*—हृदये, स्मरस्वरूपे, अनले, अधिदीपिते ( सति ) चक्षुश्रवसाम्, प्रिया, देवम्, वनपावनोद्यतम्, निशम्य, द्वैधफलस्पृशा, दृशा, प्रमोदते स्म, इति ॥११७॥

**वृत्तिः**—हृदये-अन्तःकरणे चित्ते इति यावत् । "अन्तःकरणं मानसं मनः । हृच्चेतो हृदयं चित्तं स्वान्तं गूढपथोच्चले" ६।५॥ इत्यभिधानचिन्तामणिः । हृदयावच्छेदेनेत्यर्थः सप्तम्या अवच्छिन्नत्वार्थत्वात् । स्मरस्वरूपे-स्मरः कामः स्वरूपमाकारो यस्य स स्मरस्वरूपस्तस्मिँस्तथा । कामात्मक इति यावत् । अनले-अग्नौ । अधिदीपिते-समुज्जवलिते । ( सति ) चक्षुःश्रवसाम्-नागानाम् । सर्पाणामिति यावत् । "सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः । कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी । इत्यमरकोशः । प्रिया-प्रेयसी, रमणीतियावत् । देवम्-देवाधिदेवं भगवन्तं शान्तिनाथम् । वनपावनोद्यतम्-वनपावनाय काननपूत्यै उद्यतः प्रयतस्तत्पर इति यावत् वनपावनोद्यतस्तन्तथा । निशम्य-आकर्ण्य श्रुत्वेति यावत् । द्वैधफलस्पृशा-श्रवणदर्शनात्मकद्विविधलाभवत्या । दृशा-लोचनेन । जात्यैकवचनमनुसन्धेयम् । प्रमोदते स्म-हृष्यति स्म । प्रमोदतेति यावत् । इति-अवधारणेऽव्ययम् ॥११६॥

१ [ निरीक्ष्य रूपं परमं परात्मन-स्तदात्मभावं दिविजा यदाऽवदन् ।
श्रुती पुनाना नयने न च स्म हि, स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥१॥]

*अन्वयः*—परात्मनः, परमम्, रूपम् निरीक्ष्य, दिविजाः, यदा, तदात्मभावम्, अवदन्, तदा ( तत्रत्याः ) श्रुती, पुनानाः, च, नयने, न ( पुनानाः ) हि, हृदा, आत्मनः, स्तुवन्ति, स्म, निन्दन्ति, स्म ॥

**वृत्तिः**—परात्मनः-पर उत्कृष्टश्चासावात्मा परात्मा, श्रीशान्तिनाथस्तस्य तथा । 'सन्महत्परमोत्तमोत्कृष्टं पूजायाम्' ।३।१।१०७। इत्यनेन समासः । परमम्-परा मा लक्ष्मीर्यस्मिँस्तत्तथा । रूपम्-स्वरूपम्, सौन्दर्यमितियावत् । निरीक्ष्य-समवलोक्य । दिविजाः-दिवि स्वर्गे जाता दिविजाः, 'सप्तम्याः' ५।१।१६९॥ इत्यनेन जन्धातोर्डप्रत्ययः, 'शुभावृड्वर्षाशरत्कालात्' ३।२।२७। इत्यनेन सप्तम्या

१. स्तुवन्तीत्यादितुर्यपादस्य पूर्तिरूपं सूक्तं नोपलब्धं तथा च तत् सम्पूर्यात्र निवेशितं वर्तते ।

अलुक् । यदा–यस्मिन् काले । मर्त्यलोकात् प्रतिनिवृत्य तत्रत्यान्यैः सह वार्तालापकाले इति यावत् । तदात्मभावम्–तस्य परमात्मन आत्मभावः स्वरूपं तदात्मभावस्तन्तथा । अवदन्–अब्रुवन् । तदा–तस्मिनकाले । ( तत्रत्या अकृतप्रभुदर्शना दिविजाः ) श्रुती–श्रवणे । पुनानाः–पवित्रयन्तः । च–पुनः । नयने–नेत्रे । न–नहि । पुनाना इति शेषः । हि–निश्चयेन । हृदा–हृदयेन येन। आत्मनः–स्वान् । स्तुवन्ति स्म–प्रशंसयामासुः। प्रभुचरित्रश्रवणपवित्रीकृतश्रवणत्वादितिभावः। निन्दति स्म–अनिन्दिषुः । प्रभोरदर्शनादितिभावः । अत्र तेषामात्मप्रशंसने श्रवणपवित्रीकरणस्य, आत्मनिन्दने च नयनापवित्रीकरणस्य च हेतुतयाऽभिधानाद काव्यलिङ्गमलङ्कार इति ॥

**विलोकयन्तीभिरजस्रभावना–पुरस्सरं सर्वपदे स्मरोपमम् ।**
**न विस्मरत्वं समनीयत क्वचिद्, मनस्विनीभिर्दृढरागिचेतसा ॥११८॥**

**अन्वयः**—*अजस्रभावनापुरस्सरम्, सर्वपदे, स्मरोपमम्, विलोकयन्तीभिः, मनस्विनीभिः, दृढरागिचेतसा, क्वचित्, विस्मरत्वम्, न, समनीयत ॥११८॥*

**वृत्तिः**—**अजस्रभावनापुरस्सरम्**–अजस्रं सततं भावना तद्विषयकचिन्तनम् अजस्रभावना, तेन पुरस्सरम् सहितम् अजस्रभावनापुरस्सरं यथा स्यात्तथा। **सर्वपदे**–सर्वं निखिलं तत्पदं स्थानम सर्वपदं तस्मिँस्तथा। "स्थानं तु पदमास्पदम्" ४।५४॥ इत्यभिधानचिन्तामणिः। **स्मरोपमम्**–स्मरः कन्दर्प उपमा उपमानं यस्य स स्मरोपमस्तन्तथा । ( तम्–श्रीमन्तं भगवन्तं शान्तिनाथमिति शेषः ) **विलोकयन्तीभिः**–सादरमालोकयन्तीभिः, पश्यन्तीभिरित्यर्थः। **मनस्विनीभिः**–प्रशस्तं मनोऽन्तःकरणमासामिति मनस्विन्यस्ताभिस्तथा। **दृढरागिचेतसा**–रागोऽनुरागोऽस्त्यस्येति रागि "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे इन् प्रत्ययः, दृढं बहुलञ्च तद्रागि दृढरागि दृढरागि, च तच्चेतोऽन्तःकरणं दृढरागिचेतस्तेन तथा । **क्वचित्**–कुत्रापि । **विस्मरत्वम्**–विगतः स्मरः कामो यतस्ता विस्मरास्तासां भावो विस्मरत्वं "त्वते गुणः" ३।२।५९॥ इत्यनेन पुंवद्भावः, कामाभाव इति यावत् । **न**–नहि । समनीयत–समानीतः ॥११८॥

**प्रसृत्वरे रेणुभरे वधूगणो, बलादमुं नेत्रनिमीलनेष्वपि ।**
**न्यवेशयच्चेतसि मा स्पृशन् रजो–ऽङ्गजोऽयमेनन्निधिवत् प्रियाशयात् ॥११९**

**अन्वयः**—*रेणुभरे, प्रसृत्वरे, नेत्रनिमीलनेषु अपि वधूगणः, अमुम्, बलात्, चेतसि, न्यवेशयत्, अयम्, अङ्गजः, निधिवत्, प्रियाशयात्; एनत्, रजः, मा, स्पृशन ॥११९॥*

वृत्तिः—रेणुभरे-रेणूनां धूलीनां भरोऽतिशयो रेणुभरस्तास्मिँस्तथा। प्रसृत्वरे-प्रसरणशीले। सतीतिशेषः। नेत्रनिमीलनेषु-नेत्रयोर्नयनयोर्निमीलनानि निमेषा नेत्रनिमीलनानि तेषु तथा। "निमेषस्तु निमीलनम्" ३।२४२॥ इत्यभिधानचिन्तामणिः। अपि-सम्भावनायाम्। वधूगणः-वधूनां सीमन्तिनीनां गणः कदम्बकम् वधूगणः। वनितासमुदय इति यावत। अमुम्-इमम् श्रीमन्तं शान्तिनाथभगवन्तम्। बलात्-हठात्, बलमाधायेति यावत्। चेतसि-अन्तःकरणे। न्यवेशयत्-सन्निवेशितवती। समस्थापयदिति यावत्। अयम्-एषः। अङ्गजः-अङ्गाद्देहाज्जातोऽङ्गजः कामः। निधिवत्-निधिम् निधानमर्हतीति निधिवत्। प्रियाशयात्-हृद्याभिप्रायात्। "आशयः स्यादभिप्राये पनसाधारयोरपि" इति मेदिनी। एनत्-एतत्। रजः-पांशुम्। मा स्पृशत्-नहि स्पृशतु निन्दायां शता, "तौ माङ्याक्रोशेषु" ५।२।२१॥ इत्यनेन ॥ ११९॥

**लभेत चेतः किल वैक्रियक्रियां, प्रियां वरं स्यात् समयेऽयमाशयः।**
**अलम्भि मर्त्याभिरमुष्य दर्शने, पुनः पुनः सङ्गमनेऽप्यसंशयः ॥१२०॥**

अन्वयः—चेतः, *प्रियाम्, वैक्रियक्रियाम्, लभेत, किल, समये, अयम्, आशयः, वरम्, स्यात्, मर्त्याभिः, अमुष्य, दर्शने, पुनः, पुनः, सङ्गमने, अपि, असंशयः अलम्भि ॥१२०॥*

वृत्तिः—चेतः-हृदयम् अन्तःकरणमिति यावत्। प्रियाम्-मनोरमाम्। वैक्रियक्रियाम्-विक्रियाया विकारस्येयं वैक्रिया सा चासौ क्रिया वैक्रियक्रिया तान्तथा। लभेत-प्राप्नुयात्। किल-सम्भावनायाम्। "वार्तासम्भाव्ययोः किल" इत्यमरकोशः। समये-काले, सत्यवसरे इति यावत्। अयम्-एषः। आशयः-अभिप्रायः। वरम्-मनाक्प्रियः। "देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये" इत्यमरकोशः। मर्त्याभिः-मानवीभिः। अमुष्य-एतस्य भगवतः शान्तिनाथस्य। दर्शने-साक्षात्कारे। पुनः पुनः-भूयोभूयः। सङ्गमने-सम्मिलने। अपि-सम्भावनायामव्ययम्। असंशयः-संशयाभावः, सन्देहराहित्यमिति यावत्। अलम्भि-सम्प्रापि समधिगत इति यावत् ॥१२०॥

**भवेद्भवस्यानुभवः सुरात्मक-स्तदा वरं तत्तुषवन्न मानुषम्।**
**यतो महीशस्य यशस्यदर्शने, न विघ्नलेशोऽपि निमेषनिर्मितः ॥१२१॥**

अन्वयः—( *यदि* ) *सुरात्मकः, भवस्य, अनुभवः, भवेत्, तदा, तत्, वरम्, तुषवत्, मानुषम्, न, यतः, महीशस्य, यशस्यदर्शने, निमेषनिर्मितः, विघ्नलेशः, अपि, न ॥१२१॥*

वृत्तिः—(यदि–चेत्। ) सुरात्मकः–सुरो देवश्चासौ आत्मा सुरात्मा स एव सुरात्मकः स्वार्थे कः प्रत्ययः यद्वा अनुकम्प्यः सुरात्मा सुरात्मकः, अनुकम्पायां कः प्रत्ययः। भवस्य–संसारस्य। 'भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः" इति मेदिनी। अनुभवः–अनुभवतीत्यनुभवः, अनुभवी अनुभवकर्तेति यावत्। भवेत्–स्यात्। तदा–तर्हि। तत्–सुरजन्म सुरात्मकत्वमिति यावत्। वरम्–मनाक्प्रियम्। "देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये"। इत्यमरकोशः। तुषवत्–धान्यत्वग्वत् अतितुच्छमितिभावः। मानुषम्–मनुष्यस्य मानवस्येदं मानुषम् मनुष्यजन्मेत्यर्थः। न–नहि। ( वरम्–मनाक्प्रियम् ) यतः–यस्माद्धेतोः यस्मिन् सुरजन्मनि वा तस्प्रत्ययस्य सार्वविभक्तिकत्वस्वीकारात्। महीशस्य–मह्याः पृथिव्या ईशो महीशः भगवान् शान्तिनाथः तस्य तथा। यशस्यदर्शने–यशसि कीर्तौ साधु यशस्यम् शरीरमित्यर्थः तस्य दर्शनम्–अवलोकनम् साक्षात्कार इतियावत् यशस्यदर्शनम् तस्मिँस्तथा। निमेषनिर्मितः–निमेषैर्नेत्रनिमीलनैर्निर्मितो निमेषनिर्मितः निमेषप्रयोज्य इत्यर्थः। विघ्नलेशः–विघ्नस्य दर्शनप्रतिबन्धकीभूतान्तरायस्य लेशः कणः विघ्नलेशः। अपि–सम्भावनायाम्। "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी। न–नहि। सुरजन्मनि निमेषाभावस्य प्रसिद्धत्वादितिभावः ॥१२१॥

**न का निशि स्वप्नगतं ददर्श तं, वशा रसात् तद्ध्रुवभावनावशात्।**
**न का पुनः सङ्गमनोन्मनस्तया, प्रपञ्चसञ्चारिकया सखीकृता ॥१२२॥**

अन्वयः—*रसात्, तद्ध्रुवभावनावशात्, का, वशा, निशि, तम्, स्वप्नगतम्, न, ददर्श, प्रपञ्चसञ्चारिकया, सङ्गमनोन्मनस्तया, पुनः, का, न, सखीकृता ॥१२२॥*

वृत्तिः—रसात्–रागात्। अनुरागादितियावत्। "रसो गन्धरसे जले। शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः" इति मेदिनी। तद्ध्रुवभावनावशात्–ध्रुवम्–निश्चिता चासौ भावना कामाद्युद्बोधितसंस्कारः ध्रुवभावना तस्मिन् श्रीमति शान्तिनाथे ध्रुवभावना तद्ध्रुवभावना विषयत्वं सप्तम्यर्थः, तद्विषयकध्रुवभावनेत्यर्थः, तस्या वशम् आयत्तत्वम् अधीनतेतियावत् तद्ध्रुवभावनावशम् आयत्तत्वम् अधीनतेति यावत् तद्ध्रुवभावनावशम् तस्मात्तथा। "ध्रुवः शङ्कौ हरे विष्णौ वटे चोत्तानपादजे। वसुयोगभिदोः पुंसि क्लीबं निश्चिततर्कयोः" "वशा वन्ध्यासुतायोषास्त्रीगवीकरिणीषु च। त्रिष्वायत्ते क्लीबमायत्तत्वे चेच्छाप्रभुत्वयोः" इत्युभयत्रापि मेदिनी। का–किमात्मिका। वशा–वनिता। निशि–रात्रौ। तम्–भगवन्तं श्रीशान्तिनाथम्। स्वप्नगतम्–स्वप्नप्राप्तम्। न–नहि। ददर्श–अदर्शत्। प्रपञ्चसञ्चारिकया–प्रपञ्चस्य सुखप्रपञ्चस्य–सुखसञ्चयस्य सुखविस्तारस्य वा सञ्चारिका दूतीव प्रपञ्चसञ्चारिका तया तथा 'प्रपञ्चः सञ्चयेऽपि स्याद्विस्तारे च प्रतारणे' इति मेदिनी। सङ्गमनोन्म-

नस्तया-सङ्गमनाय सम्मिलनाय उन्मना उत्का सङ्गमनोन्मनास्तस्या भावः सङ्गमनोन्मनस्ता तया तथा। पुनः-किन्तु। का-किमात्मिका। न-नहि। सखीकृता-असखी अवयस्या। सखीकृता सखीकृता, अपि तु सर्वा एव सखीकृतेतिभावः ॥१२२॥

**शिरो धुनाना मधुनोऽधुनाऽशना-ज्जगाद गोत्रस्खलिते च का न तम्।**
**उपायनं का न चकार कार्य्यधी-रधीरताभृच्च पुरः सुरप्रभोः ॥१२३॥**

अन्वयः—*मधुनः, अशनात्, शिरः, धुनाना, अधुना, का, तम्, गोत्रस्खलिते, न, जगाद, च, कार्य्यधीः, च, अधीरताभृत्, का, सुरप्रभोः पुरः, उपायनम्, न, चकार ॥१२३॥*

वृत्तिः—मधुनः-मद्यस्य। "मधु पुष्परसे क्षौद्रे मद्ये" इति मेदिनी। अशनात्-अभ्यवहरणात्। शिरः-मस्तकम्। धुनाना-वेपयन्ती, कम्पयन्तीतियावत्। अधुना-साम्प्रतम्, भगवतः श्रीशान्तिनाथस्य वनविहाराय प्रस्थानसमये इतियावत्। का-कीदृशी, धैर्य्यशालिनीतियावत्। तम्-भगवन्तं श्रीमन्तं शान्तिनाथम्। गोत्रस्खलिते-गोत्रस्य नाम्नः स्खलितं व्यत्यासो गोत्रस्खलितम् तस्मिँस्तथा। "नाम गोत्रं कुलं गोत्रं गोत्रस्तु धरणीधरः"। इति शाश्वतः। न-नहि। जगाद-अवदत्। अपि तु सर्वैव पतिव्रताव्यतिरिक्तेति भावः। च-पादपूरणे। कार्य्यधीः-कार्य्ये कार्य्यसाधने धीर्बुद्धिर्यस्याः सा कार्य्यधीः। च-पुनः। अधीरताभृत्-धीरस्य धैर्य्यान्वितस्य भावो धीरता न धीरताऽधीरता तां बिभर्ति धारयतीति अधीरताभृत्। "धीरो धैर्य्यान्विते" इति मेदिनी। का-कीदृशी। सुरप्रभोः-सुरो देव एव प्रभुरीशः सुरप्रभुस्तस्य तथा। पुरः-पुरतः, अग्रत इति यावत्। उपायनम्-उपहारम्। न-नहि। चकार-अकरोत्। सर्वाऽपि नितम्बिनी तद्दर्शनस्पर्शनसङ्गमनात्मककार्य्यसिद्ध्यर्थमुपेष्टदेवमुपायनं रक्षितवतीति यावत् ॥१२३॥

**मनोबलात् काऽप्यबलापि नामिलद्, रहः स्थिताऽहर्निशतद्वशंवदा।**
**तदात्मताध्यातधवा रते च का, प्रियाऽभवद् नासनकर्मणा प्रिये ॥१२४॥**

अन्वयः—*अपि, अबला, अपि, का, रहःस्थिता, अहर्निशतद्वशंवदा, (सती) मनोबलात्, न, अमिलत्, च, तदात्मताध्यातधवा, का रते, प्रिये, आसनकर्मणा, प्रिया, न, अभवत् ॥१२४॥*

वृत्तिः—अपि-पुनः। अबला-नास्ति बलमस्या इत्यबला-सीमन्तिनी। अपि-सम्भावनायाम्। का-किमात्मिका। रहःस्थिता-रहसि-एकान्ते विजने इत्यर्थः। स्थिता-अवस्थिता रहःस्थिता। अहर्निशतद्वशंवदा-वशं वदतीति वशंवदा तस्य भगवतः शान्तिनाथस्य वशंवदा तद्वशंवदा अहर्निशं

रात्रिन्दिवम् तद्वशंवदा अहर्निशतद्वशंवदा । सतीति शेषः । मनोबलात्—मनसोऽन्तःकरणस्य बलं सामर्थ्यविशेषः मनोबलम् तस्मात्तथा । न—नहि । अमिलत्—समगच्छत सङ्गतेति यावत् । अपि तु निखिलैव अबला तथासती मनोबलमासादयामास । च—पादपूरणे । "चान्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे" इति मेदिनी । तदात्मताध्यातधवा—तस्य शान्तिनाथस्य आत्मा स्वरूपं यस्य स तदात्मा तस्य भावस्तदात्मता शान्तिनाथस्वरूपवत्त्वम् तया शान्तिनाथस्वरूपेण ध्यातो धवः प्रियो यया सा तदात्मताध्यातधवा एवम्भूता सती । का—किमात्मिका स्त्री । रते—सम्भोगे प्रियविशेषणत्वे वा अनुरक्ते । प्रिये—दयिते वल्लभे इति यावत् । आसनकर्मणा—आसनानां बन्धानां कर्म क्रिया आसनकर्म तेन तथा । प्रिया—वल्लभा । न—नहि । अभवत्—अजायत संवृत्तेति यावत् । अपि तु सर्वैव अभवदितिभावः ॥१२४॥

**श्रुतेऽथ दृष्टेऽपि पुरोऽङ्गनां यदा, स्मरस्तताापातिशयेन निष्कृपः ।**
**तदा तदासक्तधिया च का ह्यध-श्चकार वा न स्वमनोभवोद्भवम् ॥१२५॥**

**अन्वयः**—*अथ, यदा, श्रुते, दृष्टे, अपि, पुरः, अङ्गनाम्, स्मरः, निष्कृपः, (सन्) अतिशयेन, ततापि, तदा, च, तदासक्तधिया, स्वमनोभवोद्भवम्, नहि, अधश्चकार ॥१२५॥*

**वृत्तिः**—अथ—अनन्तरम् । यदा—यस्मिन् समये । श्रुते—आकर्णिते । दृष्टे—चाक्षुषप्रत्यक्षविषयीकृते, अवलोकिते इति यावत् । तस्मिन्—श्रीशान्तिनाथे इति शेषः । अपि—सम्भावनायाम् । पुरः—नगरस्य । अङ्गनाम्—प्रशस्तान्यङ्गानि अवयवसंस्थानविशेषाः सन्त्यस्या इति अङ्गना प्रमदा तान्तथा । "प्रमदा सुन्दरी रामा रमणी ललनाङ्गना" ३।१६९॥ इत्यभिधानचिन्तामणिः । स्मरः—कन्दर्पः । निष्कृपः—निर्गता कृपा दया कारुण्यमिति यावद्यस्मात् सः निष्कृपः कृपाशून्यः "अथ दया सूकः कारुण्यं करुणा घृणा । कृपाऽनुकम्पानुक्रोशः" ३।३३॥ इत्यभिधानचिन्तामणिः । (सन्) । अतिशयेन—नितान्तं यथा स्यात्तथा । ततापि—अन्तर्भावितणिगर्थत्वात् सन्तापयामास । तदा—तस्मिन् समये । च—पुनः । तदासक्तधिया—तस्मिन् भगवति शान्तिनाथे आसक्ता आसक्तिमापन्ना तदासक्ता सा चासौ धीस्तदासक्तधीस्तया तथा । स्वमनोभवोद्भवम्—मनसश्चित्ताद् भवतीति मनोभवः कामः स्वः स्वीयो मनोभवः स्वमनोभवस्तस्य उद्भव उत्पत्तिः स्वमनोभवोद्भवस्तन्तथा । नहि—न । अधश्चकार—तिरश्चकार धिक्चकारेति यावत् । वा—पादपूरणे । अपि तु सर्वापि स्वमनोभवोद्भवमधश्चकारैवेत्यर्थः । "वा स्याद्विकल्पोपमयोर्वितर्के पादपूरणे" इति मेदिनी ॥१२५॥

**श्रियाऽस्य योग्याऽहमिति स्वमीक्षितुं, मदार्पणात् दर्पणधारिणी करे ।**
**अतादृशाङ्गासिदृशा कृशाशया, शयालुतायामपि निद्रया जहे ॥१२६॥**

*अन्वयः*—अहम्, श्रिया, अस्य, योग्या, इति, मदार्पणात्, स्वम्, ईक्षितुम्, करे, दर्पणधारिणी, (काचित्) अताहशाङ्गाप्तिहशा, कृशाशया, शयालुतायाम्, अपि, निद्रया, जहे ॥१२६॥

वृत्तिः—अहम्–मल्लक्षणो जनः। श्रिया–शोभया। अस्य–बुद्धिविषयीभूतस्य श्रीमतः शान्तिनाथस्य। योग्या–सौन्दर्यादिप्रयोज्यसादृश्यवशादुपयुक्ता। अस्मीति शेषः। इति–हेतोः। मदार्पणात्–मदस्य सौन्दर्यातिशयगर्वस्य अर्पणमवस्थापनं मदार्पणं तस्मात् तथा। 'मदो रेतसि कस्तूर्यां, हर्षे गर्वेभदानयोः' इति मेदिनी। स्वम्–आत्मानम्। ईक्षितुम्–अवलोकयितुम्। करे–हस्ते। 'बलिहस्तांशवः कराः' इत्यमरनानार्थः। दर्पणधारिणी–दर्पणं मुकुरं धरति धारयति वा तच्छीला तथा 'अजातेः शीले' ५।१।१५४। इत्यनेन तच्छीले णिन्प्रत्ययः। काचिद्रूपगर्वितेति शेषः। अताहशाङ्गाप्तिदृशा–ताहशशरीरावयवसमागमदर्शनं विरहेण। कृशाशया–कृशो दुर्बल आशयोऽभिप्रायः, अभिलाष इतियावत् यस्याः सा तथा। यद्वा, कृशा चासौ आशा अभिलाषः कृशाशा तया तथेति। शयालुतायाम्–निद्रालुतायाम्, स्वप्नवास्थायामपीति यावत्। निद्रया–स्वापेन। जहे–तत्यजे। क्षणमपि शान्तिं नापेतिभावः ॥१२६॥

**स्वयं विलेपाय च यक्षकर्दमः, करे तमालोक्य सुरूपया धृतः।**
**स दुर्दमानन्यजदाहसाहसा–दुवाह दुःखादिव हव्यवाहताम् ॥१२७॥**

*अन्वयः*—च, सुरूपया, तम्, आलोक्य, स्वयम्, विलेपाय, यक्षकर्दमः, करे, धृतः, सः दुर्दमान्यजदाहसाहसात्, दुःखात्, इव, हव्यवाहताम्, उवाह ॥१२७॥

वृत्तिः—च–पुनः। सुरूपया–सुष्ठु शोभनं रूपं सौन्दर्य्यं यस्याः सा सुरूपा तया तथा, अतिशयसौन्दर्य्यशालिन्या कयाचित् प्रमदयेति शेषः। तम्–भगवन्तम् शान्तिनाथमित्यर्थः। आलोक्य–वीक्ष्य, दृष्ट्वेति यावत्। स्वयम्–आत्मना। विलेपाय–विलेपनाय। यक्षकर्दमः–यक्षप्रियः कर्दमो यक्षकर्दमः कर्पूरागुरुकक्कोलकस्तूरीचन्दनद्रवमिश्र इति यावत्। "कर्पूरागुरुकक्कोलकस्तूरीचन्दनद्रवैः। स्याद् यक्षकर्दमो मिश्रैः" ३।३०३॥ इत्यभिधानचिन्तामणिः। धन्वन्तरिस्तु—"कुङ्कुमागुरुकस्तूरी कर्पूरंचन्दनं तथा। महासुगन्धमित्युक्तं नामतो यक्षकर्दमः" इत्याह एवञ्च महासुगन्धद्रव इत्यर्थः। करे–हस्ते। धृतः–स्थापितः। सः–हस्तसंस्थापितयक्षकर्दमः। दुर्दमानन्यजदाहसाहसात्–दुःखेन दमितुमाक्रमितुं योग्यो दुर्दमः न मनसोऽन्यस्माज्जायते इत्यनन्यजो मदनः, दुर्दमश्चासावनन्यजो दुर्दमानन्यजः तस्य दाहो ज्वाला तस्माद्वा दाहो दुर्दमानन्यजदाहः, सहसा प्रसह्य वर्तते इति साहसम् दुर्दमानन्यजदाहस्य साहसम् दुर्दमानन्यजदाहसाहसम तस्मात्तथा। "मदनो जराभीरुरनङ्गमन्मथौ कमनः कलाकेलि-

रन्त्यजोऽङ्कजः" २॥१४१॥ इत्यभिधानचिन्तामणिः। दुःखात्-प्रतिकूलवेदनीयादात्मनो गुणविशेषात्। इव-यथा। हव्यवाहताम्-हव्यं वहतीति हव्यवाहोऽग्निस्तस्य भावो हव्यवाहता तान्तथा। उवाह-प्राप, धारयामासेति यावत् ॥१२७॥

**मनोभवन्मानवशेन मानवी,-नवीभवन्त्याऽप्यतदर्हताधिया।**
**विहाय भैमीमपदर्पया कया, हताशयाऽवाङ्मुखताऽभ्यनायि नो ॥१२८॥**

अन्वयः—*मनोभवन्मानवशेन, मानवीनवीभवन्त्या, अपि, अतदर्हताधिया, भैमीम्, विहाय, अपदर्पया, कया, अवाङ्मुखता, नो, अभ्यनायि ॥१२८॥*

वृत्तिः—मनोभवन्मानवशेन-मनसि हृदये भवन् उत्पद्यमानो मनोभवन् स चासौ मानः प्रियापराधसूचकचेष्टाविशेषः मनोभवन्मानः तस्य वशम् आयत्तत्वं मनोभवन्मानवशम् तेन तथा। 'वशा वन्ध्यासुतायोषा-स्त्रीगवीकरिणीषु च। त्रिष्वायत्ते क्लीबमाय-त्तत्वे चेच्छाप्रभुत्वयोः' इतिमेदिनी। मानवीनवीभवन्त्या-मानवीषु नवीभवन्ती नूतनतामापाद्यमाना मानवीनवीभवन्ती तया तथा। अपि-सम्भावनायाम्। अतदर्हताधिया-तस्य भगवतः श्रीशान्तिनाथस्य अर्हा योग्या तदर्हा न तदर्हा अतदर्हा तस्या भावोऽतदर्हता, तस्या धीर्बुद्धिरतदर्हताधीस्तया तथा। 'त्वते गुणः' ३।२।५९। इत्यनेन पुंवद्भावः। भैमीम्-भीमात् भयानकात् आगता भैमी भीतिस्तां तथा। वस्तुतस्तु 'परिणायितश्चानेकाः, सुरूपाः कुलबालिकाः। सकलान्तःपुरीसारा, जज्ञे तस्य यशोमती' ।७८। इति श्रीमदाचार्याजितप्रभ-सूरिसन्दब्धे श्रीशान्तिनाथचरिते षष्ठप्रस्तावेऽष्टसप्ततितमे श्लोके संश्लोकिता भैमीव भैमी यशोमती तां तथा। 'काकतालीयादयः' ७।१।११७। इतिसूत्रे तुल्यार्थविषयकाकतालादिसमासपदत ईयप्रत्ययविधान-सामर्थ्यात् प्रकृते भैमीव भैमीति समासपदमनवद्यमवसेयम्। विहाय-परित्यज्य। निर्भयं यथास्या-त्तथेतिप्रथमपक्षेऽर्थोऽवसेयः। द्वितीयपक्षे तु स्पष्ट एवेति। अपदर्पया-अपगतो दर्पोऽहंकारो यस्याः साऽपदर्पा तया तथा। हताशया-हता भग्ना आशा मनोऽलाषो यस्याः सा हताशा तया तथा। कया-किमात्मिकया, प्रमदयेत्यर्थः। अवाङ्मुखता-शोकेन लज्जया वाऽधः नीचैरितियावत् मुखं वदनं यस्याः साऽवाङ्मुखा तस्या भावोऽवाङ्मुखता मुखावनतिरितियावत् वाग्विमुक्तवदनत्वं वा। नो-नहि। 'अभावे त्वनन्नो नहि' ।६।१६५। ( इति अ० चि० )। अभ्यनायि-अभिनयमानीता। भैमीं विहाय सर्वापि सुन्दर्यो हताशाऽधोमुखी सञ्जातेतिभावः ॥ १२८॥

**कृतेऽप्युपाये शतशोऽपशोकया, यदा बभूवे न कदाचिदेकया।**
**तदा गृहीतव्यतिरेकशङ्कया, न दर्पणः श्वासमलीमसः कृतः ॥१२९॥**

अन्वयः—*यदा, शतशः, उपाये, कृते, अपि, एकया, ( अपि ) कदाचित्, अपशोकया, न, बभूवे, तदा, गृहीतव्यतिरेकशङ्कया, दर्पणः, श्वासमलीमसः, न, कृतः ॥१२९॥*

वृत्तिः—यदा–यस्मिन् समये । शतशः–शतशब्दस्यानेकपरत्वात्, अनेकशः, बहुश इतियावत् । उपाये–कामव्यथाशामकप्रतीकारे । कृते–विहिते । अपि–सम्भावनायाम् । एकया–एकत्वसङ्ख्याविशिष्टया । ( अपि–सम्भावनायाम् । ) कदाचित्–जातु । अपशोकया–अपगतः शोको दैन्यं खेद इतियावद्यस्याः साऽपशोका तया तथा, सोद्यमयेत्यर्थः । न–नहि । बभूवे–समपादि । तदा–तस्मिन् काले । गृहीतव्यतिरेकशङ्कया–गृहीतमिति भावे क्तः, एवञ्च गृहीतस्य ग्रहणस्य व्यतिरेकोऽभावो गृहीतव्यतिरेकः ग्रहणाभावइत्यर्थः, तस्मात् शङ्का त्रासः, आतङ्क इतियावद, गृहीतव्यतिरेकशङ्का तया तथा, हेतुना । यद्वा गृहीतव्यतिरेकस्य ग्रहणाभावस्य शङ्का आशङ्का यस्याः सा गृहीतव्यतिरेकशङ्का तया तथा । 'भयं भीभीतिरातङ्क आशङ्का साध्वसं दरः' २।२१५। ( इत्यभि० चिन्ता० ) । कयेतिशेषः । दर्पणः– आदर्शः । 'दर्पणे मुकुरादर्शौ' इत्यमरः । श्वासमलीमसः–मलो मालिन्यमस्त्यस्येति मलीमसः 'मलादीमसश्च' ७।२।१४। इत्यनेन मत्वर्थे ईमसः प्रत्ययः, श्वासेन निःश्वासवायुना मलीमसः श्वासमलीमसः । न कृतः–नहि विहितः । नञः काक्वर्थकत्वाद, अपि तु कृत एवेत्यर्थः ॥ १२८ ॥

गच्छाधीश्वरहीरहीरविजया–म्नाये निकाये धियां,
भृत्यः श्रीविजयप्रभाख्यसुगुरोः, श्रीमत्तपाख्ये गणे ।
शिष्यः प्राज्ञमणेः कृपादिविजयस्याशास्यमानाग्रणी,–
श्चक्रे वाचकनाममेघविजयः, शस्यां समस्यामिमाम् ॥१३०॥

अन्वयः—*श्रीमत्तपाख्ये, गणे, धियाम्, निकाये, गच्छाधीश्वरहीरहीरविजयाम्नाये, श्रीविजयप्रभाख्यसुगुरोः, भृत्यः, प्राज्ञमणेः, कृपादिविजयस्य, आशास्यमानाग्रणीः, शिष्यः, वाचकनाममेघविजयः, शस्याम्, इमाम्, समस्याम्, चक्रे ॥१३०॥*

वृत्तिः—श्रीमत्तपाख्ये–शोभासम्पत्समन्विते तपाभिधाने । गणे–गच्छे । धियाम्–मतीनाम् । निकाये–समूहे, बुद्धिनिधावितियावद । निकाय्ये इतिपाठप्रकल्पनं विशेषतः सङ्गतमाभाति, तदर्थस्तु निवासस्थानभूते, 'धाय्यापाय्यसान्नाय्यनिकाय्यमृङ्मानहविर्निवासे' ५।१।२४। इतिहैमसूत्रेण निकाय्यशब्दस्य निवासार्थे निपातनाद । गच्छाधीश्वरहीरहीरविजयाम्नाये–गच्छाधिपतिहीरकश्रीमद्धीरविजयसूरीश्वरसम्प्रदाये । श्रीविजयप्रभाख्यसुगुरोः–श्रीविजयप्रभसूरीश्वरोत्तमगुरुवर्यस्य । भृत्यः–किङ्करः ।

एतेन समस्याकर्तुर्वाचकवरस्य तत्र निरतिशया भक्तिर्व्यज्यते । प्राज्ञमणेः-पण्डितशिरोमणेः । कृपादि-विजयस्य-कृपेत्यादिर्यस्य स कृपादिः, विजयो यस्य नामनि तस्य तथा, कृपाविजयस्येत्यर्थः । आशास्य-मानाग्रणीः-आशास्यमानानाम् आशंसाविषयाणामग्रणीः प्रथमस्तथा । शिष्यः-विनेयः । वाचकनाम-मेघविजयः-महामहोपाध्यायश्रीमेघविजयगणीश्वराभिधानः । शस्याम्-प्रशंसनीयाम् । इमाम्-पुरतः प्रत्यक्षतो दृश्यमानाम् । समस्याम्-समासार्थाम् 'समस्या तु समासार्था' इत्यमरः । पादपूर्तिरूपसम-स्यामितियावत् । चक्रे-विदधे । कृतवानितियावत् ॥ १३० ॥

इति-वाचकप्रवरश्रीमेघविजयजिद्गणीश्वरविरचिते श्रीनैषधीयमहाकाव्यप्रथमसर्गपादपूर्तिस्वरूपे श्रीशान्तिनाथचरित्रे शासनसम्राट्सूरिचक्रचक्रवर्तितपागच्छाधिपतिभट्टारकाचार्यमहाराजा-धिराजश्रीविजयनेमिसूरीश्वरमहाराजपट्टालङ्कारशास्त्रविशारदकविरत्न-पीयूषपाणिपूज्य-पादाचार्यमहाराजश्रीविजयामृतसूरीश्वरविरचित 'विद्वद्विनोदिनी' नामवृत्तिविभूषिते

## प्रथमः सर्गः समाप्तः ।

卐

# अथ द्वितीयः सर्गः

यथोह्यमानः खलु भोगभोजिना, रथेन विष्णुः प्रभविष्णुतेजसा ।
तथाधिराजः स रराज राजभिः, समं व्रजन् राजपथे यथेच्छया ॥१॥

अन्वयः—*यथा, भोगभोजिना, प्रभविष्णुतेजसा, रथेन, उह्यमानः, विष्णुः, रराज, तथा, ( प्रभविष्णुतेजसा, रथेन, उह्यमानः ) सः, अधिराजः, राजभिः, समम्, यथेच्छया, राजपथे, व्रजन्, ( रराज ) ॥ १ ॥*

**वृत्तिः**—यथा–येन प्रकारेण । **भोगभोजिना**–भोगं सर्पशरीरं भुङ्क्ते तच्छीलो भोगभोजी 'अजातेः शीले' ५।१।१५४। इत्यनेन ताच्छील्ये णिन्प्रत्ययः तेन तथा, गरुडात्मकेनेत्यर्थः । 'अहेः शरीरं भोगः स्यात्' इत्यमरकोशः । **प्रभविष्णुतेजसा**–प्रभवति प्रकर्षेण वर्तते तच्छीलं प्रभविष्णु, तादृशं तेजः प्रभावः प्रतापो वा यस्य स प्रभविष्णुतेजास्तेन तथा । **रथेन**–स्यन्दनेन । 'युद्धार्थे चक्रवद्याने, शताङ्गः स्यन्दनो रथः' ३।४१५। ( इत्यभि० चि० ) **उह्यमानः**–प्राप्यमाणः । **विष्णुः**–वेवेष्टि व्याप्नोति जगदिति विष्णुः, नारायणः । विष्णुर्नारायणः' इत्यमरः । **रराज**–दिदीपे, शुशुभ इति यावत् । **तथा**–तेन प्रकारेण । प्रभविष्णुतेजसा ( पूर्वोक्तार्थेन ) रथेन उह्यमानः । **सः**–प्रसिद्धः । **अधिराजः**–अधि अधिकः विशिष्ट इति यावत्, राजाप्रकृतिरञ्जनशीलोऽधिराजः, भगवान् श्रीमान् राजाधिराजः शान्तिनाथ इत्यर्थः । **राजभिः**–अनुयायिनरपतिभिः । **समम्**–सह । **यथेच्छया**–यथेप्सितम् । **राजपथे**–राज्ञां नृपाणां पन्था मार्गो राजपथस्तस्मिँस्तथा, राजमार्गे इत्यर्थः । 'ऋक्पूःपथ्यपोऽत्' ७।३।७६। इत्यनेन अत्प्रत्ययः । **व्रजन्**–गच्छन् । (रराज–शुशुभे इति ) ॥१॥

दिशोऽपि तूर्य्यध्वनिनाऽभिगर्जयन्, प्रसह्य वैरोचनिजस्य पत्तनम् ।
यियासुरग्रेसरवाजिराजिभि – र्जगाम चक्रानुगमाध्वनाऽधिपः ॥२॥

अन्वयः—*तूर्य्यध्वनिना, दिशः, अपि, अभिगर्जयन्, वैरोचनिजस्य, पत्तनम्; प्रसह्य, अग्रेसरवाजिराजिभिः, यियासुः, अधिपः, चक्रानुगमाऽध्वना, जगाम ॥ २ ॥*

**वृत्तिः**—**तूर्य्यध्वनिना**–तूर्य्यस्य वाद्यभेदस्य ध्वनिः शब्दविशेषस्तेन तथा । **दिशः**–ककुभः,

आशा इत्यर्थः । दिगन्तरालमितियावत् । **अभिगर्जयन्**–सर्वतोभावेन संशब्दयन्, समुद्‌घोषयन्निति यावत् । **वैरोचनिजस्य**–विशेषेण रोचते द्योतते विरोचः "अच्" ५।१।४९ इत्यनेन अच् प्रत्ययः, विरोच एव वैरोचः स्वार्थिकोऽण्, सचासौ निजः स्वीय आत्मीय इति यावत्तस्य तथा, भीमस्य नृपतेरिति यावत्। यद्वा 'प्रसह्य वैरोच्चनिजस्य' इत्येकं पदं द्रष्टव्यम् । ततश्च–प्रसह्यं सहनयोग्यमल्पीय इति यावत् वैरं यस्य सचासावुच्चनिजः श्रेष्ठात्मीयस्तस्य तथा। राज्ञां स्वाभाविकं परस्परं यादृशेन वैरेण भाव्यमेव तावदेव वैरमासीन्न तावता श्रेष्ठत्वे आत्मीयत्वे च कापि क्षतिः । चकारैकाधिक्यस्य समस्यापूर्त्तौ क्षत्यनाधायकत्वमवसेयम् । पत्तनम् नगरम् । कुण्डिनपुरमितियावत् । **प्रसह्य**–आग्रहेण । **अग्रेसरवाजिराजिभिः**–अग्रे–अग्रतः सरन्ति गच्छन्तीत्यग्रेसरास्ते च ते वाजिनोऽश्वा अग्रेसरवाजिनस्तेषां राजयः श्रेणयस्ताभिस्तथा । यियासुः–जिगमिषुः। **अधिपः**–भूपतिः, श्रीशान्तिनाथ इति यावत् । **चक्रानुगमाध्वना**–चक्रेण चक्ररत्नेन अनुगम्यतेऽनुस्रियते इति चक्रानुगमः सचासावध्वा मार्गश्चक्रानुगमाध्वा तेन तथा । **जगाम**–वव्राज ॥ २।२ ॥

## अथाजगामाभिमुखं स्वसीमनि, नृपोऽपि भीमः किल कुण्डिनेशिता ।
## विदर्भजाया मदनस्तथा मनो–रथं प्रजायाः सह राजभिर्विदन् ॥३॥

*अन्वयः*—*अथ, कुण्डिनेशिता, भीमः, अपि, नृपः, विदर्भजायाः, प्रजायाः, मदनः ( सन् ) तथा, मनोरथम्, विदन्, राजभिः, सह, अभिमुखं, स्वसीमनि, आजगाम ॥ ३ ॥*

वृत्तिः—**अथ**–अनन्तरम् । **कुण्डिनेशिता**–कुण्डिननगरप्रभुः । **भीमः**–तदाख्यः, भयानक इतिव्यज्यते । **अपि**–सम्भावनायाम्। **नृपः**–राजा । **विदर्भजायाः**–विदर्भे–तदाख्यदेशे जाता विदर्भजा, तस्यास्तथा । **प्रजायाः**–जनस्य । "लोको जनः प्रजा" ३।१५४॥ इत्यभि० । **मदनः**–मदयति–तदभिलषितवस्तुप्रदानेन हर्षयतीति मदनः, हर्षोत्पादक इत्यर्थः । **तथा**–तेन प्रकारेण । **मनोरथम्**–मनसः चित्तस्य रथः स्यन्दनमिव मनोरथोऽभिलाषस्तन्तथा । प्रजाया इति शेषः । **विदन्**–जानन् । **राजभिः**–सामन्तनरपतिभिः । **सह**–समम् । **अभिमुखः**–अभि– अभिगतं मुखं वदनं यस्य स तथा । **स्वसीमनि**–स्वा स्वीया चासौ सीमा प्रान्तभूमिः स्वसीमा तस्यान्तथा। **आजगाम**–आगच्छत् ॥ ३ ॥

## गजाश्वभृङ्गारणया सतोरणं, पुरं समन्तादसमं विभूषणैः ।
## असौ ससौख्यं लघुना महीभृता, नलावरुद्धं वयसैव वेशितः ॥४॥

*अन्वयः*—*असौ, गजाश्वभृङ्गारणया, सतोरणम्, समन्तात्, विभूषणैः, असमम्, नलावरुद्धम्, ससौख्यम्, पुरम्, लघुना, महीभृता, वयसा, एव, वेशितः ॥ ४ ॥*

वृत्तिः—असौ–भगवान् शान्तिनाथः। गजाश्वशृङ्गारणया–गजा हस्तिनश्च अश्वास्तुरङ्गमाश्च गजाश्वम् "प्राण्यङ्गत्वादेकवद्भावः" तस्य शृङ्गारणा मण्डनम् गजाश्वशृङ्गारणा तया तथा। "शृङ्गारः सुरते नाट्यरसे च गजमण्डने" इति मेदिनी। सतोरणम्–तोरणेन बहिर्द्वारेण सहितम् सतोरणम्। "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः। समन्तात्–सर्वतः। विभूषणैः–अलङ्कारैः। असमम्–न समं तुल्यं यस्य तदसमम्। 'अनुत्तमम् इति यावत्'। नलावरुद्धम्–नलैर्धारायन्त्रैरवरुद्धम् व्याप्तम्, नलावरुद्धम 'नलैःपद्मैः, कमलैरिति' यावत्, अवरुद्धं व्याप्तमिति नलावरुद्धमिति वा। "नलो राज्ञि कपौ नडे पितृदेवे नलं तु स्यात् पद्मे" इत्यनेकार्थः। ससौख्यम्–सौख्येन निर्वृत्या सुखेनेति यावत् सहितम् ससौख्यम्,। पुरम्–नगरम्। लघुना–स्वल्पेन। महीभृता–महीं पृथिवीं बिभर्ति धारयतीति महीभृत् तेन तथा। वयसा–अवस्थया 'यौवनेनेत्यर्थः'। एव– खलु। वेशितः–प्रवेशितः ॥ ४ ॥

पाठान्तरम्

**सदङ्गभृत् प्रत्ययितं पुरा तदा–ऽऽदिवृद्धिकृत्–तद्धितवत्–सुसङ्गतम्।**
**पदं स्वमीषल्लघुनाऽप्यसौ महा–नलावरुद्धं वयसैव वेशितः ॥४॥**

अन्वयः—*पुरा, सदङ्गभृत् प्रत्ययितम्, तदादिवृद्धिकृत्तद्धितवत्सुसङ्गतम्, महानलावरुद्धम्, अपि, स्वम्, पदम्, असौ, लघुना, वयसा, एव, वेशितः ॥ ४ ॥*

वृत्तिः—पुरा–पूर्वम्। सदङ्गभृत्प्रत्ययितम्–सत् समीचीनञ्च तदङ्गम् 'तदाख्य देशः' सदङ्गम् तद्बिभर्ति धारयतीति सदङ्गभृत्, सचासौ प्रत्ययो हेतुः सदङ्गभृत्प्रत्ययः, स सञ्जातोऽस्येति सदङ्गभृत्प्रत्ययितम्। "प्रत्ययोऽधीनशपथ–ज्ञानविश्वासहेतुषु" इत्यमरः। स्थानपक्षे इदम्, पदसंज्ञापक्षे च–सत्–विद्यमानम्, अङ्गभृत्प्रत्ययितम् अङ्गभृत्प्रत्ययोऽङ्गसंज्ञाकारिप्रत्ययः सञ्जातोऽस्येति अङ्गभृत्प्रत्ययितम्, सच तदङ्गभृत्प्रत्ययितं सदङ्गभृत्प्रत्ययितम्। उभयत्र पक्षेऽपि सदिति पृथक् पदं वा बोध्यम्। तदादिवृद्धिकृत्तद्धितवत्सुसङ्गतम्–वृद्धिमभ्युदयं कुर्वन्तीति वृद्धिकृतः, हितं कल्याणमस्त्येषामेषु वेति हितवन्तः, ते प्रसिद्धाश्च ते हितवन्ततद्धितवन्तः। तदादि–तद्दिनारभ्य वृद्धिकृतस्तदादिवृद्धिकृतः ते च ते तद्धितवन्तस्तदादिवृद्धिकृत्तद्धितवन्तस्तैः सुसङ्गतम् सुसमञ्जसम्, तदादिवृद्धिकृत्तद्धितवत्सुसङ्गतम्। पदसंज्ञा पक्षे च आदिवृद्धिकृत् तद्धितवत्, सुसङ्गतम्, तदिति च्छेदः। महानलावरुद्धम्–महान् विशालश्चासौ नलः पर्वतादिना विषमस्थानम्, महानलस्तेन अवरुद्धम्–वेष्टितम्, इति महानलावरुद्धम्। अत्र अलावरुद्धम् इतिच्छेदः लावश्छेदः रुद्धं रोधः लावश्च रुद्धश्च लावरुद्धे न लावरुद्धे यत्र तदलावरुद्धम् एतच्छेदपक्षे च 'महान्' इत्येतत् "असौ" इत्येतत्समानाधिकरणपदम्। अपि–सम्भावनायाम्। स्वम्–आत्मीयम्। पदम्–आस्पदम्, "स्थानमितियावत्।" "स्थानन्तु पदमास्पदम्" ४।५४॥ इत्यभिधानचिन्तामणिः। असौ–भगवान् राजाधिराजः श्रीमान् शान्तिनाथः। ईषल्लघुना–किञ्चिदल्पेन।

वयसा–यौवनेन । "वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्" इति मेदिनी । एव–अवधारणार्थकमव्ययम् । वेशितः–प्रवेशितः । विभक्त्यन्तत्वपक्षे स्वमीषल्लघुना स्वम्प्रभृतीषदल्पेन प्रत्ययेण, वयसा युवापत्यप्रत्ययेन चेति द्रष्टव्यम् । इति ॥ ४ ॥

**नृपेऽनुरूपे निजरूपसम्पदां, जिने प्रयाणाभिमुखे दिशां जये ।**
**पुरस्सरीभूय पुरन्दरः स्वयं, जयं चकारास्य परे पराजयम् ॥५॥**

अन्वयः—*निजरूपसम्पदाम्, अनुरूपे, नृपे, जिने, दिशाम्, जये, प्रयाणाभिमुखे, ( सति ) पुरन्दरः, स्वयम्, पुरस्सरीभूय, अस्य, जयम्, परे, पराजयम्, चकार ॥ ५ ॥*

वृत्तिः—**निजरूपसम्पदाम्**–रूपं सौन्दर्यञ्च सम्पदः सम्पत्तयश्च रूपसम्पदः निजस्य आत्मनो रूपसम्पदो निजरूपसम्पदस्तासान्तथा । **अनुरूपे**–योग्ये । **नृपे**–राजनि । **जिने**–अर्हति, भगवति शान्तिनाथे इति यावत् । **दिशाम्**–आशानाम् दिशानामिति यावत् । **जये**–विजये । दिग्विजयनिमित्तमित्यर्थः । **प्रयाणाभिमुखे**–प्रयाणाय प्रस्थानाय अभिमुखः सम्मुखः प्रयाणाभिमुखस्तस्मिँस्तथा । प्रस्थानतत्परे इति यावत् । ( सति ) **पुरन्दरः**–पुराणि शत्रूणां दारयति पुरन्दर इन्द्रः । **स्वयम्**–आत्मनैव । 'सर्वं वाक्यं सावधारणं भवती'तिनियमात् । "स्वयमात्मना" इत्यमरः । **पुरस्सरीभूय**–अग्रेसरीभूय । **अस्य**–भगवतो राजाधिराजस्य शान्तिनाथस्य । **जयम्**–विजयम् । ( च–पुनः ) **परे**–शत्रौ । **पराजयम्**–भङ्गम् । पराभवमितियावत् । "भङ्गो जयविपर्य्यये" इति मेदिनी । **चकार**–विदधे । कृतवानिति यावत् ॥ ५ ॥

**नरेशवर्गः स्वयमेव ढौकनं, दिदेश तस्मिन् बहुशः श्रुतिंगते ।**
**स्वविक्रमादद्भुतचक्रचङ्क्रमात्, पुरः पुरोऽभ्येयुषि तत् पदे पदे ॥६॥**

अन्वयः—*तत्, पुरः पुरः, पदे, पदे, स्वविक्रमात्, अद्भुतचक्रचङ्क्रमात्, अभ्येयुषि, तस्मिन्, बहुशः, श्रुतिम्, गते, ( सति ) नरेशवर्गः, स्वयम्, एव, ढौकनम्, दिदेश ॥ ६ ॥*

वृत्तिः—**तत्**–तस्माद्धेतोः । **पुरःपुरः**–अग्रतोऽग्रतः । **पदे पदे**–वीप्सायां द्विर्भावः, प्रतिपदम्, प्रतिस्थानमिति यावत् । **स्वविक्रमात्**–स्वस्य आत्मनो विक्रमः पराक्रमः स्वविक्रमस्तस्मात्तथा । **अद्भुतचक्रचङ्क्रमात्**–अद्भुतमाश्चर्य्यजनकञ्च तच्चक्रम् चक्ररत्नम् अद्भुतचक्रम् तस्य चङ्क्रमः पुनः पुनर्भ्रमणम्, अतिशयभ्रमणं वा अद्भुतचक्रचङ्क्रमस्तस्मात्तथा । **अभ्येयुषि**–समायाते, प्राप्ते इति यावत् । **तस्मिन्**–भगवति शान्तिनाथे । **बहुशः**–अनेकशः । **श्रुतिम्**–श्रवणविषयताम् । **गते**–

याते । (सति) नरेशवर्गः-नराणां मनुष्याणामीशः नायकः 'प्रभुरितियावत्' । नरेशस्तेषां वर्गः-समूहः इति नरेशवर्गः । स्वयम्-आत्मना । एव-खलु । अवधारणार्थकमव्ययम् । ढौकनम्-प्रीतिपुरस्सरमुपायनम् । सन्मुखागमनम् वा । दिदेश-कृतवान् ॥ ६ ॥

**अनेकशः क्ष्मापकनीरनीकिनी-पतिः परप्रीतिमतीरुदूढवान् ।**
**विशिष्य सा भीमनरेन्द्रनन्दिनी, प्रियाऽस्य जज्ञे रतिवद् मनोभुवः ॥७॥**

अन्वयः—*अनीकिनीपतिः, परप्रीतिमतीः, अनेकशः, क्ष्मापकनीः, उदूढवान्, विशिष्य, सा, भीमनरेन्द्रनन्दिनी, मनोभुवः, रतिवत्, अस्य, प्रिया, जज्ञे ॥ ७ ॥*

वृत्तिः—अनीकिनीपतिः-अनीकिन्याः सेनायाः पतिः अनीकिनीपतिः, सेनानायक इत्यर्थः । परप्रीतिमतीः-परा श्रेष्ठा, उत्कृष्टेति यावत् । प्रीतिः-स्नेहः, प्रेमेतियावत् परप्रीतिः, कर्मधारयसमास पुंवद्भावश्च । परप्रीतिरस्त्यस्यामिति परप्रीतिमत्यः तास्तथा । निरतिशयस्नेहशालिनीरित्यर्थः । अनेकशः-बहुशः । क्ष्मापकनीः-कनन्ति दीप्यन्ते इति कन्यः "अच्" ५।१।४९॥ इत्यच् प्रत्यये" "वयस्यनन्त्ये" २।४।२१॥ इति ङीः । क्ष्मां-पृथिवीं पान्ति रक्षन्तीति क्ष्मापाः "आतो डोऽह्वावामः" ५।१।७६॥ इत्यनेन डः प्रत्ययः । क्ष्मापाणां कन्यः कुमार्यः क्ष्मापकन्यस्तास्तथा "कन्या कनी कुमारी च" ३।१७४। इत्यभि०चि० । उदूढवान्-परिणीतवान् । विशिष्य-वैलक्षण्यमाश्रित्य, अन्यस्त्रीभ्यः सकाशादतिशयेन अन्यनृपेभ्यो मन आकृष्य वेति यावत् । सा-प्रसिद्धा । भीमनरेन्द्रनन्दिनी-भीमराजतनया, यशोमतीतियावत् । उपपत्तिस्तु प्रथमसर्गे विहाय भैमीमित्यादिव्याख्यानावसरे दर्शितया दिशाऽवसेया । नन्दयतीति नन्दिनी नन्द णिन्-ङीः । मनोभुवः-मनसो भवत्युत्पद्यते इति मनोभूः कामस्तस्य तथा । मदनस्येत्यर्थः । रतिवत्-स्मरदारेव । "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः" इति मेदिनी । अस्य-सेनानायकस्य । प्रिया-मनोज्ञा, वल्लभेतियावत् । जज्ञे-जाता । अभवदिति यावत् ॥ ७ ॥

**सहस्रनेत्रस्य शचीव सोन्नत-स्तनी हिमांशोरिव रोहिणी प्रिया ।**
**तथा दधे पञ्चमचक्रिणोऽर्हतो. मनोभवाज्ञैकवशंवदं मनः ॥८॥**

अन्वयः—*सहस्रनेत्रस्य, उन्नतस्तनी, शची, इव, तथा, हिमांशोः, प्रिया, रोहिणी, इव, सा, पञ्चमचक्रिणः, अर्हतः, मनोभवाज्ञैकवशंवदम्, मनः, दधे ॥ ८ ॥*

वृत्तिः—सहस्रनेत्रस्य-सहस्रं दशशतानि नेत्राणि नयनानि यस्य स सहस्रनेत्रस्तस्य तथा । सुरेन्द्रस्येत्यर्थः । उन्नतस्तनी-उन्नतौ तुङ्गौ स्तनौ कुचौ यस्याः सा तथा । उन्नतकुचकुम्भवतीत्यर्थः ।

**शची**–इन्द्राणी । "पुलोमजा शचीन्द्राणी" इत्यमरः । **इव**–यथा । **तथा**–किञ्च । **हिमांशोः**–हिमः शीतलोऽशुः किरणो यस्य स हिमांशुश्चन्द्रमास्तस्य तथा । "हिमांशुश्चन्द्रमाश्चन्द्रः" इत्यमरः । **प्रिया**–मनोज्ञा, मनोहारणीतियावत् । **रोहिणी**–स्वनामप्रसिद्धवनिता । **इव**–यथा । **सा**–यशोमती । **पञ्चमचक्रिणः**–चक्रमस्त्यस्येति चक्री । "अतोऽनेकस्वरात् ।" ७।२।६।। इत्यनेन मत्वर्थे इन् प्रत्ययः । पञ्चानां पूरणः पञ्चमः । स चासौ चक्री पञ्चम चक्री तस्य तथा । **अर्हतः**–चतुस्त्रिंशतमतिशयान् सुरेन्द्रादिकृतां पूजां वाऽर्हतीति अर्हन् जिनस्तस्य तथा । भगवतः शान्तिनाथस्येत्यर्थः । **मनोभवाज्ञैकवशंवदम्**–वशमायत्तत्वमधीनत्वमिति यावत्, वशंवदम् एकं मुख्यं वशंवदम् एकवशंवदम् । मनोभवस्य–कामस्य आज्ञा आदेशो मनोभवाज्ञा तस्या एकवशंवदम् मनोभवाज्ञैकवशंवदम्, कामाज्ञाकारकमिति यावत् । **मनः**-अन्तःकरणम् 'चित्तमितियावत्' । **दधे**–पुपोष । धारयति स्म वा । धा धातोर्धारणपोषणार्थत्वात् । पञ्चमचक्रिणोऽर्हतोऽमनोभवाज्ञैकवशंवदमित्येवमकारच्छेदो वा कार्य्यः, एवञ्च-अमनोभवम् अकामम्, अकषायमिति यावत् आज्ञाज्ञानम् अमनोभवाज्ञा तस्या एकमद्वितीयम् वशंवदम्-स्थिरम् इति, अमनोभवाज्ञैकवशंवदम्, अन्यत्सर्वं समानमिति ज्ञेयम् ।। ८ ।।

**उपासनामेत्य पितुः स्म रज्यते, क्रमागतामष्टमकृत् परेशितुः ।**
**स मागधं देवमनुस्मरन् वशी, वशीचकाराखिलपूर्वमण्डलम् ।।९।।**

अन्वयः—*अष्टमकृत्, परेशितुः, पितुः, क्रमागताम्, उपासनाम्, एत्य, रज्यते स्म, वशी, सः, मागधम्, देवम्, अनुस्मरन्, अखिलपूर्वमण्डलम्, वशी चकार ।। ९ ।।*

वृत्तिः—**अष्टमकृत्**–दिनत्रयव्याप्योपवासात्मकव्रतविशेषोऽष्टमः तं कृतवानिति अष्टमकृत् । **परेशितुः**–परः श्रेष्ठश्चासावीशिता नायकः प्रभुरिति यावत्, तस्य परेशितुः । **पितुः**-जनकस्य । श्रीमतो विश्वसेनस्य नृपतेरिति यावत् । **क्रमागताम्**–क्रमात्-आचारपरम्परया आगता प्राप्ता क्रमागता तान्तथा । **उपासनाम्**–समाराधनाम् । **एत्य**–प्राप्य । **रज्यते स्म**– अरज्यत । **वशी**–स्वाधीनः । जितेन्द्रिय इत्यर्थः । **सः**–प्रसिद्धः भगवान् शान्तिनाथ इत्यर्थः । **मागधम्**–तदभिधानम् । पूर्वसमुद्रगततीर्थपतिम् । **देवम्**–अमरम् । **अनुस्मरन्**–संस्मरन् । स्मरणपथमानयन्निति यावत् । **अखिलपूर्वमण्डलम्**–पूर्वं पूर्वसागरसम्बन्धि तन्मण्डलम् जनपदः पूर्वमण्डलम् । अखिलं–समस्तञ्च तत्पूर्वमण्डलम् अखिलपूर्वमण्डलम् । **वशीचकार**–स्वाधीनीकृतवान् । चक्रवर्ती हि पूर्वं पूर्वपयोनिधितटमागत्य तत्राष्टमं विधाय मागधदेवं स्ववशीकरोतीतिकल्पः ।। ९ ।।

**प्रभासमेत्याप्यमुना व्यधीयत, दिने दिने साऽवसरेषु बन्दिनाम् ।**
**मुखान्निशान्ते वरदामधाम्नित-द्दिशोरवश्यं खलु वश्यकर्मणे ।।१०।।**

अन्वयः—*दिने दिने, अवसरेषु बन्दिनाम्, मुखात्, निशान्ते, ( सति ) वरदामधाम्नि, अपि, प्रभासम्, एत्य, तद्दिशोः, अवश्यम्, वश्यकर्मणे, अमुना, खलु, सा, व्यधीयत ॥१०॥*

वृत्तिः—दिने दिने—प्रतिदिनम्, वीप्सायां द्विर्भावः। अवसरेषु—समयेषु। बन्दिनाम्—बन्दनशीलानाम्, स्तुतिपाठकानामितियावत्। मुखात्—वदनतः। निशान्ते—निशाया रात्रेरन्तोऽवसानं यतो यत्रेति वा निशान्तम्—प्रभातम् तस्मिँस्तथा, लक्षणया जागृताविति, तत्तदवसरचर्यावबोध इति भावः। सतीति शेषः। वरदामधाम्नि—तदभिधानविश्रुतदक्षिणोदधिमध्यवर्तिनि तीर्थे। अपि—पुनः। प्रभासम्—तन्नामख्यातपश्चिमपारावारवर्ति तीर्थम्। एत्य—समागत्य। तद्दिशोः—वरदामप्रभासदेवताधिष्ठितदक्षिणपश्चिमदिशयोः। अवश्यम्—ध्रुवम्। वश्यकर्मणे—वशीकरणकरणाय। अमुना—विप्रकृष्टतया दृश्यमानेन पञ्चमचक्रिणा भगवता श्रीमता शान्तिनाथेन। खलु—नूनम्। सा—आचारपरम्पराप्राप्ता उपासना। अष्टमादिविधिचर्या। व्यधीयत—अकारि। मागधदेवमायत्तीकृत्य राजराजेश्वरो वरदामप्रभाससुरौ वशीकरोतीतिभावः॥ १०॥

**तटं दधानो निकटं स सैन्धवं, धवः क्षितेः साधनया धनार्जनः।**
**पठत्सु तेषु प्रतिभूपतीनलं,　जिगाय देशेषु पुरस्सरेष्वतः॥११॥**

अन्वयः—*अतः, निकटम्, सैन्धवम्, तटम्, दधानः, साधनया, धनार्जनः, क्षितेः, धवः, सः, तेषु, पठत्सु, पुरस्सरेषु, देशेषु, प्रतिभूपतीन्, अलम्, जिगाय ॥ ११ ॥*

वृत्तिः—अतः—वरदाम-प्रभासतीर्थयोरुपुपासनासम्पादनादेव। निकटम्—समीपस्थम्। सैन्धवम्—सिन्धोः सरितोऽयं सैन्धवस्तन्तथा। तटम्—तीरम्। दधानः—धारयन्, समाश्रयन्निति यावत्। साधनया—साधनात्मकयोगेन। धनार्जनः—धनं वित्तमर्जयत्युपार्जयति इति धनार्जनः। क्षितेः—पृथिव्याः। धवः—पतिः, स्वामीति यावत्। सः—प्रसिद्धः, राजाधिराजो भगवाञ्छान्तिनाथ इति यावत्। तेषु—पूर्वोक्तेषु वन्दिषु। पठत्सु—स्तुतिपाठमुच्चारयत्सु। पुरस्सरेषु—अग्रेतनेषु। देशेषु—मण्डलेषु। "देशो जनपदो नीवृद् राष्ट्रं निर्गश्च मण्डलम्"।४१३॥ इत्यभि०चि०। प्रतिभूपतीन्—प्रतिपक्षाः—शत्रुभूता भूपतयो राजानः प्रतिभूपतयस्तांस्तथा। अलम्—पर्य्याप्तं यथा स्यात्तथा। जिगाय—जितवान् वशीचकारेति यावत्। मागधादितीर्थत्रयं विजित्य सिन्धुनदीतटवर्तिनोवृतोऽजयदितिभावः॥ ११॥

**उपत्यकास्थायिनृपालिरुद्धता कृताधिसेनानिरणा प्रणाशभाक्।**
**वने गतापीश हयागमं भयाद्, विनिद्ररोमाऽजनि शृण्वती नलम् ॥१२॥**

अन्वयः—*उद्धता, कृताधिसेनानिरणा, प्रणाशभाक्, उपत्यकास्थायिनृपालिः, वने, नलम्, गता, अपि, ईशहयागमम्, श्रण्वती, भयात्, विनिद्ररोमा, अजनि ॥ १२ ॥*

वृत्तिः—उद्धता–समुच्छृङ्खला, मानगर्वितेतियावत्। कृताधिसेनानिरणा–सेनां नयतीति सेनानीः तस्मिन् इति, अधिसेनानि, कृतोऽधिसेनानिरणो युद्धं यया सा तथा। प्रणाशभाक्–प्रणाशम् आमूलचूलमुन्मूलनं भजते सेवते इति प्रणाशभाक्। उपत्यकास्थायिनृपालिः–उपत्यकायां पर्वतीयाऽऽसन्नभूमौ तिष्ठन्ति तच्छीला उपत्यकास्थायिनः। "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः उपत्यकास्थायिनश्च ते नृपाः उपत्यकास्थायिनृपाः तेषामालिः श्रेणी पङ्क्तिर्वा उपत्यकास्थायिनृपालिः। वने–कानने। नलम्–तृणविशेषम्। गताः–आश्रिता। अपि–सम्भावनायाम्। ईशहयागमम्–ईशस्य प्रभोः श्रीशान्तिनाथस्य हयोऽश्वः ईशहयः, तस्य आगमम्–आगमनम् ईशहयागमस्तन्तथा। शृण्वती–आकर्णयन्ती, श्रावणप्रत्यक्षविषयतामादधतीति यावत्। भयात्–साध्वसात्। विनिद्ररोमा–विनिद्राणि व्यपगतनिद्राणि रोमाणि लोमानि यस्याः सा तथा। अजनि–समपद्यत। जातेति यावत्। अयं भावः–सिन्धुसरित्तरं जित्वाऽग्रे वैताढ्यपर्वतोपत्यकागतभूपान् जेतुं गतवतश्चक्रिणो भयादेवावनीपतयो वनं पलायिताः, अथ च नलं तृणं श्रिताः, तथापि तत्र राजराजस्याश्वस्याऽऽगतिमाकर्ण्य भीतितो रोमाञ्चिताः, 'अश्वस्तृणं चरिष्यति वयं च भविष्यामोऽच्छन्ना' इति तेषां भयकारणम् इति ॥ १२ ॥

**कथाप्रसङ्गेषु मिथः सखीमुखा–च्चिकीर्षुरस्यैव पुनः प्रसन्नताम् ।**
**नता सतापा जनतापि नीवृता–मुपायनस्थापनया स्थिता स्थले ॥ १३॥**

अन्वयः—*मिथः, कथाप्रसङ्गेषु, सखीमुखात्, अस्य, एव, प्रसन्नताम्, चिकीर्षुः, पुनः, नता, सतापा, नीवृताम्, जनता, अपि, उपायनस्थापनया, स्थले स्थिता ॥ १३ ॥*

वृत्तिः—मिथः–परस्परम्, अन्योऽन्यमितियावत्। कथाप्रसङ्गेषु–गोष्ठीबन्धेषु। सखीमुखात्–मित्ररूपा जनतैव सखी तस्या मुखं वदनं सखीमुखम्, तस्मात्तथा। अस्य–भगवतः शान्तिनाथस्य। एव–अवधारणार्थकमव्ययम्, तच्चान्ययोगव्यवच्छेदरूपम्, तथा च भगवतः शान्तिनाथस्यैव नत्वन्यस्येति भावः। प्रसन्नताम्–प्रसादम्। चिकीर्षुः–कर्तुमिच्छुः। पुनः–किन्तु। नता–विनता, नम्रीभूतेति यावत्। सतापा–तापेन सन्तापेन सैन्यकोलाहलोपद्रवादिजनितमानसिकसंक्षोभेणेति यावत् सहिता–सतापा। नीवृताम्–देशानाम्। "देशो जनपदो नीवृद् राष्ट्रं निगंश्च मण्डलम्" ४।१३॥ इत्यभि०चि०। जनता–जनानां लोकानां समूहो जनता, लोकसमुदाय इति यावत्। अपि–सम्भावनाम्। उपायनस्थापनया–उपायनस्य उपहारस्य स्थापना निधानम् रक्षणमिति यावदुपायनस्थापना तया तथा। स्थले–स्थाने शान्तिनाथाधिष्ठितभूभागे इति यावत्। स्थिता–अवस्थिता। स्वावस्थानञ्चकारेति यावत् ॥ १३ ॥

**धने जने वा कृतरोधने भटै-स्तृणेऽपि तन्व्या नलनामनि श्रुते ।**
**घनेऽपि च स्थातुमधीरया रयात्, तया तदादेशदशाऽप्यधीयत ॥१४॥**

*अन्वयः—भटैः, कृतरोधने, धने, वा, जने, (सति) तन्व्या, नलनामनि, तृणे, अपि, श्रुते, घने, स्थातुम्, अधीरया, च, तया, रयात्, तदादेशदशा, अपि अधीयत ॥१४॥*

**वृत्तिः**—**भटैः**–योधैः, वीरैरिति यावत् । **कृतरोधने**–कृतं विहितं रोधनमवरोधो यस्य तत् कृतरोधनम् तस्मिँस्तथा । कृतापहारे इतियावत् । **धने**–वित्ते । **वा**–समुच्चये । "वा स्याद्विकल्पोपमयोर्वितर्के पादपूरणे । समुच्चये च" इति मेदिनी । **जने**–लोके । लोको जनः प्रजा" ३।१६५॥ इत्यभि० चि० । ( सति ) **तन्व्या**–कृशया । **नलनामनि**–नलाख्ये । **तृणे**–शष्पे । **अपि**–सम्भावनायाम् । **श्रुते**–आकर्णिते । **घने**–सान्द्रे । वने इतिशेषः । **अपि**–सम्भावनायाम् । **स्थातुम्**–अवस्थातुम्, निवसितुमितियावत् । **अधीरया**–धैर्य्याभाववत्या । **च**–समुच्चये । **तया**–उपत्यकास्थायिनृपाल्या । **रयात्**–वेगात्, सत्वर मिति यावत् । **तदादेशदशा**–तस्य भगवतः शान्तिनाथस्य । आदेशस्तदादेशस्तस्य दशाऽवस्था तदादेशदशा । **अपि**–सम्भावनायाम् । **अधीयत**–अधारि ॥१४॥

**पराक्रमाच्चक्रभृतः परा क्रमाद्, भटालिरासन्नतरा द्विधापि या ।**
**द्रुतं विधूयाऽन्यदभूयताऽनया, नगस्थया क्याप्युदरे दरादरेः ॥१५॥**

*अन्वयः—चक्रभृतः, पराक्रमात्, क्रमात्, आसन्नतरा, द्विधा, अपि, या, परा, भटालिः, नगस्थया, अनया, अरेः, दरात्, द्रुतम्, अन्यत्, विधूय, क्वापि, उदरे, अभूयत ॥१५॥*

**वृत्तिः**—**चक्रभृतः**–चक्रं चक्ररत्नं बिभर्तीति धारयतीति चक्रभृत् चक्री चक्रवर्तीति यावत् तस्य तथा । **पराक्रमात्**–विक्रमात्, सामर्थ्यादितियावत् । **क्रमात्**–क्रमशः । **आसन्नतरा**–अतिशयेन आसन्ना व्याकुलिता समीपवर्तिनी वा आसन्नतरा । **द्विधा**–द्विप्रकारा । **अपि**–सम्भावनायाम् । **या**–यच्छब्दबोध्या । **परा**–अन्या, अन्यराजसम्बन्धिनीति यावत् । **भटालिः**–वीरश्रेणी । **नगस्थया**–नगे पर्वते तिष्ठतीति नगस्था तया तथा । पर्वतस्थितिमत्येति यावत् । **अनया**–परकीयभटाल्या । **अरेः**–शत्रोः । **दरात्**–भयात् । **द्रुतं**–शीघ्रम् । **अन्यत्**–अपरम् । **विधूय**–परित्यज्य । **क्वापि**–कस्मिँश्चिदपि । **उदरे**–मध्ये । पर्वतस्येतिशेषः । गिरिगह्वरे इति यावत् । **अभूयत**–अजायत । जातमिति यावत् ॥१५॥

**महाहवः क्वापि भटैः कृताहवः, समापतत् त्रस्यति तत्र शात्रवे ।**
**गिरौ स्थितं तत्प्रजया जयाहृते, मुदा तदाकर्णनसज्जकर्णया ॥१६॥**

अन्वयः—*क्वापि, त्रस्यति, तत्र, शात्रवे, भटैः, कृताहवः, महाहवः, समापतत्, तत् जयात्, ऋते, मुदा, तदाकर्णनसज्जकर्णया, प्रजया, गिरौ, स्थितम् ॥१६॥*

वृत्तिः—क्वापि—कुत्रचित्स्थले। त्रस्यति—समुद्विजति, साध्वसमादधाने इति यावत्। तत्र—तस्मिन्। शात्रवे—प्रतिपक्षे, शत्राविति यावत्। भटैः—योधैः। कृताहवः—कृतो विहित आहवो युद्धार्थमाह्वानं यस्मिन् स कृताहवः। महाहवः—आहूयन्ते जना अस्मिन्नित्याहवो युद्धम्, महान् अतिशयितश्चासौ आहवो महाहवः "सन्महत्परमोत्तमोत्कृष्टं पूजायाम्" ३।१।१०७॥ इत्यनेन समासः। समापतत्—सम्प्रावर्तत, समजायतेति यावत्। तत्—तस्माद्धेतोः। जयात्—विजयात्। ऋते—विना। "वर्जने त्वन्तरेणर्ते हिरुग्नाना पृथग् विना" ६।१६३॥ इत्यभि०चि०। मुदा—हर्षेण। तदाकर्णनसज्जकर्णया—तस्य जयशब्दस्य आकर्णनं श्रवणं तदाकर्णनम् तस्मिन् सज्जौ तत्परौ कर्णौ श्रोत्रे यस्याः सा तदाकर्णनसज्जकर्णा तया तथा। प्रजया—जनेन। गिरौ—पर्वते। स्थितम्—अवस्थितम्, न्युषितमिति यावत्॥१६॥

**स्मरात्परासोरनिमेषलोचनाद्, वरं तमिस्राध्वनि लब्धवानयम्।**
**शकादिकम्लेच्छजनैः कृताश्रयं, सुनिर्भयं साधयति स्म तत्त्रयम् ॥१७॥**

अन्वयः—*स्मरात्, परासोः, अनिमेषलोचनात्, तमिस्राध्वनि, वरम्, लब्धवान्, अयम्, शकादिकम्लेच्छजनैः कृताश्रयम्, सुनिर्भयम्, तत्त्रयम्, साधयति स्म ॥१७॥*

वृत्तिः—स्मरात्—स्मरणाद्धेतोः, तत्सम्बन्धिनानाविधगुणगणानुध्यानादिति यावत्। परासोः—पराः श्रेष्ठा प्रकृष्टा इति यावदसवः प्राणा अर्थाद्बलं यस्य स परासुः, अतिशयितानिर्वचनीयसामर्थ्यविशेषवान् इत्यर्थः, तस्मात्तथा। अनिमेषलोचनात्—न निमेषो निमीलनं ययोस्ते, अनिमेषे लोचने नयने यस्य सोऽनिमेषलोचनस्तस्मात्तथा। तमिस्राध्वनि—तमिस्राया गुहाया अध्वा मार्गस्तमिस्राध्वा तस्मिँस्तथा। वरम्—अभीप्सितम्। लब्धवान्—समधिगतवान्, प्राप्तवानिति यावत्। अयम्—सेनापतिः, महामहिमशाली भगवाञ्छान्तिनाथस्य सेनानीरत्नमितियावत्। शकादिकम्लेच्छजनैः—शकादिकाः शकप्रधानाश्च ते म्लेच्छा यवनादयः शकादिकम्लेच्छजनास्तैस्तथा। कृताश्रयम्—विहितसंश्रयम्, कृतावस्थानमिति यावत्। सुनिर्भयम्—सु अतिशयेन निर्गतं भयं भीर्यस्मात् तत् सुनिर्भयं सुनिर्भीकं यथास्यात्तथा। तत्त्रयम्—खण्डत्रयम्। साधयति स्म—प्राप्नोत्, अधिकरोति स्मेति यावत्॥ १७॥

**पथः तमिस्रान्तरमीयुषः पते !, बिभेमि तदुभिन्नमुदाहरेति सा।**
**वदन्त्यभीः स्त्री मणिमण्डलत्विषा—ऽयनं समुद्योत्य कृतैव चक्रिणा ॥१८॥**

*अन्वयः—पते !, तमिस्रान्तरम्, ईयुषः, पथः, बिभेमि, तत्, भिन्नम्, उदाहर, इति, वदन्ती, सा, स्त्री, मणिमण्डलत्विषा, अयनम्, समुद्योत्य, चक्रिणा, अभीः, कृता, एव ॥१८॥*

**वृत्तिः—पते**–पाति रक्षत्यापद्भय इति पतिः स्वामी, नायक इति यावत्, तदामन्त्रणे तथा। **तमिस्रान्तरम्**–तमिस्राया गुहाया अन्तरं मध्यम् तमिस्रान्तरम्। गुहाभ्यन्तरमित्यर्थः। **ईयुषः**–प्राप्तवतः। **पथः**–मार्गात्। **बिभेमि**–समुद्विजामि, भीता भवामीति यावत्। **तत्**–तस्मात्। **भिन्नम्**–अन्यम्, पूर्वोक्तादतिरिक्तमिति यावत्। मार्गमितिशेषः। **उदाहर**–निदर्शय। **इति**–एवं प्रकारेण। **वदन्ती**–निगदन्ती। **सा**–भीतिविह्वला प्रसिद्धा। **स्त्री**–रमणी, यशोमतीतियावत्। **मणिमण्डलत्विषा**–मणिरत्नेन विहितानि मणिमण्डलानि तेषां त्विट् प्रभा मणिमण्डलत्विट् तया तथा। **अयनम्**–मार्गम्। "अयनं सरणिर्मार्गोऽध्वा" ४।४९॥ इति अभिधानचिन्तामणिः। **समुद्योत्य**–प्रकाश्य। **चक्रिणा**–चक्रवर्तिना, सार्वभौमेणेति यावत् भगवता शान्तिनाथेनेतिशेषः। **अभीः**–अभया, निर्भीकेति यावत्। **कृता**–विहिता। **एव**–अवधारणार्थकमव्ययम् ॥ १८॥

**सरिद्द्वये वार्धकिनाऽऽद्यपद्यया, बलं समुत्तारयता नृपाज्ञया।**
**जनेन यूनः स्तुवता तदास्पदे,सुखः कृतोऽध्वा हि गतागतोद्यतान् ॥१९॥**

*अन्वयः—सरिद्द्वये, नृपाज्ञया, आद्यपद्यया, बलम्, समुत्तारयता, गतागतोद्यतान्, यूनः, स्तुवता, वार्धकिना, जनेन, हि, तदास्पदे, सुखः, अध्वा, कृतः ॥१९॥*

**वृत्तिः—सरिद्द्वये**–सरितोस्तरङ्गिण्योर्द्वयं युगलम् सरिद्द्वयम् तस्मिँस्तथा तमिस्रागुहागतोन्मग्नानिमग्नाभिधाननदीयुगल इति यावत्। **नृपाज्ञया**–नृपस्य राज्ञ आज्ञा निदेशो नृपाज्ञा तया तथा। **आद्यपद्यया**–आद्या प्रथमा चासौ पद्या पद्धतिर्मार्ग इति यावत्, आद्यपद्या तया तथा। **बलम्**–सैन्यम्। **समुत्तारयता**–पारयता। **गतागतोद्यतान्**–गतं गमनम् आगतमागमनम्, गतञ्चागतञ्च गतागते तयोरुद्यताः प्रस्तुता गतागतोद्यतास्ताँस्तथा। **यूनः**–तरुणान्। **स्तुवता**–प्रशंसता, वर्णयतेति यावत्। **वार्धकिना**–वार्धकिरत्नेन। **जनेन**–मनुष्येण मनुष्यगतिमनुभवता वार्धकिरत्नेनेतियावत्। **हि**–निश्चयेन। **तदास्पदे**–तच्च तदास्पदं स्थानम् तदास्पदम् तस्मिँस्तथा। **सुखः**–सुखं शर्म्म सौख्यमिति यावदस्त्यस्मिन्निति सुखः। **अध्वा**–मार्गः। **कृतः**–विहितः ॥ १९॥

**ततोऽवतीर्य्याद्भुतचक्रवान्धवो, विनिर्गतोऽब्दादिव चक्रवान्धवः।**
**स्फुरद्रुचिम्लेच्छजनप्रसाधने, निदर्शनं नैषधमभ्यपेचयत् ॥२०॥**

नलस्य पृष्टा निषधागता गुणान्, नृपेण दुर्गस्थरिपोर्विनिग्रहे ।
चरैर्निशम्यास्य परे शरण्यतां, प्रपेदिरेऽरण्यदशाविमोचनात् ॥२१॥
( युग्मम् )

अन्वयः—अब्दात्, विनिर्गतः, चक्रबान्धवः, इव, अद्भुतचक्रबान्धवः, ततः अवतीर्य, दुर्गस्थरिपोः, विनिग्रहे, नृपेण, निषधागताः, नलस्य, गुणान्, पृष्टा, 'परे, अरण्यदशाविमोचनात्, अस्य, शरण्यताम्, प्रपेदिरे,' (इति) चरैः, निशम्य, स्फुरद्रुचिम्लेच्छजनप्रसाधने [ प्रशासने ], निदर्शनम्, नैषधम्, अभ्यषेचयत्, ॥२०-२१॥

वृत्तिः—अब्दात्—अपो जलानि ददातीत्यब्दो मेघः, तस्मात्तथा। विनिर्गतः—निःसृतः, बहिरायात इति यावत्। चक्रबान्धवः—चक्राणां चन्द्रिकाप्रियपक्षिविशेषाणां बान्धवः स्वजनः प्रिय इति यावत् चक्रबान्धवः चन्द्रः। इव—यथा। अद्भुतचक्रबान्धवः—राष्ट्रस्य सेनाया वा बान्धवः स्वजनः चक्रबान्धवः, अद्भुत आश्चर्यजनकश्चासौ चक्रबान्धवोऽद्भुतचक्रबान्धवः, भगवाञ्छान्तिनाथश्चक्रवर्तीतियावत्। ततः—सरिद्द्वयसनाथिततमिस्रागुहायाः। अवतीर्य—प्रपार्य्य, बहिरागत्य। दुर्गस्थरिपोः—दुर्गे कोट्टे तिष्ठतीति दुर्गस्थः स चासौ रिपुः शत्रुर्दुर्गस्थरिपुस्तस्य तथा, दुर्गादिविषमस्थानस्थितारातेः। विनिग्रहे—विशेषेण निग्रहो दण्डो विनिग्रहस्तस्मिँस्तथा, सप्तम्या निमित्तत्वार्थकतया विनिग्रहनिमित्तमित्यर्थः। नृपेण—चक्रवर्तिना। निषधागताः—निषधायास्तन्नामककोशलदेशाश्रितनगर्य्या आगता निषधागताः, नरा इतिशेषः। नलस्य—नल इव नलस्तस्य, नलसदृशशक्तिशालिनः सेनानीविशेषस्य। गुणान्—समरयोग्योपायान्। पृष्टाः—पर्यनुयोगमापादिताः। परे—शत्रवः। अरण्यदशाविमोचनात्—वनवासस्थितिवियोजनतः। अस्य—नलस्य। शरण्यताम्—शरणम्। प्रपेदिरे—प्राप्ताः। (इति—एवं भूतम्।) चरैः—चरनरैः। निशम्य—समाकर्ण्य। स्फुरद्रुचिम्लच्छजनप्रसाधने(प्रशासने)—विलसद्दीप्तिकानामुत्तरार्धभरतक्षेत्रवर्तिनामनार्यलोकानां नियन्त्रणे। अत्र प्रसाधने इत्यत्र प्रशासने इति सुरुचिकारि। निदर्शनम्—निदर्शनभूतम्, उदाहरणरूपम्। विशिष्टमितियावत्। यद्वा नितरां दर्शनं यस्य स तमिति, सदा चक्रिपार्श्वस्थमित्यर्थः। नैषधम्—निषधायाअयं नैषधस्तन्तथा। पूर्वदर्शितं नलम्। अभ्यषेचयत्—अभिषिक्तवान्। अयं भावः निषधागतजनमुखतो नलानुरूप नलस्य विशिष्टगुणानाकर्ण्य चक्रवर्ती भरतोत्तरार्धवर्तिनो म्लेच्छमहीपतीन् जेतुं तं सेनापतिमकार्षीदिति ॥२०॥२१॥

विधाय वेषान्तरमस्य विक्रमा-न्मिषेण दूतद्विजवन्दिचारणाः ।
यशः पठन्तः परदेशमैयरुर्गरुत्मतः सर्पगणा इवारयः ॥२२॥

अन्वयः—विक्रमात्, गरुत्मतः सर्पगणाः, इव, अस्य, अरयः, वेषान्तरम्, विधाय, मिषेण, दूतद्विजवन्दिचारणाः, (सन्तः) यशः, पठन्तः, परदेशम्, ऐयरुः ॥२२॥

**वृत्तिः**—**विक्रमात्**—पराक्रमात्, शक्तिसम्पदो वा। "विक्रमस्तु पुमान् क्रान्तिमात्रे स्यात् शक्तिसम्पदि" इति मेदिनी। **गरुत्मतः**—गरुतः पक्षाः सन्त्यस्येति गरुत्मान् गरुडस्तस्य तथा। (अरयः-शत्रवः) **सर्पगणाः**—पवनाशनसमूहाः। **इव**—यथा। सर्पोऽहिः पवनाशनः।४।३६१।। इत्यभि०चि०। **अस्य**—राज्ञः। **अरयः**—शत्रवः। **वेषान्तरम्**—अन्यो वेषो वेषान्तरम् तत्तथा। "मयूरव्यंसकेत्यादयः" ३।१।११६।। इत्यनेन समासः। **विधाय**—कृत्वा। **मिषेण**—व्याजेन। **दूतद्विजवन्दिचारणाः**—दूता दूत्यव्यापारपारङ्गमाश्च द्विजा ब्राह्मणाश्च वन्दिनो वन्दनशीलाश्च चारणा भटाश्च दूतद्विजवन्दिचारणाः। (सन्तः) **यशः**—वर्णवादम्, समज्ञामिति यावत्। **पठन्तः**—उच्चारयन्तः, प्रख्यापयन्त इति यावत्। **परदेशम्**—देशान्तरम्। **ऐयरुः**—गतवन्तः ॥ २२ ॥

**कृताजयः केऽपि पराजयं ययु-र्भयं प्रपद्याद्रिमयुर्निरामयम्।**
**निपीय तत्कीर्तिकथामथानया-ञ्जहुर्मुहुस्ते मुमुहुर्भयादपि ॥२३॥**

अन्वयः—*केऽपि, कृताजयः, पराजयम्, ययुः, भयम्, प्रपद्य, निरामयम्, अद्रिम्, अयुः, अथ, तत्कीर्तिकथाम्, निपीय, अनयान्, जहुः, ते, भयात्, अपि, मुहुः, मुमुहुः ॥२३॥*

**वृत्तिः**—**केऽपि**—कियन्तोऽज्ञातनामधेयाः। **कृताजयः**—अजन्त्यधिक्षिपन्त्यस्यामित्याजिर्युद्धम्। कृता-विहिता आजिर्युद्धं यैस्ते कृताजयः, कृतयुद्धा इत्यर्थः। **पराजयम्**—भङ्गम्, पराभवमितियावत्। **ययुः**—प्राप्तवन्तः। **भयम्**—तदीयविक्रमादिजनितसन्त्रासम्। **प्रपद्य**—सम्प्राप्य। **निरामयम्**—निर्गत आमय उपतापो यस्मात्तन्निरामयं यथा स्यात्तथा। "आम आमय आकल्यमुपतापो गदः समाः" ३।१२७।। इत्यभिधानचिन्तामणिः। **अद्रिम्**—पर्वतम्। **अयुः**—प्राप्नुवन्। **अथ**—अनन्तरम्। **तत्कीर्ति-कथाम्**—कीर्तीनां यशसां कथा चर्चा कथनमिति यावत्, कीर्तिकथातस्य भगवतः शान्तिनाथस्य कीर्तिकथा तत्कीर्तिकथा तान्तथा। **निपीय**—सादरमाकर्ण्य। **अनयान्**—अनीतीः, अन्यायानिति यावत्। **जहुः**—तत्यजुः, त्यक्तवन्त इति यावत्। **ते**—कृताजयः पराजिताः सन्तो गिरि-गह्वरमाश्रिता जनाः। **भयात्**—साध्वसात्। **अपि**—अवधारणार्थकमव्ययम्। भयादेवेत्यर्थः। **मुहुः**—पुनः पुनः। "भूयोऽभीक्ष्णं पुनः पुनः। असकृन्मुहुः" ६।१६७।। इत्यभि०चि०। **मुमुहुः**—अमुह्यन्, मोहमापन्ना इति यावत्।।२३।।

**भयेन भग्नेऽपि हये रथे पथे, स्थिते विचक्रेऽवनिपे निपातिते।**
**रसेन सेनापतिनाऽरिसेनया, चिराय तस्थे विमनायमानया ॥२४॥**

अन्वयः—*भयेन, हये, रथे, अपि, भग्ने, पथे, विचक्रे, स्थिते, अवनिपे, सेनापतिना, रसेन, निपातिते, ( सति ) अरिसेनया, चिराय, विमनायमानया, तस्थे ॥२४॥*

वृत्तिः—भयेन–भीत्या, चक्रवर्तिसेनापतिशौण्डीर्य्यवीर्य्यौघवलोकनजनितस्वाभाविकसाध्व-सेनेति यावत् । हये–अश्वे । रथे–स्यन्दने । अपि–सम्भावनायाम् । भग्ने–आमर्दिते, सञ्चूर्णिते इति यावत् । पथे–मार्गे । "वाटः पथश्च मार्गश्च" इति त्रिकाण्डशेषः । विचक्रे–विनष्टं चक्रं रथाङ्गं यस्य स विचक्रस्तस्मिँस्तथा । स्थिते–अवस्थिते । अवनिपे–अवनिं पृथिवीं पाति रक्षतीत्यवनिपस्त-स्मिंस्तथा, प्रतिपक्षमहीपताविति यावत् । सेनापतिना–सेनाया अनीकिन्याः पतिः स्वामी, नायक इति यावत्, सेनापतिस्तेन तथा । रसेन–वीर्येण । "रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्य्ये" इति मेदिनी । निपातिते–विनाशिते, समुन्मूलिते इति यावत् । ( सति ) अरिसेनया–प्रतिपक्षपक्षीयसैन्ये-नेत्यर्थः । चिराय–दीर्घकाले यावत् । "चिराय चिररात्राय चिरस्य च चिराच्चिरम् । चिरेण दीर्घ-कालेऽर्थे" ६।१६८॥ इत्यभि० चि० । विमनायमानया–विमना दुर्मना इवाचरतीति विमनायमाना दुर्म-नायमाना, अहृष्टचित्तेति यावद्, तया तथा । तस्थे–अवतस्थे स्थितमिति यावत् ॥ २४ ॥

( पाठान्तरम् )

**चमूपतिर्भूपतिराजसन्निधेः, प्रसाधयन् म्लेच्छपुराणि तद्धनैः ।**
**धनं ललौ, तत्प्रजयाऽपमानया, चिराय तस्थे विमनायमानया ॥२४॥**

अन्वयः—*चमूपतिः, भूपतिराजसन्निधेः, म्लेच्छपुराणि, तद्धनैः, प्रसाधयन्, धनम्, ललौ, तत्, अपमानया, प्रजया, चिराय, विमनायमानया, तस्थे ॥२४॥*

वृत्तिः—चमूपतिः–सेनानायकः । भूपतिराजसन्निधेः–भूपतीनां महीक्षितां राजा प्रभुः, भूपति-राजस्तस्य सन्निधिः सान्निध्यम्, सामीप्यमिति यावत् भूपतिराजसन्निधिस्तस्य तथा । म्लेच्छपुराणि–म्लेच्छानां यवनादिप्रभृतिपामराणाम् पुराणि नगराणि म्लेच्छपुराणि तानि तथा । म्लेच्छः पामर-भेदे च पापरक्तेऽपभाषणे" इति मेदिनी । तद्धनैः–तेषां म्लेच्छानां धनानि वित्तानि तद्धनानि तैस्तथा । प्रसाधयन्–मण्डयन्, समलङ्कुर्वन्निति यावत् । धनम्–वित्तम्, तदीयमिति शेषः । ललौ–गृहीत-वान् । तत्–तस्माद्धेतोः । अपमानया–अपगतो विनष्टो मानश्चित्तोन्नतिर्यस्याः साऽपमाना, तया तथा । प्रजया–जनतया, लोकेनेति यावत् । चिराय–दीर्घकालमिति यावत् । विमनायमानया–दुर्मनायमानया अहृष्टचित्तयेति यावत् । तस्थे–अवतस्थे । अवस्थितमिति यावत् ॥ २४ ॥

**प्रियं प्रियां च त्रिजगज्जयिश्रियौ, नरौ स्वरूपेण शचीपुरन्दरौ ।**
**ददर्श चक्री नमसोऽवतीर्य्य तौ, कृताञ्जली भूमिभुजं प्रणेमतुः ॥२५॥**

*अन्वयः*—*चक्री, त्रिजगज्जयिश्रियौ, प्रियम्, च, प्रियाम्, स्वरूपेण, शचीपुरन्दरौ, नरौ, ददर्श, नभसः, अवतीर्य्य, कृताञ्जली, तौ, भूमिभुजम्, प्रणेमतुः ॥२५॥*

**वृत्तिः**—**चक्री**—चक्रं राष्ट्रमस्त्यधीनतयाऽस्येति चक्री, चक्रवर्ती सार्वभौम इति यावत्, भगवाञ्छान्तिनाथ इति शेषः। **त्रिजगज्जयिश्रियौ**—त्रयाणां जगतां समाहारस्त्रिजगत्, त्रिभुवनमित्यर्थः तज्जयत्यभिभवतीत्येवंशीला श्रीः शोभा ययोस्तौ त्रिजगज्जयिश्रियौ। **प्रियम्**—प्रीणातीति प्रियः प्रेयान् दयित इति यावत् तन्तथा। **च**—पुनः। **प्रियाम्**—कान्ताम् दयितामिति यावत्। **स्वरूपेण**—आकारेण। **शचीपुरन्दरौ**—पुलोमजासहस्राक्षौ। इन्द्राणीपुरुहूततुल्यावित्यर्थः। **नरौ**—पुमांसौ। **ददर्श**—अवलोकयामास, चाक्षुषप्रत्यक्षविषयतामापेति यावत्। **नभसः**—आकाशात्। "विहाय आकाशमनन्तपुष्करे""। खं द्यौ दिवौ विष्णुपदं वियद् नभः" २। ७७॥ इत्यभि० चि०। **अवतीर्य्य**—अवरुह्य। **कृताञ्जली**—कृतो विहितोऽञ्जलिः संयुक्तकरद्वयं याभ्यान्तौ तथा। "तौ युतावञ्जलिः पुमान्" इत्यमरः। सन्ताविति शेषः। **तौ**—शचीपुरन्दराकारनरौ। **भूमिभुजम्**—भूमिं पृथिवीं भुनक्ति पालयतीति महीभुक् तन्तथा। राजाधिराजं भगवन्तं शान्तिनाथमिति यावत्। **प्रणेमतुः**—प्रणतवन्तौ, प्राणमतामिति यावत् ॥ २५ ॥

**विनिन्यतुस्तावृषभाद्रिमीश्वरं, लिखाधिलीलागृहभित्तिकावपि ।**
**स्वनामसंसाधितभारतक्षितिः, क्षितीश ! वाचेत्युचितं तमूचतुः ॥२६॥**

*अन्वयः*—*कौ, अपि, तौ, ईश्वरम्, ऋषभाद्रिम्, विनिन्यतुः, च, उचितम्, वाचा, तम्, इति, ऊचतुः, क्षितीश !, संसाधितभारतक्षितिः, (त्वम्) अधिलीलागृहभित्ति, स्वनाम, लिख, ॥२६॥*

**वृत्तिः**—**कौ,अपि**—अनिर्वचनीयस्वरूपौ कौचितौ तौ चक्रिणाऽनुपलक्षितौ शचीन्द्राविति यावत्। **ईश्वरम्**—चक्रिणम्, भगवन्तं शान्तिनाथमिति यावत्। **ऋषभाद्रिम्**—ऋषभकूटम्। **विनिन्यतुः**—प्रापयामासतुः। **च**—पुनः। **उचितम्**—साम्प्रतं यथा स्यात्तथा। **वाचा**—गिरा। **तम्**—भगवन्तं शान्तिनाथम्। **इति**—वक्ष्यमाणप्रकारेण। **ऊचतुः**—कथयामासतुः। इतीति किमित्याह। **क्षितीश !**—भूनायक !। **संसाधितभारतक्षितिः**—संसाधिता—स्वाज्ञावशवर्तिनी कृता भारतक्षितिः भारतवर्षाख्यैतद्देशीयभूमिर्येन स तथा। ( **त्वम्**—भवान् ) **अधिलीलागृहभित्ति**—लीलागृहस्य क्रीडनकागारस्य भित्तिः कुड्यं लीलागृहभित्तिः, तस्यामितीत्यधिलीलागृहभित्ति। विभक्त्यर्थेऽव्ययीभावः समासः। **स्वनाम**—स्वस्य आत्मनो नाम अभिधानम्, स्वं स्वीयं नाम-अभिधानं स्वनामेति वा। "स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रियाम्" इत्यमरः। **लिख**—अक्षरात्मतया विनिवेशय ॥ २६ ॥

स विश्वसेनात्मजशान्तिचक्रभृत्, समाजगामात्र जयेन भारते ।
इति स्म सा कारुवरेण लेखितं, जिनेशनामाभिननाम देवता ॥२७॥

अन्वयः—*सः, विश्वसेनात्मजशान्तिचक्रभृत्, जयेन, अत्र, भारते, समाजगाम, इति, कारुवरेण, लेखितम्, जिनेशनाम, सा, देवता, अभिननाम, स्म ॥२७॥*

वृत्तिः—**सः**–प्रसिद्धः । **विश्वसेनात्मजशान्तिचक्रभृत्**–शान्तिः शान्तिनाथः, शान्तिश्चासौ चक्रभृत् शान्तिचक्रभृत्, विश्वसेनस्य तदाख्यहस्तिनापुरराजस्य आत्मजस्तनयो विश्वसेनात्मजः स चासौ शान्तिचक्रभृत् विश्वसेनात्मजशान्तिचक्रभृत् । **जयेन**–विजयेन उपलक्षित इति शेषः । **अत्र**–अस्मिन् । **भारते**–भारतवर्षाख्यदेशे । **समाजगाम**–समागतः । **इति**–इत्येवंप्रकारेण । **कारुवरेण**–कारुषु शिल्पिषु वरः श्रेष्ठः कारुवरस्तेन तथा । "कारुस्तु कारी प्रकृतिः शिल्पी" ३।५६३॥ इत्यभि०चि० । **लेखितम्**–अक्षरात्मतया विन्यासितम् । **जिनेशनाम**–जिनेषु सर्वज्ञेषु ईशः प्रभुर्जिनेशो जिनवरस्तस्य नामभिधानं जिनेशनाम । "आख्याह्वे अभिधानं च नामधेयञ्च नाम च" इत्यमरः । **सा**–प्रसिद्धा । **देवता**–दैवतम् । **अभिननाम स्म**–पूर्वं सर्वतोभावेन प्रणनाम । 'स्मातीते' इत्यमरः । अत्र स्मेत्यस्य नहि धातुना योग इति 'स्मे च वर्तमाना' ।५।२।१६। इत्यस्य नावकाशः ॥ २७ ॥

कृतार्हदर्चाविधिनाऽधिनायकः, स्थितोऽष्टमे स्पष्टतयाऽष्टमङ्गलः ।
हरेः स्म तत्राभ्युदयन्महो महा-ऽनलस्य च स्वस्य च सख्यमीक्षते ॥२८॥

अन्वयः—*अष्टमङ्गलः, अधिनायकः, कृतार्हदर्चाविधिना, स्पष्टतया, अष्टमे स्थितः, ( सन् ) तत्र, हरेः, च, अभ्युदयन्महोमहानलस्य, च, स्वस्य, सख्यम्, ईक्षते स्म, ॥२८॥*

वृत्तिः—**अष्टमङ्गलः**–अष्टौ, अष्टत्वसंख्याकानि मङ्गलानि स्वस्तिकादीनि यस्य सोऽष्टमङ्गलः । **अधिनायकः**–अधि–ईश्वरश्चासौ नायकः सेनानेता अधिनायकः । **कृतार्हदर्चाविधिना**–अर्हतो जिनेश्वरस्य अर्चा पूजा अर्हदर्चा तस्या विधिर्विधानम् अर्हदर्चाविधिः, कृतो विहितोऽर्हदर्चाविधिः कृतार्हदर्चाविधिस्तेन तथा । अत्र "कृतार्हदर्चो विधिनाऽधिनायकः" इत्येवं पाठः साधीयान् प्रतिभाति, कृता विहिता अर्हदर्चा जिनेश्वरपूजा येन स कृतार्हदर्चः" इति प्रथमान्तं पदमधिनायकविशेषणतया समुपस्थापनीयम् । विधिना इति च पृथक् पदमनुसन्धेयम् । **स्पष्टतया**–व्यक्तरूपेण । **अष्टमे**–दिनत्रयव्यापकोपवासात्मकव्रतविशेषे । **स्थितः**–अवस्थितः । ( सन् ) **तत्र**–तस्मिन् स्थले, तस्मिन् काले वा । **हरेः**–इन्द्रस्य । "हरिश्चन्द्रार्कवाताश्वशुकभेकयमादिषु । कपौ सिंहे हरेऽजेऽंशौ शक्रे लोकान्तरे पुमान्" इति मेदिनी । **च**–पुनः । **अभ्युदयन्महोमहानलस्य**–अभ्युदयत्–समुन्नयत् मह-

स्तेजो यस्य सोऽभ्युदयन्महाः, स चासौ महांश्चासावनलो महानलोऽभ्युदयन्महोमहानलस्तस्य तथा। च–पुनः। स्वस्य–आत्मनः। सरूपम्–रूपसाम्यम, मित्रतां च। ईक्षते स्म–ऐक्षत, समवलोकयदिति यावत् ॥ २८ ॥

**मनोरथेन स्वपतीकृतं नलं, वनाद्रिदुर्गस्थितमारुरुत्सुकः।**
**समुत्सुकः पञ्चमचक्रभृत् पुनः, खगाचलेऽभ्यागमनेच्छयाऽचलत् ॥२९॥**

अन्वयः—*मनोरथेन, वनाद्रिदुर्गस्थितम्, स्वपतीकृतम्, नलम्, आरुरुत्सुकः, पुनः, खगाचले, अभ्यागमनेच्छया, समुत्सुकः, पञ्चमचक्रभृत्, अचलत् ॥२९॥*

वृत्तिः—**मनोरथेन**–मनसश्चित्तस्य रथः स्यन्दनमिव मनोरथोऽभिलाषस्तेन तथा। **वनाद्रिदुर्गस्थितम्**–वने कानने अद्रिः पर्वतो वनाद्रिस्तत्र दुर्गं कोट्टं वनाद्रिदुर्गम् तत्र स्थितो अवस्थितो वनाद्रिदुर्गस्थितस्तन्तथा। **स्वपतीकृतम्**–न विद्यते स्व आत्मा पतिः स्वामी यस्य सोऽस्वपतिः, अस्वपतिः स्वपतिः कृतः स्वपतीकृतस्तन्तथा। **नलम्**–स्थानविशेषम्, नलाख्यतृणबहुलमितियावत्। **आरुरुत्सुकः**–आरोढुमिच्छत्यारुरुत्सति आरुरुत्सतीत्यारुरुत्सुः, "सन् भिक्षाऽऽशंसेरुः" ५।२।३३॥ इत्यनेन'उ' प्रत्ययः। आरुरुत्सुरेव आरुरुत्सुकः 'स्वार्थे कप्रत्ययः।' **पुनः**–किञ्च। **खगाचले**–खे गगने गच्छन्तीति खगा विद्याधरास्तेषामचलः पर्वतः खगाचलो वैताढ्यस्तत्र तथा। **अभ्यागमनेच्छया**–आजिगमिषया। **समुत्सुकः**–इष्टार्थोद्युक्तः। "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः। **पञ्चमचक्रभृत्**–पञ्चमचक्रवर्ती। भगवाञ्छान्तिनाथ इति शेषः। **अचलत्**–प्रातिष्ठत ॥ २९ ॥

**पुरश्चलच्चारुचमूपतेश्चमू–र्निशि क सा न स्वपती स्म पश्यति।**
**नलस्थितारिप्रतिरोधनाद् वन–ग्रहेऽवरोधप्रतिबन्धनक्रियाम् ॥३०॥**

अन्वयः—*पुरश्चलच्चारुचमूपतेः, सा, चमूः, निशि, स्वपती, वनग्रहे अपि, नलस्थितारिप्रतिरोधनात्, अवरोधप्रतिबन्धनक्रियाम्, क, न, पश्यति स्म ॥३०॥*

वृत्तिः—**पुरश्चलच्चारुचमूपतेः**–चारुः शोभनश्चासौ चमूपतिः सेनानायकः चारुचमूपतिः, पुरोऽग्रतश्चलन् गच्छन् पुरश्चलन्, पुरश्चलन् चासौ चारुचमूपतिः पुरश्चलच्चारुचमूपतिस्तस्य तथा। **सा**–प्रसिद्धा। **चमूः**–सेना। "वाहिनी पृतना सेना बलं सैन्यमनीकिनी। वरूथिनी चमूश्चक्रं स्कन्धावारः' ३।४१०॥ इत्यभि० चि०। **निशि**–रात्रौ। **स्वपती**–शयाना। **वनग्रहे**–अरण्यस्वीकारेऽपि। **नलस्थितारिप्रतिरोधनात्**–नले पर्वतादिविषमस्थाने स्थिता अवस्थिता नलस्थितास्ते च ते अरयः

शत्रवो नलस्थितारयस्तेषां प्रतिरोधनम् प्रतिरोधो नलस्थितारिप्रतिरोधनम् तस्मात्तथा। अवरोधप्रतिबन्धनक्रियाम्–अवरोधस्य संरोधस्य प्रतिबन्धनम् प्रतिबन्धो यत्र सा चासौ क्रिया व्यापारोऽवरोधप्रतिबन्धनक्रिया तान्तथा। क्व–कुत्र। न–नहि। पश्यति स्म–अपश्यत्, अपि सर्वत्रैवापश्यदिति भावः ॥ ३० ॥

**परैः कृता या नलदुर्गताकृतिर्धनैर्जनैः सैव च दुर्गताकृतिः।**
**अदृष्टमप्यर्थमदृष्टवैभवा-दवाप्य सेनापतिना व्यधीयत ॥३१॥**

अन्वयः—*या, परैः, नलदुर्गताकृतिः, कृता, अदृष्टवैभवात्, अदृष्टम्, अपि, अर्थम्, अवाप्य, सेनापतिना, सा, एव, धनैः, च, जनैः, दुर्गताकृतिः, व्यधीयत ॥३१॥*

वृत्तिः—या–सर्वं वाक्यं सावधारणं भवतीति नियमात् यैव चमूरित्यर्थः। परैः–अन्यैः, शत्रुभिरिति यावत्। नलदुर्गताकृतिः–नलेन पर्वतादिस्थविषमस्थानादिना दुर्गता दुःस्था आकृतिः स्वरूपं यस्याः सा तथा। कृता–विहिता। अदृष्टवैभवात्–धर्माधर्मसामर्थ्यात्। अदृष्टम्–अनवलोकितम्, अननुभूतचरमिति यावत्। अपि–सम्भावनायमव्ययम्। "अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी। अर्थम्–वस्तु। अवाप्य–सम्प्राप्य, समधिगम्येति यावत्। सेनापतिना–सेनानायकेन। स्थितेनेति पूर्वशेषः। सा–पूर्वप्रदर्शिता चमूः। एव–खलु। धनैः–वित्तैः। च–पुनः। जनैः–लोकैः। दुर्गताकृतिः–दुर्गता दुरवगता कृतिः यस्याः सा तथा। व्यधीयत–समपाद्यत, अक्रियतेति यावत् ॥ ३१ ॥

**नलोदयस्याप्यनलोदयादभू-दभूतपूर्वा स्थितिराप्ततेजसा।**
**भवेदवस्थेयमहो! क्षितौ न यां, करोति सुप्तिर्जनदर्शनातिथिम् ॥३२॥**

अन्वयः—*नलोदयस्य, अपि, आप्ततेजसा, अनलोदयात्, अभूतपूर्वा, स्थितिः, अभूत्, अहो!, क्षितौ, इयम्, अवस्था, भवेत्?, सुप्तिः, याम्, जनदर्शनातिथिम्, न, करोति ॥३२॥*

वृत्तिः—नलोदयस्य–नलस्य नडाख्यतृणविशेषस्य उदयोऽभ्युदयो नलोदयस्तस्य तथा। अपि–सम्भावनायाम्। आप्ततेजसा–आप्तस्य अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवतो नान्यथा वादिनस्तेजः प्रतापः प्रभावो वा आप्ततेजः, तेन तथा। अनलोदयात्–अनलस्य वह्नेरुदय उत्पत्तिरनलोदयस्तस्मात्तथा। अभूतपूर्वा–असञ्जातपूर्वा। स्थितिः–अवस्था। अभूत्–अभवत्। अहो–प्रश्ने, वितर्के वाऽव्ययम्। "अहो प्रश्ने वितर्के च" इति मेदिनी। क्षितौ–पृथिव्याम्। इयम्–एतादृशी। अवस्था–

स्थितिः । भवेत्-जायेत । सुप्तिः-स्वापः । याम्-अवस्थाम् । जनदर्शनातिथिम्-जनस्य लोकस्य दर्शनम् दृष्टिर्जनदर्शनम तस्य अतिथिर्गोचरो जनदर्शनातिथिस्तान्तथा । न-नहि । करोति-सम्पादयति ॥ ३२ ॥

**निमीलितादक्षियुगाच्च निद्रया, नलात्प्रणष्टारिवधूजनेन सः ।**
**अवीक्षितोऽपि क्षितिशायिनेक्षितः, स्मरादिवोच्चैः करवालचालकः ॥३३॥**

अन्वयः—*निद्रया, निमीलितात्, अक्षियुगात्, च, नलात्, क्षितिशायिना, प्रणष्टारिवधूजनेन, अवीक्षितः, अपि, उच्चैः, स्मरात्, इव, करवालचालकः, सः, ईक्षितः ॥३३॥*

वृत्तिः—निद्रया-प्रमीलया, संवेशेनेति यावत् । निमीलितात्-संमुद्रितात् । अक्षियुगात्-नेत्रद्वयात् । च-पुनः । नलात्-पर्वतादिना विषमस्थानात् । क्षितिशायिना-भूतलतल्पकारिणा । प्रणष्टारिवधूजनेन-प्रणष्टाः प्रकर्षेण नाशमासादिताश्च ते अरयो रिपवः प्रणष्टारयस्तेषां वधूजनः रमणीवर्गः प्रणष्टारिवधूजनस्तेन तथा । अवीक्षितः-अनवलोकितः । अपि-सम्भावनायाम् । उच्चैः-अतिशयेन । स्मरात्-ध्यानात् कन्दर्पाच्च । इव-यथा । करवालचालकः-करवालस्य खड्गस्य चालकः संचालकः, बालाः केशा बवयोरभेदात् तेषां चालको बालचालकः, करेण हस्तेन बालचालकः करवालचालकः, कन्दर्पात् कचग्रहतत्पर इति परपक्षीयचतुर्थपादसमुदितोऽर्थः । सः-सेनानायकः । ईक्षितः-अवलोकितः ॥ ३३ ॥

**परासुताप्तावपि नायकेऽभवद्, हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।**
**सविभ्रमा चक्रिणि वैरिणो वधूः, स्मरेऽतिविस्मेरदशाप्यथाद्भुता ॥३४॥**

अन्वयः—*अथ, परासुताप्तौ, अपि, वैरिणः, वधूः, स्मरे, अतिविस्मेरदशा, बाह्येन्द्रिय, मौनमुद्रितात्, अपि, हृदः, नायके, चक्रिणि, अद्भुता, सविभ्रमा, अभवत्, ॥३४॥*

वृत्तिः—अथ-अनन्तरम् । परासुताप्तौ-परा गता असवः प्राणा अस्येति परासुः प्राप्तमृत्युस्तस्य भावः परासुता, तस्या आप्तिः प्राप्तिः परासुताप्तिस्तस्यां तथा । मृत्युत्वप्राप्तावित्यर्थः । अपि-सम्भावनायाम् । स्वपतेरितिशेषः । वैरिणः-प्रतिपक्षस्य भूपतेः । वधूः-सीमन्तिनी रमणीति यावत् । स्मरे-मदने । अतिविस्मेरदशा-अतिविस्मेरा प्रफुल्ला जाग्रतीति यावत् दशाऽवस्था यस्याः सा तथा । जाग्रद्दशेति यावत् । बाह्येन्द्रियमौनमुद्रितात्-बाह्यानि च तानीन्द्रियाणि करणानि बाह्येन्द्रियाणि तेषां मौनम्-स्वविषयग्रहणाभावो बाह्येन्द्रियमौनम् तेन मुद्रितम्-रूपादिलक्षण स्वविषयग्रहणासक्तम् बाह्येन्द्रियमौनमुद्रितम् तस्मात्तथा । अपि-सम्भावनायाम् । हृदः-मनसः । नायके-प्रभौ, स्वामि-

नीति यावत् । चक्रिणि-चक्रं राष्ट्रं सैन्यं वा, तन्त्रत्वादुभयं वाऽस्त्यस्येति चक्री, चक्रवर्तीत्यर्थः, सार्वभौम इति यावत् । "चक्रः कोके पुमान् क्लीवं व्रजे सैन्यरथाङ्गयोः राष्ट्रे-" इतिमेदिनी । अद्भुता-आश्चर्यकारिणी, अद्भुतमाश्चर्यमस्ति कार्य्यत्वेन यस्याः सा तथा "अभ्रादिभ्यः" ७।२।४६। इति मत्वर्थे अः प्रत्ययः । सविभ्रमा-विभ्रमेण विलासेन हावभावादिना सहिता सविभ्रमा, बहुव्रीहिसमासः, सह शब्दस्य सादेशश्च । पतिविनाशेऽपि जाग्रत्स्मरदशा विभ्रमाद्याकलनादाश्चर्य्यकारित्वमिति भावः । अभवत्-संभूता, समजायतेति यावत् ॥ ३४ ॥

**छलत्स्खलत्पाद-पयोगतो वने, नलादपि प्राप्तभयो भयोज्झितः ।**
**अदर्शि संगोप्य कदाप्यवीक्षितः, प्रमीलया बाधनलीलया निजः ॥३५॥**

अन्वयः—*छलत्स्खलत्पादपयोगतः, वने, नलात्, अपि, प्राप्तभयः, भया, उज्झितः, अवीक्षितः, प्रमीलया, बाधनलीलया, निजः, सङ्गोप्य, कदापि, अदर्शि ॥३५॥*

वृत्तिः—छलत्स्खलत्पादपयोगतः-पयसे जलाय गतः पयोगतः, पादेषु प्रत्यन्तपर्वतेषु गतः पादपयोगतः छलन्-व्यपदिशन् चासौ स्खलन् स्खलनामादधत् छलत्स्खलन् स चासौ पादपयोगतः छलत्स्खलन्पादपयोगतः, छलेन व्याजेन स्खलन्पादं यथास्यात्तथा पयसे जलाय पयसि जले वा गतस्तथा। निजजनस्य विशेषणम् । वने-कानने । नलात्-स्वस्थानात्, अनलात् इतिच्छेदो वा वह्नेरित्यर्थः । अपि-खलु । प्राप्तभयः-प्राप्तमासादितं भयं भीतिर्येन स तथा । भया-दीप्त्या । उज्झितः-त्यक्तः । अवीक्षितः-अविमृष्टः । प्रमीलया-निद्रया । बाधनलीलया-दुःखलीलया । निजः-आत्मीयः । जनः इति शेषः । निजैरिति च शेषः । सङ्गोप्य-संयम्य, गोपयित्वेति यावत् । कदापि-कस्मिँश्चित्समये । अदर्शि-दृष्टः ॥ ३५ ॥

**अभूत् सुरङ्गेक्षणता रिपुस्त्रियो, द्विषश्च सिंहासनभूः क्षमाभृतः ।**
**समीहिता-यैव भुवश्चिरोदयी, रहस्यमस्याः स महन्महीपतिः ॥३६॥**

अन्वयः—*रिपुस्त्रियः, सुरङ्गेक्षणता, च, द्विषः, क्षमाभृतः, सिंहासनभूः, समी, हिताय, एव, अभूत्, अस्याः, भुवः, चिरोदयी, सः, महीपतिः, महत्, रहस्यम्, ( अभूत्, ) ॥३६॥*

वृत्तिः—रिपुस्त्रियः-शत्रुरमण्यः । सुरङ्गेक्षणता-सरत्यनया सुरङ्गा गूढमार्गो भूमिमध्यवर्ती 'सर्तेः सुर्च' ( उ० १०८ ) इत्युङ्गः, सुरङ्गा सुरुङ्गा चैकार्थौ शब्दस्तोममहानिधिवचनात् । 'सुरुङ्गा तु सन्धिला स्याद्, गूढमार्गो भुवोऽन्तरे' ४।५१। इत्यभि०चि० । सुरङ्गाया ईक्षणमवलोकनं सुरङ्गेक्षणं तस्य भावः सुरङ्गेक्षणता । प्रागपि रिपुराजरमण्यः शोभननृत्यभूमिदर्शनतात्मिका सुरङ्गेक्षणताऽऽसीव

साम्प्रतमपि साऽभूदिति चित्रम् । 'रङ्गः स्यान्नृत्ययुद्धुवो'रित्यनेकार्थः । च—पुनः । द्विषः—शत्रोः । क्षमाभृतः—क्षमां क्षितिं क्षान्तिं च बिभर्तीति क्षमाभृन्नृपस्तस्य, पराजितस्यास्य क्षमाधारकत्वादिति । सिंहासनभूः—सिंहानामासनं यत्र तत् सिंहासनं गुहा दरीतियावत् तत्र भूः सिंहासनभूः, गिरिगह्वर-स्थानमितियावत्, 'भूस्तु भूमिरिव क्षितौ, स्थाने चे' त्यनेकार्थः । पूर्वं तु प्रतिपक्षिणो भूपस्य राजसिं-हासनावस्थानमभूदधुनात्वनन्तरोक्तं तदिति । समीहिताय एव—उभयमपि उभयोः समीचीनेप्सितकृते खलु समभवत् । यद्वा समी सशयोरैक्यात् शमी शिम्बीवृक्षः ( खिजडीतिभाषायाम् ) 'शमी द्रुभेदे वल्गुल्यां शिम्ब्या' मित्यनेकार्थः, हिताय—श्रेयसे । प्राग्राज्यस्थितौ शमी शमवान् हितायासीदधुना पुनः शमीपादप इति । अभूत्—समभवत् । अस्याः—पुरोवर्तिन्याः । भुवः—पृथिव्याः, अखण्डषट्खण्डभरत-भूमेरितियावत् । चिरोदयी—चिरमुन्नतिभाक् । सः—प्रसिद्धः । महीपतिः—चक्रवर्ती श्रीशान्तिनाथो भगवान् । महत्—विपुलम्, उर्विति यावत् । रहस्यम्—गोप्यम्, अकलनीयमितियावत् । अभूदित्य-त्राप्यन्वेयमिति ॥ ३६ ॥

**अहो ! अहोभिर्महिमाहिमागमे, प्रपद्यते द्योतिभिरन्वहं यथा ।**
**तथा महोभिर्गरिमाऽरिमारणाद्, रणादवाप्यस्य समं स्वसेनया ॥३७॥**

*अन्वयः—अहिमागमे, अन्वहम्, द्योतिभिः, अहोभिः, यथा, महिमा, प्रपद्यते, तथा, रणात्, अरिमारणात्, स्वसेनया, समम्, अस्य, महोभिः, गरिमा, अवापि, अहो ॥३७॥*

वृत्तिः—अहिमागमे—हिमस्य शैत्यस्य आगम आगमनं सम्प्राप्तिरिति यावदत्रासौ हिमागमो हेमन्तः, अविद्यमानो हिमागमो हेमन्तोऽत्रेत्यहिमागमः । वसन्तर्ताविति । अन्वहम्—प्रतिदिनम् । द्योतिभिः—द्योतः प्रकाशोऽस्त्येषामिति द्योतीनि "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे इन् प्रत्ययः । अहोभिः—दिवसैः । "घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ" इत्यमरः । यथा—येन प्रकारेण । महिमा—महत्वम्, दीर्घतेतियावत् । प्रपद्यते—समवाप्यते । तथा—तेन प्रकारेण । रणात्—युद्धात्, युद्धहेतोरित्यर्थः । अरिमारणात्—शत्रुविनाशनात् । स्वसेनया—स्वस्य आत्मनः सेना कटकं स्वसेना निजकटकमित्यर्थः तया तथा । समम्—सह । अस्य—सेनानायकस्य भगवतः श्रीशान्तिनाथस्य । महोभिः—तेजोभिः । "मह उत्सवः तेजसोः" इति मेदिनी । गरिमा—गौरवम् गुरुतेति यावत् । अवापि—सम्प्रापि । समधिगत इति यावत् । अहो—आश्चर्ये, वितर्के वाऽव्ययम् ॥ ३७ ॥

**गृहोन्मुखीं भूरिदिनैर्यियासती—मभिप्रपेदे प्रति तां स्मरार्दिताम् ।**
**नृपोऽनुकम्पां त्वलनेऽतिगौरवात्, ततो गिरेः प्रापदुपत्यकां त्यकाम् ॥३८॥**

*अन्वयः*—*भूरिदिनैः, स्मरार्दिताम्, गृहोन्मुखीम्, यियासतीम्, ताम्, प्रति, अनुकम्पाम्, अभिप्रपेदे, ततः, नृपः, चलने, अतिगौरवात्, गिरेः, त्यकाम्, उपत्यकाम्, प्रापत्* ॥३८॥

वृत्तिः—**भूरिदिनैः**—भूरीणि प्रभुतानि च तानि दिनानि भूरिदिनानि तैस्तथा। बहुदिवसैरिति यावत्। **स्मरार्दिताम्**—स्मरेण स्मरणेन गृहस्मरेणेति यावत्। आर्दिता क्लेदिता स्मरार्दिता तान्तथा। गृहस्मरणव्याकुलान्तःकरणामित्यर्थः। (अत एव) **गृहोन्मुखीम्**—गृहाय गृहं गन्तुं उन्मुखीम् समुत्सुका गृहोन्मुखी तान्तथा। (अत एव) **यियासतीम्**—जिगमिषतीम्। **ताम्**—प्रसिद्धाम् सेनाम्। **प्रति**—लक्षीकृत्य, उद्दिश्येति यावत्। **अनुकम्पाम्**—कारुण्यम्। **अभिप्रपेदे**—समधिजगाम। **ततः**—तदनन्तरम्। **नृपः**—राजा। **अतिगौरवात्**—गौरवस्यात्ययोऽतिगौरवं तस्मात्तथा, शीघ्रमितियावत्। **चलने**—गमने सतीतिशेषः। **गिरेः**—पर्वतस्य। **त्यकाम्**—त्यामेव तां विश्रुतामितियावत्। **उपत्यकाम्**—आसन्नभूमिम् अधोभूमिमिति यावत्। "दन्तकास्तु बहिस्तिर्य्यक् प्रदेशा निर्गता गिरेः। अधित्यकोर्ध्वभूमिः स्यादधोभूमिरुपत्यका" ४।१०१॥ इत्यभि० चि०। **प्रापत्**—अध्यगच्छत् ॥ ३८॥

**खगाचलेऽप्याविरभूच्चलाचला, प्रजा प्रजारक्षणवार्तयाऽर्तिभृत्।**
**तपर्तुपूर्तावपि मेदसां भराद्, न लेभिरे स्थूलनरा हि के व्यथाम् ॥३९॥**

*अन्वयः*—*खगाचले, अपि, चलाचला, प्रजा, प्रजारक्षणवार्त्तया, अर्त्तिभृत्, आविरभूत्, हि तपर्तुपूर्तौ, अपि, मेदसाम्, भरात्, के, स्थूलनराः, व्यथाम्, न, लेभिरे* ॥३९॥

वृत्तिः—**खगाचले**—खे नभसि गच्छन्तीति खगाः खेचरा विद्याधरा इति यावत्तेषाम् अचलः पर्वतः खगाचलो वैताढ्यस्तस्मिँस्तथा। **अपि**—सम्भावनायाम्। **चलाचला**—अत्यधिकचलनक्रियावती। **प्रजा**—जनता। **प्रजारक्षणवार्तया**—प्रजारक्षणस्य सन्तानपालनस्य वार्ता वृत्तान्त उदन्त इतियावद्, प्रजारक्षणवार्ता तया तथा। 'वार्ता वार्ताव्युदन्तयो' रित्यनेकार्थः। **अर्तिभृत्**—अर्तिं पीडां बिभर्ति धारयतीत्यर्तिभृत्। **आविरभूत्**—प्रादुरभूव, प्रकटीबभूवेति यावत्। **हि**—यतः। **तपर्तुपूर्तौ**—तपर्तोर्निदाघस्य पूर्तिः पूरणं समाप्तिरितियावद्, तपर्तुपूर्त्तिस्तस्यां तथा। **अपि**—पुनः। **मेदसाम्**—मज्जानाम्। **भरात्**—बाहुल्याद्। लक्षणया स्थूलत्वमुपगमनाद्धेतोरिति यावद्। **के**—किमात्मकाः। **स्थूलनराः**—स्थूलाश्च ते नरा मानवाः स्थूलनराः, स्थौल्यगुणयुक्तशरीरधारिण इति यावत्। **व्यथाम्**—पीडाम्। **न**—नहि। **लेभिरे**—प्रापुः। समधिगता इति यावद्। चक्रिसेना यदा वैताढ्ये समागता तदा तत्रत्या प्रजा चलाचलाऽभवत्कष्टञ्चापेति भावः ॥ ३९॥

**दरादरादाऽऽश्रितकन्दरान्तरा, निरन्तरायस्थितया तया नगे।**
**दिनानि हीनानि समान्यऽमान्यमा-विभावरीभिर्बिभरांबभूविरे ॥४०॥**

अन्वयः—*दरादरात्, आश्रितकन्दरान्तरा, निरन्तरायस्थितया, तया, नगे, अमान्यमा-विभावरीभिः, समानि, हीनानि, दिनानि, बिभरांबभूविरे ॥४०॥*

**वृत्तिः—दरादरात्**—दरो भयश्च अदरोऽभयश्च दरादरस्तस्मात्तथा। "भयं भीर्भीतिरातङ्क आशङ्का साध्वसं दरः" २।२१५॥ इत्यभि०। अथवा दराद्-अराद् इतिच्छेदः दराद् भयाद्धेतोः, अराद्-शीघ्राद्। "अथ शीघ्रं त्वरितं लघुक्षिप्रमरं द्रुतम्" इत्यमरः। **आश्रितकन्दरान्तरा**—कन्दरायाः दर्य्या अन्तर्मध्यम् कन्दरान्तः, आश्रितमधिष्ठितं कन्दरान्तर्यया तया तथा। "दरी स्याद् कन्दरः" ४।६९। इत्यभि०चि०। **निरन्तरायस्थितया**—निर्गतोऽन्तरायो विघ्नो यस्मात्तन्निरन्तरायं यथा स्यात्तथा स्थिताऽवस्थिता निरन्तरायस्थिता तया तथा "श्रोणीभारादलसगमना स्तोकनम्रास्तनाभ्याम्" इत्यत्र स्तोकं नम्रा स्तोकनम्रेति क्रियाविशेषणवाचकपदेन समासदर्शनाद्। **तया**—भजया। **नगे**—पर्वते। **अमान्यमाविभावरीभिः**—अमाया अमावस्याया विभावर्य्यो रात्रयः अमाविभावर्य्यः, अमानिन्यो मानरहिताश्च ता अमाविभावर्य्योऽमान्यमाविभावर्य्यस्ताभिस्तथा। **समानि**—तुल्यानि। **हीनानि**—निष्प्रमाणि। **दिनानि**—दिवसाः। **बिभरांबभूविरे**—दधिरे। धृतानीति यावद् ॥४०॥

**स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः, स्वतो गुणं योजयताऽऽशुगानुगम्।**
**जिनेन को-दण्डकरेण सानुगं, नृपं समुद्दिश्य गुणो न योजितः ॥४१॥**

अन्वयः—*स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः, गुणम्, स्वतः, योजयता, दण्डकरेण, जिनेन, आशुगानुगम्, सानुगम्, नृपम्, समुद्दिश्य, कः, गुणः, न, योजितः ॥४१॥*

**वृत्तिः—स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः**—स्वस्य आत्मनः कान्तिः सौन्दर्य्यम्, स्वकान्तिः, तस्याः कीर्तिर्यशः स्वकान्तिकीर्तिः, तस्या व्रजः, समूहः स्वकान्तिकीर्तिव्रजः, स्वसौन्दर्य्यविषयकीर्तिसमूह इत्यर्थः। स एव शुभ्रत्वान्मौक्तिकस्रक् मौक्तिकमाला स्वकान्तिकीर्तिव्रजमौक्तिकस्रक् तस्यास्तथा। **गुणम्**—दोरकम्। **स्वतः**—स्वयमेव। **योजयता**—सम्बन्धयता। **दण्डकरेण**—दण्डः करे यस्य स दण्डकरस्तेन तथा। पाणौ राज्यदण्डं धारयतेत्यर्थः। **जिनेन**—अर्हता, भगवता शान्तिनाथेनेत्यर्थः। **आशुगानुगम्**—आशु शीघ्रं गच्छन्तीत्याशुगा बाणाः,ते अनुगा अनुगमनशीला यस्य स आशुगानुगस्तन्तथा। "आशुगो मारुते बाणे" इति मेदिनी। **सानुगम्**—सानुं पर्वतशृङ्गमनुगच्छतीति सानुगस्तन्तथा। पर्वतशृङ्गस्थमित्यर्थः। यद्वा अनुगच्छन्तीत्यनुगा अनुचराः, सेवका इति यावद् तैः सहितः सानुगस्तन्तथा। अथवा जिनेश्वरकर्तृकगुणकर्मकयोजनक्रियाविशेषणवाचकतया पदमिदमुपस्थेयम्।

समुद्दिश्य–लक्ष्यीकृत्य । कः–किमात्मकः । गुणः–सन्धिविग्रहादिः । न–नहि । योजितः–प्रयोजितः । आयोजित इत्यर्थः । अनुसंहित इति यावत् । अपि तु सर्वोऽपि प्रयोजित इति भावः । अत्र कोदण्डकरेण धनुष्पाणिना जिनेन सानुगं नृपं समुद्दिश्य गुणो ज्या न योजित इत्यप्यन्वयो विधेय इति ॥ ४१ ॥

**खगाद्रिराजं समरेष्वतन्द्रितं, श्रयन्तमन्तर्घटनागुणश्रियम् ।**
**पराक्रमः पञ्चमचक्रिणः क्रमा-न्निवार्य्य चक्रे क्रमसेवनोन्मुखम् ॥४२॥**

अन्वयः—*पञ्चमचक्रिणः, पराक्रमः, समरेषु, अन्तर्घटनागुणश्रियम्, श्रयन्तम्, अतन्द्रितम्, खगाद्रिराजम्, क्रमात्, निवार्य्य, क्रमसेवनोन्मुखम्, चक्रे ॥४२॥*

वृत्तिः—पञ्चमचक्रिणः–पञ्चमश्चासौ चक्री पञ्चमचक्री तस्य तथा । पञ्चमचक्रवर्तिनो भगवतः शान्तिनाथस्येति यावत् । पराक्रमः–विक्रमः, उद्योगः सामर्थ्यमिति यावत् । समरेषु–युद्धेषु । अन्तर्घटनागुणश्रियम्–अन्तः मध्ये घटनागुणः, तस्य श्रीः शोभा, स एव श्रीः सम्पद् वा अन्तर्घटनागुणश्रीस्तान्तथा । श्रयन्तम्–कुर्वन्तम् । अतन्द्रितम्–तन्द्रा आलस्यं निद्रा वा सञ्जाताऽस्येति तन्द्रितः, न तन्द्रितोऽतन्द्रितः, अनलस इत्यर्थः, तन्तथा । खगाद्रिराजम्–खगाद्रेः वैताढ्यस्य राजा प्रभुः खगाद्रिराजस्तन्तथा विद्याधरेश्वरमितियावत् । "राजन् सखेः" ७।३।१०६॥ इत्यनेन अट् प्रत्ययः समासान्तः । क्रमात्–क्रमशः । निवार्य्य–निरुध्य । क्रमसेवनोन्मुखम्–क्रमयोश्चरणयोः सेवनं सेवा क्रमसेवनम् तस्मिन् उन्मुख उत्सुकः क्रमसेवनोन्मुखस्तन्तथा । "चरणः क्रमणः पादः पदोऽङ्घ्रिश्चलनः क्रमः" २।२८०॥ इत्यभि०चि० । चक्रे–कृतवान् इति ॥ ४२ ॥

**विराजिराजन्यजनस्य धोरणे-रणे-रणे दारुणरूपसम्पदः ।**
**कदाचिदस्या युवधैर्य्यलोपिनं, जयं निशम्याजनि राजनिग्रहः ॥४३॥**

अन्वयः—*रणेरणे, विराजिराजन्यजनस्य, धोरणे, दारुणरूपसम्पदः, अस्याः, कदाचित्, युवधैर्य्यलोपिनम्, जयम्, निशम्य, राजनिग्रहः, अजनि ॥४३॥*

वृत्तिः—रणे-रणे–वीप्सायां द्विर्भावात्प्रतियुद्धमित्यर्थः । विराजिराजन्यजनस्य–विरुद्धो राजते शोभते तच्छीले विराजी, "अजातेः शीले" ५।१।१५४॥ इत्यनेन तच्छीले णिन् प्रत्ययः, स चासौ राजन्यजनः क्षत्रियलोकः विराजिराजन्यजनस्तस्य तथा । "क्षत्रं तु क्षत्रियो राजा राजन्यो बाहुसम्भवः" ३।५२७॥ इत्यभि०चि० । धोरणे–नियमे । दारुणरूपसम्पदः–रूपं स्वरूपञ्च सम्पत् सम्पत्तिश्च रूपसम्पदौ, दारुणे रूपसम्पदौ यस्याः सा दारुणरूपत् तस्यास्तथा । अस्याः–भगवच्छान्तिनाथसम्बन्धिन्याः प्रजाया इति शेषः । कदाचित्–जातु । कस्मिंश्चित्समये इति यावत् । युवधैर्य्यलोपिनं–

यूनां तरुणजनानां धैर्य्यं धीरता युवधैर्य्यम् तल्लोपयति दूरीकरोति तच्छीलो युवधैर्य्यलोपी तन्तथा । जयम्-जयशब्दम् । निशम्य-आकर्ण्य श्रुत्वेति यावत् । राजनिग्रहः-राज्ञः खगाद्रिराजस्य निग्रहो दण्डः पराजय इति यावद्राजनिग्रहः । अजनि-जातः । इति लोकैरवगतमितिशेषः ॥ ४३ ॥

**नृपः प्रसन्नो हि धनाय साधनै-स्तदन्यथाऽयं निधनाय बाधनैः ।**
**खगाद्रिराजोऽस्य निदेशदेशने, नलोपिलोकादशृणोद् गुणोत्करम् ॥४४॥**

अन्वयः—*हि, नृपः, साधनैः, धनाय, प्रसन्नः, तदन्यथा, अयम्, बाधनैः, निधनाय, खगाद्रिराजः, निदेशदेशने, नलोपिलोकात्, अस्य, गुणोत्करम्, अशृणोत् ॥४४॥*

**वृत्तिः**—**हि**-निश्चयेन । **नृपः**-नराधिपः । **प्रसन्नः**-प्रीतः । **साधनैः**-साध्यते निष्पाद्यत एभिरिति साधनानि, धनादिप्रयोजकोपकरणानि, तैस्तथा । **धनाय**-वित्ताय भवतीतिशेषः । **तदन्यथा**-तद्विपरीतः । **अयम्**-एषः, नृपश्चक्रीतियावत् । **बाधनैः**-बाधाकरैरुपायैः । **निधनाय**-मरणाय । भवतीतिशेषः । **खगाद्रिराजः**-वैताढ्यपतिर्विद्याधरनृपः । **निदेशदेशने**-निदेश आज्ञा दिश्यतेऽस्मिन्निति निदेशदेशनम् तस्मिँस्तथा । **नलोपिलोकात्**-न लोपयति निदेशं तच्छीलो नलोपी नैकधेत्यादिवन्निषेधार्थकस्य नशब्दस्य विवक्षणाद्दोषाभावः नलोपी प्रत्ययित आप्त इति यावत् चासौ लोको जनो नलोपिलोकस्तस्मात्तथा । **अस्य**-पञ्चमचक्रिणो भगवतः शान्तिनाथस्य । **गुणोत्करम्**-गुणानां त्यागशौर्य्यवीर्य्यादीनामुत्करः समूहो गुणोत्करस्तन्तथा । **अशृणोत्**-अश्रौषीत, श्रुतवानिति यावत् ॥ ४४ ॥

**तमेव लब्ध्वावसरं ततः स्मर-स्वरूपभूपाय खगाचलेश्वरः ।**
**निजाङ्गनापूर्वमपूर्ववस्तुभिः, कृताधिकोपाय-नमन्मुदेऽभवत् ॥४५॥**

अन्वयः—*ततः, खगाचलेश्वरः, तम्, अवसरम्, एव, लब्ध्वा, कृताधिकोपाय, स्मरस्वरूपभूपाय, अपूर्ववस्तुभिः, निजाङ्गनापूर्वम्, नमन्, मुदे, अभवत् ॥४५॥*

**वृत्तिः**—**ततः**-तदनन्तरम् । **खगाचलेश्वरः**-वैताढ्यपर्वतराजः, खगाद्रीश इति यावत् । **तम्**-तत्कालप्राप्तन्तादृशम् । **अवसरम्**-योग्यकालम् । **एव**-अवधारणार्थकमव्ययम् । **लब्ध्वा**-सम्प्राप्य । **कृताधिकोपाय**-कृतः अन्तर्भावितणिगर्थत्वात्कारित इत्यर्थः । अधि-अधिकः कोपः क्रोधो यं स कृताधिकोपस्तस्मै तथा । **स्मरस्वरूपभूपाय**-स्मरस्वरूपः कन्दर्पतुल्यश्चासौ भूपः पृथ्वीपालकः स्मरस्वरूपभूपः भगवान् शान्तिनाथ इत्यर्थः, तस्मै तथा । **अपूर्ववस्तुभिः**-अपूर्वाणि अभूतपूर्वाणि, अत्यन्तममूल्यानीति यावत् तानि वस्तूनि तैस्तथा । **निजाङ्गनापूर्वम्**-स्वीयरमणीसहितं यथास्यात्तथा ।

नमन्–प्रणमन् । मुदे–हर्षाय । अभवत्–समजायत । अत्र "कृताधिकोपायनमन्" इति श्लिष्टम् । तेन पक्षे–अधिकं पर्य्याप्तञ्च तदुपायनमुपहारः अधिकोपायनम् कृतं विहितं च तदधिकोपायनम् कृताधिकोपायनम्, तेन मदयति हृष्यतीति कृताधिकोपायनमन् क्विपि रूपम्, खगाद्रिराज विशेषण-तयाऽवसेयमिति ॥ ४५ ॥

**वरैरमुष्याभरणैर्मणीमयैः, शरीरशोभाजयजातमत्सरः ।**
**तदा परः कोऽपि युयुत्सयाऽपतद्, बलस्य नाशाय ससौप्तिकाशया ॥४६॥**

अन्वयः—*तदा, वरैः, मणीमयैः, अमुष्याभरणैः, शरीरशोभाजयजातमत्सरः, कोऽपि, परः, युयुत्सया, ससौप्तिकाशया, बलस्य, नाशाय, अपतत् ॥४६॥*

वृत्तिः—तदा–तस्मिन्समये । वरैः–सुन्दरैः । श्रेष्ठैरिति यावत् । मणीमयैः–मण्यो मणयः रत्नानीति यावत् प्रचुराणि सन्त्येष्विति मणीमयानि तैस्तथा । अत्र मणीशब्दः स्त्रीलिङ्गो ङ्यन्तोऽव-सेयः, यद् 'गुरुगममणीसङ्कुल' मिति संसारदावास्तुतौ, नैषधीयेऽपि 'नृपनीलमणीगृहत्विषा २।७५। इति । 'इतोऽक्त्यर्थात्' २।४।३२। इतिङीः । अमुष्य–अस्य, भगवतः शान्तिनाथस्येति यावत् । आभरणैः–आभ्रियते शरीरमेभिरित्याभरणानि तैस्तथा, अलङ्करणैरित्यर्थः । शरीरशोभाजयजातमत्सरः–शरीरस्य स्वदेहस्य शोभा सौन्दर्य्यम् कान्तिश्छविरिति यावच्छरीरशोभा तस्या जयः शरीरशोभाजयस्तेन जात उत्पन्नो मत्सरः क्रोधो यस्य स तथा । कोऽपि–कश्चिदनिर्वचनीयः । परः–शत्रुः । युयुत्सया–योद्धुमिच्छया । ससौप्तिकाशया–निशि सुप्तेषु भावं सौप्तिकम्, अभ्यासदनम्–छलादाक्रमणमिति यावत् । अध्यात्मादित्वादिकण् तेन सहिता ससौप्तिका, सा चासावाशा मनोरथः ससौप्तिकाशा तया तथा । "प्रपातस्त्वभ्यवस्कन्दो धाट्यभ्यासादनं च सः । तद्रात्रौ सौप्तिकम्" ३।४६५॥ इत्यभि० चि० । बलस्य–सैन्यस्य । नाशाय–विनाशाय । विध्वंसायेति यावत् । अपतत्–पतितः इति ॥४६॥

**शराशरि व्यक्तगदागदि क्रुधा–ऽऽयुधाऽनुधावद्भटकोटिदारुणः ।**
**अमोघशक्त्या निजयेव मूर्तया, रणोऽभवद् भूरिभयाय भूभुजाम् ॥४७॥**

अन्वयः—*भूभुजाम्, भूरिभयाय, मूर्तया, निजया, अमोघशक्त्या, इव, शराशरि, व्यक्तगदागदि, क्रुधाऽऽयुधाऽनुधावद्भटकोटिदारुणः, रणः अभवत् ॥४७॥*

वृत्तिः—भूभुजाम्–भुवं पृथिवीं भुञ्जन्ति पालयन्तीति भूभुजो राजानस्तेषान्तथा। भूरिभयाय–भूरि अतिशयितञ्च तद् भयं भीतिर्भूरिभयम् तस्मै तथा । राजगणात्यन्तभीतिजननायेत्यर्थः । यद्वा भूभुजाम् रणः भूरिभयाय लोकानामिति शेषः । मूर्तया–शरीरधारिण्या । निजया–स्वकीयया ।

अमोघशक्त्या-अमोघा अप्रतीकारा सफलेति यावत् चासौ शक्तिः अस्त्रम् अमोघशक्तिस्तया तथा। इव-यथा। शराशरि-शरैः शरैः बाणैर्बाणैः प्रहृत्येदं युद्धं प्रवृत्तं शराशरि बाणाबाणि, "तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः" ३।१।२६॥ इत्यनेन अव्ययीभावसमासः। व्यक्तगदागदि-गदाभिर्गदाभिः प्रहृत्येदं युद्धं प्रवृत्तं गदागदि, व्यक्तं स्पष्टञ्च तद् गदागदि व्यक्तगदागदि। क्रुधाऽऽयुधाऽनुधावद्भटकोटिदारुणः-आयुधान् शस्त्राणि आयुधैः शस्त्रैर्वाऽनुधावन्तीति आयुधानुधावन्तस्ते च ते भटा योधाश्च आयुधानुधावद्भटाः, क्रुत्-कोप एव क्रुधा, भागुरिमते व्यञ्जनान्तानामाकारान्तत्वात् वाचा निशा दिशादिवत्। क्रुधया आयुधानुधावद्भटाः क्रुधाऽऽयुधानुधावद्भटाः तेषां कोटिः तदाख्यसङ्ख्या, तया दारुणो भीषणस्तथा। रणः-युद्धम्। अभवत्-अभूत् ॥ ४७ ॥

अनीकिनीनामधिपैरनेकशः, स युद्धयमानोऽपि निरुद्धमानसः।
स्वसेनया कोऽपि विमुक्तमार्गण-स्तया विनिर्जेतुमियेष नैषधम् ॥४८॥

अन्वयः—*अनेकशः, अनीकिनीनाम्, अधिपैः, युध्यमानः, अपि, निरुद्धमानसः, विमुक्तमार्गणः, कोऽपि, सः, तया, स्वसेनया, नैषधम्, विनिर्जेतुम्, इयेष ॥४८॥*

वृत्तिः—अनेकशः-बहुशः, कतिपयश इति यावत्। अनीकिनीनाम्-सेनानाम् 'वाहिनी पृतना सेना बलं सैन्यमनीकिनी' ३।४०९। इत्यभि०। अधिपैः-नायकैः। युध्यमानः-संप्रह्रियमाणः। अपि-सम्भावनायाम्। निरुद्धमानसः-निरुद्धं गृहीतं मानसमन्तःकरणं यस्य स तथा। धृतधैर्य इति यावत्। विमुक्तमार्गणः-विमुक्ताः त्यक्ताः मार्गणा बाणा येन सः विमुक्तमार्गणः। कोऽपि-कश्चिदनिर्वचनीयः। सः-प्रसिद्धः, राजेति शेषः। तया-प्रसिद्धया। स्वसेनया-आत्मीयसैन्येन। नैषधम्-श्रीऋषभदेववंशपरम्परागतं निषधानगरीपतिम्। विनिर्जेतुम्-वि-विशेषेण निर्-निःशेषेण जेतुं पराभवितुमित्यर्थः। इयेष-ऐच्छत्, अभिललाषेति यावत् ॥ ४८ ॥

अकारि येन श्रवणा तिथिर्गुणः, क्षणं परिक्षिप्तसहस्रमार्गणः।
विभिद्य सेनापतिना शरैरुरः, पुरःप्रदोषे स यमातिथीकृतः ॥४९॥

अन्वयः—*येन, गुणः, श्रवणातिथिः, कृतः, क्षणम्, परिक्षिप्तसहस्रमार्गणः, सः, पुरःप्रदोषे, सेनापतिना, शरैः, उरः, विभिद्य, यमातिथीकृतः ॥४९॥*

वृत्तिः—येन-अनिर्वचनीयगुणशालिना यादृशेन वीरेण। गुणः-त्यागशौर्यवीर्यौदार्यादिः, पक्षे मौर्वी च। श्रवणातिथिः-लोकानां कर्णगोचरः, कर्णप्रान्तवर्ती च। कृतः-विहितः। क्षणम्-

अतिशयितसूक्ष्मकालविशेषेणैव । परिक्षिप्तसहस्रमार्गणः-परिक्षिप्ताः शत्रुसैन्योपरि पातिताः दूरीकृताश्च सहस्रं सहस्रसंख्याका मार्गणा बाणा याचकाश्च येन स तथा 'मार्गणस्तु शरेऽर्थिनि' इत्यनेकार्थः। सः-पूर्वोक्तविशेषणविशिष्टतया प्रसिद्धः कश्चन वीरशिरोमणिः । पुरःप्रदोषे-अग्रिमक्षणे, अग्रिमसमये वा । "प्रदोषः समये दोषे" इति मेदिनी । सेनापतिना-अनीकिनीनायकेन । शरैः-बाणैः । उरः-वक्षः । विभिद्य-विशेषेण भित्त्वा, विदार्य्येति यावत् । यमातिथीकृतः-यमस्य कृतान्तस्य यमराजस्येति यावत् । अतिथिः प्राघुणिको यमातिथिः, अयमातिथिर्यमातिथिः कृतः सम्पादितो यमातिथीकृतः ॥४९॥

**मनः प्रसत्त्या विजयः श्रुतौ धृतः, क्षमाभुजा भीमनृपात्मजालयः ।**
**प्रदाय तस्मै गजवाजिराजितां, यथेच्छया देशभुवं पराजिताम् ॥५०॥**

*अन्वयः—क्षमाभुजा, भीमनृपात्मजालयः, विजयः, मनः, प्रसत्त्या, यथेच्छया, गजवाजिराजिताम्, देशभुवम्, तस्मै, प्रदाय, श्रुतौ, धृतः ॥५०॥*

वृत्तिः—क्षमाभुजा-क्षमां पृथिवीं भुनक्ति पालयति इति क्षमाभुक् तेन तथा। पृथिवीपालकेन भगवता शान्तिनाथेन । भीमनृपात्मजालयः-नृपस्य राज्ञ आत्मजः पुत्रो नृपात्मजः, भीमः-भीमनामा चासौ नृपात्मजः भीमनृपात्मजः स आलयो निवासस्थानं यस्य स तथा। विजयः-जयः। मनःप्रसत्त्या-चित्तप्रसन्नतया। यथेच्छया-इच्छानुसारम् यथेप्सितमिति यावत्। गजवाजिराजिताम्-गजा हस्तिनश्च वाजिनोऽश्वाश्च गजवाजिनः तै राजिता शोभिता गजवाजिराजिता तान्तथा । पराजिताम्-रिपुपराजयं विधायाधिगताम् परैः शत्रुभिरजिता पराजिता तान्तथा। देशभुवम्-देशस्य मण्डलस्य भूर्भूमिः, देश एव वा भूर्देशभूस्तान्तथा । तस्मै-भीमनृपात्मजाय। प्रदाय-वितीर्य्य दत्त्वेति यावत् । श्रुतौ-श्रवणे कर्णे इति यावत् । धृतः-अधारि ॥ तदीयविजयश्रवणसमनन्तरमेव तादृश विशेषणविशिष्टां देशात्मकभूमिं प्रादात्तस्मै भगवानिति भावः ॥ ५० ॥

**ततः प्रयाणादवतीर्णकन्दरा-प्रपातदेशस्य नृपस्य तत्परम् ।**
**तदुच्चधैर्य्यव्ययसंहितेषुणा-ऽरिणा रणोऽभूदरिणाऽसृजाऽरुणः ॥५१॥**

*अन्वयः—ततः, प्रयाणात्, अवतीर्णकन्दराप्रपातदेशस्य, नृपस्य, तत्परम्, तदुच्चधैर्य्यव्ययसंहितेषुणा, अरिणा, (सह) अरिणा, असृजा, अरुणः, रणः, अभूत् ॥५१॥*

वृत्तिः—ततः-तदनन्तरम् । प्रयाणात्-प्रस्थानात् । अवतीर्णकन्दराप्रपातदेशस्य-कन्दरा वैताढ्यनगस्था खण्डप्रपाताभिधा दरी तस्या प्रपातोऽतटश्च कन्दराप्रपातः तस्य देशः प्रदेशः स्थानमिति यावत्, कन्दराप्रपातदेशः, अवतीर्णः पूर्वदर्शितरीत्या प्रकाशप्रद्यादिकरणेन पारितः कन्दरा-

प्रपातदेशो येन सोऽवतीर्णकन्दराप्रपातदेशस्तस्य तथा। "प्रपातस्त्वतटो भृगुः" इत्यमरः। नृपस्य-राज्ञः श्रीमतः शान्तिनाथस्य। तत्परम्-तदनन्तरम्। तदुच्चधैर्य्यव्ययसंहितेषुणा-तस्य भगवतः शान्तिनाथस्य उच्चधैर्य्यमतिशयितधीरता तदुच्चधैर्य्यम्, तस्य व्ययाय विनाशाय संहिता सन्धानमानीता इषवो बाणा येन स तदुच्चधैर्य्यव्ययसंहितेषुस्तेन तथा। अरिणा-शत्रुणा। (सह) अरिणा-चक्रेण। "रथाङ्गं रथपादोऽरि चक्रम्" ३।४१९॥ इत्यभि०चि०। असृजा-रुधिरेण, रक्तेनेति यावत्। अरुणः-रक्तः। रक्तमयो रक्तवर्णो वेति यावत्। रणः-युद्धम्। अभूत्-अभवत्॥ ५१॥

**क्रमेण सेनापतिनाऽर्हदाज्ञया, बलेन जिग्ये सुरसिन्धुनिष्कुटम्।**
**वशीकृतस्तत्र वसञ्जनोऽङ्गिना, स्मरेण च स्वात्मशरासनाश्रयः॥५२॥**

अन्वयः—*सेनापतिना, अर्हदाज्ञया, क्रमेण, बलेन, सुरसिन्धुनिष्कुटम्, जिग्ये, च, अङ्गिना, स्मरेण, तत्र, वसन्, स्वात्मशरासनाश्रयः, जनः, वशीकृतः,॥५२॥*

वृत्तिः—सेनापतिना-कटकनायकेन। अर्हदाज्ञया-जिनेश्वरचक्रिश्रीशान्तिनाथानुशासनेन। क्रमेण-क्रमशः। बलेन-सैन्येन, सामर्थ्येन वा, तन्त्रत्वस्वीकारादुभयेन वा। सुरसिन्धुनिष्कुटम्-सुराणां देवानान् सिन्धुर्नदी सुरसिन्धुस्तत्र निष्कुटम्-गृहारामः सुरसिधुनिष्कुटम्, गङ्गातटवर्ति गृहाराम इति यावत्। "निष्कुटस्तु गृहारामः" ४।१७८॥ इत्यभि०चि० निष्कुटशब्दस्य "अर्धर्चादित्वाद्देहो देहम् शरीरः शरीरम् इत्यादिवद्द्विलिङ्गता स्वीकरणीया, यथाश्रुतकोशानुसारात्तस्य पुल्लिङ्गतया कर्मवाच्यानुसारेण प्रथमैकवचने "सुरसिधुनिष्कुटम्" इति प्रयोगोऽनुपपन्नः स्यात्। जिग्ये-जितम्। च-पुनः। अङ्गिना-मूर्तिभृता, शरीरधारिणेति यावत्। स्मरेण-कन्दर्पेण। कुन्दर्पतुल्यसौन्दर्य्यशालिना सेनापतिना तेनेति यावत्। तत्र-तद्देशे। वसन्-निवसन्। स्वात्मशरासनाश्रयः-स्वात्मा निजदेहः शरासनस्य तदीयधनुष आश्रय आधारो यस्य स तथा, पक्षे धनार्पकः शराणां जलानाम् आसनानि शरासनानि तषामाश्रयः शरासनाश्रयः स्वं धनञ्च आत्मा देहश्च स्वात्मानौ ताभ्यां शरासनाश्रयस्तथा। 'स्वः स्याद् पुंस्यात्मनि ज्ञातौ, त्रिष्वात्मीये धनेऽस्त्रियाम्' 'आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि। धृतावपि मनीषायां, शरीरब्रह्मणोरपि' इत्युभयत्र मेदिनी। 'शरं जले, शरः पुनर्दधिसारे, काण्डतेजनयोरपि' इत्यनेकार्थः। जनः-लोकः। वशीकृतः-वशंवदो विहितः॥ ५२॥

**अमुष्य धीरस्य जयाय साहसी, वशीकृतश्चक्रमुचा स चक्रिणा।**
**ततः प्रयाणे गजवाजिराजिभिः, समं समादाय समा विभूतिकाः॥५३॥**
**बलाध्वनि द्वेषिबलं दधद् ध्वनिं, तदा खलु ज्यां विशिखैःसनाथयन्।**
**पुरस्सरीभूय चमूपतिः स्वयं, रुरोध तत्प्राणदबाणसञ्चयैः॥५४॥**

*अन्वयः—धीरस्य, अमुष्य, जयाय, साहसी, सः, चक्रमुचा, चक्रिणा, वशीकृतः, गजवाजिराजिभिः, समम्, समाः, विभूतिकाः, समादाय, ततः, प्रयाणे, बलाध्वनि, ध्वनिम्, दधत्, द्वेषिबलम्, तदा, खलु, विशिखैः, ज्याम्, सनाथयन्, चमूपतिः, पुरस्सरीभूय, तत्प्राणदबाणसञ्चयैः, स्वयं, रुरोध, ॥५३-५४॥*

वृत्तिः—**धीरस्य**–धैर्य्यान्वितस्य,स्वतन्त्रस्य वा 'धीरो धैर्य्यान्विते स्वरे' इति मेदिनी। **अस्य**–सेनापतेः। **जयाय**–विजयाय। **साहसी**–साहसं हठः अविमृश्य कार्य्यकारित्वं हिताहितानपेक्षं कर्म वेति यावत्, अस्येति साहसी। **सः**–प्रसिद्धः आक्रन्ता कश्चिद्वीर इति यावत्। **चक्रमुचा**–चक्रम् अस्त्रविशेषं मुञ्चतीति चक्रमुक् चक्रप्रक्षिप्ता, तेन तथा। **चक्रिणा**–चक्रवर्तिना, सार्वभौमेनेति यावद् भगवता शान्तिनाथेन। **वशीकृतः**–अधीनीकृतः, स्वायत्तीकृत इत्यर्थः, जित इति यावत्। **गजवाजिराजिभिः**–गजा हस्तिनश्च वाजिनोऽश्वाश्च गजवाजिनस्तेषां राजयः श्रेणयः समूहा इति यावद् गजवाजिराजयः ताभिस्तथा। **समम्**–सह। **समाः**–सकलाः। "समग्रं सकलं समम्" ६।६९॥ इत्यभि० चि०। **विभूतिकाः**–विभूतयः सम्पत्तयः एव विभूतिकास्तास्तथा, स्वार्थे कः प्रत्ययः। **समादाय**–सम्यग् गृहीत्वा। **ततः**–तस्माद स्थानात्। **प्रयाणे**–प्रस्थाने। **बलाध्वनि**–बलानां सैन्यानामध्वा मार्गो बलाध्वा तस्मिँस्तथा। **ध्वनिम्**–अव्यक्तशब्दम्। **दधत्**–धारयत्। **द्वेषिबलम्**–शत्रुवर्गम्। **तदा**–तस्मिन् समय एव, सर्वं वाक्यं सावधारणं भवतीति नियमात्। **खलु**–निश्चयेन। **विशिखैः**–बाणैः। **ज्याम्**–मौर्वीम्। **सनाथयन्**–संयोजयन्। **चमूपतिः**–सेनानायकः। **पुरस्सरीभूय**–अपुरस्सरः पुरस्सरो भूत्वा पुरस्सरीभूय, अग्रेसरीभूयेति यावत्। **तत्प्राणदबाणसञ्चयैः**–तेषां बलानां प्राणः असवः तत्प्राणास्तान् द्यन्ति–अवखण्डयन्ति समूलमुन्मूलयन्तीति तत्प्राणदास्ते च ते बाणास्तत्प्राणदबाणास्तेषां सञ्चयास्तत्प्राणदबाणसञ्चयास्तैस्तथा। **स्वयम्**–आत्मना। **रुरोध**–अवरुरोध, निवारयामासेति यावत्। अत्र–चतुर्थपादस्थानापन्नः—"कृपाणपाणिः सह सेनयाऽरुधत्'। इत्यपि पाठो दृश्यते कृपाणं खड्गः पाणौ हस्ते यस्य स कृपाणपाणिश्चमूपतिः सेनया–कटकेन सह समम् अरुधत्–न्यवारयत्" इति तदर्थः परन्त्वेतत् पाठापेक्षया प्रथमः पाठः साधीयान् अन्यथा तस्य द्वेषिबलं सेनया सह अरुधत्" इत्येवं पौनरुक्त्यप्रसङ्गात् ॥ ५३ ॥ ५४ ॥

**पुरः स्फुरन् कोऽपि सुरश्चमूं सृजन्, भयातुरां भैरवफेरवारवैः।**
**निमज्जयामास यशांसि संशये, युयुत्सुरस्या विविधायुधैः क्रुधा ॥५५॥**

*अन्वयः—भैरवफेरवारवैः, भयातुराम्, चमूम्, सृजन्, क्रुधा, विविधायुधैः, युयुत्सुः, पुरः, विलसन्, कोऽपि, सुरः, अस्याः, यशांसि, संशये, निमज्जयामास ॥५५॥*

**वृत्तिः**—**भैरवफेरवारवैः**–फेरवाणां शिवानां शृगालीनामिति यावत्, आरवाः आरावाः शब्दा इति यावत्, फेरवारवाः, भैरवा भयानकाश्च ते फेरवारवा भैरवफेरवारवास्तैस्तथा। "शृगालो जम्बुकः फेरुः फेरण्डः फेरवः शिवः" ४।३५५॥ इत्यभि० चि०।" शब्दे निनानिनद.........आरवाराव-संरावविरावाः" इत्यमरः। **भयातुराम्**–साध्वसजनिकाम्। "भयं भीर्भीतिरातङ्क आशङ्का साध्वसं दरः" २।२१५ इत्यभि० चि०। **चमूम्**–सेनाम्। **सृजन्**–उत्पादयन्। **क्रुधा**–क्रोधेन। **विविधायुधैः**–विविधानि बहुप्रकाराणि च तान्यायुधानि शस्त्राणि विविधायुधानि तैस्तथा करणैः **युयुत्सुः**–युद्धविषयकेच्छावान्। (अतएव) **पुरः**–अग्रतः। "पुरः पुरस्तात् पुरतोऽग्रतः" ६।१६५॥ इत्यभि० चि०। **विलसन्**–विराजमानः सन्तिष्ठमानो वा। **कोऽपि**–कश्चिदनिर्दिष्टनामा। **सुरः**–देवः। **अस्याः**–स्वसेनायाः। भैम्या वा। **यशः**–कीर्तिम्। **संशये**–सन्देहे, विरुद्धकोटिद्वयावगाहिज्ञानं संशयः विजयप्रयोऽयं यशः इमां सेनामन्यदीयसेनां भैमीमन्यां वा प्राप्नुयादिति सन्देह इति यावत्। **निमज्जयामास**–न्यमज्जयत्। यशः सन्देहदोलामधिरोहयामासेति भावः॥ ५५॥

**तदा तदावेशविनाशनाशया, पुरन्दरः सुन्दरधीरुदायुधः।**
**यशांसि तेनेऽस्य जयोदयादनु-स्मरँस्त्रिलोकीविजयार्जितान्यपि॥५६॥**

अन्वयः—*तदा, उदायुधः, सुन्दरधीः, पुरन्दरः, अस्य, अनुस्मरन्, तदावेशविनाशनाशया, जयोदयात्, त्रिलोकीविजयार्जितानि, अपि, यशांसि, तेने॥५६॥*

वृत्तिः—**तदा**–तस्मिन् काले। **उदायुधः**–उद् उत्कृष्टमायुधमस्त्रं यस्य स तथा। **सुन्दरधीः**–शोभनबुद्धिशाली। **पुरन्दरः**–इन्द्रः। **अस्य**–सेनापतेः शान्तिजिनं वा। **अनुस्मरन्**–स्मरणपथमानयन्। "स्मृत्यर्थदयेशः" २।२।११॥ इत्यनेन वैकल्पिककर्मत्वम्। **तदावेशविनाशनाशया**–तस्य पूर्वोक्तविशेषणविशिष्टचमूनिर्माणकर्तुः सुरस्य आवेशः संरम्भः तदावेशः, तस्य विनाशनं विध्वंसनम् तदावेशविनाशनम्, तस्य आशा अभिलाषः तदावेशविनाशनाशा तया तथा। "आवेशाटोपौ संरम्भे" ६।१३५॥ इत्यभि० चि०। **जयोदयात्**–विजयोत्पत्तेः। अस्येति शेषः। **त्रिलोकीविजयार्जितानि**–त्रिलोक्यास्त्रैलोककर्मकविजयस्त्रिलोकीविजयस्तेन अर्जितानि समुपार्जितानि लब्धानीतियावत्। त्रिलोकीविजयार्जितानि। **अपि**–सम्भावनायाम्। **यशांसि**–कीर्तिः। **तेने**–विस्तारयामास॥ ५६॥

**अनेन भैमीं घटयिष्यतस्तथा-ऽभ्यमित्र(त्र्य)भावादनुगां बलस्य च।**
**अभूद् विलम्बः सुरसिन्धुसैकते, कृताष्टमस्यापि जिनस्य चक्रिणः॥५७॥**

अन्वयः—*तथा, अभ्यमित्र(त्र्य)भावात्, च, बलस्य, अनुगाम्, भैमीम्, अनेन, घटियिष्यतः, कृताष्टमस्य, अपि, चक्रिणः, जिनस्य सुरसिन्धुसैकते, विलम्बः, अभूत्, ॥ ५७॥*

वृत्तिः—तथा–तेन प्रकारेण । अभ्यमित्र(त्र्य)भावात्–आभिमुख्येनऽमित्रमलंगामी अभ्यमित्र्यस्तस्य भावोऽभ्यमित्र्यभावस्तस्मात्तथा । "अभ्यमित्रमीयश्च" ७।१।१०४। इत्यनेन यः प्रत्ययः । च–पुनः । बलस्य–सैन्यस्य । अनुगाम्–अनु पश्चाद् गच्छतीत्यनुगा तान्तथा । भैमीम्–भीमदुहितरम् । अनेन–सेनापतिनामुना । घटयिष्यतः–सङ्गमयिष्यतः । कृताष्टमस्य–दिनत्रयव्यापकोपवासात्मक व्रतविशेषोऽष्टमः, (भाषायामट्ठमशब्दतया प्रसिद्धः) कृतो विहितोऽष्टमो येन स कृताष्टमस्तस्य तथा । अपि–सम्भावनायाम् । जिनस्य–अर्हतः । चक्रिणः–चक्रवर्तिणः, भगवतः शान्तिनाथस्येति यावत् । सुरसिन्धुसैकते–सुराणां देवानाम् सिन्धुर्नदी सुरसिन्धुर्मन्दाकिनी, गङ्गेति यावद्, तस्याः सैकतम् सिकता बालुकाः सन्त्यस्मिन्निति सैकतं पुलिनम् सुरसिन्धुसैकतम् तस्मिँस्तथा । पुलिनं तज्जलोज्झितम् सैकतञ्च" ४।१४४। इत्यभि०चि० । विलम्बः–कालाधिकयापनम् । अभूत्–अभवद् ॥५७॥

**प्रसन्नया स्वःसरिता तनुभृता, विधेरवन्ध्येच्छतया व्यलासि तत् ।**
**विमुद्रपद्माननया सविभ्रम-प्रकाशवद्दर्शनयाऽप्ययौद् नृपः ॥५८॥**

*अन्वयः—विधेः, अवन्ध्येच्छतया, प्रसन्नया, तनुभृता, स्वःसरिता, व्यलासि, तत्, अपि, विमुद्रपद्माननया, सविभ्रम-प्रकाशवद्दर्शनया, नृपः, अयौत् ॥५८॥*

वृत्तिः—विधेः–दैवस्य । अवन्ध्येच्छतया–अवंध्या निष्फलत्वाभाववती सफलेति यावद् । इच्छा अभिलाषो यस्य सोऽवन्ध्येच्छस्तस्य भावोऽवन्ध्येच्छता तया तथा, सम्भावितस्यासम्भावितस्य चापि कर्तुं शक्यतयेति यावद् । प्रसन्नया–प्रसादगुणवत्या, स्वच्छया, हृद्ययेति यावद् । तनूभृता– तनूं शरीरं बिभर्ति धारयतीति तनूभृत् तया तथा, मूर्तिमत्येति यावद् । स्वःसरिता–स्वर्गदीर्घिकया, गङ्गयेतियावत् । व्यलासि–विलासितम् । तत्–तथा । अपि–सम्भावनायाम् । विमुद्रपद्माननया– विमुद्रं विरहितमुद्रं पद्मम् कमलमेव आननं वदनं मुखमिति यावद्यस्याः सा विमुद्रपद्मानना तया तथा । सविभ्रमप्रकाशवद्दर्शनया–विभ्रमेण विलासेन सहितः सविभ्रमः स चासौ प्रकाश आलोकः सविभ्रमप्रकाशः तद्वद्दर्शने नयने यस्याः सा सविभ्रमप्रकाशवद्दर्शना तया तथा । "चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् । लोचनं दर्शनं दृक् च" ३।२३९। इत्यभि०चि० । तयेति शेषः । नृपः–राजा । अयौत्–अमिलद् ॥५८॥

**मरालगत्या विलसत्तरङ्गया, न गङ्गया निर्मितचक्रसङ्गया ।**
**अभेदि तत्तादृगनङ्गमार्गणै-र्मनोऽस्य नारीवपुषाऽपि च प्रभोः ॥५९॥**

*अन्वयः—मरालगत्या, विलसत्तरङ्गया, निर्मितचक्रसङ्गया, च, नारीवपुषा, अपि गङ्गया, तादृगनङ्गमार्गणैः, अस्य प्रभोः, तत्, मनः, न, अभेदि ॥५९॥*

**वृत्तिः**—मरालगत्या–मरालस्य हंसस्य गतिरिव गतिर्यस्याः सा मरालगतिस्तया तथा । हंसगत्येति यावत् । "उष्ट्रमुखादयः" ३।१।२३।। इत्यनेन बहुव्रीहिसमासः, पूर्वसमासोत्तरपदीभूतगतिशब्दस्य लोपश्च मरालानां गतिर्यस्यां सा तथा तयेति वा । **विलसत्तरङ्गया**–विलसन्–शोभमानस्तरङ्गो भङ्गो यस्याः सा विलसत्तरङ्गा तया तथा । आविल–सत्तरङ्गयेतिच्छेदस्तथा च–आविला रागेण कलुषा सत्ता सद्भावो यस्य स आविलसत्तः, ईदृशो रङ्गश्चित्ताभिप्रायो यस्याः साऽऽविलसत्तरङ्गा तया तथा, पक्षे–विभिः पक्षिभिर्लसन्तः शोभमानास्तरङ्गा भङ्गा यस्यां सा विलसत्तरङ्गा तया तथा । **निर्मितचक्रसङ्गया**–निर्मितो विरचितश्चक्रेण जलावर्त्तेन कोकेन सङ्ग आसङ्गो यस्याः सा निर्मितचक्रसङ्गा तया तथा । पक्षे चक्रं सैन्यं राष्ट्रं वाऽस्त्यस्येति चक्रः, "अभ्रादिभ्यः" ७।२।४६।। इत्यनेन मत्वर्थे 'अ' प्रत्ययः, तथा च निर्मितश्चक्रेण चक्रिणा सङ्गः सान्निध्यं यस्याः सा निर्मितचक्रसङ्गा तया तथा । "चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः । जलावर्त्ते" इति–मेदिनी । च–पुनः । **नारीवपुषा**–स्त्रीरूपधारिण्या । अपि–सम्भावनायाम् । **गङ्गया**–मन्दाकिन्या । **तादृगनङ्गमार्गणैः**–अनङ्गस्य कन्दर्पस्य मार्गणा बाणा अनङ्गमार्गणाः तादृशस्तद्विधाश्च ते अनङ्गमार्गणा स्तादृगनङ्गमार्गणास्तैस्तथा । **अस्य**–एतस्य । **प्रभोः**–विभोः, भगवतः शान्तिनाथस्येति यावत् । **तत्**–निश्चलतया प्रसिद्धमित्यर्थः । **मनः**–अन्तःकरणम् । **न**–नहि । **अभेदि**–भिन्नम्–विकारमानीतमिति यावत् ।।५९।।

## कृतं मनोभूवशवर्त्ति कान्तया, सरोजकोशस्तनहंसकस्पृशा ।
## बलं तया तत् समभेदि मार्गणै–र्यदस्य पौष्पैरपि धैर्य्यकञ्चुकम् ।।६०।।

**अन्वयः**—*सरोजकोशस्तनहंसकस्पृशा, कान्तया, तया, यत्, पौष्पैः, अपि, मार्गणैः, अस्य, धैर्य्यकञ्चुकम्, समभेदि, तत्, बलम्, मनोभूवशवर्ति, कृतम्, ।।६०।।*

**वृत्तिः**—सरोजकोशस्तनहंसकस्पृशा–सरसि कासारे जातं सरोजम्, कमलम् तस्य कोशौ कुड्मलौ सरोजकोशौ ताविव स्तनौ कुचौ सरोजकोशस्तनौ, तौ हंसकौ राजहंसाविवेति सरोजकोशस्तनहंसकौ तौ स्पृशतीति सरोजकोशस्तनहंसकस्पृक् तया तथा । **कान्तया**–मनोहारिण्या । **तया**–स्त्रीवेशधारिण्या, गङ्गया । **यत्**–यस्माद्धेतोः । "यत्तद्यतस्ततो हेतौ" इत्यमरकोशः । **पौष्पैः**–पुष्पाणां कुसुमानामिमाः पौष्पाः, पुष्पसम्बन्धिनः, तैस्तथा । अपि–सम्भावनायाम् । **मार्गणैः**–बाणैः । कन्दर्पस्येति शेषः । **अस्य**–बलस्य । **धैर्य्यकञ्चुकम्**–धैर्य्यं धीरता कञ्चुकं वारबाण इवेति धैर्य्यकञ्चुकम् । "निचोलकः स्याद् कूर्पासो वारबाणश्च कञ्चुकः" ३।४३१।। इत्यभि०चि० । **समभेदि**–सातिशयं यथा स्यात्तथा भिन्नमित्यर्थः । **तत्**–तस्माद्धेतोः । **बलम्**–सैन्यम् । अखिलमितिशेषः । **मनोभूवशवर्ति**–

मनोभुवः कामस्य वश आयत्तत्वं मनोभूवशस्तत्र वर्तते तच्छीलं मनोभूवशवर्ति, कामाधीनमित्यर्थः। कृतम्–विहितम् ॥६०॥

किमन्यदद्यापि यदस्त्रतापितः, शिवो वशीन्द्रः शिवया वशीकृतः।
स्मरेण लक्षीकरणेऽपि लक्षशो–ऽप्यलक्षधीर्नाप्यत लक्ष्यतां प्रभुः ॥६१॥

अन्वयः—*अन्यत्, किम्, अद्यापि, यदस्त्रतापितः, वशीन्द्रः, शिवः शिवया, वशीकृतः, स्मरेण, लक्षशः, लक्षीकरणे, अपि, अलक्षधीः, प्रभुः, लक्ष्यताम्, न, आप्यत ॥६१॥*

वृत्तिः—अन्यत्–अपरम्। किम्–किमात्मकम्, वस्तु कथनीयमिति शेषः। अद्यापि–अधुनापि। यदस्त्रतापितः–यस्य कामदेवस्य अस्त्रम् आयुधम् यदस्त्रम् सम्मोहनादिबाणपञ्चकम् तेन तापितः सन्तापितः व्याकुलीकृत इति यावत् तथा यदुक्तम् 'सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा। स्तम्भनश्चेतिकामस्य, शराः पञ्च प्रकीर्तिताः'। इति। वशीन्द्रः–वशीषु जितेन्द्रियेषु इन्द्रः श्रेष्ठो वशीन्द्रः। शिवः–शम्भुः। महेश्वर इति यावत्। शिवया–भवान्या सर्वमङ्गलयेति यावत्। "शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला" इत्यमरः। वशीकृतः–स्वाधीनीकृतः। स्मरेण–कन्दर्पेण। लक्षशः–लक्षपदस्य बहुत्वोपलक्षकतया अनेकश इत्यर्थः। लक्ष्यीकरणे–शरव्यीकरणे। लक्ष्यपथानयने इति यावत्। अपि–सम्भावनायाम्। अलक्षधीः–न लक्षं कपटं यत्र सा अलक्षा, तादृशी धीर्बुद्धिर्यस्य स तथा। "कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम्। व्यपदेशो मिषं लक्षं निभं व्याजः" ३।४२॥ इत्यभि०चि०। निष्कपटबुद्धिरित्यर्थः। प्रभुः–विभुः, भगवान् शान्तिनाथ इत्यर्थः। लक्ष्यताम्–शरव्यताम्, लक्ष्यविषयतामिति यावत्। न–नहि। आप्यत–प्राप्यत ॥६१॥

हरिर्यदासीज्जलधीहिताश्रयः, पितामहो वारिजमाश्रयत्यहो।
अनङ्गजं तापमुपेत्य सोऽप्यभू–ज्जिनेश्वरेऽनङ्गज एव साङ्गजे ॥६२॥

अन्वयः—*अहो!, यत्, अनङ्गजम्, तापम्, उपेत्य, हरिः, जलधीहिताश्रयः, आसीत्, पितामहः, वारिजम्, आश्रयति, सः, अपि, साङ्गजे, जिनेश्वरे, अनङ्गजः, एव, अभूत् ॥६२॥*

वृत्तिः—अहो–आश्चर्ये। यत्–यस्मात्। अनङ्गजम्–कामजन्यम् तत्प्रयोज्यं वा। तापम्–सन्तापकम्, कामपीडामिति यावत्। उपेत्य–प्राप्य। हरिः–भगवान् विष्णुः। जलधीहिताश्रयः–जलधौ सागरे ईहितो वाञ्छित आश्रय आधारो येन स तथा। आसीत्–अभवत्। पितामहः–ब्रह्मा, धाता, विधातेति यावत्। ( यः स्वपितामहमपि नितान्तवृद्धमतिपूज्यं शरैः पीडयतीति

सोऽन्यं पीडयतीति किं वाच्यम् ! स्वसिद्धं कमलासनत्वं कामसन्तप्तत्वेनोत्प्रेक्षितम्, प्रतीयमानोत्प्रेक्षालङ्कारः, सम्भावनमथोत्प्रेक्षा प्रकृतस्य परेण यत्" इति काव्यप्रकाशकारो मम्मटः । वारिजम्-कमलम् । आश्रयति-अवलम्बते । सः-तादृशः कामः । अपि-सम्भावनायाम् । साङ्गजे-अङ्गाज्जातोऽङ्गजः पुत्रस्तेन सहितः साङ्गजस्तस्मिँस्तथा । जिनेश्वरे-देवाधिदेवे, भगवति शान्तिनाथे इति यावत् । अनङ्गजः-न अङ्गजः पुत्रो यस्य सोऽनङ्गजः, वन्ध्यः, निष्फल इति यावत् । एव-अवधारणार्थकमव्ययम् । अभूत्-अभवत् ॥६२॥

**सदङ्गसङ्गं कुलशैलशालिनीं, सितां निजाज्ञां दधतं स्वरूपतः ।**
**स्मरं तनुच्छायतया तमात्मनः, परं प्रभुं नाक्रमितुं मनोभवः ॥६३॥**

अन्वयः—*मनोभवः, आत्मनः, तनुच्छायतया, कुलशैलशालिनीम्, सिताम्, निजाज्ञाम्, दधतम्, सदङ्गसङ्गम्, स्वरूपतः, स्मरम्, परम्, तम्, आक्रमितुम्, प्रभुः, न ॥६३॥*

वृत्तिः—मनोभवः-कामः । आत्मनः-स्वस्य । तनुच्छायतया-तन्वी स्वल्पा छाया शोभा यस्य स तनुच्छायःस्तस्य भावस्तनुच्छायता, तया तथा, शान्तिनाथापेक्षयाऽल्पशोभत्वेनेत्यर्थः । कुलशैलशालिनीम्-कुलमन्ववायः, वंश इति यावत्, शैलः पर्वतः इवेति कुलशैलः "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२॥ इत्यनेनोपमितसमासः । तेन शालते शोभते तच्छीला कुलशैलशालिनी, "अजातेः शीले" ५।१।१५४॥ इत्यनेन तच्छीले 'णिन्' प्रत्ययः तान्तथा । सिताम्-अवदाताम्, विशुद्धामिति यावत् । निजाज्ञाम्-स्वीयानुशासनम् । दधतम्-धारयन्तम् । सदङ्गसङ्गम्-सन्ति समीचीनानि च तान्यङ्गान्यवयवाः सदङ्गानि तैस्तेषां वा सङ्ग आसङ्गो यस्य स सदङ्गसङ्गस्तन्तथा । स्वरूपतः-स्वस्य आत्मनो रूपं सौन्दर्यं स्वरूपम् तस्मात्तथा, आकारादितो वा । परम्-श्रेष्ठम् । स्मरम्-कन्दर्पम् । तम्-प्रसिद्धम् । भगवन्तम्-शान्तिनाथमिति यावत् । आक्रमितुम्-पराभवितुम् । प्रभुः-समर्थः न-नहि । अभवदिति शेषः ॥ ६३ ॥

**प्रसाधितेऽस्मिन् भरते महीभुजा, जनोऽपि नानाविषयान् प्रपन्नवान् ।**
**सदारतासक्तरुचिः सरित्तटं, शशाक शङ्के न स लङ्घितुं नरः ॥६४॥**

अन्वयः—*महीभुजा, अस्मिन्, भरते, प्रसाधिते, जनः, अपि, नानाविषयान्, प्रपन्नवान्, सदारतासक्तरुचिः, सः, नरः, सरित्तटम्, लङ्घितुम्, न, शशाक, (इति) शङ्के ॥६४॥*

वृत्तिः—महीभुजा-महीं पृथिवीं भुनक्ति पालयतीति महीभुक् तेन तथा, राज्ञा भगवता शान्तिनाथेनेति यावत् । अस्मिन्-एतस्मिन् । भरते-भरतक्षेत्रे । प्रसाधिते-प्रशासिते संस्कारिते वा ।

जनः–लोकः । अपि–सम्भावनायाम् । नानाविषयान्–विविधदेशान् ? प्रपन्नवान्–समधिगतवान् । सदारतासक्तरुचिः–दारयन्ति दीर्य्यन्ते एभिरिति वा दाराः, पुँल्लिङ्गो बहुवचनान्तश्च, एकवचनान्तोऽपि दृश्यते' यल्लक्ष्यम्–धर्मप्रजासम्पन्ने दारे नान्यं कुर्वीत" इति "न्यायावाया" ५।३।१३४।। इति घञि साधुः तथा च दारैः–पत्न्या दारेण पत्न्या वा सहितः सदारस्तस्य भावः सदारता दारा इत्यर्थः, प्रकृतिजन्यबोधे प्रकारीभूतो भावः" इति सिद्धान्तात् 'तल्' प्रत्ययप्रकृति–सदारशब्दजन्ये दारप्रकारकाश्रयविशेष्यकबोधे दाराणां प्रकारीभूतत्वात् सदारतायां सक्ता आसक्ता वा रुचिरभिलाषो यस्य स सदारतासक्तरुचिः, "पत्नी सहचरी पाणिगृहीती गृहिणी गृहा । दाराः क्षेत्रम्" ३।१७६।। इत्यभि० चि० । यद्वा सदेति पृथक् रतासक्तरुचिरिति च पृथगवसेयमर्थस्तु व्यक्त एव । सः–प्रसिद्धः । नरः–मानवः । सरित्तटम्–सरितो नद्याः तटस्तीरम् सरित्तटस्तन्तथा । लङ्घितुम्–उल्लङ्घयितुम् पारयितुमिति यावत् । न–नहि । शशाक–अशक्नोत् । समर्थोऽभूदिति यावत् । ( इति ) शङ्के–वितर्कयामि ।।६४।।

**उरोभुवा कुम्भयुगेन जृम्भितं, मनोभुवो दुर्गधिया जिघृक्षतः ।**
**चमूपतेः सा रमतोद्भवे निशो–ऽप्यतीरभावेन मतिः सतीरते ।।६५।।**

अन्वयः—*मनोभुवः, दुर्गधिया, उरोभुवा, कुम्भयुगेन, जृम्भितम्, जिघृक्षतः चमूपतेः, सा, मतिः, अपि, निशः, उद्भवे अतीरभावेन सतीरते, अरमत् ।।६५।।*

वृत्तिः—मनोभुवः–कामस्य । दुर्गधिया–कोट्टबुद्धया । उरोभुवा–उरसो वक्षसो भवतीति उरोभूस्तेन तथा । कुम्भयुगेन–कलशायितस्तनद्वयेन । जृम्भितम्–विलसितम । जिघृक्षतः–ग्रहीतुमिच्छतः । चमूपतेः–सेनानायकस्य । नैषधस्येति यावत् । सा–विलक्षणत्वेन प्रसिद्धा । मतिः–बुद्धिः । निशः–निशायाः । रात्रेरिति यावत् । उद्भवे–उद्गमे । अपि–सम्भावनायाम् । अतीरभावेन–अपारतया । सतीरते–सत्या समीचीनया पतिव्रतयेति यावत् रतं सम्भोगः सतीरतम् तस्मिँस्तथा । "रतं सुरतगुह्ययोः" इति मेदिनी । सम्भोगसुरतशब्दौ च पर्य्यायतयाऽतिप्रसिद्धौ । अरमत्–अक्रीडत् ।।६५।।

**क्रमात् प्रयाणेऽस्य पुरस्सराः पुरां, नवोपहारेण वयस्कृतेन किम् ।**
**अधीश्वराः स्वानुगतां गताः स्वयं, प्रसाद्य भेजुः सकलास्तमुद्बलम् ।।६६।।**

अन्वयः—*क्रमात्, प्रयाणे, अस्य, पुराम्, पुरस्सराः, स्वानुगताम्, गताः सकलाः, अधीश्वराः, वयस्कृतेन, नवोपहारेण, तम्, प्रसाद्य, स्वयम्, उद्बलम्, भेजुः, किम् ।।६६।।*

**वृत्तिः**—**क्रमात्**–क्रमशः । **अस्य**–भगवतः शान्तिनाथस्य । **प्रयाणे**–प्रस्थाने । **पुराम्**–नगरीणाम । "पूः स्त्री पुरी, नगर्यौ वा" इत्यमरः । **पुरस्सराः**–पुरोऽग्रतः सरन्ति गच्छन्तीति पुरस्सराः, अग्रगामिनः, अग्रगण्या इति यावत् । **स्वानुगताम्**–स्वस्य आत्मनोऽनुगा अनुचराः स्वानुगास्तेषां भावः स्वानुगता तान्तथा । **गताः**–प्राप्ताः । **सकलाः**–समस्ताः निखिलाः इति यावत् । **अधीश्वराः**–राजानः । **वयस्कृतेन**–वयसा तारुण्येन कृतो विहितो वयस्कृतस्तेन, वयसे–तारुण्याय कृतो–विहितो वयस्कृतः तेन तथा वा । **नवोपहारेण**–नवो नूतनश्चासावुपहारः उपायनम् नवोपहारस्तेन तथा । **तम्**–चक्रवर्तितया प्रसिद्धम्, भगवन्तं शान्तिनाथमिति यावत् । **प्रसाद्य**–सन्तोष्य । **स्वयम्**–आत्मना । **उद्बलम्**–उत्–उत्कृष्टं बलम्–सामर्थ्यमुद्बलम्, तत्तथा । **भेजुः**–सिषेविरे, प्राप्नवन्त इति यावत् । **किम्**–उत्प्रेक्षायाम् ॥६६॥

**जयादहंपूर्विकया स्ववाहिनी, ससाहसोत्साहतयाऽवगाहिनी ।**
**त्रपाः सरिद्दुर्गमपि प्रतीर्य्य सा, स्वतः परावृत्य ददौ स्वदौर्जने ॥६७॥**

**अन्वयः**—*जयात्, अहंपूर्विकया, ससाहसोत्साहतया, अवगाहिनी सा, स्ववाहिनी, सरिद्दुर्गम्, अपि, प्रतीर्य्य, त्रपाः, स्वतः, परावृत्य, स्वदौर्जने, ददौ ॥६७॥*

**वृत्तिः**—**जयात्**–विजयाद्धेतोः । **अहंपूर्विकया**–अहं पूर्वमहं पूर्वमिति सम्भावना, अहंपूर्विका तया तथा । "अहंपूर्विका पुनः ।" "अहंपूर्व महं पूर्वमिति" २।२३२। इत्यभि०चि० । **ससाहसोत्साहतया**–अविमृश्यकार्य्यकारित्वम्, हिताहितानपेक्षं कर्म वा साहसन्तेन सहितः ससाहसः, ससाहसः उत्साहः परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्यश्चित्तवृत्तिविशेषो यस्य स ससाहसोत्साहस्तस्य भावः ससाहसोत्साहता तया तथा । **अवगाहिनी**–अवगाहनशीला, विशिष्टेति यावत् । **सा**–प्रसिद्धा । **स्ववाहिनी**–निजानीकिनी, स्वसैन्यमित्यर्थः । **सरिद्दुर्गम्**–सरिन्नद्येव दुर्गं प्राकारः सरिद्दुर्गन्तत्तथा । **अपि**–सम्भावनायाम् । **प्रतीर्य्य**–तीर्त्वा । **त्रपाः**–लज्जाः । **स्वतः**–आत्मनः सकाशात् । **परावृत्य**–अन्तर्भावितणिगर्थत्वात्परावर्त्येत्यर्थः । **स्वदौर्जने**–दुर्जनानां दुष्टानां शत्रूणामिति यावत् समूहः, दौर्जनम् स्वस्य आत्मनो दौर्जनं स्वदौर्जनम् तस्मिँस्तथा । **ददौ**–दत्तवान् । निहितवतीति यावत् । धातूनामनेकार्थत्वादत्रत्य 'दा' धातोः स्थापनार्थकतया कथञ्चित् सप्तमी सङ्गमनीया, वस्तुतस्तु 'दा' धातुयोगे चतुर्थ्याः क्लृप्ततया, "खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति पातञ्जलमहाभाष्यप्रयोगदर्शनाद्दानाभावेऽपि चतुर्थीदर्शनेन चात्रापि चतुर्थ्येव भवितव्यमिति सुधीभिर्विभावनीयम् ॥६७॥

**स्वदुर्गभङ्गे भवनेऽवनेर्जने, वने विलग्ने जडता हसत्त्रपा ।**
**भयाद् रिपूणां नृपतेः स्फुरन्महो-ऽनलस्य तन्वी हृदयं विवेश यत् ॥६८॥**

*अन्वयः — यत्, स्वदुर्गभङ्गे, अवने, जने, वने, भवने, विलग्ने, भयात्, ह्रसत्त्रपा, रिपूणाम्, तन्वी, जडता, स्फुरन्महोऽनलस्य, नृपतेः, हृदयम्, विवेश ॥६८॥*

वृत्तिः—यत्–यस्माद्धेतोः यत्र वा । स्वदुर्गभङ्गे–स्वदुर्गस्य निजप्राकारस्य भङ्गो विध्वंसः स्वदुर्गभङ्गस्तस्मिंस्तथा । अवने–सप्तम्या निमित्तत्वार्थकतया रक्षणनिमित्तमित्यर्थः । "भवनेऽवनेर्जने" इति पाठे तु पञ्चम्याः प्रयोज्यत्वार्थकतया स्वदुर्गभङ्गे हेतुत्वमनुसन्धेयम् । जने–लोके । वने–कानने । भवने–गृहे । काननात्मकगृहे इति काननस्य गृहत्वेन रूपणाद्रूपकालङ्कारः । विलग्ने–सम्बद्धे । सतीतिशेषः । भयात्–साध्वसात् । ह्रसत्त्रपा–ह्रसन्ती ह्रासमापन्ना त्रपा लज्जा यस्याः सा तथा । रिपूणाम्–शत्रूणाम् । तन्वी–तन्वीव तन्वी कृशा । जडता–जाड्यम्, विरहव्यथाविष्कारमात्रमेव जीवनावस्थानमिति यावत् । स्फुरन्महोऽनलस्य–स्फुरत् विलसत् महस्तेजो यस्य स स्फुरन्महाः, स चासावनलोऽग्निः स्फुरन्महोऽनलः तस्य तथा, देदीप्यमानत्वविशिष्टतेजस्त्ववद्वह्निरूपस्येत्यर्थः । नृपतेः–राज्ञः श्रीमतः शान्तिनाथस्येति यावत् । हृदयम्–अन्तःकरणम् । विवेश–प्रविष्टा ॥ ६८ ॥

**अपह्नुवानस्य जनाय यन्निजाः, प्रजाः क्वचिच्छैलवनादिषु द्विषः ।**
**मृगेक्षणानामभवच्चला दशा, मृगेक्षणानामिव भूमिभृद्भयात् ॥६९॥**

*अन्वयः—यत्, क्वचित्, शैलवनादिषु, निजाः, प्रजाः, जनाय, अपह्नुवानस्य, द्विषः, मृगेक्षणानाम्, भूमिभृद्भयात्, मृगेक्षणानाम्, इव, दशा, चला, अभवत् ॥६९॥*

वृत्तिः—यत्–यस्मात्कारणात् । क्वचित्–कुत्रापि । शैलवनादिषु–शैलाः पर्वताश्च वनानि काननानि च शैलवनानि, तान्यादिः प्रधानं येषु स्थानेषु तानि शैलवनादीनि तेषु तथा । निजाः–स्वीया, आत्मीया इति यावत् । प्रजाः–लोकान्, स्वाश्रितजनानिति यावत् । "लोको जनः प्रजा" ३।१६५॥ इत्यभि० चि० । जनाय–प्रतिपक्षलोकाय । अपह्नुवानस्य–गोपायतः । द्विषः–शत्रोः । मृगेक्षणानाम्–हरिणलोचनानाम्, रमणीनामिति यावत् । भूमिभृद्भयात्–भूमिभृतः पृथिवीपालकात् भयं भीः भूमिभृद्भयम् तस्मात्तथा । मृगेक्षणानाम्–हरिणनयनानाम् । इव–यथा । दशा–अवस्था । "दशावस्थादीपवर्त्त्योः" इति मेदिनी । चला–चञ्चला । अभवत्–अभूत् ॥६९॥

**अजन्यतश्चञ्चलया दधद् रिपो–रधीरतामस्य कृतं मनोभुवा ।**
**अनाधिपत्यं दिशतीममुं स्वतः, स्वतः स तत्याज सराज राजताम् ॥७०॥**

अन्वयः—*अजन्यतः,चञ्चलया, भुवा, अस्य, रिपोः, मनः, अधीरताम्, दधत्, (अ), कृतम्, सः, अनाधिपत्यम्, दिशतीम्, सराजराजताम्, अमुम्, स्वतः, स्वतः, तत्याज ॥७०॥*

वृत्तिः—अजन्यतः-उपद्रवात्, 'उपलिङ्गं त्वरिष्टं स्यादुपसर्ग उपद्रवः। अजन्यमीतिरुत्पातः २।४०॥ इत्यभि० चि०। चञ्चलया-पारिप्लवया। भुवा-पृथिव्या। अस्य-एतस्य, भगवतः शान्तिनाथस्येति यावत्। रिपोः-शत्रोः। मनः-अन्तःकरणम्। अधीरताम्-धैर्याभावम्। दधत्-धारयत्। कृतम्-विहितम्। यद्वा जन्यतः-युद्धात् चञ्चलया भुवा अस्य रिपोः मनः अधीरतां दधत् अ कृतम् न कृतम्, अ अभावार्थकमव्ययम् 'अभावे त्व न नो नहि' ६।१७५। इत्यभि०चि०। सः-प्रतिपक्षः। अनाधिपत्यम्-आधिपत्याभावम्। तत्सम्बन्धिसाम्राज्याभावमिति यावत्। दिशतीम्-प्रतिपादयन्तीम्, अभिदधतीमिति यावत्। सराजराजताम्-राज्ञां राजा राजराजः सार्वभौमस्तस्य भावो राजराजता ऐश्वर्यमिति यावत्। राजराजतया सहितः सराजराजता तान्तथा। अमुम्-इमाम्, भूमिमिति शेषः। स्वतः-आत्मतः। स्वतः-अनायासेन। तत्याज-परिजहार, पर्यत्याक्षीदिति यावत्॥७०॥

**धवे भुवो वा विधवे वधूजने, द्विषां वियोगादसुखं यदुन्मुखम्।**
**अबोधि तज्जागरदुःखसाक्षिणी, तडागभागस्थरथाङ्गपक्षिणी ॥७१॥**

अन्वयः—*द्विषाम्, विधवे, वधूजने, वियोगात्, धवे, भुवः, वियोगाद् वा, यत्, असुखम्, उन्मुखम्, तत्, जागरदुःखसाक्षिणी, तडागभागस्थरथाङ्ग-पक्षिणी, (एव) अबोधि ॥७१॥*

वृत्तिः—द्विषाम्-द्विषन्त्यप्रीतयन्तीति द्विषः शत्रवः तेषान्तथा। विधवे-विगतो धवः प्रियः पतिरिति यावद्यस्य स विधवस्तस्मिंस्तथा। वधूजने-वध्वो रमण्य एव जनो वधूजनो रमणीलोकस्तस्मिँस्तथा। वियोगात्-विप्रयोगात्, विरहात्, विच्छेदादिति यावत् पत्युरिति शेषः। धवे-धवः प्रियोऽस्त्यस्य इति धवस्तस्मिँस्तथा। "अभ्रादिभ्यः" ७।२।४६। इत्यनेन मत्वर्थे 'अ' प्रत्ययः। भुवः-पृथिव्याः, भूपदस्य साम्राज्योपलक्षकत्वात्साम्राज्यस्येति यावत्। (वियोगात्-विच्छेदात् अपहृतत्वादिति यावत्) वा-अथवा। यत्-यादृशम्। असुखम्-नञो विरोधार्थकत्वेन सुखविरुद्धं, दुःखमित्यर्थः। तथा च "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च,नञर्थाः षट् प्रकीर्तिताः" इति भर्तृहरिः। "असुरः" "अधर्म" इत्यादिवत्। उन्मुखम्-समुन्मीलितम्। अभवदितिशेषः। तत्-तादृशम्, दुःखमित्यर्थः। जागरदुःखसाक्षिणी-जागरस्य जागरणायाः जागराद्वा दुःखं कष्टम्, जागरदुःखम्, जागरणा सम्बन्धितत्प्रयोज्यं वेत्यर्थः। तत् साक्षात् ईक्षते तच्छीला जागरदुःखसाक्षिणी, "अजातेः शीले" ५।१।१५४। इत्यनेन तच्छीले "णिन्" प्रत्ययः साक्षाज्जागरदुःखमनुभवित्रीति यावत्। तडागभागस्थ-

रथाङ्गपक्षिणी–तडागस्य कासारस्य भाग एकदेशस्तडागभागस्तत्र तिष्ठतीति तडागभागस्था सा चासौ रथाङ्गपक्षिणी चक्रवाकी तडागभागस्थरथाङ्गपक्षिणी एवेतिशेषः। सर्वं वाक्यं सावधारणं भवतीति नियमाद्वा तडागभागस्थरथाङ्गपक्षिण्येवेत्यर्थः। अबोधि–अजानात्, अवागच्छदितिशेषः॥७१॥

समुच्छलद्वाजिरजोभिरञ्जसा, नभस्तले संतमसाकुलेऽरिपोः।
पुरश्चलच्चक्ररुचा सुहृत्कृता, निशा च शय्या च शशाङ्ककोमला ॥७२॥

*अन्वयः*—*समुच्छलद्वाजिरजोभिः, अञ्जसा, संतमसाकुले, नभस्तले, अरिपोः, निशा, पुरश्चलच्चक्ररुचा, सुहृत्-कृता, रिपोः, पुरः, चक्ररुचा, असुहृत्, निशा, कृता, च, शय्या, शशाङ्ककोमला, च ॥७२॥*

वृत्तिः—समुच्छलद्वाजिरजोभिः–समुच्छलन्ति सम्यगूर्ध्वं गच्छन्ति च तानि वाजिरजांसि अश्वखुरोत्थापितधूलयः समुच्छलद्वाजिरजांसि तैस्तथा। अञ्जसा–तूर्णम्, सत्वरमिति यावत्। सन्तमसाकुले–संततं तमोऽन्धकारम्, सन्तमसम्, "समवान्धात् तमसः" ७।३।८०॥ इत्यनेन 'अत्' प्रत्ययः समासान्तः। सन्तमसेन आकुलं व्याप्तं सन्तमसाकुलम् तस्मिँस्तथा। नभस्तले–आकाशमण्डले। अरिपोः–मित्रस्य। कृते इति शेषः। निशा–रात्रिः। पुरश्चलच्चक्ररुचा–पुरोऽग्रतश्चलद्विलसद्यच्चक्रमस्त्रविशेषः पुरश्चलच्चक्रम् तस्य रुक् कान्तिः पुरश्चलच्चक्ररुक् तया तथा। पुर इति पृथक् पदं वा। "रुक् स्त्री शोभाद्युतीच्छासु" इति मेदिनी। सुहृत्–प्रिया। कृता–विहिता। रिपोः–शत्रोः। पुरः–अग्रतः। चक्ररुचा–अस्त्रविशेषद्युत्या। असुहृत्–प्राणहरी। निशा–रात्रिः। कृता–विहिता, इतिच्छेदाच्छेदाभ्यां द्विविधोऽर्थोऽनुसन्धेयः। च–पुनः। शय्या–आस्तरणम्। शशाङ्ककोमला–शशानां हरिणानाम् अङ्कश्चिह्नं यस्यां सा शशाङ्का सा चासौ कोमला मृदुला शशाङ्ककोमला। अभवदितिशेषः। च–पादपूरणे ॥ ७२ ॥

(पाठान्तरम्)

नृपप्रतापाम्बुजबान्धवोदये, सुहृद्वधूनामिव वर्द्धने श्रियाः।
प्रियाऽभवत्सा-न-सुहृन्मृगीदृशां, निशा च शय्या च शशाङ्ककोमला॥७२॥

*अन्वयः*—*नृपप्रतापाम्बुजबान्धवोदये, श्रियाः, वर्धने, इव, सुहृद्वधूनाम्, सा, निशा, प्रिया, अभवत्, सुहृन्मृगीदृशाम्, निशा, च, शशाङ्ककोमला, शय्या, च, प्रिया, न, अभवत् ॥७२॥*

वृत्तिः—नृपप्रतापाम्बुजबान्धवोदये–अम्बुनि जले जातान्यम्बुजानि कमलानि, तेषां बान्धवः प्रकाशकत्वाद्बन्धुः, प्रिय इति यावत् अम्बुजबान्धवः, प्रतापः प्रभावस्तेज इति यावत् एव अम्बुजबान्धवः सूर्यः प्रतापाम्बुजबान्धवः, नृपस्य चक्रवर्तिनः शान्तिनाथस्य प्रतापाम्बुजबान्धवः नृपप्रतापा-

म्बुजबान्धवः तस्य उदयः प्रकाशः नृपप्रतापाम्बुजबन्धवोदयस्तस्मिँस्तथा। श्रियाः-लक्ष्म्याः, सम्पत्तेः, शोभायाः वा। वर्धने-वृद्धौ। इव-यथा। सुहृद्वधूनाम्-मित्रस्त्रीणाम्। सा-शत्रुसंहारकरत्वेन प्रसिद्धाऽपि। निशा-रात्रिः। प्रिया-हृद्या। भोगादिनेति शेषः। अभवत्-अभूत्, सम्पन्नेति यावत्। यद्वा-असुहृद्वधूनामितिच्छेदः स्तथा च तत्त्वे सति असुहृदवधूनाम्- द्विषत्कामिनीनाम्। श्रियाः-लक्ष्म्याः। वर्धने-वृद्धौ। इव-यथा। सा-प्रसिद्धा। निशा-रात्रिः। प्रिया-हृद्या। अभवत्-रात्रेर्नाशानवसरत्वात्। यद्वा, सुहृद्वधूनाम्-सुष्ठु हरन्तीति सुहृदश्चौराः, तेषां वध्वः कमिन्यः सुहृद्वध्वस्तासान्तथा। चौरस्त्रीणामित्यर्थः अथवा अनसुहृन्मृगीदृशाम् असुमित्रार्थादिहरणहरिणाक्षीणाम्। सा, प्रिया, न, अभवदिति। प्रतापसूर्य्यस्य नित्यत्वात्, रात्रौ चौर्य्याधिकारात्, चौर्य्यप्रवृत्तेरभावात्। सुहृन्मृगीदृशाम्-मित्रसम्बन्धिहरिणलोचनानाम्। निशा-रात्रिः। च-पुनः। शशाङ्ककोमला-शशानां जीवानामङ्कः चिह्नं शशाङ्कस्तेन कोमला हृद्या शशाङ्ककोमला। शय्या-आस्तरणम्। च-पादपूरणे। प्रिया-रुचिरा। न-नहि। अभवत्-सम्पन्ना। प्रतापसूर्य्यस्यास्तप्रापणशङ्कयेव। विरोधाभासालंकारः ॥७२॥

स्मरोपतप्तोऽपि भृशं न स प्रभुः, प्रभोर्निदेशेन विना कदाचन।
चमूपतिर्भीमभुवा कनिष्ठया, वशीकृतस्तां परिणेतुमुच्चधीः ॥७३॥

अन्वयः—*सः, भृशम्, स्मरोपतप्तः, अपि, प्रभोः, निदेशेन, विना, ताम्, परिणेतुम्, न, प्रभुः, कदाचन, कनिष्ठया, भीमभुवा, उच्चधीः, चमूपतिः, वशीकृतः ॥७३॥*

वृत्तिः—सः-चमूपतित्वेन प्रसिद्धो नैषधः। भृशम्-अत्यन्तम्। स्मरोपतप्तः-स्मरेण मदनेन उपतप्तः सन्तप्तः स्मरोपतप्तः कामपीडित इति यावत्। अपि-सम्भावनायामव्ययम्। प्रभोः-ईश्वरस्य विभोर्वा शान्तिनाथस्य। निदेशेन-आदेशेन। आज्ञयेति यावत्। विना-अन्तरेण। ताम्-भीमदुहितरम्। परिणेतुम्-उद्वोढुम्। न-नहि। प्रभुः-समर्थः। अभवदिति शेषः। कदाचन-जातुचित्। कनिष्ठया-यविष्ठया। भीमभुवा-भीमाद् भवतीति भीमभूः भीमकन्या तया तथा। उच्चधीः-विलक्षणबुद्धिः। चमूपतिः-सेनानायकः। नैषध इति यावत्। वशीकृतः-स्नेहरज्वा स्वायत्तीकृतः, ॥७३॥

नृपस्य तद्भावविदो निदेशतो, विदर्भराजं तनयामयाचत।
रसेन सेनापतिरप्युदूढवान्, निगूढभावामपि तां तदन्तरे ॥७४॥

अन्वयः—*(सः) तद्भावविदः, नृपस्य, निदेशतः, विदर्भराजम्, तनयाम्, अयाचत, सेनापतिः, अपि, तदन्तरे, निगूढभावाम्, अपि, ताम्, रसेन, उदूढवान् ॥७४॥*

**वृत्तिः**—**तद्भावविदः**–तस्य नैषधस्य भावोऽभिप्रायस्तद्भावस्तं वेत्ति जानाति इति तद्भाववित्, तदभिप्रायविज्ञातेत्यर्थः, तस्य तथा। **नृपस्य**–राज्ञः, श्रीमतः शान्तिनाथस्य। **निदेशतः**–आदेशात्। **विदर्भराजम्**–विदर्भस्य तदाख्यजनपदस्य राजा राट्, पार्थिव इति यावत्। विदर्भराजस्तन्तथा। षष्ठीतत्पुरुषसमासः, 'अट्' प्रत्ययश्च समासान्तोऽवगन्तव्यः। **तनयाम्**–दुहितरम्, पुत्रीमिति यावत्। **अयाचत**–प्रार्थयत्। याचेर्धातोर्द्विकर्मकत्वाद्धेतोर्विदर्भराजशब्दादपि द्वितीयाविभक्तिः सञ्जातेति बोध्यम्। **सेनापतिः**–अनीकिनीनायकः, नैषध इति यावत्। **अपि**–सम्भावनायाम्। **तदन्तरे**–तयोः कन्यकयोरन्तरम्–मध्यम् तदन्तरम् तस्मिँस्तथा। **निगूढभावाम्**–निगूढोऽनभिव्यक्तो भावोऽभिप्रायः क्रिया, लीला वा यस्याः सा निगूढभावा तान्तथा। **अपि**–सम्भावनायाम्। **ताम्**–कनिष्ठिकाम्, भीमदुहितरमितियावत्। **रसेन**–अनुरागेण। **उदूढवान्**–परिणीतवान्, उपायंस्तेति यावत् ॥ ७४ ॥

## कृपाणतः केचन केऽपि चक्रतः, परेऽपि तन्मार्गणवेधमार्गतः।
## त्यजन्त्यसून् शर्म च मानिनो वरं, भुवि स्म सैन्येऽस्य समीपमागते ॥७५॥

अन्वयः—*अस्य, सैन्ये, समीपम्, आगते, (सति) भुवि, केचन, मानिनः, कृपाणतः, केऽपि, चक्रतः, अपि, परे, तन्मार्गणवेधमार्गतः, असून्, वरम्, शर्म, च, त्यजन्ति* ॥ ७५ ॥

**वृत्तिः**—**अस्य**–सेनापतेः, नैषधस्येति यावत्। **सैन्ये**–कटके सेनायामिति यावत्। **समीपम्**–निकटम्। **आगते**–आयाते (सति)। **भुवि**–पृथिव्याम्। **केचन**–केचित्। **मानिनः**–मानवन्तो, मनस्विन इत्यर्थः। **कृपाणतः**–खड्गात्। **केऽपि**–केचन, मानिनो जना इत्यर्थः। **चक्रतः**–तदाख्यास्त्रविशेषात्। **अपि**–पुनः। **परे**–अन्ये मानिन इति शेषः। **तन्मार्गणवेधमार्गतः**–तस्य सेनापतेः मार्गणा बाणास्तैर्यो वेधो वेधनं तस्य मार्गतोऽन्वेषणतः, सेनानीक्षिप्तशरवेधवर्त्मत इति यावत्। 'मार्गणस्तु शरेऽर्थिनि' इति 'मार्गो मृगमदे मासे, सौम्यर्क्षेऽन्वेषणे पथी'ति चानेकार्थः। **असून्**–प्राणान्। **च**–पुनः। **वरम्**–श्रेष्ठम्। **शर्म**–सौख्यम्, निर्वृतिमिति यावत्। **त्यजन्ति**–विजहति, अन्तर्भावितणिगर्थत्वात्त्याजयन्तीति वाऽनुसन्धेयम् ॥ ७५ ॥

## अयाचितैरेव नयाञ्चितैर्जया-दुपायनैरागमनादुपायनम्।
## कृतः प्रसन्नः स यतो महाशया-स्त्यजन्ति न त्वेकमयाचितव्रतम् ॥७६॥

अन्वयः—*जयात्, अयाचितैः, एव, नयाञ्चितैः, उपायनैः, उपायनम्, आगमनात्, सः, प्रसन्नः, कृतः, यतः, महाशयाः, तु, एकम्, अयाचितव्रतम्, न, त्यजन्ति* ॥ ७६ ॥

वृत्तिः—जयात्–विजयात्। पञ्चम्याहेत्वर्थत्वविवक्षणात् विजयाद्धेतोरित्यर्थः। अयाचितैः–अप्रार्थितैः। एव–विशेषणसङ्गतत्वादन्ययोगव्यवच्छेदात्मकमवधारणमेवकारार्थः, यथा 'राम एवायम्' इत्यत्र विशेषणसङ्गत्वादेवकारः इदन्त्वावच्छिन्ने विशेष्ये रामत्वान्यसम्बन्धं व्यवच्छिन्दन् रामत्वं बोधयति, प्रकृतेऽपि तथैवकार उपायनत्वावच्छिन्ने विशेष्ये अयाचितत्वान्ययाचितत्वसम्बन्धं व्यवच्छिन्दन् याचितत्वसम्बन्धं बोधयतीत्यगन्तव्यम्। नयाश्रितैः–नीतिसंवलितैः। उपायनैः–उपहारैः। उपायनम्–अयनस्य मार्गस्य समीपमुपायनम्, सामीप्यार्थे उपाव्ययेनाव्ययीभावः समासः। आगमनात्–आगमनं स्वीकृत्य। "गम्ययपः कर्माऽऽधारे" २।२।७४॥ इत्यनेन 'पञ्चमी'। सः–सेनापतित्वेन प्रसिद्धो नैषधः। प्रसन्नः–हृष्टः, सन्तुष्ट इति यावत्। कृतः–विहितः। यतः–यस्मात्। महाशयाः–महान् विशाल आशयोऽभिप्रायो येषान्ते महाशयाः। तु–किन्तु। एकम्–केवलम्। अयाचितव्रतम्–अयाचननियमम्। न–नहि। त्यजन्ति–विजहति॥ ७६॥

**मृषा विषादाभिनयादयं क्वचिद्, नृपाय नूनं नमते स्वतेजसा।**
**तदीयदुर्नीतिनिवारणेच्छया, रणेच्छया स्वक्रुधमप्युपादिशत्॥७७॥**

अन्वयः—*अयम्, क्वचित्, मृषा, विषादाभिनयात्, स्वतेजसा, नमते, नृपाय, तदीयदुर्नीतिनिवारणेच्छया, रणेच्छया, नूनम्, स्वक्रुधम्, अपि, उपादिशत्॥ ७७॥*

वृत्तिः—अयम्–असौ, सेनापतिः। क्वचित्–कुत्रापि। मृषा–मिथ्या। विषादाभिनयात्–इष्टासिद्धिराजगुर्वाद्यपराधादिजन्योऽनुतापो विषादस्तस्य अभिनयः परत्रख्यापनम् विषादाभिनयस्तस्मात् तथा। मृषाविषादाभिनयादित्येकं वा पदं समस्तमनुसन्धेयम्। स्वतेजसा–निजप्रतापेन। नमते–प्रह्वीभवते। नृपाय–राज्ञे। तदीयदुर्नीतिनिवारणेच्छया–दुष्टा नीतिर्नयो दुर्नीतिः तस्य नृपस्येयं तदीया सा चासौ दुर्नीतिस्तदीयदुर्नीतिस्तस्या निवारणं दूरीकरणम्, तदीयदुर्नीतिनिवारणन्तस्येच्छा तदीयदुर्नीतिनिवारणेच्छा तया तथा। रणेच्छया–युद्धाभिलाषेण। नूनम्–निश्चयेन। स्वक्रुधम्–निजकोपम्। अपि–सम्भावनायाम् अव्ययम्। उपादिशत्–धातूनामनेकार्थत्वाददर्शयत्॥ ७७॥

**यदा प्रयाणान्तरितापि भीमजा, जुगोप निःश्वासततिं वियोगजाम्।**
**मिषेण केनाऽप्यवगम्य तज्जनाद्, निनाय तां क्वाप्यवलम्ब्य सन्निधिम्॥७८॥**

अन्वयः—*यदा, भीमजा, प्रयाणान्तरिता, अपि, केनापि, मिषेण, वियोगजाम्, निःश्वासततिम्, जुगोप, जनात्, तत्, अवगम्य, क्वापि, सन्निधिम्, अवलम्ब्य, ताम्, निनाय॥ ७८॥*

**वृत्तिः**—यदा–यस्मिन् समये । **भीमजा**–भीमनरेन्द्रनन्दिनी । **प्रयाणान्तरिता**–प्रयाणे प्रस्थाने, अन्तरिता व्यवहिता प्रयाणान्तरिता । **अपि**–सम्भावनायाम् । **केनापि**–केनचिदनिर्वचनीयेन । **मिषेण**–व्याजेन । **वियोगजाम्**–विप्रलम्भजनिताम् । **निःश्वासततिम्**–निश्वसितविस्तारम् । **जगोप**–गोपयाञ्चकार । **जनात्**–लोकात् । **अवगम्य**–विज्ञाय । **क्वापि**–कुत्रचित् । **सन्निधिम्**–सन्निधानम्, सान्निध्यम्, सामीप्यमिति यावत् । **अवलम्ब्य**–समवस्थाप्य । **ताम्**–भीमजाम् । **निनाय**–प्रापयामास ॥ ७८ ॥

## नवाप्यथासन् निधयः स्त्रियोऽनुगा, भुवा निगूढा अपि साधनात् प्रभोः ।
## विलेपनस्याधिकचन्द्रभागता–र्पणात्सितास्या इव मुद्रयान्तिके ॥७९॥

**अन्वयः**—*अथ, भुवा, निगूढाः, अपि, अधिकचन्द्रभागतार्पणात्, साधनात्, विलेपनस्य, मुद्रया, सितास्याः, अनुगाः, स्त्रियः, इव, नवापि, निधयः, प्रभोः, अन्तिके, आसन्,* ॥ ७९ ॥

**वृत्तिः**—**अथ**–वैताढ्यनगदक्षिणभागागमनानन्तरम् । **भुवा**–भूतलेन । **निगूढाः**–संगुप्ताः, महीमध्यमध्यासिताः इति यावत् । **अपि**–तथापि । **अधिकचन्द्रभागतार्पणात्**–चन्द्रस्य कर्पूरस्य भागोऽंशश्चन्द्रभागः, अधिकश्चन्द्रभागः अधिकचन्द्रभागः, तस्य भावोऽधिकचन्द्रभागता तस्या अर्पणात् । 'चन्द्रोऽम्बुकाम्ययोः, स्वर्णे सुधांशौ कर्पूरे, काम्पिल्ये मेचकेऽपि चे'त्यनेकार्थः । **साधनात्**–क्रियासाधकप्रयोगतः । **विलेपनस्य**–अनुलेपनद्रव्यस्य । **मुद्रया**–अङ्गुल्यादिसन्निवेशविशेषेण । **सितास्याः**–उज्ज्वलाननाः, बद्धमुखा वा । **अनुगाः**–अनुसरणशीलाः । **स्त्रियः**–नार्यः । **इव**–यथा । **नवापि**–नवसङ्ख्याका अपि । **निधयः**–निधानानि । **प्रभोः**–चक्रिणः श्रीशान्तिनाथस्वामिनः । **अन्तिके**–निकटे । **आसन्**–अभूवन् । अयं भावः–चक्रवर्ती यदा विजित्य वैताढ्योत्तरस्थान् म्लेच्छान् समागच्छति दक्षिणदेशं तदा तत्र गङ्गां साधयति, वशयति च नवापि निधीन्, 'नैसर्पः पाण्डुकश्चाथ, पिङ्गलः सर्वरत्नकः । महापद्मः कालमहाकालौ माणवशङ्खकौ ॥१॥ तेषामेवाभिधानैस्तु, तदधिष्ठायकाः सुराः । पल्योपमायुषो नागकुमारास्तन्निवासिनः ॥ २ ॥ द्वादशयोजनायामा नवयोजनविस्तृताः । मञ्जूषाकृतयः प्रादुर्बभूवुर्निधयो नव ॥ ३ ॥' इत्युक्तस्वरूपा नवनिधयो गङ्गातटे भुवोऽन्तरे सन्ति, प्रत्येकमस्य सहस्रं सुरा अधिष्ठायकाः, एते चानुगच्छन्ति चक्रिणमिति ॥ ७९ ॥

## क्वचिच्च दानावसरे विमुद्रणाद्, बिभेद शङ्खस्य निधेः स धैर्यकम् ।
## मुखे तथा भीमभुवोऽधिचन्द्रता–विभावनाच्चापललापपाण्डुताम् ॥८०॥

**अन्वयः**—*च, सः, क्वचित्, दानावसरे, विमुद्रणात्, शंखस्य, निधेः, धैर्यकम्, बिभेद, तथा, अधिचन्द्रताविभावनात् भीमभुवः, मुखे, पाण्डुताम्, अपललाप, च* ॥ ८० ॥

वृत्तिः—च-पुनः । सः-सेनापतित्वेन प्रसिद्धो नैषधः । क्वचित्-कुत्रापि । दानावसरे-दीनजनोद्देश्यकधनदानोचितकाले । विमुद्रणात्-विगतं मुद्रणं विमुद्रणम् तस्मात्तथा, मुद्रणत्यागादिति यावत्, मुद्रणापनयनादिति हृदयम् । शङ्खस्य-तदाख्यस्य । निधेः-निधानस्य । धैर्य्यकम्-धृतिम् धीरतामिति यावत् । धैर्य्यकमित्यत्र धीरतावाचकधैर्य्यशब्दात् स्वार्थे 'क' प्रत्ययो बोध्यः । बिभेद-अभिनत्, विदारयामासेत्यर्थः, दूरीचकारेति तु भावः । तथा-किञ्च । भीमभुवः-भीमनन्दिन्याः । मुखे-आनने । अधिचन्द्रताविभावनात्-अधि अधिकश्चन्द्रः स्वर्णम् अधिकचन्द्रस्तस्य भावोऽधिचन्द्रता तस्या विभावनम्-प्रकाशनम् अधिचन्द्रताविभावनम् तस्मात्तथा । अधिकस्वर्णभूषणादिप्रकटनादित्यर्थः स्वर्णं……तपनीयचामीकरचन्द्रभर्मे-' ४-११० इत्यभि० चि० । पाण्डुताम्-पाण्डुनामकनिधेर्भावम् । अपललाप-अपालपत् । चिक्षेपेतियावत् ॥ ८० ॥

**शशाक निह्नोतुमये न तत्प्रिया, प्रियाशयं साम यदा स चाश्रयन् !**
**तदीयकोपस्य जिहीर्षुचेतसा, तदा चकारानुनयं नयं विदन् ॥८१॥**

*अन्वयः—अये, यदा, तत्प्रिया, प्रियाशयम् , निह्नोतुम् , न, शशाक, तदा, साम, आश्रयन्, च, नयम् , विदन् , सः, तदीयकोपस्य, जिहीर्षुचेतसा, अनुनयम्, चकार ॥ ८१ ॥*

वृत्तिः—अये !-कष्टम् । "अये क्रोधे विषादे च" इति विश्वः । यदा-यस्मिन् समये । तत्प्रिया-नैषधप्रेयसी । प्रियाशयम्-प्रियो हृद्यः अभीष्ट इति यावदाशयोऽभिप्रायः प्रियाशयस्तन्तथा, प्रियस्य वल्लभस्य आशयो वा प्रियाशयस्तन्तथा । निह्नोतुम्-अपलपितुम् । न-नहि । शशाक-अशकत्, समर्था नाभूदिति यावत् । तदा-तस्मिन् समये । साम-सामाख्यमुपायविशेषम् । "साम क्लीबमुपायस्य भेदे वेदान्तरेऽपि च" इति मेदिनी । आश्रयन्-समवलम्बमानः । च-पुनः । नयम्-नीतिम् । विदन्-जानन्, अवगच्छन्निति यावत् । सः-सेनानायकत्वेन प्रसिद्धो नैषधः । तदीयकोपस्य-तस्या अयम् तदीयः स चासौ कोपः क्रोधस्तदीयकोपस्तस्य तथा । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावनियमात् । जिहीर्षुचेतसा-जिहीर्षु हरणेच्छु चादश्चेतोऽन्तःकरणम्, मन इति यावत्, जिहीर्षुचेतस्तेन तथा । अनुनयम्-अनुनयनमनुनयस्तन्तथा । प्रणिपातमित्यर्थः । "प्रणतिः प्रणिपातोऽनुनये" ६।१३९। इत्यभि० चि० । चकार-कृतवान् ॥ ८१ ॥

**पुरस्थितां तामनुनीय साशय-मयं बभाषे यदलीकवीक्षिताम् ।**
**क्षितीश्वरः किं क्षितिमीक्षसेऽधुना, मयि प्रिये विप्रियमादधासि किम् ॥८२॥**

अन्वयः—*अलीकवीक्षिताम्, पुरस्थिताम्, ताम्, अनुनीय, अयम्, क्षितीश्वरः, साशयम्, बभाषे, यत्, अधुना, क्षितिम्, किम्, ईक्षसे, मयि, प्रिये, विप्रियम्, किम्, आदधासि ?, ॥ ८२ ॥*

वृत्तिः—अलीकवीक्षिताम्-अलीकं मृषा वीक्षितं वीक्षणमवलोकनमस्याः सा तां तथा, पदार्थान्तरदर्शनव्याजेन प्रियाननदर्शनकर्त्रीमिति भावः। पुरस्थिताम्-समीपवर्तिनीम्। ताम्-भीमदुहितरम्। अनुनीय-स्वानुकूलां विधाय, प्रणिपाताद्युपायेन मानमुक्तां कृत्वेतियावत्। अयम्-असौ। क्षितीश्वरः-राजा। साशयम्-साभिप्रायम्। बभाषे-ऊचे। यत्-यतः। अधुना-साम्प्रतमपि, मयाऽनुनयं विहितेऽपीतियावत्। क्षितिम्-पृथ्वीम्, अधोमुखमितिभावः। क्षयं क्षतिं वा। किम्-कथम्। ईक्षसे-विलोकसे। मयि-मल्लक्षणे। प्रिये-भर्तरि। विप्रियम्-अपराधम्, 'कृतवानसि विप्रियं न मे' इति कुमारः। किम्-किमर्थम्। आदधासि-आरोपयसि ॥ ८२ ॥

**ततः प्रियामित्यनुनीय सत्त्वतः, समाधिमाधाय निजात्मनात्मनि ।**
**समाजं एवालपितासु वैणिकैः, प्रणीतवीणासु रराज राजभिः ॥८३॥**

अन्वयः—*ततः, इति, सत्त्वतः, प्रियाम्, अनुनीय, निजात्मना, आत्मनि, समाधिम्, आधाय, वैणिकैः, प्रणीतवीणासु, आलपितासु, समाजे, एव, राजभिः, रराज ॥ ८३ ॥*

वृत्तिः—ततः-तदनन्तरम्। इति-एवं प्रकारेण। सत्त्वतः-सात्त्विकगुणयोगादित्यर्थः, सात्त्विक-भावेनेतियावत्। प्रियाम्-वल्लभाम्। अनुनीय-मधुरवचनादिभिः प्रणिपातादिभिर्वा सान्त्वयित्वा। निजात्मना-स्वप्रयत्नेन। "आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि" इति मेदिनी। समाधिम्-सम्यगाधीयते समाधिः, समाधानमितियावत्। आधाय-संस्थाप्य। धारयित्वेति यावत्। वैणिकैः-वीणावादनकुशलैः। प्रणीतवीणासु-प्रणीताश्च ता वीणाः प्रणीतवीणास्तासु तथा। आलपितासु-पुनः पुनर्गीतासु। सतीष्वीति शेषः। समाजे-सभायाम्। एव-अवधारणार्थकमव्ययम्। राजभिः-नृपतिभिः। सहेति शेषः। रराज-दिदीपे, शुशुभे इति यावत्॥ ८३ ॥

**सधर्मधीः कर्म सशर्मनर्मणे, प्रवर्तयन् सद्व्यवहारधारणः ।**
**न वीतरागः स विनिश्चयात्पुन-र्मुमूर्च्छ यत्पञ्चममूर्च्छनास्वपि ॥८४॥**

अन्वयः—*सशर्मनर्मणे, कर्म, प्रवर्तयन्, सधर्मधीः, सद्व्यवहारधारणः, सः, विनिश्चयात्, वीतरागः, यत्, पञ्चममूर्च्छनासु अपि, पुनः, न, मुमूर्च्छ ॥ ८४ ॥*

वृत्तिः—सशर्मनर्मणे–शर्मणा सौख्येन सहितम् सशर्म, तच्च तन्नर्म क्रीडा च सशर्मनर्म तस्मै तथा। "केलिर्द्रवः परीहासः क्रीडा लीला च नर्म च" ३।२१९। इत्यभि० चि०। कर्म–क्रियाम्। आचारमिति यावत्। प्रवर्तयन्–सञ्चोदयन्। सधर्मधीः–धर्मेण पुण्येन सुकृतेनेति यावत्। सहिता–सधर्मा, सा धीर्बुद्धिर्यस्य स तथा। सद्व्यवहारधारणः–सन् समीचीनो व्यवहारः आचारः सद्व्यवहारस्तस्य धारणः धर्ता सद्व्यवहारधारणः, सदाचारानुष्ठातेति यावत्। सः–प्रसिद्धो भगवान् शान्तिनाथः। विनिश्चयात्–वि-विशिष्टोऽलौकिकचमत्कारशाली निश्चयो निश्चयनयः,विनिश्चयस्तस्मात्तथा। वीतरागः–वीतो विशेषेण इतो गतो रागः, अनुरागो मात्सर्य्यञ्च यस्मात् स वीतरागः। यत्–यस्माद्धेतोः। पञ्चममूर्च्छनासु–पञ्चमस्य पञ्चमरागस्य मूर्च्छनाः निषादादिसप्तस्वरसम्बन्ध्यारोहावरोवरोहक्रमाः पञ्चममूर्च्छनास्तासु तथा। अपि–सम्भावनायाम्। पुनः–निश्चयेन। अव्ययानामनेकार्थत्वात्। न–नहि। मुमूर्च्छ–अमुह्यत् ॥ ८४ ॥

**अवाप सापत्रपतां स भूपति-र्गुरुत्वमन्यत्र नयाय शिक्षयन् ।**
**प्रशस्यमुद्दिश्य दयादमक्रमं, पुरः पुरश्चात्मविबोधनक्षमम् ॥८५॥**

अन्वयः—सः, भूपतिः, अन्यत्र, नयाय, पुरः, पुरः, आत्मविबोधनक्षमम्, प्रशस्यम्, दयादमक्रमम्, उद्दिश्य, सापत्रपताम्, शिक्षयन्, गुरुत्वम्, अवाप ॥ ८५ ॥

वृत्तिः—सः–प्रसिद्धः। भूपतिः–पृथिवीनायकः। भगवाञ्छान्तिनाथ इति यावत्। अन्यत्र–लोके। नयाय–नीत्यै। पुरःपुरः–अग्रतोऽग्रतः। "पुरः पुरस्तात् पुरतोऽग्रतः" ६।१६५। इत्यभि० चि०। आत्मविबोधनक्षमम्–परमात्मतत्त्वावबोधनसमर्थम्। प्रशस्यम्–प्रशंसनीयम्। दयादमक्रमम्–निरुपाधिपरदुःखापहरणेच्छा दया, दमश्च दयादमौ अभ्यर्हितत्वाद्दयाशब्दस्य पूर्वनिपातः, तयोः क्रमः परिपाटी दयादमक्रमस्तन्तथा। उद्दिश्य–लक्ष्यीकृत्य। सापत्रपताम्–अन्यतो लज्जाऽपत्रपा, तया सह-वर्तमानः सापत्रपस्तस्य भावः सापत्रपता तान्तथा। "लज्जा साऽपत्रपाऽन्यतः" इत्यमरः। शिक्षयन्–बोधयन्। गुरुत्वम्–गौरवम्। अवाप–प्राप्तवान्, समधिजगामेति यावत् ॥ ८५ ॥

**दधार यो वा चरणेऽतिकौशलं, जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।**
**दधारयोवा चरणेऽतिकौशलं, स मार्गणीये विषयं श्रयन् स्वयम् ॥८६॥**

अन्वयः—यः, वा, जितेन्द्रियाणाम्, धुरि, कीर्तितस्थितिः, चरणे, अतिकौशलम्, दधार, सः, स्वयम्, अतिकौशलम्, विषयम्, श्रयन्, मार्गणीये, रणे, दधारया, उवाच ॥ ८६ ॥

**वृत्तिः**—यः–यादृशो भगवान् शान्तिनाथः । वा–वितर्के पादपूरणे वा । "वा स्याद् विकल्पोपमयोर्वितर्के पादपूरणे" इति मेदिनी । **जितेन्द्रियाणाम्**–जितानि वशीकृतानीन्द्रियाणि हृषीकाणि यैस्ते जितेन्द्रियास्तेषान्तथा । वशिनामित्यर्थः । **धुरि**–अग्रे । **कीर्तितस्थितिः**–कीर्तिता स्तुता स्थितिर्मर्य्यादा यस्य तथा । "स्थितिः स्त्रियामवस्थाने मर्य्यादायाञ्च सीमनि" इति मेदिनी । **चरणे**–चारित्रे, "चरित्रं चरिताचारौ चारित्रचरणे अपि" ३।५०७। इत्यभि० चि० । **अतिकौशलम्**–कुशलस्य निपुणस्य भावः कौशलम् । अति–अत्यन्तम् च तत् कौशलम् अतिकौशलम् विलक्षणप्रावीण्यमिति यावत् । **दधार**–धारयामास । **सः**–प्रसिद्धः, भगवाञ्छान्तिनाथः । **स्वयम्**–आत्मना "स्वयमात्मना" इत्यमरः । **अतिकौशलम्**–कौशलमयोध्यामतिक्रान्तोऽतिकौशलस्तन्तथा । **विषयम्**–देशम् । **श्रयन्**–भजन्, आश्रयन्निति यावत् । **मार्गणीये**–याचकसम्बन्धिनि । **रणे**–शब्दे । **श्रुते**–इतिशेषः । **दधारया**–दं दानम्, तस्य धारा निरवच्छिन्नप्रणाली दधारा तया तथा दस्य दानार्थकता 'ददद' इत्यादिवेदवचनतो व्यक्तैव **उवाच**–उक्तवान् । यमकालंकारः ॥ ८६ ॥

**पुरःप्रयाणे न्यरुधद् न कोऽप्यमुं, यियासुमग्रे खलु हस्तिनापुरम् ।**
**असंवरेऽसंवरवैरिविक्रमे, विना श्रमं भङ्गमुपेयुषि क्रमात् ॥८७॥**

**अन्वयः**—*श्रमम्, विना, क्रमात्, असंवरवैरिविक्रमे, भङ्गम्, उपेयुषि, ( सति ) पुरः, असंवरे, प्रयाणे, हस्तिनापुरम्, ( प्रति ) खलु, अग्रे, यियासुम्, अमुम्, कोऽपि, न, न्यरुधत् ॥८७॥*

**वृत्तिः**—**श्रमम्**–प्रयासम् । **विना**–अन्तरेण । **क्रमात्**–क्रमशः । **असंवरवैरिविक्रमे**–वैरिणां शत्रूणाम् विक्रमः पराक्रमः वैरिविक्रमः असंवरोऽप्रतिहतः प्रबल इति यावच्चासौ वैरिविक्रमः असंवरवैरिविक्रमस्तस्मिँस्तथा । **भङ्गम्**–विनाशम् । **उपेयुषि**–प्राप्तवति । सतीतिशेषः । **पुरः**–नगरात् । "पूः स्त्री पुरीनगर्य्यौ वा" इत्यमरः । **असंवरे**–अप्रतिहते सुनिश्चिते इति यावत् । **प्रयाणे**–प्रस्थाने । **हस्तिनापुरम्**–भारतराजधानीत्वेन स्वनामप्रसिद्धनगरम् । ( प्रतिलक्ष्यी कृत्य ) । **खलु**–निश्चयेन । **अग्रे**–पुरतः । **यियासुम्**–यातुकामम् । **अमुम्**–भगवन्तम्, शान्तिनाथमिति यावत् । **कोऽपि**–कश्चिदपि शत्रुमित्रोदासीन इति यावत् । **न**–नहि । **न्यरुधत्**–न्यवारयत् । 'विना श्रमं नश्यति तस्य तेजसे' तिपाठोऽपि तुर्यपादस्थाने दृश्यते प्रतिविशेषे सोऽपि स्पष्ट एव ॥ ८७ ॥

**असाधयत् साधनमप्यबाधया, स भारतं प्राप्य जयादनारतम् ।**
**प्रतापभानावुदयाद्रिसानुनि, क्रमेण तत्र स्फुटतामुपेयुषि ॥८८॥**

अन्वयः—*अनारतम्, जयात्, तत्र, उदयाद्रिसानुनि, प्रतापभानौ, क्रमेण, स्फुटताम्, उपेयुषि, सति, सः, भारतम्, प्राप्य, अबाधया, साधनम्, अपि, असाधयत् ॥ ८८ ॥*

वृत्तिः—अनारतम्-नित्यम्, सन्ततमिति यावत् । जयात्-विजयात् । तत्र-तस्मिन् । उदयाद्रिसानुनि-अभ्युदयाचलप्रस्थे । "सानुरस्त्री वने प्रस्थे" इति मेदिनी । प्रतापभानौ-प्रतापः प्रभावस्तेज इति यावदेव भानुः सूर्यः, प्रतापो भानुरिवेति वा प्रतापभानुस्तस्मिँस्तथा । आद्ये मयूर-व्यंसकादित्वाद् द्वितीये च "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२॥ इत्यनेन समासः, रूपकोपमयोः संसृष्टिः "सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः" इति काव्यप्रकाशकारो मम्मटः । क्रमेण-क्रमशः स्फुटताम्-अभिव्यक्तताम् । उपेयुषि-प्राप्तवति । सतीति शेषः । सः-जिनेषु पञ्चमचक्रवर्तितया प्रसिद्धो भगवान् शान्तिनाथः । भारतम्-भारताख्यं देशम् । प्राप्य-समधिगत्य । अबाधया-बाधा प्रतिबन्धः पीडा वा, न बाधाऽबाधा बाधाभावस्तया तथा । साधनम्-सैन्यम् गमनं वा । अपि-खलु । असाधयत्-निष्पादयाञ्चकार । "साधनं मृतसंस्कारे सैन्ये सिद्धौषधौ गतौ" इति मेदिनी ॥ ८८ ॥

**अलं नलं रोद्धुमिहाभवन्नमी, भ्रमीर्भजन्तो रिपवोऽस्य कानने ।**
**क्वचिद् विमृष्टं विषमस्थलेऽचले, जलेऽतिदुर्गे स्वत एव दुर्गताः ॥८९॥**

अन्वयः—*अस्य, स्वतः, दुर्गताः, रिपवः, इह, कानने, एव, क्वचित्, विषमस्थले, अचले, अतिदुर्गे, जले, भ्रमीः, भजन्तः, विमृष्टम्, नलम्, रोद्धुम्, अलम्, अभवन् ॥ ८९ ॥*

वृत्तिः—अस्य-भगवतः शान्तिनाथस्य । स्वतः-धनात् । दुर्गताः-दरिद्राः । अपहृतधनाः सन्तोऽकिञ्चनायिता इति यावत् । रिपवः-शत्रवः । इह-अस्मिन् । कानने-वने । एव-अवधारणार्थकमव्ययम् । क्वचित्-कुत्रापि । विषमस्थले-विषममुच्चावचम्, नैकप्रकारमिति यावच्च तत्स्थलं स्थानं विषमस्थलम्, तस्मिँस्तथा । अचले-पर्वते । अतिदुर्गे-दुःखेन गन्तुं योग्यं दुर्गम् अति अत्यन्तं दुर्गम् अतिदुर्गम् तस्मिँस्तथा । अतिकठिनप्रवेशे इति यावत् । जले-सलिले । भ्रमीः-भ्रमणम् । भजन्तः-श्रयन्तः । विमृष्टम्-सैन्यावमर्दितम् । नलम्-पर्वतीयस्थानविशेषम् । रोद्धुम्-अवरोद्धुम् । अलम्-पर्य्याप्ताः, समर्थाः इति यावत् । अभवन्-समपद्यन्त ॥ ८९ ॥

**नयं विनिन्युः प्रचलन्नृणां बलं, गुणा विवेकप्रमुखा न चापलम् ।**
**ततः सुखायाजनि तन्निवेशनं, स्वसीम्नि देशेऽपि च तत्प्रवेशिनम् ॥९०॥**

अन्वयः—*प्रचलन्नृणाम्, विवेकप्रमुखाः, गुणाः, बलम्, नयम्, विनिन्युः, चापलम्, न, तत्, तन्निवेशनम्, च, देशे, अपि, स्वसीम्नि, तत्प्रवेशनम्, सुखाय, अजनि ॥ ९० ॥*

वृत्तिः—प्रचलन्नृणाम्–प्रचलन्तः प्रकर्षेण गच्छन्तश्च ते नरो नरा मनुष्या इति यावत्, प्रचलन्नरस्तेषान्तथा। विवेकप्रमुखाः–विवेकः सदसत्तत्त्वविचारः प्रमुखो मुख्यः प्रधानमिति यावद्येषु ते विवेकप्रमुखाः। गुणाः–त्यागशौर्य्यादिसत्त्वाद्याः। बलम्–शक्तिम् सैन्यं वा। नयम्–नीतिम्। विनिन्युः–प्रापयामासुः। चापलम्–चपलत्त्वम्। न–नैव पुनः, निन्युरितिशेषः। ततः–तस्मात्। तन्निवेशनम्–तस्य नयस्य निवेशनं चेतसि स्थापनम् तथा। च–पुनः। देशे–जनपदे। अपि–खलु। स्वसीम्नि–स्वस्य स्वीयस्य नगरस्येत्यर्थः, सीमा मर्य्यादा स्वसीमा तस्यान्तथा। स्वनगरप्रान्त इति यावत्। तत्प्रवेशनम्–तस्य भगवतः शान्तिनाथस्य प्रवेशनम् प्रवेशः तत्प्रवेशनम्। सुखाय–साताय, सौख्यायेति यावत्। अजनि–समपादि, जातमिति यावत्॥ ९०॥

**नयप्रवादी प्रतियानमानदन्, पटुः पदव्यां पटहस्तथार्हतः।**
**स्मरः सरन्त्यामनिरुद्धमेव यद्, विरुद्धतां वारयति स्म सङ्गतौ ॥९१॥**

अन्वयः—*अर्हतः, प्रतियानम्, आनदन्, नयप्रवादी, तथा, स्मरः, पटहः, सङ्गतौ, पटुः, यत्, सरन्त्याम्, पदव्याम्, अनिरुद्धम्, वारयति स्म, एव ॥ ९१ ॥*

वृत्तिः—अर्हतः–जिनेश्वरस्य, भगवतः शान्तिनाथस्येति यावत्। प्रतियानम्–यानं यानं वाहनं वाहनं प्रतियानम्। आनदन्–संशब्दयन्। नयप्रवादी–नयं नीतिं प्रवदतीव तच्छीलमस्त्यस्येति नयप्रवादी, अथवा नयं प्रवदत्येवेत्यावश्यके णिनि प्रत्ययोऽनुसन्धेयः। तथा–पुनः। किञ्चेति यावत्। स्मरः–स्मर्य्यते इति स्मरः लोकैः स्मरणयोग्यः। पटहः–आडम्बरः। सङ्गतौ–ज्ञानजनने, धातूनामनेकार्थत्वात्। पटुः–समर्थः। यत्–यस्मात्। सरन्त्याम्–चलन्त्याम्। पदव्याम्–पद्धतौ। अनिरुद्धम्–चपलम्, अविमृश्यकार्य्यकारिणम्। वारयति स्म–न्यवारयत्। "स्मातीते" इत्यमरः, 'स्मे च वर्तमाना'५।२।१६। इति वर्तमाना। एव–नूनम्॥ ९१॥

**नृपे प्रजायां सकृपे नयाव्यया–दनीतिकृद् भीतिमुपैति दुर्जनः।**
**रविच्छविर्नो किमुलूकमूकतां, सृजत्ययं सर्गनिसर्ग ईदृशः ॥९२॥**

अन्वयः—*नयाव्ययात्, प्रजायाम्, सकृपे, नृपे, अनीतिकृत्, दुर्जनः, भीतिम्, उपैति, अयम्, ईदृशः, सर्गनिसर्गः, (हि) रविच्छविः, उलूकमूकताम्, किम्, नो, सृजति ? ॥ ९२ ॥*

वृत्तिः—नयाव्ययात्–नयस्य नीतेरव्ययः संरक्षणम् नयाव्ययः नयेन अव्ययः, संरक्षणं वा नयाव्ययस्तस्मात्तथा। प्रजायाम्–जने लोके इति यावत्। सकृपे–कृपया, निरुपधिदुःखापहर–

णेच्छया सहितः सकृपस्तस्मिँस्तथा । नृपे-राजनि, भगवति शान्तिनाथ इति यावत । अनीतिकृत्-अनीतिम् अन्यायं करोतीत्यनीतिकृत् । धर्मविरुद्धाचरणशील इत्यर्थः । दुर्जनो-दुष्टो जनो लोको दुर्जनः, दुरात्मा, मनोवाक्कायैर्भिन्नभिन्नकार्य्याचरणपर इति यावत् । भीतिम्-आतङ्कम् । उपैति-प्राप्नोति । अयम्-एषः । ईदृशः-एवंविधः । सर्गनिसर्गः-सर्गस्य सृष्टेः निसर्गः स्वभावः सर्ग-निसर्गः । हि-यतः । रविच्छविः-सूर्य्यप्रकाशः । उलूकमूकताम्-उलूकस्य घूकस्य मूकता-मौनम्-अनवलोकनम् इति यावत्, उलूकमूकता तान्तथा । किम्-प्रश्नार्थकमव्ययम् । नो-नहि । सृजति-सम्पादयति, अपि तु सम्पादयत्येवेति भावः ॥ ९२ ॥

अनङ्गचिह्नं स विना शशाक नो, प्रवक्तुमन्यत् तदनन्यमानसः ।
यथा भवे भावि तथैव भावना, पुरः स्फुरेद् धातुरिहातुरे हृदि ॥९३॥

*अन्वयः—तदनन्यमानसः, सः, अनङ्गचिह्नम्, विना, अन्यत्, प्रवक्तुम्, नो, शशाक, इह, भवे, यथा, भावि, तथैव, धातुः, आतुरे, हृदि, भावना, पुरः, स्फुरेत् ॥ ९३ ॥*

वृत्तिः—तदनन्यमानसः-तस्मात् ज्ञानात् । न-नहि । अन्यत्र मानसमन्तःकरणम् यस्य स तथेति व्यधिकरणबहुव्रीहिः । सः-प्रसिद्धः, भगवान्शान्तिनाथ इति यावत् । अनङ्गचिह्नम्-न अङ्गं शरीरमात्मव्यतिरिक्ततया येषान्तेऽनङ्गाः सिद्धास्तेषां चिह्नम् ज्ञानम् अनङ्गचिह्नम् तत्तथा । विना-अन्तरेण । अन्यत्-अपरम् । प्रवक्तुम्-प्रकर्षेण वदितुम् । नो-नहि । शशाक-शक्तोऽभूत्, समर्थो बभूवेति यावत् । इह-अस्मिन् । भवे-संसारे । यथा-येन प्रकारेण । वस्त्वीतिशेषः । भावि-भविष्यत्सत्ताकम् । तथैव-तेन प्रकारेण खलु । धातुः-परमेष्ठिनः, विधातुरिति यावत् । आतुरे-व्यग्र । हृदि-अन्तःकरणे, चित्ते इति यावत् । भावना-विचारणा । पुरः-पुरस्तात्, प्रथममिति यावत् । स्फुरेत्- विलसेत् ॥ इति ॥ ९३ ॥

अलं विरक्तोऽपि न राज्यधूर्भरा-द्यदासितुं संसदि यत्नवानपि ।
नियोगिनोऽपास्य स योगिनोऽङ्गिनो, विनोदहेतून् विदधे सदःसदः ॥९४॥

*अन्वयः—राज्यधूर्भरात्, विरक्तः, अपि, यत्नवान्, अपि, यदा, संसदि, आसितुम्, न, अलम्, (तदा) सः, नियोगिनः, अपास्य, अङ्गिनः, विनोदहेतून् योगिनः, सदःसदः, विदधे, ॥९४॥*

वृत्तिः—राज्यधूर्भरात्-राज्यस्य राजकर्मणः, साम्राज्यस्य वा धूर्भारो राज्यधूः, तस्याः भर आधिक्यम् राज्यधूर्भरस्तस्मात्तथा समासान्तविधेरनित्यत्वात् समासान्तस्य अप्रत्ययस्याऽभावोऽनु-

संश्रेयः । विरक्तः-अननुरक्तः । अपि-नूनम् । यत्नवान्-प्रयत्नशीलः । अपि-खलु । यदा-यस्मिन्समये । संसदि-सभायाम् । आसितुम्-समवस्थातुम् । न-नहि । अलम्-समर्थः शक्त इति यावत् । अभूदिति शेषः । (तदा) । सः-चक्री । नियोगिनः-अधिकारिवर्गान् । अपास्य-त्यक्त्वा । अङ्गिनः-प्राणिनः, जीवात्मन इति यावत् । विनोदहेतून्-आनन्दकारणानि । योगिनः-ज्ञानदर्शनचारित्रासेवनात्मको योगोऽस्त्येषां ते योगिनस्ताँस्तथा । सदःसदः-सदसि सभायां सीदन्तीति सदःसदस्तांस्तथा सभासदः, पार्षद्यानिति यावत् । विदधे-चकार । कृतवानितियावत् ॥ ९४ ॥

ततः समुत्थाय वने तपस्विना, यशस्विनाऽनेन समं समासितुम् ।
क्षणं तदारामविहारकैतवा-दभाजि राजापि तदीयमण्डलम् ॥९५॥

अन्वयः—*ततः, समुत्थाय, राजा, अपि, यशस्विना, तपस्विना, अनेन, समम्, वने, समासितुम्, क्षणम्, तदारामविहारकैतवात्, तदीयमण्डलम्, अभाजि* ॥ ९५ ॥

वृत्तिः—ततः-तदनन्तरम् । समुत्थाय-सुसज्जीभूय । राजा-राजते दीप्यते प्रकृतिरञ्जनात् इति राट् पार्थिवः भूपतिरिति यावत् तेन तथा । "राजा राट् पार्थिवः क्ष्माभृत्" इत्यमरः । अपि-सम्भावनायाम् । यशस्विना-यशःकीर्तिरस्त्यस्येति यशस्वी तेन तथा, कीर्तिशालिनेत्यर्थः । तपस्विना-तपःकैवल्यादिप्रयोजको व्रतविशेषोऽस्त्यस्येति तपस्वी तेन तथा । अनेन-एतेन । समम्-सह । वने-कानने । समासितुम्-स्थातुम्, निवसितुमिति यावत् । क्षणम्-क्षणं यथा स्यात्तथा सोत्सवमित्यर्थः । तदारामविहारकैतवात्-तस्य नैषधस्य आराम उपवनम् तदारामस्तत्र विहारो भ्रमणम् तदारामविहारस्तस्य कैतवं व्याजस्तदारामविहारकैतवम् तस्मात्तथा । तदीयमण्डलम्-तस्य योगिनो मण्डलं कदम्बकम्, तदीयमण्डलम्, योगिवृन्दमित्यर्थः । अभाजि-असेवि । समाश्रितमिति यावत् ॥ ९५ ॥

तदन्तरे दन्तुरिते नभोऽन्तरे, शरैश्चलद्भिः करवालचालनैः ।
निदेशलाभाय नरेशपेशलं, निषेवितुं देशमियेष नैषधः ॥९६॥

अन्वयः—*तदन्तरे, चलद्भिः, शरैः, करवालचालनैः, नभोऽन्तरे दन्तुरिते (सति) नैषधः, निदेशलाभाय, नरेशपेशलम्, देशम्, निषेवितुम्, इयेष* ॥ ९६ ॥

वृत्तिः—तदन्तरे-तन्मध्ये । चलद्भिः-गच्छद्भिः । शरैः-बाणैः । करवालचालनैः-करवालाणां खड्गानां चालनानि प्रक्षेपणानि करवालचालनानि तैस्तथा । नभोऽन्तरे-आकाशमध्यभागे । दन्तुरिते-उच्चावचेनैकभेदे इति यावत् । सतीति शेषः । नैषधः-पूर्वप्रसिद्धसेनापतिः । निदेशलाभाय-

निदेशस्य आज्ञाया अनुमतेरिति यावत् लाभः प्राप्तिः निदेशलाभस्तस्मै तथा । **नरेशपेशलम्**–नराणां मनुष्याणामीशो नरेशः शान्तिनाथस्तेन पेशलः कोमलः, मनोहर इति यावत्, नरेशपेशलस्तन्तथा । नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि' इति पण्डितराजजगन्नाथः । 'यद्वा' नरेशैः उपायनप्रदानार्थमागतैः शरणागतैर्वा राजभिः पेशलो नरेशपेशलस्तान्तथा । **देशम्**–जनपदम् । **निषेवितुम्**–संसेवनायै । **इयेष**–जगाम ॥ ९६ ॥

**अथ श्रिया भर्त्सितमत्स्यलाञ्छनः, क्वचित्परोपद्रुतमण्डलश्रुतेः ।**
**स यानहेतुं पटहं स्फुटं दृशा-प्यवीवदद् योधविबोधनोन्मनाः ॥९७॥**

अन्वयः—*अथ, श्रिया, भर्त्सितमत्स्यलाञ्छनः, क्वचित्, परोपद्रुतमण्डलश्रुतेः, योधविबोधनोन्मनाः, सः, दृशा, अपि, स्फुटम्, यानहेतुम्, अवीवदत्* ॥ ९७ ॥

वृत्तिः—**अथ**–अनन्तरम् । **श्रिया**–शोभया, लक्ष्म्या सम्पत्त्या वा । **भर्त्सितमत्स्यलाञ्छनः**–मत्स्यो मीनो लाञ्छनं चिह्नं यस्य स मत्स्यलाञ्छनः कामः भर्त्सितस्तर्जितस्तिरस्कृतो वा मत्स्यलाञ्छनो येन स तथा । **क्वचित्**–कुत्रापि । **परोपद्रुतमण्डलश्रुतेः**–परैः शत्रुभिः उपद्रुतम् अपकारमापादितं विद्रुतं वा परोपद्रुतम्, तच्च तन्मण्डलम् देशः परोपद्रुतमण्डलम् तस्य श्रुतिः श्रवणम् परोपद्रुतमण्डलश्रुतिस्तस्यास्तथा । **योधविबोधनोन्मनाः**–योधानां भटानां विबोधनम् वैशिष्ट्येन ज्ञापनम् योधविबोधनम् तदर्थमुन्मना उत्सुकः योधविबोधनोन्मनाः । **सः**–प्रसिद्धः, सेनापतिः । **दृशा**–नेत्रेण । तदिङ्गितेनेत्यर्थः । **अपि**–खलु । **स्फुटम्**–व्यक्तं यथास्यात्तथा । **यानहेतुम्**–यानस्य युद्धार्थं प्रयाणस्य हेतुः कारणम् यानहेतुस्तथा । **पटहम्**–आडम्बरम् । वाद्यविशेषम् । **अवीवदत्**–वादितवान् ॥९७॥

**स्वतन्त्रमामन्त्रणयाऽप्यमीमिलत्, समं वयस्यैः स्वरहस्यवेदिभिः ।**
**चलाचलं भूपबलं क्रुधा ज्वलत्, महोज्वलं स्वामिविधेर्विधित्सया ॥९८॥**

अन्वयः—*स्वरहस्यवेदिभिः, वयस्यैः, समम्, स्वामिविधेः, विधित्सया, महोज्ज्वलम्, चलाचलम्, क्रुधा, ज्वलत्, स्वतन्त्रम्, भूपबलम्, अपि, आमन्त्रणया, अमीमिलत्* ॥ ९८ ॥

वृत्तिः—**स्वरहस्यवेदिभिः**–स्वस्य आत्मनो रहस्यानि मर्माणि स्वरहस्यानि तानि विदन्ति जानन्ति तच्छीलाः स्वरहस्यवेदिनः । **वयस्यैः**–सखिभिः, मित्रैरिति यावत् । **समम्**–सह । **स्वामिविधेः**–स्वामिनः प्रभोर्विधिः कार्य्यम् स्वामिविधिः तस्य तथा । **विधित्सया**–चिकीर्षया । **महोज्ज्वलम्**–अतिशयदीप्तम् । **चलाचलम्**–चलतीति चलाचलम्, "चराचर चलाचल" ४।१।१३॥ इति अचि,

द्वित्वमात्वञ्च, चञ्चलमित्यर्थः । "अथ चञ्चलम् । तरलं कम्पनं कम्प्रं परिप्लवचलाचले" । ६।९१। इत्यभि० चि० । क्रुधा–कोपेन । उज्ज्वलत्–सन्दीप्यत् प्रज्ज्वलनमादधदिति यावत् । स्वतन्त्रम्–अपरतन्त्रम्, अन्यानधीनत्वान्निरङ्कुशमित्यर्थः । भूपबलम्–राजसैन्यम् । अपि–सम्भावनायामव्ययम् । आमन्त्रणया–कामचारानुज्ञया । अमीमिलत्–समगमयत्, सम्मेलितवानितियावत् ॥ ९८ ॥

## क्षितीशिता सैन्यपतेर्गिरा गुरुः,स्वतेजसे वाऽगरुवद् रिपून् दहन् ।
## पुरोपकण्ठं स वनं किलेक्षिता, न्यवेशयद्वस्त्रकुटीः पटीयसीः ॥९९॥

*अन्वयः—गिरा, सैन्यपतेः, गुरुः, वा, अगरुवत्, स्वतेजसे, रिपून्, दहन्, क्षितीशिता, किल, पुरोपकण्ठम्, वनम्, ईक्षिता, सः, पटीयसीः, वस्त्रकुटीः, न्यवेशयत् ॥९९॥*

वृत्तिः—गिरा–वाण्या, युद्धसमुचितोपदेशात्मकवचनेनेति यावत् । सैन्यपतेः–सैन्यानामनीकिनीनां पतिर्नायकः सैन्यपतिस्तस्य तथा । गुरुः–सद्धर्म्मनीतिमार्गाद्युपदेशकः । वा–अथवा । अगरुवत्–अगत्यनेनेत्यगरुः, अगं रोगं रुणद्धि इति वाऽगरुस्तस्यैवेत्यगरुवत् इवार्थे 'वत्' प्रत्ययः, राजार्हवत्, गन्धदारुवदिति यावत् । स्वतेजसे–स्वस्य आत्मनः स्वमात्मीयं वा तेजः प्रतापः प्रभाव इति यावत् । स्वतेजस्तस्मै तथा । "यत्कोशदण्डजं तेजः स प्रभावः प्रतापवत्" ३।४०४॥ इत्यभि० चि० । रिपून्–शत्रून् । दहन्–ज्वालयन् । संदग्धयन्निति यावत् । क्षितीशिता–क्षितेः पृथिव्या ईशिता नायकः क्षितीशिता पृथ्वीपालक इत्यर्थः । किल–सम्भावनायाम् अव्ययम् निश्चयेनेत्यर्थः । पुरोपकण्ठम्–नगरसमीपवर्ति । वनम्–काननम् । ईक्षिता–समवलोकिता, द्रष्टेत्यर्थः । सः–भगवान् शान्तिनाथः । पटीयसीः–अतिशयितशोभनाः । वस्त्रकुटीः–वसनगृहान् । न्यवेशयत्–व्यरचयत, व्यरीरचत् वा॥९९॥

## स्वयं समारोढुमना निगूढधी–स्तुरङ्गमं निस्सममष्टमङ्गलम् ।
## रयादुपानेतुमहेतुयोगतो, दिदेश यानाय निदेशकारिणः ॥१००॥

*अन्वयः—निगूढधीः, समारोढुमनाः, स्वयम्, अष्टमङ्गलम्, निस्समम्, तुरङ्गमम्, अहेतुयोगतः, यानाय, उपानेतुम्, रयात्, निदेशकारिणः, दिदेश ॥१००॥*

वृत्तिः—निगूढधीः–निगूढा परैरत्यन्तमलक्षिता धी–र्बुद्धिर्यस्य स निगूढधीः । समारोढुमनाः–समारोढुम् समधिरोढुं मनश्चित्तं यस्य स तथा 'तुमश्च मनःकामे' ३।२।१४०। इति । "लुम्पेदवश्यमः कृत्ये, तुंकाममनसोरपि" इत्यभियुक्तोक्तेश्च तुमो मकारस्य लोप इति विज्ञेयम् । स्वयम्–आत्मना । अष्टमङ्गलम्–अष्टौ–अष्टत्वसङ्ख्याकानि मङ्गलानि–कल्याणानि यस्य सोऽष्टमङ्गलस्तन्तथा ।

विशिष्टलक्षणलक्षितमितियावत् । 'पुच्छोरःखुरकेशास्यैः, सितैः स्यादष्टमङ्गलः' ४।३०३। इत्यभि० चि०। **निस्समम्**–समतारहितम् अतुलनीयमिति यावत् । **तुरङ्गमम्**–अश्वम् । **अहेतुयोगतः**–हेतोः कारणस्य योगः सम्बन्धो हेतुयोगः न हेतुयोगोऽहेतुयोगस्तस्मात्तथा । कारणसम्बन्धं विनेत्यर्थः । **यानाय**–युद्धार्थप्रस्थानाय । **उपानेतुम्**–सामीप्यं प्रापयितुम् । **रयात्**–वेगाद् । **निदेशकारिणः**–निदेशमादेशमनुशासनमिति यावत्, कुर्वन्ति तच्छीला निदेशकारिणस्तांस्तथा । **दिदेश**–आदिशत् । आदिष्टवानित्यर्थः ॥ १०० ॥

**अमी ततस्तस्य विभूषितं सितं, यशोभिरीशस्य दिशोऽमितः स्थितैः ।**
**अतुच्छपुच्छे तदुरःखुरे पुनः, सुपर्णकीर्त्येव च मूर्त्तया श्रितम् ॥१०१॥**

अन्वयः— *ततः, अमी, विभूषितम्, पुनः, तस्य, ईशस्य, दिशः, अमितः, स्थितैः, यशोभिः, अतुच्छपुच्छे, तदुरःखुरे, सितम्, च, मूर्त्तया, सुपर्णकीर्त्या, श्रितम्, इव ॥१०१॥*

**वृत्तिः**—**ततः**–तदनन्तरम् । **अमी**–इमे विप्रकृष्टतया वर्तमाना, निदेशकारिणः । **विभूषितम्**–समलङ्कृतम् । **पुनः**–किञ्च । **तस्य**–प्रसिद्धस्य । **ईशस्य**–प्रभोः शान्तिनाथस्य । **दिशः**–आशाः दिशा इति वा । **अमितः**–सर्वतः, चतुर्दिक्ष्वित्यर्थः । **स्थितैः**–अवस्थितैः, विभ्राजमानैरित्यर्थः । **यशोभिः**–कीर्त्तिभिः । **अतुच्छपुच्छे**–विशाललाङ्गूले । **तदुरःखुरे**–अश्वीयवक्षस्थलशफप्रदेशविषये । प्राण्यङ्गत्वादेकवद्भावः । **सितम्**–शुक्लवर्णम् । **च**–पुनः । **मूर्त्तया**–शरीरधारिण्या । **सुपर्णकीर्त्या**–सुपर्णस्य पन्नगाशनस्य गरुडस्येति यावत् । कीर्त्तिर्यशः सुपर्णकीर्त्तिस्तया तथा । **श्रितम्**–सेवितम्, आश्रितम्, अश्वस्यास्य तद्वदतिवेगवत्त्वादिति । **इव**–यथा ॥ १०१ ॥

**उपाददुस्तस्य तुरङ्गपुङ्गवं, जवेऽपि मानेऽपि च पौरुषाधिकम् ।**
**धरां समुत्सृज्य नभो यियासया, निजक्रमैराक्रममाणमुच्चकैः ॥१०२॥**
(युग्मम्)

अन्वयः—*जवेऽपि, पौरुषाधिकम्, च, मानेऽपि, ( पौरुषाधिकम्, ) धराम्, समुत्सृज्य, नभः, यियासया, निजक्रमैः, उच्चकैः, आक्रममाणम्, तस्य, तुरङ्गपुङ्गवम्, उपाददुः ॥१०२॥*

**वृत्तिः**—**जवेऽपि**–वेगे खलु । **पौरुषाधिकम्**–पौरुषेण बलेन अधिक उत्कृष्टः, पौरुषाधिकस्तन्तथा । **च**–पुनः । **मानेऽपि**–परिमाणेऽपि । ( पौरुषाधिकम्–पौरुषम् पुरुषप्रमाणम् तस्मादधिकः पौरुषाधिकस्तन्तथा ) "ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु" इत्यमरः । **धराम्**–पृथिवीम् ।

समुत्सृज्य–परित्यज्य । नभः–आकाशम् । यियासया–जिगमिषया । गन्तुमिच्छयेत्यर्थः । निजक्रमैः–स्वचरणैः । उच्चकैः–अतिशयेन । आक्रममाणम्–आक्रमणशीलम् । तस्य–भगवतः शान्तिनाथस्य । तुरङ्गपुङ्गवम्–अश्वश्रेष्ठम् । "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।....प्रशस्यार्थप्रकाशकाः" ६।७६। इत्यभि० चि० । उपाददुः–उपाहरन् आनीतवन्त इति यावत् ॥ १०२ ॥

हयं सपक्षैरुभयांशसङ्गतै-र्नरेशवस्त्राञ्चलरूपशालिभिः ।
द्विधा विपक्षं किल जेतुमुद्यतं, परेऽपि मत्वावसरं परं पुरः ॥१०३॥

*अन्वयः—उभयांशसङ्गतैः, नरेशवस्त्राञ्चलरूपशालिभिः, सपक्षैः, किल, द्विधा, विपक्षम्, जेतुम्, उद्यतम्, हयम्, परम्, अवसरम्, मत्वा, पुरः, अपि, परे ॥१०३॥*

वृत्तिः—उभयांशसङ्गतैः–उभयांशेन सङ्गता मिलिता उभयांशसङ्गतास्तैस्तथा । नरेशवस्त्राञ्चलरूपशालिभिः–नरेशा राजानश्च वस्त्राञ्चलानि वसनप्रान्ताश्च नरेशवस्त्राञ्चलानि तेषां रूपं सौन्दर्य्यम् नरेशवस्त्राञ्चलरूपम् तेन शालन्ते शोभन्ते तच्छीला नरेशवस्त्राञ्चलरूपशालिनस्तैस्तथा । सपक्षैः–सहायकवर्गैः । उपलक्षितमितिशेषः । किल–निश्चयेन । द्विधा–द्विप्रकारेण । विपक्षम्–वीनां पक्षिणाम् पक्षः पत्रम् विपक्षस्तन्तथा । गमनस्पर्धया वैरिणं वा, यद्वा–तनुकान्त्या गरुडम् । जेतुम्–पराभवितुम् । उद्यतम्–प्रस्तुतम् । हयम्–अश्वम् । परम्–उत्कृष्टम् । अवसरम्–योग्यकालम् । मत्वा–विज्ञाय । पुरः–अग्रे । अपि–खलु । परे–श्रेष्ठे ॥ १०३ ॥

उदीतपक्षैरिव सादिनि स्थिते, तदंशुकस्योभयपार्श्वतोऽञ्चलैः ।
उपाहरन्नश्वमजस्रचञ्चलै-रमी विहङ्गैः सह यातुमुत्सुकम् ॥१०४॥
(युग्मम्)

*अन्वयः—सादिनि, स्थिते, ( सति ) उभयपार्श्वतः, तदंशुकस्य, अञ्चलैः, इव, उदीतपक्षैः, अजस्रचञ्चलैः, विहङ्गैः, सह, यातुम्, उत्सुकम्, अश्वम्, अमी, उपाहरन् ॥१०४॥*

वृत्तिः—सादिनि–अश्वारोहिणि । स्थिते–अवस्थिते । सतीति शेषः । उभयपार्श्वतः–पार्श्वद्वयतः । तदंशुकस्य–तस्य सादिनोऽशुकम् वस्त्रम् तदंशुकम् तस्य तथा । अञ्चलैः–प्रान्तैः । इव–यथा । उदीतपक्षैः–प्रकाशितपतत्त्रैः । अजस्रचञ्चलैः–सततचलाचलैः । विहङ्गैः–पक्षिभिः । सह–समम् । यातुम्–गन्तुम् । उत्सुकम्–इष्टार्थोद्युक्तम् । "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः । अश्वम्–तुरङ्गमम् । अमी–विप्रकृष्टाः सेवकाः । उपाहरन्–उपानयन् आनीतवन्त इति यावत् ॥ १०४ ॥

**दिशां जयायोद्धुरसाधने मयि, नवं धनं साधु न बन्धनं पुनः ।**
**इतीव रोषादतिशायिपौरुषात्, खुराञ्चलैः क्षोभितमन्दुरोदरम् ॥१०५॥**

अन्वयः—दिशाम्, जयाय, उद्धुरसाधने, मयि, नवम्, धनम्, साधु, पुनः, बन्धनम्, न, इति, अतिशायिपौरुषात्, रोषात्, इव, खुराञ्चलैः, क्षोभितमन्दुरोदरम् ॥१०५॥

वृत्तिः—दिशाम्—आशानाम्, दिशानामिति यावत् । जयाय—विजयाय । उद्धुरसाधने—उद्गता धूरस्येत्युद्धुरम्, उग्रम्, उन्नतमित्यर्थः,साध्यते निष्पाद्यतेऽनेनेति साधनम् उद्धुरञ्च तत्साधनमुद्धुरसाधनम् तस्मिँस्तथा । मयि—मल्लक्षणे तुरङ्गमे इति शेषः । नवम्—नूतनम् अभिनवमिति यावत् । धनम्—वित्तम्, ऐश्वर्य्यमिति यावत् । साधु—समीचीनम् । पुनः—किन्तु । बन्धनम्—बद्धत्वम् । न—नहि । ( साधु—समीचीनमितिशेषः ) । इति—एवं विधात् । इत्थं प्रकारादिति यावत् । अतिशायिपौरुषात्—अतिशेतेऽतिक्रामत्यन्यत्तच्छीलमतिशायि, अतिशायि पौरुषं पुरुषार्थो यस्मिन् सोऽतिशायिपौरुषस्तस्मात्तथा । रोषात्—क्रोधात् । अत्र गुणे गुणानङ्गीकारः इति नियमात् रोषे पौरुषानवस्थानादप्रमाणमिदमिति चेन्न रोषपौरुषयोरात्मधर्मतया समानाधिकरण्यसम्बन्धेन तयोः परस्परमाधाराधेयभावे बाधकाभावात् । इव—यथा । खुराञ्चलैः—शफप्रान्तैः । क्षोभितमन्दुरोदरम्—मन्दुराया वाजिशालाया उदरः मध्यभागो मन्दुरोदरः क्षोभितो व्याकुलितो मन्दुरोदरो येन स क्षोभितमन्दुरोदरस्तन्तथा । "वाजिशाला तु मन्दुरा" ४।६४। इत्यभि० चि० । हयमुपाहरन्निति पूर्वेण सम्बन्धः ॥ १०५ ॥

**अथान्तरेणाऽवटुगामिनाऽध्वना-ऽऽशयेन हेषारवमाप्तुमुद्यतम् ।**
**अहंकृतिः शुद्धमतेर्न सम्मता, हिताय लोकैरिति मौनमागतम् ॥१०६॥**

अन्वयः—अथ, अवटुगामिना, आन्तरेण, अध्वना, हेषारवम्, आप्तुम्, उद्यतम्, शुद्धमतेः, आहङ्कृतिः, हिताय, लोकैः, न, सम्मता, इति, आशयेन, मौनम्, आगतम् ॥१०६॥

वृत्तिः—अथ—अश्वोपाहरणानन्तरम् । अवटुगामिना—अवटुं घाटां कृकाटिकामिति यावत्, गच्छति तच्छीलोऽवटुगामी तेन तथा । "अवटुर्घाटा कृकाटिका" इत्यमरः । आन्तरेण—कण्ठमध्यवर्तिना । अध्वना—मार्गेण । हेषारवम्—तदाख्यशब्दविशेषम् । आप्तुम्—प्राप्तुम् । उद्यतम्—प्रस्तुतम् । शुद्धमतेः—विलक्षणबुद्धेः । कृते इति शेषः । अहङ्कृतिः—अहङ्कारः, गर्व इति यावत् । स च रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनमिति जगन्नाथपण्डितनरेन्द्रः । हिताय—कल्याणाय । लोकैः—लोक्यते शास्त्रतत्त्वमेभिरिति लोकास्तैस्तथा, विद्वद्भिर्जनैरिति यावत् । न—नहि । सम्मता—अभ्युपगता स्वीकृतेति यावत् संगतेत्यपि पाठः । इति—एवं प्रकारेण । आशयेन—अभिप्रायेण । मौनम्—अभाषणम्,

हेषणाभावमिति यावत् । "अभाषणं पुनर्मौनम्" १।७७ इत्यभि० चि० । आगतम्–सम्प्राप्तम् । "तमारुरोह क्षितिपाकशासनः" इति दूरवर्तिनाऽन्वितम् ॥ १०६ ॥

**यथा मुखे पृष्ठपदे तथा स्थिति–र्निशीथिनीनाथमहःमहोदरैः ।**
**करैरितीवाश्रितमुज्ज्वलैरलं, निगालभागेऽप्युरसा समैः समैः ॥१०७॥**

*अन्वयः—यथा, मुखे, स्थितिः, तथा, पृष्ठपदे, ( अपि ) निगालभागे, अपि, उरसा, समैः, समैः, निशीथिनीनाथमहःमहोदरैः, उज्ज्वलैः, करैः, अलम्, आश्रितम्, इव ॥१०७॥*

वृत्तिः—यथा–येन प्रकारेण । मुखे–आनने । स्थितिः–अवस्थितिः । तथा–तेन प्रकारेण । पृष्ठपदे–पृष्ठञ्च पदानि चरणाश्च पृष्ठपदम्, 'प्राण्यङ्गत्वादेकवद्भावः' तस्मिँस्तथा। (अपि–सम्भावनायाम्।) निगालभागे–गलप्रदेशे । अपि–सम्भावनायम् । उरसा–वक्षसा । समैः समैः–तुल्यैस्तुल्यैः । निशीथिनीनाथमहःमहोदरैः–निशीथिनी रात्रिस्तस्या नाथः स्वामी, वल्लभ इति यावत् । निशीथिनीनाथस्तस्य महांसि तेजांसि किरणा इति यावत् निशीथिनीनाथमहांसि तेषां सहोदराः सदृशा निशीथिनीनाथमहःसहोदरास्तैस्तथा । प्रायेण सहोदराः सरूपा भवन्तीति सारूप्यं लक्ष्यते । उज्ज्वलैः–विशदैः शुक्लैरिति यावत् । करैः–किरणैः । अलम्–पर्य्याप्तम् । आश्रितम्–सेवितम्, युक्तमिति यावत् । इव–यथा मुखपृष्ठपदगलवक्षःप्रदेशेषूज्ज्वलमिति भावः ॥ १०७ ॥

**महोदयं स्वामिनि कामितं जया–दुपादिशद्भिः परितस्तथोर्ध्वगैः ।**
**निगालगाद्देवमणेरिवोत्थितैः, खगैर्मयूखैरिव सेवितं पुनः ॥१०८॥**

*अन्वय—महोदयम्, जयात्, स्वामिनि, कामितम्, उपादिशद्भिः, तथा, परितः, ऊर्ध्वगैः, निगालगात्, देवमणेः, उत्थितैः, इव, खगैः, मयूखैः, पुनः, सेवितम् ॥१०८॥*

वृत्ति—महोदयम्–महान् अतिशयित उदयोऽभ्युदयोयस्माद्यस्य वा स महोदयस्तन्तथा । जयात्–विजयात् । स्वामिनि–प्रभौ । कामितम्–अभिलषितम्, मनोवाञ्छितमिति यावत् । उपादिशद्भिः–प्रतिपादयद्भिः । तथा–पुनः । परितः–सर्वतः । ऊर्ध्वगैः–उपरिगमनशीलैः । निगालगात्–गलप्रदेशस्थितात् । देवमणेः–दक्षिणावर्तात् । 'देवमणिः शिवेऽश्वस्य, कण्ठावर्ते च कौस्तुभे'इति विश्वः । उत्थितैः–समुत्पन्नैः । इव–यथा । खगैः–आकाशगमनशीलैः । मयूखैः–प्रभाभिः । पुनः–अतिशयेन । सेवितम्–समाश्रितम् ॥ १०८ ॥

**प्रभावभारैर्भविता स भूमिभुक्, समारुहन् भासविता सहस्ररुक् ।**
**सदावदातैरिति मञ्जुराजिभि–र्विराजतं केशरकेशरश्मिभिः ॥१०९॥**

**अन्वयः**—*सः, भूमिभुक्, प्रभावभारैः, समारुहन्, मासविता, सहस्ररुक्, भविता, इति, सदावदातैः, मञ्जुराजिभिः, केशरकेशररश्मिभिः, विराजितम् ॥१०९॥*

**वृत्तिः**—**सः**-प्रसिद्धः । **भूमिभुक्**-भूमिं पृथिवीम् भुनक्ति पालयति इति भूमिभुक्, पृथ्वीपालक इत्यर्थः । **प्रभावभारैः**-भरोऽतिशय एव भारः प्रभावस्य प्रतापस्य भाराः अतिशयाः प्रभावभारास्तैस्तथा । **समारुहन्**-समाक्रामन् । **मासविता**-माया लक्ष्म्याः सविता समुत्पादको मासविता । 'लक्ष्मीः पद्मा रमा या मा ता सा श्रीः कमलेन्दिरा' २।१४०। इत्यभि० चि० । **सहस्ररुक्**-सहस्रं रुचः कान्तयो यस्य स सहस्ररुक् सूर्य्यः । उपमानसूर्य्यापेक्षया मासमुत्पादकत्ववैशिष्ट्यप्रतिपादनात्प्रतीयमानो व्यतिरेकोऽत्रालङ्कारः । **भविता**-भविष्यति । **इति**-इत्येवंप्रकारविशेषसूचकैः । **सदावदातैः**-सर्वदा शुक्लैः । **मञ्जुराजिभिः**-मञ्जवो मनोहरा राजयः श्रेणयो येषान्ते मञ्जुराजयस्तैस्तथा । **केशरकेशररश्मिभिः**-स्कन्धे प्ररूढा ये केशरकेशाः किञ्जल्कवर्णकचाः तेषाम्, त एव ( तल्लक्षणा एव ) वा रश्मयः किरणानि केशरकेशररश्मयस्तैस्तथा । अत्र यद्यपि केशरशब्दोऽश्वस्कन्धप्ररूढकेशार्थे रूढस्तथापि केशशब्दसान्निध्यादस्याश्वस्कन्धप्ररूढमात्रार्थत्वमवसेयमिति । प्रकृते "केशर-केशर" इति यमकम् "अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः । यमकम्" इति काव्यप्रकाशे मम्मटः । **विराजितम्**-शोभितम् । यद्वा वीनां पक्षिणां राजा विराजो गरुडस्तद्वदाचरितो विराजितस्तन्तथा ॥ १०९ ॥

**अजस्रभूमीतटकुट्टनोद्गतै, रजोव्रजैर्दूरत एव गत्वरैः ।**
**विरोधभावाद् मलिनैस्तनुत्विषा, विषादयोगादिव नाश्रितं क्वचित् ॥११०॥**

**अन्वयः**—*अजस्रभूमीतटकुट्टनोद्गतैः, दूरतः, एव, गत्वरैः, विरोधभावात्, तनुत्विषा, मलिनैः, रजोव्रजैः, विषादयोगात्, इव, क्वचित्, न, आश्रितम् ॥११०॥*

**वृत्तिः**—**अजस्रभूमीतटकुट्टनोद्गतैः**-भूमीतटस्य पृथ्वीतलस्य कुट्टनम् चूर्णनम् भूमीतटकुट्टनम् अजस्रं सततं यथा स्यात्तथा भूमीतटकुट्टनम् अजस्रभूमितटकुट्टनम् तस्मादुद्गतानि समुत्थितानि अजस्रभूमितटकुट्टनोद्गतानि तैस्तथा । अथ क्रियाविशेषणवाचकपदेन समासो नोपलभ्यते "स्तोकं पाकः" इत्यसमस्तप्रयोगस्यैव दर्शनादिति चेत् सत्यम् । "तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी, मध्ये क्षामा चकितहरिणप्रेक्षणा निम्ननाभिः । श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां, या तत्र स्याद्युवति विषये सृष्टिराद्यैव धातुः ।" इति महाकविकालिदासीयोत्तरमेघदूतस्थपद्ये "स्तोकनम्रा" इति प्रयोगदर्शनात् । **दूरतः**-विप्रकृष्टतः । **एव**-अवधारणेऽव्ययम् । **गत्वरैः**-गमनशीलैः । **विरोधभावात्**-विद्वेषात् । **तनुत्विषा**-शरीरकान्त्या । **मलिनैः**-मलीमसैः । **रजोव्रजैः**-रजसां धूलीनां व्रजानि समूहा रजोव्रजानि तैस्तथा । **विषादयोगात्**-विषादस्यानुतापस्य योगः सम्बन्धो विषादयोगस्तस्मात्तथा । तथा

च जगन्नाथः "इष्टासिद्धिराजगुर्वाद्यपराधजन्योऽनुतापो विषादः" इति । इव–यथा । क्वचित्–कुत्रापि । न–नहि । आश्रितम्–समाश्रितम् ॥ ११० ॥

**भुवः स्वमातुर्विरहासहैः पुन–रुपास्यमानं चरणेषु रेणुभिः ।**
**पतद्भिरेतत्सहनं चिकीर्षुभिः, पदप्रणामे हि सतां प्रसन्नता ॥१११॥**

अन्वयः – *पुनः, स्वमातुः, भुवः, विरहासहैः, एतत्सहनम्, चिकीर्षुभिः, ( अत एव ) पतद्भिः, रेणुभिः, चरणेषु, उपास्यमानम्, हि, पदप्रणामे, सताम्, प्रसन्नता ॥१११॥*

वृत्तिः—पुनः–तथा । स्वमातुः–निजजनन्याः । भुवः–पृथिव्याः । विरहासहैः–सहन्ते मर्षन्ति इति सहाः, न सहाः असहाः, विरहस्य वियोगस्य असहा विरहासहास्तैस्तथा । एतत्सहनम्–एतस्य विरहस्य तत्प्रयुक्तदुःखस्येत्यर्थः । सहनम्–मर्षणम् एतत्सहनम् । अथात्र सर्वनाम्नां प्रधानपरामर्षित्वनियमात् विरहस्य असहा विरहासहाः" इति षष्ठीतत्पुरुषसमासे उत्तरपदार्थस्यैव प्रधानत्वेन ( शाब्दबोधीयमुख्यविशेष्यताश्रयत्वेन ) विरहस्याप्रधानत्वादेतत्पदेन तस्य परामर्शोऽसम्भावितः शास्त्रनियमविरुद्धश्चापीति चेत् सत्यम्—"दर्शैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः" "दुःखत्रयाभिधानाज्जिज्ञासा तदपघातके हेतौ" इत्यादौ सर्वनाम्नोऽप्रधानपरामर्शित्वस्यापि दर्शनात् । चिकीर्षुभिः–करणेच्छावद्भिः । ( अत एव ) पतद्भिः–अधोदेशसंयोगवद्भिः । रेणुभिः–धूलिभिः । चरणेषु–पादेषु । उपास्यमानम्–सेव्यमानम् । हि–यतः । पदप्रणामे–चरणप्रणिपाते । सताम्–सज्जनानाम् । प्रसन्नता–चित्तप्रसादः, अन्तःकरणाह्लाद इति यावत् । भवतीतिशेषः । अर्थान्तरन्यासोऽलङ्कारः—"ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः" इति कविर्दण्डी "सामान्यं वा विशेषो वा तदन्येन समर्थ्यते । यत्तु सोऽर्थान्तरन्यासो साधर्म्येणेतरेण वा" इति काव्यप्रकाशकारो मम्मटः ॥ १११ ॥

**सुवर्णपर्य्याणमणीमयाण्डजैर्विचित्ररूपैः परितोऽनुवेष्टितम् ।**
**रयप्रकर्षाध्ययनार्थमागतै–स्तदीयताक्ष्याभिधयाऽधिभूधिया ॥११२॥**

अन्वयः—*तदीयताक्ष्याभिधया, अधिभूधिया, रयप्रकर्षाध्ययनार्थम्, आगतैः, विचित्ररूपैः, सुवर्णपर्य्याणमणिमयाण्डजैः, परितः, अनुवेष्टितम् ॥११२॥*

वृत्तिः—तदीयताक्ष्याभिधया–अभिधीयतेऽनयेत्यभिधाऽभिधानम्, नामेति यावत् । ताक्ष्यैत्यभिधा ताक्ष्याभिधा तस्य अश्वस्य इयम् तदीया सा चासौ ताक्ष्याभिधा तदीयताक्ष्याभिधा, तया तथा हेत्वर्थे तृतीया । ताक्ष्यशब्दोऽश्ववाचकोऽपि, यदनेकार्थः 'ताक्ष्यस्तु स्यन्दने वाहे, गरुडे गरुडाग्रजे ।

अश्वकर्णाह्वयतरौ, स्यात्तार्क्ष्यं तु रसाञ्जने'इति । **अधिभूधिया**–अधिभवतीति अधिभूः स्वामी, तस्य धीर्बुद्धिरधिभूधीः, 'अधिभू (स्वामी) विषयिणीबुद्धि' "अधिभूरयम्" इत्याकारिका तया तथा । **रयप्रकर्षाध्ययनार्थम्**–रयस्य वेगस्य प्रकर्षः प्रकृष्टता चारुत्वमित्यर्थः, रयप्रकर्षः, तस्य अध्ययनम्-अभ्यासः शिक्षणमित्यर्थः । रयप्रकर्षाध्ययनम्, तत् अर्थः प्रयोजनम् यस्मिन् कर्मणि तत् रयप्रकर्षाध्ययनार्थं यथा स्यात्तथा । **आगतैः**–समायातैः । **विचित्ररूपैः**–नानाविधरूपशालिभिः । **सुवर्णपर्य्याणमणिमयाण्डजैः**–परितोऽश्वपृष्ठमेतीति पर्य्याणम् "कल्याणपर्य्याणादयः" (उ० १९३) इति साधुः सुवर्णपर्य्याणम् सुवर्णपर्य्याणम्, मण्योमणयः रत्नानीति यावदेव मणीमयाः, ते च तेऽण्डजाः जीवप्रभेदाः मणीमयाण्डजाः सुवर्णपर्य्याणे मणीमहाण्डजाः सुवर्णपर्य्याणमणीमयाण्डजास्तैस्तथा । **परितः**–सर्वतः । **अनुवेष्टितम्**–परिवारितम् ॥ ११२ ॥

**सपक्षभावात् प्रसरे सरेखतां, दिदृक्षुभिर्मङ्क्षुरजःकणच्छलात् ।**
**पदप्रसक्तैः सततं समन्वितं, जनस्य चेतोभिरिवाणिमाङ्कितैः ॥११३॥**

*अन्वयः*—*सपक्षभावात्, मङ्क्षु, प्रसरे, सरेखताम्, दिदृक्षुभिः, रजःकणच्छलात्, पदप्रसक्तैः, अणिमाङ्कितैः, जनस्य, चेतोभिः, सततम्, समन्वितम्, इव ॥११३॥*

**वृत्तिः**—**सपक्षभावात्**–पक्षैः पतत्रैः सहितः सपक्षस्तस्य भावः सपक्षभावस्तस्मात्तथा । यद्यपि अश्वस्य पक्षो लोकेऽप्रसिद्धस्तथापि चक्रिमाहात्म्यात्तदीयाश्वरत्नस्य तादृग्वेगेन नभोगमनशीलत्वात् सपक्षत्वमनुसन्धेयम् । विपक्षविरहाद्वेत्यपि बोध्यम् । **मङ्क्षु**–झगिति । **प्रसरे**–गमने । **सरेखताम्**–रेखा वैशिष्ट्यसूचकचिह्नविशेषस्तया सह वर्तते इति, यद्वा रेखा सौभाग्यादिसूचकलिपिविशेषस्तया सह वर्तत इति सरेखस्तस्य भावः सरेखता तां तथा । 'लेखा राज्यां लिपावपि' इत्यनेकार्थः । रलयोरैक्याद् 'रेखा' अपीतिबोध्यम्, अमरसुधायां तथोक्तेः । **दिदृक्षुभिः**–द्रष्टुमिच्छद्भिः । इवेतिशेषः । **रजःकणच्छलात्**–धूलिलेशव्याजतः । **पदप्रसक्तैः**–पादविलग्नैः । **अणिमाङ्कितैः**–अणोर्भावोऽणिमाऽणुत्वं तेन अङ्कितान्यङ्कितानि अणिमाङ्कितानि, तैस्तथा । सिद्धिविशेषाङ्कितैरिति वा । 'अणिमा लघिमा चैव, महिमा गरिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं, वशित्वञ्चाष्टसिद्धयः ।' इत्यमरः । **जनस्य**–लोकस्य । **चेतोभिः**–अन्तःकरणैः । **सततम्**–सन्ततम् । **समन्वितम्**–विशिष्टम्, संवलितमितियावत् । **इव**–उत्प्रेक्षायाम् । अपह्नुत्यनुप्राणितोत्प्रेक्षालङ्कारः । अयमाशयः, गगनाङ्गनगामि चक्रवर्तिनोऽश्वरत्नमवलोकयितुं समेषामपि जनानां चेतांसि समुत्सुकान्यासन्, धूलिकणव्याजेन तान्येवाश्वपदप्रसक्तान्यवलोक्यन्ते स्म ॥ ११३ ॥

**चलाचलप्रोथतया महीभुजे, निबोधयन्तं च सुगन्धिबोधने ।**
**चतुष्पदेभ्यः प्रणयेऽपि चाधिकं, स्वमश्ववर्गे पुरुषे सुखावहम् ॥११४॥**

**वृत्तिः—चतुष्पदेभ्यः**–चत्वारि पदानि चरणा येषां ते चतुष्पदाः पशुत्वजातिविशिष्टाः पशव इत्यर्थः, तेभ्यस्तथा, पशुभ्यः सकाशादिति यावत् । **सुगन्धिबोधने**–सुष्ठु शोभनो गन्धो घ्राणेन्द्रियजन्य-प्रत्यक्षविषयतामापन्नो गन्धाख्यो गुणविशेषो यस्य स सुगन्धिः, "बहुव्रीहिसमासः।" "सुपूत्युत्सुरभे-र्गन्धादिद् गुणे" ७।३।१४४। इत्यनेन इत्समासान्तः, शोभनगन्धवद्द्रव्यमित्यर्थः । तस्य बोधनं बोधो ज्ञानम् सुगन्धिबोधनम् तस्मिँस्तथा । च–पुनः । **प्रणये** स्नेहे । **अधिकम्**–अतिरिक्तम्, विलक्षणमिति यावत् । च–पुनः । **अश्ववर्गे**–अश्वस्य तुरङ्गमस्य वर्गः समूहोऽश्ववर्गस्तस्मिँस्तथा । अश्वानां मध्ये इति यावत् । **पुरुषे**–लोके जने इति यावत् । **सुखावहम्**–सुखं लोकोत्तरमानन्दमावहति करोतीति सुखावहस्तन्तथा । सौख्यजनकमिति यावत् । **स्वम्**–आत्मानम् । **चलाचलप्रोथतया**–चलाचलोऽति-चञ्चलः प्रोथ ओष्ठाग्रम् नासापुटं यस्य स चलाचलप्रोथस्तस्य भावः चलाचलप्रोथता तया तथा । 'प्रोथमश्वस्य नासिका' ४।३०९। इत्यभि० चि० । **महीभुजे**–महीं पृथ्वीं भुनक्ति पालयतीति महीभुक् तस्मै तथा । **निबोधयन्तम्**–ज्ञापयन्तम् ॥ ११४ ॥

## रवेरवेक्ष्याऽश्वगणे गतेर्भिदः, स्ववेगदर्पानिव वक्तुमुद्यतम् ।
## तदीयशिक्षाविधये वियत्कृत-क्रमं सिसृक्षुं त्वदसीयमान्द्यतः ॥११५॥

**अन्वयः**—*रवेः, अश्वगणे, गतेः, भिदः, अवेक्ष्य, स्ववेगदर्पान्, वक्तुम्, उद्यतम्, इव, तु, अदसीयमान्द्यतः तदीयशिक्षाविधये, वियत्कृतक्रमम्, सिसृक्षुम् ॥११५॥*

**वृत्तिः—रवेः**–सूर्य्यस्य । **अश्वगणे**–तुरङ्गमव्रजे । **गतेः**–गमनस्य । **भिदः**–भेदान् । प्रत्यहं भिन्नभिन्नगतिभेदानित्यर्थः । **अवेक्ष्य**–समालोक्य, विचार्य्य वा । **स्ववेगदर्पान्**–स्वस्य आत्मनो वेगो रयः स्ववेगस्तत्प्रयुक्ता दर्पा अहङ्काराः स्ववेगदर्पास्तान् तथा । **वक्तुम्**–कथितुम् । प्रतिपादयितुमिति यावत् । **उद्यतम्**–प्रस्तुतम् । **इव**–यथा । **तु**–पुनः । **अदसीयमान्द्यतः**–अमीषामश्वानामिदम् अदसी-यम् तच्च तन्मान्द्यम् जडता गतिमन्दता इति यावत् अदसीयमान्द्यम् तस्मात्तथा । **तदीयशिक्षाविधये**–तेषामश्वानामियं तदीया, सा चासौ शिक्षाऽभ्यासस्तदीयशिक्षा तस्या विधिर्विधानम्, तदीयशिक्षा-विधिस्तस्मै तथा । **वियत्कृतक्रमम्**–वियति आकाशे कृता क्रमाश्चरणा येन स वियत्कृतक्रमस्तन्तथा । आकाशोत्पतनयोग्यता शालिचरणवन्तम् । आत्मानमिति शेषः । **सिसृक्षुम्**–उत्पिपादयिषुम् । इवेति शेषः ॥ ११५ ॥

## क्व सूरसूतानुजधीः क्व मे प्रभा, द्युनाथजस्येत्यभिधातुमुत्सुकम् ।
## अलं गिरा वेद किलाऽयमाशयं,महाशयश्चेति विमृश्य मौनिनम् ॥११६॥

*अन्वयः*—द्युनाथजस्य, मे, सूरसूतानुजधीः, क्व, प्रभा, क्व, इति, अभिधातुम्, उत्सुकम्, च, गिरा, अलम्, महाशयः, अयम्, किल, आशयम्, वेद, इति, विमृश्य, मौनिनम् ॥११६॥

**वृत्तिः**—द्युनाथजस्य—दिव आकाशस्य नाथः स्वामी द्युनाथस्तस्माज्जातो द्युनाथजस्तस्य तथा, सूर्य्योत्पन्नस्येत्यर्थः । **मे**—मम, मल्लक्षणस्य शान्तिनाथीयतुरङ्गमस्येति यावत् । **सूरसूतानुजधीः**—सूरसूतस्य अरुणस्य अनुजोऽनुपश्चाज्जातः सूरसूतानुजः गरुडस्तस्य धीर्बुद्धिः सूरसूतानुजधीः, गरुडबुद्धिरित्यर्थः । **क्व**—कुत्र । **प्रभा**—कान्तिः । गरुडस्येत्यर्थः । **क्व**—कुत्र । **इति**—कथितम्, प्रकारद्वयम् । **अभिधातुम्**—वक्तुम् । **उत्सुकम्**—उन्मनस्कम् । **च**—पुनः । **गिरा**—वाण्या । **अलम्**—किमपि प्रयोजनम् नास्तीत्यर्थः । **महाशयः**—महान् विशाल आशयोऽभिप्रायो यस्य स महाशयः । **अयम्**—पुरोवर्ती भगवान् शान्तिनाथ इत्यर्थः । **किल**—निश्चयेन । **आशयम्**—अभिप्रायम् । मदीयमिति शेषः । **वेद**—जानाति । **इति**—इत्थम् । **विमृश्य**—विचार्य्य । **मौनिनम्**—मौनम् अभाषणम्, अद्वेषणमिति यावदस्त्यस्येति मौनी "अतोऽनेकस्वरादेः" ७।२।६॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः, तन्तथा ॥ ११६ ॥

**विजेतुमुच्चैःश्रवसं हयं हरे-र्भयादिवोच्चैर्ध्रुवमुल्लसत्पदम् ।**
**न वैमनस्यं घटते सगोत्रिणः, स्वयं हयस्येति च मौनमास्थितम् ॥११७॥**

*अन्वयः*—हरेः, उच्चैःश्रवसम्, हयम्, विजेतुम्, उल्लसत्पदम्, च, सगोत्रिणः, हयस्य, स्वयम्, वैमनस्यम्, न, घटते, इति, भयात्, इव, ध्रुवम्, उच्चैः, मौनम्, आस्थितम् ॥११७॥

**वृत्तिः**—**हरेः**—इन्द्रस्य । **उच्चैःश्रवसम्**—उच्चैः श्रवसी अस्य उच्चैःश्रवास्तन्तथा, इन्द्रस्याश्वमित्यर्थः 'उच्चैःश्रवा हयः' २।९०। इत्यभि० चि० । **हयम्**—अश्वम् । **विजेतुम्**—अभिभवितुम् । **उल्लसत्पदम्**—उत् उच्चैर्लसन्तौ विलसन्तौ शोभमानौ पदौ चरणौ यस्य स उल्लसत्पदस्तन्तथा । **च**—पुनः । **सगोत्रिणः**—समानं गोत्रम् नाम सगोत्रम्, तदस्त्यस्येति सगोत्री तस्य तथा । 'अथाह्वयोऽभिधा । गोत्रसंज्ञानामधेयाऽऽख्याऽऽह्वाऽभिख्याश्च नाम च २।१७४॥ इत्यभि० चि० । हरिरिति समानमुभयोरिन्द्रस्याश्वस्य च नामेति साधूक्तं सगोत्रिण इति । **हयस्य**—अश्वस्य । तस्येन्द्राश्वस्येति शेषः । **स्वयम्**—आत्मना । सगोत्रेणेत्यर्थः । द्वारेति शेषः । **वैमनस्यम्**—विरुद्धं प्रतिकूलं मनोऽन्तःकरणमस्येति विमनास्तस्य भावो वैमनस्यम् । विद्वेष इति यावत् । **न**—नहि । **घटते**—कल्पते, युज्यते इति यावत् । **इति**—अस्माद्धेतोः । **भयात्**—भीतेः, स्वबान्धवापमानजनितापराधभयादिति यावत् । **इव**—यथा । **ध्रुवम्**—निश्चयेन । **मौनम्**—अभाषणम् । अद्वेषणमिति यावत् । **आस्थितम्**—अवलम्बितम् । समाश्रितमिति यावत् ॥ ११७ ॥

**महारथस्याध्वनि चक्रवर्तिनः, परः प्रयाणश्रवणाददुद्रुवत् ।**
**अमंस्त तत्राशरणः शरण्यता–मरण्ययोगस्य निशां विशां दिशा ॥११८॥**

अन्वयः—महारथस्य, चक्रवर्तिनः, प्रयाणश्रवणात्, अध्वनि, परः अदुद्रुवत्, तत्र, विशाम्, दिशा, अशरणः, अरण्ययोगस्य, (च) निशाम्, शरण्यताम्, अमंस्त ॥११८॥

वृत्तिः—महारथस्य–महान् विशालो रथः स्यन्दनं यस्य सः महारथः, आत्मानं सारथिमश्वान् रक्षन योद्धा, तस्य तथा। चक्रवर्तिनः–चक्रं राष्ट्रं वर्तयति स्वातन्त्र्येण प्रवर्तयतीति चक्रवर्ती सार्वभौमस्तस्य तथा। भगवतः शान्तिनाथस्येति शेषः। प्रयाणश्रवणात्–प्रयाणस्य प्रस्थानस्य श्रवणमाकर्णनम् प्रयाणश्रवणम् तस्मात्तथा। अध्वनि–मार्गे, मार्ग एवेत्यर्थः। सर्वं वाक्यं सावधारणं भवतीति नियमात्। परः–शत्रुः। अदुद्रुवत्–प्रपलायिष्ट। तत्र–मार्गे। विशाम्–मनुष्याणाम्। दिशा–दिशया, मार्गेणेति लक्ष्योऽर्थः। अशरणः–नास्ति शरणं रक्षणं यस्य सोऽशरणः। अरण्ययोगस्य–अरण्ये कानने योगः सम्बन्धोऽरण्ययोगस्तस्य तथा, वनवासस्येत्यर्थः। च–पुनः। निशाम्–रात्रीणाम्। शरण्यताम्–रक्षणयोग्यताम्। अमंस्त–अवाबुध्यत, ज्ञातवानिति यावत् ॥११८॥

**हयं तमारुह्य जयं पुरस्थितं, परानपेक्षोद्वहनाद् यशःसितं ।**
**समन्यमानः प्लवमानमानसः, प्रमोदकामोदधियाऽविशद् वनम् ॥११९॥**

अन्वयः—प्लवमानमानसः, सः, परानपेक्षोद्वहनात्, यशःसितम्, तम्, हयम्, आरुह्य, जयम्, पुरस्थितम्, मन्यमानः, प्रमोदकामोदधिया, वनम्, अविशत् ॥११९॥

वृत्तिः—प्लवमानमानसः–प्लवमानम् विस्तीर्यमाणं मानसमन्तःकरणं यस्य स प्लवमानमानसः। सः–प्रसिद्धो भगवाञ्छान्तिनाथः। परानपेक्षोद्वहनात्–अपेक्षणम्–अपेक्षा, आवश्यकतेत्यर्थः। न अपेक्षाऽनपेक्षा परेषाम्, अन्येषाम्। परस्यान्यस्य वा अपेक्षा परानपेक्षा, तया उद्वहनं धारणम् परानपेक्षोद्वहनम् तस्मात्तथा। यशःसितम्–यशसा कीर्त्त्या सितो धवलो यशःसितस्तन्तथा। 'मालिन्यं व्योम्नि पापे यशसि धवलता वर्ण्यते हासकीर्त्योः' (सा. द. ७) इति विश्वनाथः। तम्–प्रसिद्धम्, तत्तद्गुणतयेति शेषः। हयम्–अश्वम्। आरुह्य–अधिरुह्य। जयम्–विजयम्। पुरःस्थितम्–अग्रे वर्तमानम्। मन्यमानः–अवबुध्यमानः। प्रमोदकामोदधिया–प्रमोदयतीति प्रमोदकः स चासावामोदो हर्षः परिमलो वा प्रमोदकामोदस्तस्य धीर्बुद्धिः प्रमोदकामोदधीः तया तथा। वनम्–काननम्। अविशत्– प्रविष्टः ॥११९॥

चमूचराणामतिचारुखेलनैः, परस्परप्रेरणवादिसादिनाम् ।
रदावदातांशुमिषादनीदृशां, बभौ विभुस्तत् पिबतां यशोऽन्तरे ॥१२०॥

अन्वय—*रदावदातांशुमिषात्, अनीदृशाम्, तत्, यशः, पिबताम्, अतिचारुखेलनैः, चमूचराणाम्, परस्परप्रेरणवादिसादिनाम्, अन्तरे, विभुः, बभौ ॥१२०॥*

वृत्तिः—रदावदातांशुमिषात्—अवदाताः शुक्लाश्च ते अंशवः किरणा अवदातांशवः, रदानाम्-दन्तानाम् अवदातांशवो रदावदातांशवस्तेषां मिषम्—व्याजो रदावदातांशुमिषम्, तस्मात्तथा। अनीदृशाम्—इमे स्वपक्षपातिन इव दृश्यन्ते इतीदृशो न ईदृशोऽनीदृशास्तेषामनीदृशाम् शत्रूणाम्। तत्-यशः—कीर्त्तिम्। पिबताम्—आददानानाम्, गृह्णतामिति यावत्। अतिचारुखेलनैः—अतिचारूणि अत्यन्तमनोहराणि च तानि खेलनानि क्रीडनानि अतिचारुखेलनानि तैस्तथा। चमूचराणाम्—चमूषु सेनासु चरन्ति विचरन्तीति चमूचरास्तेषान्तथा। परस्परप्रेरणवादिसादिनाम्—परस्परप्रेरणेन अन्योन्यप्रेरणया वदन्ति निगदन्ति तच्छीलाः परस्परप्रेरणवादिनस्ते च ते सादिनोऽश्वाद्यारोहिणः परस्परप्रेरणवादिसादिनस्तेषान्तथा। अन्तरे—मध्ये। विभुः—प्रभुः, भगवाञ्छान्तिनाथः। बभौ—शुशुभे ॥१२०॥

ददर्श तं सादिगणं समीरणै-र्द्विधाकृतस्पर्धनवर्धनं प्रभुः ।
प्रसृत्वरैर्वाजिबलैश्च सत्वरै-र्हसन्तमन्तर्बलमर्वतां रवेः ॥१२१॥

अन्वयः—*प्रभुः, समीरणैः, द्विधाकृतस्पर्धनवर्धनम्, सत्वरैः, च, प्रसृत्वरैः, वाजिबलैः, रवेः, अर्वताम्, बलम्, अन्तः, हसन्तम्, तम्, सादिगणम्, ददर्श ॥१२१॥*

वृत्तिः—प्रभुः—स्वामी, विभुर्वा भगवान् शान्तिनाथ इति यावत्। समीरणैः—पवनैः। द्विधाकृतस्पर्धनवर्धनम्—स्पर्धनम् स्पर्धा च वर्धनम्—छेदनञ्च स्पर्धनवर्धने द्विधाकृते द्विप्रकारविहिते स्पर्धनवर्धने यस्मिन् स द्विधाकृतस्पर्धनवर्धनस्तन्तथा। सत्वरैः—त्वरया जवेन सहितानि सत्वराणि तैस्तथा। च—पुनः। प्रसृत्वरैः—प्रसरणशीलैः। वाजिबलैः—वाजिनामश्वानाम् बलानि सामर्थ्यानि वाजिबलानि तैस्तथा। रवेः—सूर्य्यस्य। अर्वताम्—अश्वानाम् 'घोटकस्तुरगस्तार्क्ष्यस्तुरङ्गोऽश्वस्तुरङ्गमः। गन्धर्वोऽर्वासप्तिवीती वाहो वाजी हयो हरिः' ४।२९९। इत्यभि० चि०। बलम्—शक्तिम्। अन्तः—अन्तर्मनसि, अन्तःकरणावच्छेदेनेति यावत्। हसन्तम्—विहसन्तम्। तम्—शौर्यबलतया प्रसिद्धम्। सादिगणम्—अश्वारोह्यादिकदम्बकम्। ददर्श—दृष्टवान् ॥ १२१ ॥

सितत्विषश्चञ्चलतामुपेयुष-स्तुरङ्गरङ्गन्निवहस्य चास्यतः ।
श्रमात्पतत्फेनमिषादरेर्यशो-निपातनं मर्दनहेतु सोऽस्मरत् ॥१२२॥

अन्वयः—सः, सितत्विषः, च, चञ्चलताम्, उपेयुषः, तुरङ्गरङ्गन्निवहस्य, आस्यतः, श्रमात्, पतत्फेनमिषात्, अरेः, मर्दनहेतु, यशोनिपातनम्, अस्मरत् ॥१२२॥

वृत्तिः—सः-प्रसिद्धो भगवान् शान्तिनाथः। सितत्विषः-सिता शुक्ला त्विट् कान्तिर्यस्य स सितत्विट् तस्य तथा। च-पुनः। चञ्चलताम्-चलाचलताम्, चापल्यमिति यावत्। उपेयुषः-प्राप्तवतः। तुरङ्गरङ्गन्निवहस्य-रङ्गन् विलसन् चासौ निवहः समूहः रङ्गन्निवहः, तुरङ्गस्य अश्वस्य रङ्गन्निवहस्तुरङ्गरङ्गन्निवहस्तस्य तथा। आस्यतः-मुखात् वदनत इति यावत्। श्रमात्-परिश्रमात्। खेदविशेषादिति यावत्। बहुतरशरीरव्यापारजन्मा निःश्वासाङ्गसम्मर्दनिद्रादिकारणीभूतः खेदविशेषः श्रमः' इति जगन्नाथः। पतत्फेनमिषात्-पतन्तोऽधोदेशसंयोगमाश्रयन्तश्च ते फेना डिण्डीराः पतत्फेनास्तेषां मिषं व्याजः पतत्फेनमिषन्तस्मात्तथा डिण्डीरोऽब्धिकफः फेनः' ४।१४३। इत्यभि० चि०। अरेः-शत्रोः। मर्दनहेतु-मर्दनं पीडनम् पराजय इति यावत्। हेतुः कारणं यस्य तत्तथा। यशोनिपातनम्-यशसः कीर्तेर्निपातनम् विनाशः यशोनिपातनम्। अस्मरत्-स्मृतिविषयतामानयत्, अचिन्तयदिति यावत्॥१२२॥

**विधूनतो वैरियशोऽधुनाऽधुनाद्, मिषेण पुच्छस्य च केसरस्य च।**
**तदा तदाश्वस्य पदात् पदान्तर-स्पृशः समाश्वास्य जनानयं श्रमात् ॥१२३॥**

अन्वयः—अयम्, तदा, तदा, श्रमात्, पदात्, पदान्तरस्पृशः, जनान्, समाश्वास्य, विधूनतः, आश्वस्य, पुच्छस्य, च, केसरस्य, च, मिषेण, अधुना, वैरियशः, अधुनात् ॥१२३॥

वृत्तिः—अयम्-असौ, भगवान् शान्तिनाथः। तदा तदा-तस्मिन् तस्मिन् समये। श्रमात्-शरीरव्यापारजन्यखेदात्। पदात्-स्थानात्। 'स्थानं तु पदमास्पदम्' ।४।५४। इत्यभि० चि०। पदान्तरस्पृशः-अन्यत् अपरं पदम् स्थानम् पदान्तरम् 'मयूरव्यंसकादित्वात् समासः' पदान्तरं स्पृशन्ति भजन्ते इति पदान्तरस्पृशः, स्थानान्तरस्थानिति यावत्। जनान्-लोकान्। समाश्वास्य-सम्भाव्य। विधूनतः-कम्पमानस्य। आश्वस्य-अश्वस्य तुरङ्गमस्य अयम् आश्वस्तस्य तथा, अश्वसम्बन्धिनः। पुच्छस्य-लाङ्गूलस्य। च-पुनः। केसरस्य-बालस्य। च-पादपूरणे। मिषेण-व्याजेन। अधुना-सम्प्रति। वैरियशः-शत्रुकीर्त्तिम्। अधुनात्-अकम्पयत् ॥१२३॥

**प्रभोर्यशोऽपि प्रससार सर्वतः, क्षमातलं वाऽऽप्य नभस्तलं पुनः।**
**स्फुटं चलच्चामरयुग्मचिह्नने-र्बभूव रूपं तदखण्डपिण्डितम् ॥१२४॥**

अन्वयः—प्रभोः, यशः, अपि, सर्वतः, क्षमातलम्, प्रससार, पुनः, नभस्तलम्, वा, आप्य, चलच्चामरयुग्मचिह्नैः, तदखण्डपिण्डितम्, रूपम्, स्फुटम्, बभूव ॥१२४॥

वृत्तिः—प्रभोः–विभोः श्रीमतः शान्तिनाथस्येत्यर्थः। यशः–कीर्तिः। अपि–सम्भावनायाम् अव्ययम्। सर्वतः–परितः। क्षमातलम्–भूमण्डलम्। "सर्वोभयाऽभिपरिणा तसा" २।२।३५॥ इत्यनेन तसन्तसर्वशब्दयोगे द्वितीयाविभक्तिः। प्रससार–व्याप, व्याप्नोत, प्रकाशितमिति यावत्। पुनः–किञ्च। नभस्तलम्–गगनमण्डलम्। वा–वितर्के पादपूरणे वाऽव्ययम्। आप्य–प्राप्य। वस्तुतस्तु "वा आप्य" इत्येतत्पदद्वयस्थाने 'व्याप्य' इत्येव पाठः साधीयान् प्रतिभाति। चलच्चामरयुग्मचिह्नैः–चामरस्य बालव्यजनस्य युग्मम्–युगलम् चामरयुग्मम् चलत्–प्रचलत् विलसदिति यावच्चामरयुग्मम् चलच्चामरयुग्मम् तस्य चिह्नानि लक्षणानि चलच्चामरयुग्मचिह्नानि तैस्तथा। तदखण्डपिण्डितम्–अखण्डं सम्पूर्णं सकलमिति यावच्च तत्पिण्डं शरीरम् अखण्डपिण्डम् तत् सञ्जातमस्येत्यखण्डपिण्डितम् तस्य यशसः अखण्डपिण्डितम् सम्पूर्णशरीरितम् तदखण्डपिण्डितम्, प्रतिस्थानमखण्डतायोगात्। रूपम्–स्वरूपम्। स्फुटम्–व्यक्तम्। बभूव–अभवत् ॥ १२४ ॥

**विनोदसिद्धय स नुनोद सोदरं, गरुत्मतः स्वं पुरतोऽश्वमाशुगम् ।**
**सितातपत्रोद्भवदंशुमण्डलै–रनिह्नुवानं　निजवाजिराजताम् ॥१२५॥**

अन्वयः—सः, विनोदसिद्धयै, सितातपत्रोद्भवदंशुमण्डलैः, निजवाजिराजताम्, अनिह्नुवानम्, आशुगम्, गरुत्मतः, सोदरम्, स्वम्, अश्वम्, पुरतः, नुनोद ॥१२५॥

वृत्तिः—सः–प्रसिद्धः, भगवान् शान्तिनाथ इत्यर्थः। विनोदसिद्धयै–विनोदस्य आनन्दस्य सिद्धिर्निष्पत्तिर्विनोदसिद्धिस्तस्यै तथा। कौतूहलनिष्पत्तिहेतवे इति भावः। सितातपत्रोद्भवदंशुमण्डलैः–सितं श्वेतञ्च तदातपत्रं–छत्रम् सितातपत्रम् तस्मादुद्भवन्ति जायमानानि सितातपत्रोद्भवन्ति तानि च तान्यंशुभमण्डलानि प्रभाकदम्बकानि सितातपत्रोद्भवदंशुमण्डलानि तैस्तथा। निजवाजिराजताम्–वाजिनामश्वानाम् राजा प्रभुर्वाजिराजस्तस्य भावो वाजिराजता, निजस्य आत्मनो वाजिराजता निजवाजिराजता तान्तथा। अनिह्नुवानम्–अनपलपन्तम्। आशुगम्–आशु शीघ्रं गच्छतीत्याशुगस्तन्तथा। शीघ्रगामिनमित्यर्थः। गरुत्मतः–वैनतेयस्य, गरुडस्येति यावत्। सोदरम्–सदृशम्। स्वम्–आत्मीयम्। अश्वम्–तुरङ्गमम्। पुरतः–पुरः। नुनोद–प्रेरयामास। ॥ १२५ ॥

**अपि द्विजिह्वाभ्यवहारपौरुषे, रुषेव धिक्कारकरे गरुत्मति ।**
**हयेऽधिरूढश्च वसुन्धराधवः, पराजयायैव स–दानवद्विषः ॥१२६॥**

अन्वयः—*द्विजिह्वाभ्यवहारपौरुषे, अपि, गरुत्मति, रुषा, इव, धिक्कारकरे, हये, अधिरूढः सः, वसुन्धराधवः, दानवद्विषः, पराजयाय, एव ॥१२६॥*

वृत्तिः—**द्विजिह्वाभ्यवहारपौरुषे**—द्वे द्विसङ्ख्यके जिह्वे रसने येषान्ते द्विजिह्वाः सर्पास्तेषामभ्यवहारो भक्षणम् द्विजिह्वाभ्यवहारः स एव तस्माद्वा पौरुषम् पुरुषार्थो यस्य स द्विजिह्वाभ्यवहारपौरुषस्तस्मिँस्तथा। **अपि**—सम्भावनायाम्। **गरुत्मति**—गरुडे विष्णुवाहने इति यावत्। **रुषा**—क्रोधेन। **इव**—यथा। **धिक्कारकरे**—करोतीति करः धिक्कारस्य तिरस्कारस्य करो धिक्कारकरस्तस्मिँस्तथा। **हये**—अश्वे। **अधिरूढः**—समारूढः। **सः**—प्रसिद्धः। **वसुन्धराधवः**—वसुन्धराया पृथिव्या धवः पतिः स्वामी वसुन्धराधवः पृथ्वीपरिपालक इति यावत्। भगवान् शान्तिनाथ इति यावत्। [स]**दानवद्विषः**—द्वेष्टयप्रीतयतीति द्विट्, दानवानां दैत्यानाम् द्विट् दानवद्विट् कृष्णस्तस्य तथा, यद्वा सदा—सर्वदा, नवद्विषः अनवद्विषो वेति पदच्छेदः कार्यः। **पराजयाय**—पराभवाय। **एव**—अवधारणार्थकमव्ययम्। अभवदितिशेषः ॥ १२६ ॥

**स्फुटीकृता श्रीरमुनेन्द्रधन्वनो, मुखानुषक्तायतवल्गुवल्गया।**
**हयेन तत् किं न स चक्रभृज्जिनः, सहस्रनेत्राकृतिमान् भवेदहो ॥१२७॥**

अन्वयः—*अमुना, हयेन, मुखानुषक्तायतवल्गुवल्गया, इन्द्रधन्वनः, श्रीः, स्फुटीकृता, तत्, चक्रभृत् सः, जिनः, सहस्रनेत्राकृतिमान्, किम्, न, भवेत्, अहो ? ॥१२७॥*

वृत्तिः—**अमुना**—विप्रकृष्टतया दृश्यमानेन। **हयेन**—अश्वेन। **मुखानुषक्तायतवल्गुवल्गया**—आयता दीर्घा चासौ वल्गुः सुन्दरी आयतवल्गुः, 'शीतोष्णं जलम्' इत्यादाविव विशेषणयोरपि कथञ्चिद् परस्परं गुणप्रधानभावमनुसन्धाय विशेषणसमासः। मुखे—वदने अनुषक्ता लग्ना मुखानुषक्ता सा चासावायतवल्गुर्मुखानुषक्तायतवल्गुः। अत्रापि पूर्वोदीरितदिशा समासोऽनुसन्धेयः, मुखानुषक्तायतवल्गुश्चासौ वल्गा प्रग्रहः रश्मिरिति यावत्। मुखानुषक्तायतवल्गुवल्गा तया तथा कृत्वेतिशेषः। 'वल्गुः स्याच्छगले पुंसि, सुन्दरे चाभिधेयवत्' इति मेदिनी। रश्मौ वल्गाऽवक्षेपणी कुशा' ४।३१८। इत्यभि० चि०। **इन्द्रधन्वनः**—इन्द्रस्य शक्रस्य धन्व धनुरिन्द्रधन्वस्तस्य तथा। धन्वा तु मरुदेशे ना क्लीवं चापे स्थलेऽपि च' इति मेदिनी। **श्रीः**—शोभा। **स्फुटीकृता**—अस्फुटाऽव्यक्ता स्फुटा व्यक्ता कृतेति स्फुटीकृता, 'प्रागतत्तत्वे च्विः प्रत्ययः' प्रकटीकृतेति यावत्। भागवतोऽश्वः पुरन्दरधनुःशोभामादधादिति भावः। **तत्**—तस्माद्धेतोः। **चक्रभृत्**—चक्रं बिभर्ति इति चक्रभृत्। **सः**—प्रसिद्धः। **जिनः**—तीर्थकृत् भगवान् शान्तिनाथ इति यावत्। **सहस्रनेत्राकृतिमान्**—सहस्रं सहस्रसङ्ख्यकानि

नेत्राणि नयनानि यस्य स सहस्रनेत्रः इन्द्रः, तस्य आकृतिराकारः सहस्रनेत्राकृतिः साऽस्त्यस्येति सहस्रनेत्राकृतिमान् । किम्–कथम् । न–नहि । भवेत्–स्यात् । अहो–आश्चर्ये वितर्के वा ॥ १२७ ॥

**जिनो मनोभूविषयं स्वरूपतो, यमश्वमारुह्य जिगाय विस्मयात् ।**
**उपेयिवांसं प्रतिमल्लतां रय-स्मये जयात्तं मनसः स्मरेन्न कः ॥१२८॥**

अन्वयः—*जिनः, यम्, अश्वम्, आरुह्य, स्वरूपतः, मनोभूविषयम्, जिगाय, मनसः, जयात्, रयस्मये, प्रतिमल्लताम्, उपेयिवांसम्, तम्, विस्मयात्, कः, न, स्मरेत्* ॥१२८॥

वृत्तिः—**जिनः**–जयति रागद्वेषमोहानिति जिनोऽर्हन् भगवान् शान्तिनाथ इति यावत् । **यम्**–वर्णितप्रकारम् । यादृशमित्यर्थः । **अश्वम्**–तुरङ्गमम् । **आरुह्य**–अधिरुह्य, समाक्रम्येति यावत् । **स्वरूपतः**–स्वस्य आत्मनो रूपं सौंदर्य्यम् स्वरूपम् तस्मात्तथा । **मनोभूविषयम्**–मनसि भवतीति मनोभूः कामः ईदृशो विषयो गोचरो मनोभूविषयस्तन्तथा । **जिगाय**–अजैषीत्, जितवान् इति यावत् । **मनसः**–चित्तस्य अन्तःकरणस्येति यावत् । **जयात्**–विजयात्, मनःकर्मकविजयत इति यावत् । **रयस्मये**–रयस्य वेगस्य स्मयो गर्वः रयस्मयः तस्मिँस्तथा । "रूपधनविद्यादिप्रयुक्तात्मकोत्कर्षज्ञानाधीनपरावहेलनं गर्वः" इति जगन्नाथः । **प्रतिमल्लताम्**–प्रतिभटत्वम् । **उपेयिवांसम्**–प्राप्तवन्तम् । **तम्**–प्रसिद्धम्, अश्वमित्यर्थः । **विस्मयात्**–आश्चर्य्यात् । **कः**–को नाम जनः । **न**–नहि । **स्मरेत्**–स्मृतिपथमानयेत्, अपि तु सर्व एवेति भावः ॥ १२८ ॥

**विभुर्दधौ काञ्चन काञ्चनत्विषं, स्वकीयतन्वाऽद्भुततेजसा पुनः ।**
**तदा प्रभां वाहनमस्य तां रय-स्मये जितस्य प्रसभं गरुत्मतः ॥१२९॥**

अन्वयः—*विभुः, काञ्चन, काञ्चनत्विषम्, दधौ, पुनः, अस्य, वाहनम्, अद्भुततेजसा, स्वकीयतन्वा, तदा, रयस्मये, प्रसभम्, जितस्य, गरुत्मतः, ताम्, प्रभाम्, दधौ* ॥१२९॥

वृत्तिः—**विभुः**–विशेषेण भवतीति विभुर्व्यापकः, प्रभुरिति यावत् । **काञ्चन**–कामप्यनिर्वचनीयामित्यर्थः । **काञ्चनत्विषम्**–काञ्चनस्य सुवर्णस्य त्विट् कान्तिश्छविरिति यावत् काञ्चनत्विट् तान्तथा । **दधौ**–धारयामास, धृतवानिति यावत् । **पुनः**–किञ्च । **अस्य**–भगवतः शान्तिनाथस्य । **वाहनम्**–उह्यतेऽनेनेति वाहनम्, "वाह्याद्वाहनस्य" २।३।७२॥ इति सूत्रे निपातनादनटि दीर्घत्वम्, वहनमेव वा वाहनम् प्रज्ञादित्वात् स्वार्थे'ऽण्' प्रत्ययः । अश्व इति यावत् । **अद्भुततेजसा**–अद्भुतमाश्चर्य्यजनकं तेजः प्रतापो यस्यां साऽद्भुततेजास्तया तथा । **स्वकीयतन्वा**–स्वकीया स्वीया चासौ

तनुः वपुः स्वकीयतनुस्तया तथा । तदा–तस्मिन् समये । रयसमये–वेगगर्वे । प्रसभम्–हठात् । जितस्य–पराजितस्य । गरुत्मतः–गरुडस्य । ताम्–अनिर्वचनीयाम्, प्रसिद्धां वा । प्रभाम्–कान्तिम् । दधौ–दधार ॥ १२९ ॥

गच्छाधीश्वरहीरहीरविजयाम्नाये निकाये धियां,
भृत्यः श्रीविजयप्रभाख्यसुगुरोः श्रीमत्तपाख्ये गणे ।
शिष्यः प्राज्ञमणेः कृपादिविजयस्याशास्यमानाग्रणी–
श्चक्रे वाचकनाममेघविजयः शस्यां समस्यामिमाम् ॥१३०॥

( पूर्ववद्व्याख्येयोऽयं श्लोकः )

इति–वाचकप्रवरश्रीमेघविजयजिद्गणीश्वरविरचिते श्रीनैषधीयमहाकाव्यप्रथमसर्गपादपूर्तिस्वरूपे श्रीशान्तिनाथचरित्रे शासनसम्राट्सूरिचक्रचक्रवर्तितपागच्छाधिपतिभट्टारकाचार्यमहाराजाधिराज–श्रीविजयनेमिसूरीश्वरमहाराजपट्टालङ्कारशास्त्रविशारदकविरत्नपीयूषपाणिपूज्यपादाचार्यमहाराज–श्रीविजयामृतसूरीश्वरविरचित'विद्वद्विनोदिनी'नामवृत्तिविभूषिते–

## ॥ द्वितीयः सर्गः समाप्तः ॥

卐

## ॥ अथ तृतीयः सर्गः ॥

स सिन्धुजं शीतमहःसहोदरं, जयन् यशोभिर्विजयौजसां भरैः ।
पुरः प्रयाणं प्रति हस्तिनापुरं, चकार कारुण्यधियाऽरुणीभवन् ॥१॥

अन्वयः—*सः, विजयौजसाम्, भरैः, यशोभिः, सिन्धुजम्, शीतमहःसहोदरम्, जयन्, कारुण्यधिया, अरुणीभवन्, हस्तिनापुरम्, प्रति, पुरःप्रयाणम्, चकार ॥ १ ॥*

वृत्तिः—सः–प्रसिद्धो भगवान् शान्तिनाथः । विजयौजसाम्–विजयो जयश्च ओजांसि, तेषां तथा । भरैः–अतिशयैः । तैरुपलक्षितैरित्यर्थः । यशोभिः–कीर्तिभिः । सिन्धुजम्–सिन्धोः समुद्राज्जात उत्पन्नः सिन्धुजस्तन्तथा । शीतमहःसहोदरम्–शितं शैत्यं गुणसमाकलितम् महः किरणं यस्य स शीतमहश्चन्द्रस्तस्य सहोदरः सोदरभ्राता शीतमहःसहोदरः ऐरावणः, समुद्रोत्पन्नत्वात्, तन्तथा । जयन्–आक्रमन्, अधिक्षिपन्निति यावत् । यद्वा "जयन् यशोभिर्विजयौजसा भरैः" इति पाठं कुत्रत्य-

श्चिदनुसन्धाय-विजयौजसा-विजयतेजसा, भरैः अतिशयैः, यशोभिश्च महःसहोदरम्-सूर्य्यम्, सिन्धु-जम्-ऐरावणञ्च जयन् इत्येवमन्वेयम्। अत्र पक्षे शीतम् इति शान्ततया शनैः शनैरित्यर्थकं पुरःप्रयाण-विशेषणतयाऽनुसन्धेयम्। **कारुण्यधिया**–कारुण्यम् दया, सा च परदुःखापहरणेच्छा, तद्विशिष्टा धीर्बुद्धिः कारुण्यधीस्तया तथा। **अरुणीभवन्**–अनरुणोऽरक्तोऽरुणो भवन् सम्पद्यमानोऽरुणी भवन्, प्रागतत्त्वे 'च्विः' प्रत्ययः। **हस्तिनापुरम्**–गजाख्यराजधानीरूपां नगरीम् प्रति–उद्दिश्य। **पुरःप्रयाणम्**–प्रथमप्रस्थानम्। **चकार**–विदधौ, कृतवानिति यावत्॥ १॥

**नृपाधिरोहे परितो मनोहरं, हरन्तमुच्चैःश्रवसः श्रियं हयम्।**
**सकण्टकैस्तैः सुभटैः स्फुटीभवद्-घनाघनच्छायममंस्त हस्तिनम्॥२॥**

अन्वयः—*नृपाधिरोहे, परितः, मनोहरम्, उच्चैःश्रवसः, श्रियम्, हरन्तम्, हयम्, सकण्टकैः, तैः, सुभटैः, स्फुटीभवद्घनाघनच्छायम्, हस्तिनम्, अमंस्त॥ २॥*

**वृत्तिः—नृपाधिरोहे**–अधिरोहणमारोहणम्। अधिरोहः, नृपस्य–राज्ञोऽधिरोहो नृपाधिरोहः, कर्त्तरि षष्ठी, नृपकर्तृकारोहणमित्यर्थः, तस्मिँस्तथा। सतीतिशेषः। **परितः**–सर्वतः। **मनोहरम्**–रमणीकम्। **उच्चैःश्रवसः**–उच्चैः श्रवसी कर्णे यस्य स उच्चैश्रवाः इन्द्राश्वस्तस्य तथा। 'उच्चैःश्रवा हयः' इत्यभि० चि०। **श्रियम्**–शोभाम्। **हरन्तम्**–अपनयन्तम्, दूरीकुर्वन्तमिति यावत्। **हयम्**-अश्वम्। **सकण्टकैः**–कण्टकाः क्षुद्रशत्रवस्तैः सहिताः सकण्टकास्तैस्तथा। **तैः**–प्रसिद्धैः। **सुभटैः**–सु-शोभनाश्च ते भटा वीराः योधा इति यावत्। सुभटास्तैस्तथा। कृत्वेतिशेषः। **स्फुटीभवद्घनाघनच्छायम्**–स्फुटीभवन्निव प्रकटीभवन्निव घनाघनो मेघः स्फुटीभवद्घनाघनस्तस्यच्छाया कान्तिः दीप्तिर्वा यत्रासौ स्फुटीभवद्घनाघनच्छायस्तन्तथा। **हस्तिनम्**–मतङ्गजम्। **अमंस्त**–अवबुध्यत॥२॥

( पाठान्तरम् )

**रिपूरगाणां विषये विषच्छिदे, हरन्तमुच्चैःश्रवसः श्रियं हयम्।**
**सवै-नते(ऽ)यं तनुमन्तमन्तरा, नृपे प्रसादात् प्रतिपादयन् ययौ॥२॥**

**अन्वयः**—*सः, रिपूरगाणाम्, विषच्छिदे, विषये, उच्चैःश्रवसः, श्रियम्, हरन्तम्, अयम्, तनुमन्तम् अन्तरा, हयम्, वै, नते, नृपे, प्रसादात्, प्रतिपादयन्, ययौ॥ २॥*

**वृत्तिः—सः**–प्रसिद्धः, चक्री, शान्तिनाथ इति यावत्। **रिपूरगाणाम्**–रिपवः शत्रव उरगाः सर्पा इव रिपव एव वा उरगा, रिपूरगास्तेषान्तथा। "उपमितं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२॥ इत्यनेनोपमितसमासः। अन्ये च "मयूरव्यंसकेत्यादयश्च" ३।१।११६॥ इत्यनेन रूपकसमासः। रूपको-

पमयोः संसृष्टिश्चालङ्कारः । "मिथोऽनपेक्षया तेषां स्थितिः संसृष्टिरुच्यते" इति विश्वनाथः । **विषच्छिदे**—छेदनं छिदा, विषस्य गरलस्य 'अहंकारस्येति यावत् । छिदा यत्र स विषच्छिदस्तस्मिँस्तथा । **विषये**—देशे । **उच्चैश्रवसः**—इन्द्राश्वस्य । **श्रियम्**—शोभाम् । **हरन्तम्**—अपनयन्तम् । दूरीकुर्वन्तमिति यावत् । **अयम्**—अयः शुभावहभाग्यमस्त्यस्येत्ययः । "अभ्रादिभ्यः" ७।२।४६।। इत्यनेन मत्वर्थे 'अ' प्रत्ययः । 'अयः शुभावहो विधि'रित्यमरः । **तनुमन्तम्**—मूर्तिमन्तम् । ( तम्—प्रसिद्धं निजवाहनतयाऽश्वम् ) **अन्तरा**—विना । तमश्वं परित्यज्येत्यर्थः । **हयम्**—अश्वम् । **वै**—निश्चयेन । **नते**—नम्रीभूते, अधिकृते इति यावत् । **नृपे**—राज्ञि, राजगणे वा जात्यैकत्वविवक्षया । **प्रसादात्**—प्रसन्नतातः । प्रसादं प्रपद्य वा "गम्ययपः" २।२।७४।। इति पञ्चमी । **प्रतिपादयन्**—ददत् । **ययौ**—जगाम ।। २ ।।

## जयेन दीप्तः स निजाङ्गजन्मना, पुनर्जयन्त्या सुरसेनयान्वितः ।
## जिताखिलक्ष्माभृदनल्पलोचन-श्रिया तदैन्द्रया रुरुचे विरोचनः ।।३।।

अन्वयः—*निजाङ्गजन्मना, जयेन, दीप्तः, पुनः, जयन्त्या, सुरसेनया, अन्वितः, जिताखिलक्ष्माभृत् , सः, तदा, ऐन्द्रया, अनल्पलोचनश्रिया, विरोचनः, रुरुचे ॥ ३ ॥*

वृत्तिः—**निजाङ्गजन्मना**—निजमात्मीयञ्च तदङ्गम् शरीरावयवः बाहुरित्यर्थः । निजाङ्गम् ,तस्माज्जन्मोत्पत्तिर्यस्य स निजाङ्गजन्मा, तेन तथा । निजबाहुप्रतापार्जितेनेति यावत् । **जयेन**—विजयेन । **दीप्तः**—दीप्तिमान् । देदीप्यमान इति यावत् । **पुनः**—किञ्च । **जयन्त्या**—विजयशालिन्या । **सुरसेनया**—देववाहिन्या । **अन्वितः**—विशिष्टः । **जिताखिलक्ष्माभृत्**—जिताः पराजिताः, अखिलक्ष्माभृतः समस्तनृपतयो येन स जिताखिलक्ष्माभृत् । **सः**—प्रसिद्धः, भगवान् शान्तिनाथ इति यावत् । **तदा**—तस्मिन् समये । **ऐन्द्रया**—इन्द्रस्येयम् ऐन्द्री तथा तया । **अनल्पलोचनश्रिया**—न अल्पानि स्तोकानि अनल्पानि तानि लोचनानि नयनानि यस्य सोऽनल्पलोचनस्तस्य श्रीः शोभा अनल्पलोचनश्रीस्तया तथा । **विरोचनः**—विरोचनः सूर्य्य इव विरोचनः । लुप्तोपमा । **रुरुचे**—शुशुभे ।। ३ ।।

## सहस्रदेवैः कृतसेवयेव यो-ऽश्वरत्नमासीद् बहुरत्नभूषणैः ।
## पट्टकृताराात्रिकमुच्चशासन-स्तमारुरोह क्षितिपाकशासनः ।।४।।

अन्वयः—*यः, सहस्रदेवैः, कृतसेवया, इव, बहुरत्नभूषणैः, अश्वरत्नम् , आसीत् , उच्चशासनः, क्षितिपाकशासनः, पट्टकृताराात्रिकम् , तम् , आरुरोह ॥ ४ ॥*

वृत्तिः—**यः**—वर्णितप्रकारोऽश्वः । **सहस्रदेवैः**—सहस्रं सहस्रसङ्ख्याकाः, देवाः सुराः सहस्रदेवास्तैस्तथा । चक्रिणो रत्नस्य यक्षसहस्राधिष्ठितत्वात् । **कृतसेवया**—कृता विहिता सेवा शुश्रूषा

कृतसेवा तया तथा । इव–यथा । बहुरत्नभूषणैः–रत्नानां मणीनां भूषणान्यलङ्काराणि रत्नभूषणानि, बहूनि च तानि रत्नभूषणानि बहुरत्नभूषणानि तैस्तथा । अश्वरत्नम्–तुरङ्गमश्रेष्ठः । आसीत्–अभवत् । उच्चशासनः–उच्चमुन्नतम् शासनमनुशासनम्, साम्राज्यमिति यावद्यस्य स उच्चशासनः । क्षितिपाकशासनः–पाकम् तन्नामकमसुरं शास्तीति पाकशासनः इन्द्रः, क्षितेः पृथिव्याः पाकशासनः क्षितिपाकशासनः, भगवान् शान्तिनाथः । पटूकृतारात्रिकम्–पटूकृतं नैरुज्यार्थं सम्पादितरात्रिकम् नीराजना यस्य स पटूकृतारात्रिकस्तन्तथा । तम्–प्रसिद्धम्, अश्वमिति यावत् । आरुरोह–अधिरुरोह, आरूढवानिति यावत् ॥ ४ ॥

**निजा मयूखा इव तीक्ष्णदीधितिं, सरित्प्रवाहा इव पाथसां निधिम् ।**
**विरेजिरे राजसमाजराजयो, जयोर्जितात् तं सृतसङ्गता गताः ॥५॥**

अन्वयः—*तीक्ष्णदीधितिम्, निजाः, मयूखाः, इव, पाथसाम्, निधिम्, सरित्प्रवाहाः, इव, जयोर्जितात्, सृतसङ्गताः, तम्, गताः, राजसमाजराजयः, विरेजिरे ॥ ५ ॥*

वृत्तिः—तीक्ष्णदीधितम्–तीक्ष्णा तीव्रा दीधितिः गभस्तिः किरणमिति यावद्यस्य स तीक्ष्णदीधितिः सूर्यस्तन्तथा । निजाः–स्वीयाः । मयूखाः–किरणानि । इव–यथा । पाथसाम्–जलानाम् । निधिम्–आकरम् । समुद्रमिति यावत् । सरित्प्रवाहाः–नदीधाराः, तदीयवेगा वा । इव–यथा । तथेति शेषः । जयोर्जितात्–ऊर्जितपदस्यात्र भावप्रधानत्वात्, जयेन विजयेन ऊर्जितं बलशालित्वम् जयोर्जितम् जयोर्जितत्वमित्यर्थस्तस्मात्तथा । विजयेन बलशालित्वाद्धेतोरिति यावत् । सृतसंगताः–अनुसृतसङ्गतयः, मिथः समुदिता इति यावत् । राजसमाजराजयः–राज्ञां नृपतीनां समाजा निवहाः राजसमाजास्तेषां राजयः श्रेणयो राजसमाजराजयः । तम्–प्रसिद्धम्, भगवन्तं शान्तिनाथमिति यावत् । गताः–प्राप्ताः । सन्त इति शेषः । विरेजिरे–शुशुभिरे ॥ ५ ॥

**निरीक्ष्य केचिच्चतुराः पुराधिपाः, स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।**
**स्वतोऽपि विश्वम्भरमेव मानसे, स्मृतं दधानाश्चरणौ प्रपेदिरे ॥६॥**

अन्वयः—*चतुराः, केचित्, पुराधिपाः, स्फुटारविन्दाङ्कितपाणिपङ्कजम्, ( तम् ) निरीक्ष्य, स्वतः, मानसे, अपि, स्मृतम्, विश्वम्भरम्, एव, दधानाः, चरणौ, प्रपेदिरे ॥ ६ ॥*

वृत्तिः—चतुराः–निपुणाः । केचित्–अनिर्दिष्टनामानः केचन । पुराधिपाः–पुरस्य नगरस्य अधिपा अध्यक्षास्तथा । स्फुटारविन्दाङ्कितपाणिपङ्कजम्–स्फुटं विकसितञ्च तदरविन्दं कमलम् स्फुटा-

रविन्दम् तेन अङ्कितं पाणिपङ्कजम् करकमलम् यस्य स स्फुटारविन्दाङ्कितपाणिपङ्कजस्तन्तथा। तम्-प्रसिद्धं भगवन्तं शान्तिनाथम्। **निरीक्ष्य**-समवलोक्य। **स्वतः**-अनायासेन। **मानसे**-अन्तःकरणे। **अपि**-सम्भावनायाम्। एकसम्बन्धिज्ञानाधीनतया। **स्मृतम्**-स्मृतिपथमानीतम्। **विश्वम्भरम्**-विश्वं भुवनं बिभर्ति इति विश्वम्भरस्तन्तथा। **एव**-इव। **दधानाः**-धारयन्तः। **चरणौ**-पादौ। **प्रपेदिरे**-प्रापुः, समाशिश्रियुरिति यावत् ॥ ६ ॥

**पथे चलन्तं यदि वा स्थितं रथे, तथेति तस्यैव मनोरथेरिताः।**
**तमश्ववारा जवनाश्वयायिनं, वने जने वा प्रधने निषेविरे ॥७॥**

अन्वयः—*इति, तस्य, एव, मनोरथेरिताः, अश्ववाराः, पथे, चलन्तम्, यदि वा, रथे, तथा, वने, जने, वा, प्रधने, स्थितम्, जवनाश्वयायिनम्, तम्, निषेविरे ॥ ७ ॥*

**वृत्तिः**—**इति**-एवं प्रकारेण। **तस्य**-भगवतः शान्तिनाथस्य। **एव**-अवधारणार्थकमव्ययम्। **मनोरथेरिताः**-मनोरथैरभिलाषैरीरिताः प्रेरिता मनोरथेरिताः। **अश्ववाराः**-अश्वं वृण्वन्ति वारयन्तीति वा अश्ववारा अश्वारोहाः। **पथे**-मार्गे। **चलन्तम्**-विचरन्तम्। **यदि वा**-अव्ययसमुच्चयोऽयमथवेत्यर्थे। **जने**-लोकसमुदये। **वा**-अथवा। **प्रधने**-युद्धे। **स्थितम्**-अवस्थितम्। **जवनाश्वयायिनम्**-जवनो वेगवाँश्चासावश्वस्तुरङ्गमो जवनाश्वस्तेन याति गच्छति तच्छीलो जवनाश्वयायी तन्तथा। "अजातेः शीले" ५।१।१५४। इत्यनेन तच्छीलेऽर्थे 'णिन्' प्रत्ययः। **तम्**-प्रसिद्धं भगवन्तमिति यावत्। **निषेविरे**-समाशिश्रियिरे, समाश्रितवन्त इत्यर्थः ॥ ७ ॥

**स्थिते प्रभौ स्थैर्यधियश्चलाशये, नृपेऽचलायाः प्रभवश्चलाचलाः।**
**परं शयानेऽप्यशयालवोऽद्भुतात्, प्रकाशरूपा मनुजेशमन्वयुः ॥८॥**

अन्वय—*नृपे, प्रभौ, स्थिते, (सति) स्थैर्यधियः, चलाशये, अचलायाः, प्रभवः, चलाचलाः, परम्, शयाने, अपि, अशयालवः, ( अत एव ) अद्भुतात्, प्रकाशरूपाः, ( सन्तः ) मनुजेशम्, अन्वयुः ॥ ८ ॥*

**वृत्तिः**—**नृपे**-राज्ञि। **प्रभौ**-स्वामिनि, नायके इति यावत्। **स्थिते**-स्थितिमासादिते, गतिविरहङ्गत इति यावत्। **स्थैर्यधियः**-स्थिरतामतयः, स्थिरतां विदधत इति यावत्। **चलाशये**-चले चलने गमन इति यावत्। आशयोऽभिप्रायो यस्य स चलाशयस्तस्मिँस्तथा। चलित इति यावत्। (सति) **अचलायाः**-स्थिरायाः, पृथिव्या इति यावत्। **प्रभवः**-स्वामिनः राजान इति यावत्। **चलाचलाः**-अतिशयेन चलनक्रियावन्तः। **परम्**-अत्यन्तम्। **शयाने**-निद्रामापन्ने। **अपि**-सम्भावनायाम्।

अशयालवः-अनिद्रालवः, निद्रामलभमाना इति यावत् । (अतएव) अद्भुतात्-अद्भुततः । प्रकाशरूपाः-प्रकाशस्वभावाः । बाह्यदीपप्रकाशतो विलक्षणधर्मयुक्तत्वादेतेऽद्भुतप्रकाशरूपा इति । (सन्तः) राजान इति शेषः । मनुजेशम्-नरेन्द्रम् श्रीशान्तिनाथम् । अन्वयुः-अन्वगच्छन् यथा रघुवंशे कविः कालिदासः 'स्थितः स्थितामुच्चलितः प्रयातां, निषेदुषीमासनबन्धधीरः । जलाभिलाषी जलमाददानां, छायेव तां भूपतिरन्वगच्छत्' इति दिलीपनरेश्वरविहितनन्दिनीसमनुगमनमवर्णयत्तथैवात्रापि परं विच्छित्येति विशेषः । अत्र विरोधाभासध्वनिर्विभावना चालङ्कारः ॥ ८ ॥

**चलन्नलंकृत्य महारयं हयं, स शक्रवच्चक्रधरो धराधरान् ।**
**प्रकम्पयञ्शेषविशेषभीतये, तयेह जज्ञे गजवाजिसेनया ॥९॥**

अन्वयः—*महारयम्, हयम्, अलङ्कृत्य, चलन्, शक्रवत्, धराधरान्, प्रकम्पयन्, चक्रधरः, सः, इह, तया, गजवाजिसेनया, शेषविशेषभीतये, जज्ञे ॥ ९ ॥*

वृत्तिः—महारयम्-महान् अतिशायितो रयो वेगो यस्मिन स महारयस्तन्तथा । हयम्-अश्वम् । अलङ्कृत्य-अवस्थानेन संभूष्य । चलन्-विचरन् । शक्रवत्-इन्द्र इव । धराधरान्-धरन्तीति धराः, धरायाः पृथिव्या धराः पर्वतास्तांस्तथा । प्रकम्पयन्-प्रचलयन् । चक्रधरः-चक्री । सः-प्रसिद्धः, भगवान् शान्तिनाथ इति यावत् । इह-अस्मिन् भूमण्डले इति यावत् । तया-प्रसिद्धया, स्वीययेति शेषः । गजवाजिसेनया-गजा हस्तिनश्च वाजिनश्च गजवाजिनस्तद्विशिष्टा सेना वाहिनी गजवाजिसेना तया तथा । शेषविशेषभीतये-शेषस्य शेषनागस्य फणामण्डलनिहितसम्पूर्णभूमण्डलस्य अनन्तस्येतियावत्, विशेषभीतिरत्यन्तभयम्, शेषविशेषभीतिस्तस्यै तथा । जज्ञे-जातः ॥ ९ ॥

**करेण रेणोः स्वशिरस्यहो धृतात्, स्ववाहवाहोचितवेशपेशलः ।**
**जगाद सादी गजपालबालकं, करोत्ययं तत्समलं परालकम् ॥१०॥**

अन्वयः—*स्ववाहवाहोचितवेशपेशलः, सादी, गजपालबालकम्, जगाद, अयम्, करेण, स्वशिरसि, धृतात्, रेणोः, परालकम्, समलम्, करोति, तत्, अहो ॥ १० ॥*

वृत्तिः—स्ववाहवाहोचितवेशपेशलः-स्वस्य आत्मनो वाहोऽश्वः स्ववाहः स एव वाहो वाहनम् स्ववाहवाहस्तस्य उचित उपयुक्तः स्ववाहवाहोचितः स चासौ वेशोऽलङ्कारादिः स्ववाहवाहोचितवेशस्तेन पेशलो रमणीयस्तथा । यद्वा-वाहान् अश्वान् वाहयति प्रेरयतीति वाहवाहोऽश्ववारः स्वस्य वाहवाहः स्ववाहवाहस्तस्योचितो यो वेशस्तेन पेशलस्तथा । अथवा-स्वस्य वाहोऽश्वः स्ववाहस्तस्य वाहः सञ्चारणम् स्ववाहवाहस्तत्र उचितो यो वेशो नेपथ्यम्, तेन पेशलस्तथा वेषार्थको

वेशशब्दोऽपि, 'विशति चेतः' इत्यन्ये तालव्यशमाहुरित्यभि० चि० टीकावचनात् ३।२९९। सादी—अश्ववारः । गजपालबालकम्—गजान् हस्तिनः पालयति रक्षयतीति गजपालस्तस्य बालको गजपालबालकस्तन्तथा । जगाद—उक्तवान् । किमुक्तवानित्याह । अयम्—प्रत्यक्षविषयो गजः । करेण—शुण्डादण्डात्मना हस्तेन । स्वशिरसि—निजमस्तके । धृतात्—अवस्थापितात् । रेणोः—धूलेः । परालकम्—परस्यान्यस्य अलकः—चूर्णकुन्तलः वेणी वा परालकस्तन्तथा । समलम्—मलेन मालिन्येन सहितः समलो मलीनस इत्यर्थस्तन्तथा । करोति—विदधाति सम्पादयति । तत्—शुण्डादण्डकरणकस्वमस्तकावस्थापितरेणुजनितान्यदीयचूर्णकुन्तलमालिन्यसम्पादनमित्यर्थः । अहो—आश्चर्यजनकम् ॥ १० ॥

( पाठान्तरम् )

**कदाप्ययं पट्टगजे रजन् क्वचित्, स्ववाहवाहोचितवेशपेशलः ।**
**सुखासने वा नरवाहने स्थितो, द्रुतं ययौ चित्तनिलीनकौशलः ॥१०॥**

अन्वयः—*अयम् कदापि, पट्टगजे, रजन्, क्वचित्, स्ववाहवाहोचितवेशपेशलः, वा, सुखासने, नरवाहने, स्थितः, चित्तनिलीनकौशलः, ( सन् ) द्रुतम्, ययौ ॥१०॥*

वृत्तिः—अयम्—सर्वसामर्थ्यसमर्थो भगवान् शान्तिनाथ इत्यर्थः । कदापि—कस्मिँश्चिद् समये पट्टगजे—प्रधानमतङ्गजे । रजन्—अनुरागमादधत् । क्वचित्—कुत्रापि । स्ववाहवाहोचितवेशपेशलः—वाहनीभूतनिजतुरङ्गमोचितालङ्कारमनोहरः । पदच्छेदः समासादिर्वा पूर्वश्लोके द्रष्टव्यः । वा—अथवा । सुखासने—सुखेनानन्देन आस्यत उपविश्यतेऽत्रेति सुखासनम्, तस्मिँस्तथा । नरवाहने—नरैर्मानवैः कल्पितम् नरकल्पितम्, तच्च तद्वाहनम् नरवाहनम्, तस्मिँस्तथा । स्थितः—अवस्थितः । चित्तनिलीनकौशलः—चित्ते मानसेऽन्तःकरण इति यावत् । निलीना अन्तर्हिता कौशला अयोध्या यस्य स तथा अयोध्यां गन्तुमुत्सुक इति यावत् । 'साकेतं कोसलाऽयोध्या' ४।४९॥ इति अ० चि० । ( सन् ) द्रुतम्—शीघ्रम् । ययौ—जगाम ॥ १० ॥

**मृगाक्षिलक्षैः समवेक्ष्ययं चलन्, बलादतुच्छोच्छलदध्वरेणुभिः ।**
**प्रमोदनिष्पन्दतराक्षिपक्ष्मभि-र्निरुद्धमानेक्षणमप्यतिक्षणात् ॥११॥**

अन्वयः—*चलन्, अयम्, मृगाक्षिलक्षैः, बलात्, अतुच्छोच्छलदध्वरेणुभिः, प्रमोदनिष्पन्दतराक्षिपक्ष्मभिः, निरुद्धयमानेक्षणम्, अपि, अतिक्षणात्, समवेक्षि ॥११॥*

वृत्तिः—चलन्—मध्ये मार्गं गच्छन् । अयम्—भगवाञ्छान्तिनाथः । मृगाक्षिलक्षैः—मृगाक्षीणां

मृगनयनानां लक्षाणि मृगाक्षिलक्षाणि तैस्तथा । अपरिमितभिर्मृगलोचनाभिर्ललनाभिरिति यावत्, लक्षपदस्यानन्तोपलक्षकत्वात् । बलात्-हठात् । अतुच्छोच्छलदध्वरेणुभिः-अतुच्छा अक्षुद्राश्चोच्छलन्त उद्गच्छन्तः अतुच्छोच्छलन्तः अध्वरेणवो मार्गधूलयो येषु तानि अतुच्छोच्छलदध्वरेणूनि तैस्तथा । प्रमोदनिष्पन्दतराक्षिपक्ष्मभिः-अक्ष्णोर्नयनयोः पक्ष्माणि रोमाणि अक्षपक्ष्माणि प्रमोदेन अतिशयिताऽऽनन्देन निस्पन्दतराणि अत्यन्तक्रियाशून्यानि प्रमोदनिस्पन्दतराणि तानि तान्यक्षिपक्ष्माणि प्रमोदनिस्पन्दतराक्षिपक्ष्माणि तैस्तथा । निरुध्यमानेक्षणम्-निरुध्यमाने ईक्षणे नयने यस्मिन् कर्मणि तन्निरुध्यमानेक्षणम् तद्यथा स्यात्तथा । अपि-सम्भावनायाम् । अतिक्षणात्-महोत्सवात् 'अथोत्सवे, महः-क्षणोद्धवोद्धर्षाः' ६।१४४। इत्यभि० चि० । समवेक्षि-समवलोकि अदर्शीति यावत् ॥ ११ ॥

**स वन्द्यमानोऽप्यनवद्यधीर्नृपैः, कृपाणपाणिः कृपणैर्निजौजसा ।**
**पदं दधानो न मदं मनागयं, व्यलोकि लोकैर्नगरालयैर्न लः ॥१२॥**

अन्वयः—*अनवद्यधीः, कृपाणपाणिः, निजौजसा, कृपणैः, नृपैः, वन्द्यमानः, पदम्, दधानः, अपि, मनाक्, मदम्, न, (दधानः,) सः, अयम्, नगरालयैः, लोकैः, लः, न, व्यलोकि ॥ १२ ॥*

**वृत्तिः—अनवद्यधीः**-अवद्यम्, पापम्, तन्न विद्यते यत्रासावनवद्या निष्पापा धीर्बुद्धिर्यस्य सोऽनवद्यधीः । **कृपाणपाणिः**-कल्पते इति कृपाणः खड्गः, स पाणौ हस्ते यस्य स कृपाणपाणिः इति व्यधिकरणपदबहुव्रीहिसमासः । **निजौजसा**-निजं स्वीयमोजो बलं निजौजस्तेन तथा । **कृपणैः**-दुर्विधैः दीनैरित्यर्थः । **नृपैः**-राजभिः । **वन्द्यमानः**-स्तूयमानः, पूज्यमान इति यावत् । **पदम्**-आस्पदम्, प्रतिष्ठामिति यावत् 'स्थानं तु पदमास्पदम्' ४।५४। इत्यभि० चि० । "आस्पदं प्रतिष्ठायाम्" इति पाणिनीयसूत्रञ्च । **दधानः**-धारयन्, अधिगच्छन्निति यावत् । **अपि**-सम्भावनायाम् । **मनाक्**-ईषत् किञ्चिदपीत्यर्थः । **मदम्**-गर्वम् । जगन्नाथेन तु "मद्याद्युपयोगजन्मा उल्लसिताख्यः शयनहसितादिहेतुर्मदः" रूपधनविद्यादिप्रयुक्ताऽऽत्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः" इति तयोर्भेद ऊरीकृतः । परन्तु तत्र व्यभिचारिभावतया भेदोपादानेऽपि प्रकृते मदपदस्य दोषपरतया गर्वानतिरेक एवाङ्गीकर्तव्यः । **न**-नहि । (दधानः) **सः**-प्रसिद्धः । **अयम्**-भगवाञ्छान्तिनाथः । **नगरालयैः**-नगरे पुरे आलयो वसतिर्येषान्ते नगरालयास्तैस्तथा । नगरवासिभिरित्यर्थः । **लोकैः**-मानवैः जनैरिति यावत् । **लः**-इन्द्रः, "अयमेवास्ति इन्द्रो नास्मात् परः कोऽपीन्द्रः" इत्येवम् । **न**-नहि । **व्यलोकि**-अदर्शि । अपि तु व्यलोक्येव । नञः काकर्थकत्वात् ॥ १२ ॥

**क्षणादथैष क्षणदापतिप्रभः, प्रभानुसन्धानकरः स्वमण्डलैः ।**
**अनीत्यधर्मादिषु हानिकृद्ययौ, नरैः परं गीतयशाः सकिन्नरैः ॥१३॥**

अन्वयः—अथ, क्षणात्, क्षणदापतिप्रभः, स्वमण्डलैः, प्रभानुसन्धानकरः, अनीत्यधर्मादिषु, हानिकृत्, एषः, सकिन्नरैः, नरैः परम्, गीतयशा, (सन्) ययौ ॥ १४ ॥

वृत्तिः—अथ–अनन्तरम् । क्षणात्–उत्सवाद्धेतोः । क्षणदापतिप्रभः–क्षणमुत्सवं ददातीति क्षणदा रात्रिस्तस्याः पतिर्वल्लभः प्रिय इति यावत् । क्षणदापतिश्चन्द्रस्तस्य प्रभा कान्तिरिव प्रभा कान्तिर्यस्य स क्षणदापतिप्रभः "उष्ट्रमुखादयः" ३।१।२३। इत्यनेन उपमानसरूपपदलोपविशिष्टबहुव्रीहिसमासो निपात्यते । स्वमण्डलैः–स्वस्य आत्मनो मण्डलानि समूहाः स्वमण्डलानि तैस्तथा । प्रभानुसन्धानकरः–प्रभया कान्त्या अनुसन्धानमनुभवो यस्य स प्रभानुसन्धानः, तादृशः करो हस्तो बलिर्वा यस्य स तथा । अनीत्यधर्मादिषु–अनीतिरन्यायोऽत्याचार इति यावत्, अनीतिश्चाधर्म पुण्याभावः पापमिति यावत् च अनीत्यधर्मौ तावादिः प्रधानं येषु ते अनीत्यधर्मादयः । पापानुबन्धिनो विषयास्तेषु तथा । हानिकृत्–हानिं न्यूनतां करोतीति हानिकृत् । अनीत्यधर्मादिष्वित्यत्र षष्ठ्यर्थे सप्तमीं प्रकल्प्य तेषां हानिकृत् निवारक इत्यर्थोऽनुसन्धेयः । एषः–अयम्, भगवान्शान्तिनाथ इति यावत् । सकिन्नरैः–किन्नरा देवयोनिविशेषास्तैः सहिताः सकिन्नरास्तैस्तथा । नरैः–मानवैः । परम्–अतिशयेन । गीतयशाः–गीतं गानक्रिया विषयीकृतं यशः कीर्तिर्यस्य स तथा । (सन्) ययौ–जगाम ॥ १३ ॥

**इतस्ततो द्विड्नगरप्रभञ्जनात्, प्रभञ्जनाध्येयजवेन वाजिना ।**
**जनान् विमुच्यैव गतं क्वचिन्निशि, द्विषा विषादेन विषाऽदनेच्छया ॥१४॥**

अन्वयः—प्रभञ्जनाध्येयजवेन, वाजिना, इतस्ततः, द्विड्नगरप्रभञ्जनात्, द्विषा, विषादेन, विषादनेच्छया, जनान्, विमुच्य, निशि, क्वचित्, गतम्, ॥ १४ ॥

वृत्तिः—प्रभञ्जनाध्येयजवेन–प्रभञ्जनेन वायुना अध्येयोऽभ्यसनीयो जवो वेगो यस्मात् स प्रभञ्जनाध्येयजवस्तेन तथा । वाजिना–अश्वेन । इतस्ततः–यत्र तत्र । द्विड्नगरप्रभञ्जनात्–द्विषन्त्यप्रीतयन्तीति द्विषः शत्रवस्तेषां नगराणि पुराणि द्विड्नगराणि, तेषां प्रभञ्जनम् विध्वंसनम्, द्विड्नगरप्रभञ्जनम् तस्मात्तथा । हेत्वर्थे पञ्चमी तत्प्रभञ्जनाद्धेतोरिति यावत् । द्विषा–शत्रुणा । विषादेन–अनुतापेन । "इष्टासिद्धिराजगुर्वाद्यपराधादिजनितोऽनुतापो विषादः" इति रसगंगाधरे जगन्नाथः । विषादनेच्छया–गरलभक्षणकामनया । जनान्–पुत्रमित्रकलत्रादिपरिजनलोकात् । विमुच्य–परित्यज्य । निशि–रात्रौ । क्वचित्–कुत्रापि । गतम्–यातम्, पलायितमितियावत् ॥१४॥

**महीभृताऽऽतिथ्यकृता प्रवेशिताः, कृतार्थतामात्मनि जानता क्वचित् ।**
**सहैव ताभिर्जनदृष्टिवृष्टिभिः, पुरं पुनाति स्म स चक्रभृज्जिनः ॥१५॥**

अन्वयः—क्वचित्, आतिथ्यकृता, आत्मनि, कृतार्थताम्, जानता, महीभृता, प्रवेशितः, सः, चक्रभृत्, जिनः, ताभिः, जनदृष्टिवृष्टिभिः, सहैव, पुरम्, पुनाति, स्म, ॥ १५ ॥

वृत्तिः—क्वचित्–कुत्रापि । आतिथ्यकृता–अतिथये प्राघुणाय, अभ्यागतायेति यावत् इदमातिथ्यम् तत्करोतीत्यातिथ्यकृद् तेन तथा । ( अत एव ) आत्मनि–स्वस्मिन् । कृतार्थताम्–कृत-कृत्यताम् । जानता–अवगच्छता । महीभृता–महीं पृथिवीं बिभर्ति पोषयति इति महीभृद् तेन तथा । प्रवेशितः–प्रवेशं कारितः । सः–प्रसिद्धः । चक्रभृत्–चक्री । जिनः–तीर्थकृत् भगवाञ्शान्तिनाथ इति यावत् । ताभिः–प्रसिद्धाभिः । जनदृष्टिवृष्टिभिः–जनानां ( सहागत ) सेनासमवेतमानवानां दृष्टयो दर्शनानि जनदृष्टयः ता एव वृष्टयो वर्षणानि जनदृष्टिवृष्टयस्ताभिस्तथेति । सहैव–सममेव । पुरम्–नगरम् । पुनाति स्म–अपुनाद् पवित्रीचकारेति यावत् ॥१५॥

**स तत्र चित्रेण दिनानि कानिचिद्, व्यतीत्य नीत्यानुदिनं नवोत्सवैः ।**
**स पौरलाजोपरिवर्षहर्षितं बहिः पुरोऽभूत् पुरुहूतपौरुषः ॥१६॥**

अन्वयः—पुरुहूतपौरुषः, सः, नीत्या, अनुदिनम्, नवोत्सवैः, चित्रेण, कानिचित्, दिनानि, व्यतीत्य, सपौरलाजोपरिवर्षहर्षितम्, पुरः, बहिः, अभूत् ॥ १६ ॥

वृत्तिः—पुरुहूतपौरुषः–पुरु प्रभूतं हूतं यज्ञेष्वाह्वानमस्येति पुरुहूत इन्द्रस्तस्य पौरुषं पुरुषार्थः, सामर्थ्यमिति पौरुषं सामर्थ्यं यस्य स तथा, "उष्ट्रमुखादयः" ३।१।२३॥ इत्यनेन बहुव्रीहिसमास उपमानवाचकपूर्वपदलोपश्च । सः–प्रसिद्धः भगवाञ्शान्तिनाथ इति यावद् । नीत्या–नयेन । न्यायेनेति यावत् । अनुदिनम्–दिनानुदिनम् उत्तरोत्तरमिति यावद् । नवोत्सवैः–नवा नूतनाश्च ते उत्सवा उद्धवा उद्धर्षा इति यावत नवोत्सवास्तैस्तथा । चित्रेण–आश्चर्येण । तत्र–तस्मिन्नगरे । कानिचित्–कियन्तिचित् । दिनानि–दिवसान् । व्यतीत्य–अतिवाह्य, गमयित्वेति यावद् । सपौरलजोपरिवर्षहर्षितम्–( पौराणां नागरिकाणां माङ्गलिकव्यवहारार्थम् लाजै राजोपरि वर्षः वर्षणम् पौरलाजोपरिवर्षः, तेन ) पुरे नगरे भवाः पौरा नागरिकास्तैः सहिताः सपौराः, उपरि राज्ञो मस्तकाद्यूर्ध्वावयवेषु वर्षो वर्षणम् उपरि वर्षणम् लाजानां तण्डुलाद्यन्नानामुपरिवर्षो लाजोपरिवर्षः सपौराणां लाजोपरिवर्षः सपौरलाजोपरिवर्षस्तेन हर्षितम् हर्ष आमोद इति यावद्यस्मिन् कर्मणि तत् सपौरलाजोपरिवर्षहर्षितम् तद्यथा स्यात्तथा । पुरः–नगरात् । बहिरभूत्–निरगच्छद् ॥१६॥

**ततः प्रतीच्छ–प्रहरेतिभाषिणी, द्विधा विभक्तेव पुरस्सरा चमूः ।**
**नृपस्य तस्योभयपक्षविस्तृता, जगज्जिघृक्षोरिव दोर्द्वयी बभौ ॥१७॥**

अन्वयः—*ततः, प्रतीच्छ-प्रहर, -इति, भाषिणी, पुरस्सरा, चमूः, द्विधा, विभक्ता, इव, (बभूव) जगज्जिघृक्षोः, इव, तस्य, नृपस्य, उभयपक्षविस्तृता, दोर्द्वयी, बभौ ॥ १७ ॥*

वृत्तिः—ततः-तदनन्तरम् । प्रतीच्छप्रहरेतिभाषिणी-प्रतीच्छमदीयं शस्त्रं निजाङ्के गृहाण, प्रहर-मयि प्रहारं कुरु, इति-एवंप्रकारेण भाषते वदति तच्छीला तथा "अजातेः शीले" ५।१।१५४॥ इत्यनेन तच्छीलेऽर्थे 'णिन्' प्रत्ययः । पुरस्सरा-अग्रगामिनी । चमूः-अनीकिनी सेनेति यावत् । द्विधा-द्विप्रकारेण । विभक्ता-विभागं नीता । इव-यथा । ( बभूव ) जगज्जिघृक्षोः-ग्रहीतुमिच्छति जिघृक्षति जिघृक्षतीति जिघृक्षुः "सन् भिक्षाऽऽशंसेरुः" ५।२।३३॥ इत्यनेन 'उः' प्रत्ययः जगताम् भुवनानाम् जिघृक्षुर्जगज्जिघृक्षुस्तस्य तथा । समस्तसंसारकर्मकाऽऽदानेच्छावत इति यावत् । इव-यथा । तस्य-प्रसिद्धस्य । नृपस्य-राज्ञः भगवतः शान्तिनाथस्येति यावत् । उभयपक्षविस्तृता-उभयपक्षे विभक्तसेनाद्वयमध्ये विस्तृता विस्तीर्णा सेनाद्वयप्रान्तव्यापिनीति यावत् । दोर्द्वयी-द्वावयवावस्या इति द्वयी, दोष्णोर्भुजयोर्द्वयी दोर्द्वयी, बाहुयुगलीत्यर्थः । बभौ-शुशुभे, दिदीपे इति यावत् ॥१७॥

**बले नृपस्यानुगताग्रगामुके, परस्परोल्लासितशल्यपल्लवे ।**
**पयोधिवेले इव दुर्धरे नद-त्त्रिरेखचक्राश्वगजे विरेजतुः ॥१८॥**

अन्वयः—*अनुगताग्रगामुके, परस्परोल्लासितशल्यपल्लवे, पयोधिवेले, इव, दुर्धरे, नदत्त्रिरेखचक्राश्वगजे, नृपस्य, बले, विरेजतुः ॥ १८ ॥*

वृत्तिः—अनुगताग्रगामुके-अग्रगामुकमग्रगामिनम् सेनापतिमिति यावत्, अनुगते अनुसृते अनुगताग्रगामुके अनुसृतसेनापतिनिर्देशे इति यावत् । परस्परोल्लासितशल्यपल्लवे-परस्परस्य अन्योन्यस्य ( उपरि ) उल्लासिता उद्गूर्णाः युयुत्साया मृषात्वेन न तु क्षिप्ताः, शल्यानां शस्त्रविशेषाणाम् तोमराणामिति यावत् । पल्लवाः प्रान्ता याभ्यान्ते तथा । पयोधिवेले-पयोधेः समुद्रस्य वेले मर्य्यादे अम्भोवृद्धी इति यावत्, पयोधिवेले । इव-यथा । दुर्धरे-दूराक्रान्ते । नदत्त्रिरेखचक्राश्वगजे-तिस्रो रेखा अस्येति त्रिरेखः शङ्खः, चक्रमस्त्रविशेषः, त्रिरेखाश्च चक्राणि च अश्वास्तुरङ्गाश्च गजा हस्तिनश्च त्रिरेखचक्राश्वगजम्, सेनाङ्गत्वादेकवद्भावः, नदत् गर्जत् त्रिरेखचक्राश्वगजं ययोस्ते तथा । नृपस्य-राज्ञः श्रीमतः शान्तिनाथस्येति यावत् । बले-पूर्वोक्तप्रकारेण विभक्ते इव दृश्यमाने सैन्यद्वये । विरेजतुः-शुशुभाते, दिदीपाते इति यावत् ॥१८॥

**प्रभोरलं दर्शयितुं निजं बलं, बलोत्कटास्तत्र भटा नटा इव ।**
**मृषा मृधं सादिवले कुतूहलाद्, निबध्य वध्यस्य रिपोर्भियेऽभवन् ॥१९॥**

अन्वयः—तत्र, निजम्, अलम्, बलम्, दर्शयितुम्, बलोत्कटाः, प्रभोः, भटाः, नटाः, इव, सादिबले, कुतूहलात्, मृषा, मृधम्, निबध्य, वध्यस्य, रिपोः, भिये, अभवन् ॥ १९ ॥

वृत्तिः—तत्र–तस्मिन् युद्धस्थले। निजम्–स्वीयम् आत्मीयमिति यावत्। अलम्–पर्य्याप्तम्। बलम्–सामर्थ्यम्। दर्शयितुम्–समवलोकयितुम्। बलोत्कटाः–सामर्थ्योद्धतोः। प्रभोः–भगवतः शान्तिनाथस्य, विभोरिति यावत्। भटाः–योधाः वीरा इति यावत्। नटाः–नृत्यगानाद्युपजीविनो जातिविशेषः। इव–यथा। सादिबले–अश्वारोह्यादिविशिष्टसैन्ये। कुतूहलात्–कौतूहलात्। मृषा–मिथ्या। मृधम्–मर्धते शोणितैरिति मृधम् युद्धम्। निबध्य–प्रकल्प्य। वध्यस्य–वधार्हस्य। रिपोः–शत्रोः। भिये–भीत्यै। अभवन्–समपद्यन्त। समजायन्तेति यावत् ॥१९॥

**जलस्य दुर्गे ह्यनलस्य संभवे, खलस्य कालाय युधे बले चले।**
**निवेश्य तद्वारिपदार्थमानने, नलस्य नासीरगते वितेरतुः ॥२०॥**

अन्वयः—नलस्य, आनने, जलस्य, दुर्गे, अनलस्य, सम्भवे, तद्वारिपदार्थम्, निवेश्य, खलस्य, कालाय, युधे, चले, नासीरगते, बले, वितेरतुः ॥ २० ॥

वृत्तिः—नलस्य–स्थानविशेषस्य। आनने–मुखे। अग्रभागे इति यावत्। जलस्य–सलिलस्य पानीयस्येति यावत्। दुर्गे–दुर्गमे, कोट्टे वा, सतीतिशेषः। अनलस्य–वह्नेः। सम्भवे–मार्गावरोधकतया प्राप्यमाणत्वसम्भावनायाम्। तद्वारिपदार्थम्–तज्जलदुर्गम्, तं वह्निसंसर्गं च वारयति निवारयति–दूरीकरोतीति यावत्, तद्वारी स चासौ पदार्थः वस्तु तद्वारिपदार्थस्तन्तथा। जलदुर्गवारकं नौप्रमुखम् वह्निवारकं जलवाहादिकञ्चेत्यर्थः। हि–निश्चयेन। निवेश्य–संस्थाप्य, सम्यगायोज्येति यावत्। खलस्य–दुर्जनस्य, दुष्टस्येत्यर्थः। कालाय–'आयुर्घृतम्' इत्यादिवत् कालजनकाय, मृत्युप्रयोजकायेतियावत्। युधे–युद्धाय। चले–चञ्चले। नासीरगते–सेनामुखप्राप्ते। बले–पूर्वकथित–प्रकारेण द्विधा विभक्ते इव दृश्यमानसैन्ये। वितेरतुः–जलदुर्गं वह्निसङ्कटं च पारयामासतुः ॥२०॥

**प्रयातुमस्माकमियं कियत्पदं, भवेत् त्रिलोकीति यशोऽस्य पिण्डितम्।**
**मृगाङ्कतारागणतारकैतवाद्, नभस्य सङ्ख्येयमपीह संख्यजम् ॥२१॥**

अन्वयः—इयम्, त्रिलोकी, अस्माकम्, प्रयातुम्, कियत्पदम्, भवेत्, इति, मृगाङ्कतारागणतारकैतवात्, नभसि, असंख्येयम्, अपि, इह, संख्यजम्, अस्य, यशः, पिण्डितम् ॥२१॥

वृत्तिः—इयम्–एषा। त्रिलोकी–त्रयाणां लोकानां भुवनानां समाहारस्त्रिलोकी, त्रिभुवनमित्यर्थः। अस्माकम्–शान्तिनाथसम्बन्धिनां यशसामस्माकम्। प्रयातुम्–यातुम्, गन्तुमिति यावत्।

कियत्पदम्–भवेत् अपितु द्वित्राण्येव पदानि भविष्यन्तीति भावः। इति–अस्माद्धेतोः। मृगाङ्कतारागणतारकैतवात्–मृगो हरिणोऽङ्के क्रोडे यस्य स मृगाङ्कश्चन्द्रमाः, मृगाङ्कश्चन्द्रश्च तारागणस्तारकासमूहश्च तारः शुद्धमौक्तिकश्चेत्येषामितरेत्तरयोगद्वन्द्वसमासः, मृगाङ्कतारागणतारास्तेषां कैतवं व्याजः, मृगाङ्कतारागणतारकैतवम् तस्मात्तथा। नभसि–आकाशे। असंख्येयम्–संख्यातुं गणयितुम् इयत्तया परिच्छेतुम् इति यावत्। अयोग्यम् अगण्यमित्यर्थः। अपि–सम्भावनायाम्। इह–अस्मिँल्लोके। संख्यजम्–संचक्षतेऽत्रेति संख्यम् युद्धम्, "चक्षो वाचि" ४।४।४। इत्यनेन 'ख्या' देशः तस्माज्जातं संख्यजम्, युद्धप्रयोज्यमिति यावत्। अस्य–भगवतः शान्तिनाथस्य। यशः–कीर्तिः। पिण्डितम्–पिण्डं शरीरं सञ्जातमस्येति पिण्डितम्, "तदस्य सञ्जातं तारकादिभ्य इतः" ७।१। १३८॥ इत्यनेन 'इतः' प्रत्ययः, मूर्तिमदिति यावत्। जातमिति शेषः ॥२१॥

पवित्रता श्वेतपयोजमूर्तिभि–र्धरा तदम्भोधिरपि स्थलायताम्।
अखण्डडिण्डीरभरच्छलाद् यशः, समूढमित्यूढधियेव भूभुजः ॥२२॥

अन्वयः—*श्वेतपयोजमूर्तिभिः, धरा, पवित्रिता, तत्, अम्भोधिः, अपि, स्थलायताम्, इत्यूढधिया, इव, भूभुजः, यशः, अखण्डडिण्डीरभरच्छलात्, समूढम्* ॥ २२ ॥

वृत्तिः–श्वेतपयोजमूर्तिभिः–पयसि जले जातान्युत्पन्नानि पयोजानि कमलानि श्वेतानि शुक्लवर्णानि च तानि पयोजानि श्वेतपयोजानि तेषां मूर्तिः शरीरमिव मूर्तिर्येषामिति श्वेतपयोजमूर्तीनि तैस्तथा। यशोभिरिति शेषः। धरा–पृथिवी। पवित्रिता–विशुद्धीकृता। तत्–तस्माद्धेतोः। अम्भोधिः–अम्भांसि जलानि धीयन्तेऽस्मिन्निति अम्भोधिः समुद्रः। अपि–सम्भावनायाम्। स्थलायताम्–स्थलं भूमिरिवाचरतु। इत्यूढधिया–इत्येवं समुत्पन्नबुद्ध्या। इव–यथा। भूभुजः–भुवं पृथिवीं भुनक्ति पालयतीति भूभुक् पृथ्वीपालकस्तस्य तथा। भगवतः शान्तिनाथस्येति यावत्। यशः–कीर्तिः। अखण्डडिण्डीरभरच्छलात्– अखण्डोऽविच्छिन्नश्चासौ डिण्डीरः फेनोऽखण्डडिण्डीरस्तस्य भरः समूहोऽतिशयो वाऽखण्डडिण्डीरभरस्तस्य छलं व्याजोऽखण्डडिण्डीरभरच्छलन्तस्मात्तथा। समूढम्–समूहभावेन स्थितम् ॥२२॥

किमर्कजायाः समलं जलं भवेद्, हिमाद्रिरूपेऽस्य यशोभरे स्थिरे।
इतीव वाहैर्निजवेगदर्पितै–स्तदङ्गजैर्गाङ्गपदात् तदाश्रितम् ॥२३॥

अन्वयः—*अस्य, हिमाद्रिरूपे, यशोभरे, स्थिरे, (सति) अर्कजायाः, जलम्, किम्, समलम्, भवेत्, इतीव, वाहैः, निजवेगदर्पितैः, तदङ्गजैः, गाङ्गपदात्, तत्, आश्रितम्* ॥ २३ ॥

**वृत्तिः**—अस्य-भगवतः शान्तिनाथस्य । **हिमाद्रिरूपे**-हिमाद्रिर्हिमाचलो रूपं स्वरूपं यस्य स हिमाद्रिरूपस्तस्मिँस्तथा । **यशोभरे**-यशसां कीर्तिनां भरोऽतिशयो यशोभरस्तस्मिँस्तथा । **स्थिरे**-दृढे । सतीतिशेषः । **अर्कजायाः**-यमुनायाः । **जलम्**-सलिलम् । **किम्**-कथम् । **समलम्**-मालिन्य-विशिष्टम् मलीमसमिति यावत् । **भवेत्**-स्यात् । **इतीव**-इत्थमिव । **निजवेगदर्पितैः**-निज आत्मीयश्चासौ वेगो रयो निजवेगस्तेन दर्पिता दलिता निजवेगदर्पितास्तैस्तथा । **तदङ्गजैः**-हिमाद्रिशरीर-समुत्पन्नैः । **वाहैः**-प्रवाहैः । **गाङ्गपदात्**-गङ्गाया मन्दाकिन्या इदम् गाङ्गम् गङ्गाजलमित्यर्थस्तस्य पदम् मिषम् गाङ्गपदम् तस्मात्तथा । यद्वा गाङ्गमित्याकारकं पदम् स्याद्यन्तम् गाङ्गपदम् तस्मात्तथा । **तत्**-यमुनाजलम् । **आश्रितम्**-गृहीतम् ॥२३॥

**यशःस्वरूपैस्तुरगैर्दिशां गणे, प्रसृत्वरैः श्वेततरैः पुरः खुरैः ।**
**स्वगातृसंस्थानधिया सुदुर्धरैः, पयोधिरोधक्षममुद्धतं रजः ॥२४॥**

**अन्वयः**—*यशःस्वरूपैः, तुरगैः, दिशाम्, गणे, प्रसृत्वरैः, श्वेततरैः, सुदुर्धरैः, पुरः खुरैः, स्वगातृसंस्थानधिया, पयोधिरोधक्षमम्, रजः, उद्धतम्* ॥ २४ ॥

**वृत्तिः**—**यशःस्वरूपैः**-दिगन्तव्यापितया कीर्तिरूपैः । **तुरगैः**-अश्वैः । **दिशाम्**-आशा-नाम् । पूर्वदक्षिणपश्चिमादिहरितामिति यावत् । **गणे**-समूहे । सर्वासु दिक्ष्विति भावः । **प्रसृत्वरैः**-प्रसरणशीलैः । **श्वेततरैः**-अतितरांशुक्लैः । **सुदुर्धरैः**-अत्यन्तदुराक्रान्तैः । अनभिभवनीयैरिति यावत् । **पुरः खुरैः**-अग्रशफैः । **स्वगातृसंस्थानधिया**-गायन्तीति गातारः, स्वस्य स्वकीयस्य यशस इति यावद् गातारः, स्वगातारस्तेषां संस्थानम् निवासः स्वगातृसंस्थानम् तद्भवत्वित्याकारिका धीर्बुद्धिः स्वगातृसंस्थानधीस्तया तथा । **पयोधिरोधक्षमम्**-पयांसि जलानि धीयन्तेऽस्मिन्निति पयोधिः समुद्र-स्तस्य रोधोऽवरोधः पयोधिरोधस्तत्र क्षमं समर्थम् पयोधिरोधक्षमम् । **रजः**-धूलिः । **उद्धतम्**-उत्थापितम् ॥२४॥

**हरेर्यदक्रामि पदैककेन खं, त्रिभिर्धरेत्येव चतुष्पदीफलम् ।**
**बभूव पूर्वं द्विपदस्ततोऽधिका, गतिर्हरीणामुचिता चतुष्पदैः ॥२५॥**

**अन्वयः**—*यत्, पूर्वम्, द्विपदः, हरेः, एककेन, पदा, खम्, त्रिभिः, धरा, अक्रामि; इतीव, चतुष्पदीफलम्, बभूव, हरीणाम्, चतुष्पदैः, ततः, अधिका, गतिः, उचिता* ॥ २५ ॥

**वृत्तिः**—**यत्**-यस्माद्धेतोः । **पूर्वम्**-प्राचीनकाले, बलिनिग्रहार्थं वामनावतार काले इति यावत् । **द्विपदः**-चरणद्वयविशिष्टस्य । **हरेः**-विष्णोः । **एककेन**-एकाकिना । **पदा**-चरणेन । **खम्**-आकाशम्

अक्रामि-आक्रान्तम् । (च) त्रिभिः-त्रित्वसंख्याविशिष्टैश्चरणैरित्यर्थः । धरा-पृथिवी । (अक्रामि-आक्रान्ता) इतीव-इत्थमिव चतुष्पदीफलम्-चतुर्णां पदानां चरणानां समाहारश्चतुष्पदी । तस्याः फलम् प्रयोजनम् चतुष्पदीफलम् । बभूव-जातम् । हरीणाम्-अश्वानाम्, अस्माकमिति यावत् । चतुष्पदैः-चत्वारि च तानि पदानि चरणानि चतुष्पदानि तैस्तथा । करणैः । ततः-चरणद्वयभाजो विष्णोः सकाशात् । अधिका-अतिरिक्ता, वैलक्षण्यविशिष्टेति यावत्। गतिः-गतिक्रिया । उचिता-युक्ता ॥२५॥

( पाठान्तरम् )

**हरेर्यदक्रामि पदैककेन खं, त्रिभिर्धरेत्येवमभूत् त्रिविक्रमः ।**
**ततो हरीणामपि रोदसीक्रमा-च्चतुष्क्रमत्वं चतुरब्धिलङ्घनात् ॥२५॥**

अन्वयः—यत्, हरेः, एककेन, पदा, खम्, अक्रामि, त्रिभिः, धरा, इत्येवम्, (सः) त्रिविक्रमः, अभूत्, ततः, हरीणाम्, अपि, रोदसीक्रमात्, चतुरब्धिलङ्घनात्, चतुष्क्रमत्वम् । (उचितम्) ॥ २५ ॥

वृत्तिः—यत्-यस्मात् । हरेः-विष्णोर्वामनावतारमापन्नस्य । एककेन-एकाकिना, एकेन वा । पदा-चरणेन । खम्-आकाशम । अक्रामि-आक्रान्तम् । त्रिभिः-त्रित्वसंख्याविशिष्टैः चरणैरिति यावत् । धरा-पृथिवी । (अक्रामि-आक्रान्ता) इत्येवम्-एवंविधकारणात् । सः-हरिर्विष्णुः । त्रिविक्रमः-त्रयः विक्रमाः स्वर्गमर्त्यपातालात्मकत्रिभुवनव्यापनरूप पराक्रमा यस्य स तथा । अभूत्-अभवत्, समजायतेति यावत् । ततः-तस्माद्धेतोः । नामसाम्यादितियावत् । हरीणाम्-अश्वानामस्माकम् । अपि-सम्भावनायाम् । रोदसीक्रमात्-रोदस्योर्द्यावापृथिव्योः क्रमः क्रमणमतिक्रमणमिति यावत् रोदसीक्रमस्तस्मात्तथा । ( च-पुनः ) चतुरब्धिलङ्घनात्-आपो जलानि धीयन्त एष्वित्यब्धयः समुद्राः । चत्वारश्च तेऽब्धयः श्चतुरब्धयस्तेषां लङ्घनम् अतिक्रमणम् चतुरब्धिलङ्घनम् तस्मात्तथा । अथवा रोदसीक्रमणा व्यवहितोत्तरकालावच्छेदेन चतुःसमुद्रोलङ्घनादिति यावत् । चतुष्क्रमत्वम्-चत्वारः क्रमाश्चरणा यस्य स चतुष्क्रमस्तस्य भावश्चतुष्क्रमत्वम्, चरणचतुष्टयवत्त्वमिति यावत् । उचितम्-युक्तम् सफलमिति यावत् ॥२५॥

**दिशां न सोंऽशोऽस्तु न यत्र सङ्गतिः, पदैश्चतुर्भिः क्रमणेऽपि तस्य नः ।**
**पराङ्मुखीभूय दिशोऽपरां दिश-मिति व्रजन्तोऽभिससञ्जिरे हयाः ॥२६॥**

अन्वयः—चतुर्भिः, नः, पदैः, तस्य, क्रमणे, दिशाम्, सः, अंशः, अपि, न, अस्तु, यत्र, (नः,) सङ्गतिः, न, इति, दिशः, पराङ्मुखीभूय, अपराम्, दिशम्, व्रजन्तः, हयाः, अभिससञ्जिरे, ॥२६॥

वृत्तिः—चतुर्भिः-चतुःसंख्याकैः । नः-अस्माकम् । पदैः-चरणैः । तस्य-दिगन्तस्य । क्रमणे-अतिक्रमणे । दिशाम्-आशानाम् । दिशानामिति यावत् । सः-प्रसिद्धतया कश्चन । अंशः-एकदेशः । अपि-सम्भावनायाम् । न-नहि । अस्तु-भवतु । यत्र-यस्मिन्नंशे, यस्मिन्प्रान्ते वा । सङ्गतिः-सङ्गमः, प्राप्तिरिति यावत्, अस्माकमितिशेषः । न-नहि । भवेदिति शेषः । इति-इतिमनसि निधाय । दिशः-अतिक्रान्ताया दिशायाः सकाशात् । पराङ्मुखीभूय-विमुखीभूय,परावृत्येति यावत् । अपराम्-अतिक्रान्तदिग्भिन्नाम्,अन्यामिति यावत् । व्रजन्तः-गच्छन्तः । हयाः-चक्रिसम्बन्धिनोऽश्वाः । अभिससञ्जिरे-अभिव्यापुः ॥२६॥

दिवाकराश्वीयजिगीषयोद्गतै-र्हयैश्चतुर्दिग्विजयैर्नृपाश्रयैः ।
त्रपा हरीणामिति नम्रिताननैः, प्रपद्यते वारुणदिग्रवेर्हयैः ॥२७॥

अन्वयः—*दिवाकराश्वीयजिगीषया, उद्गतैः, चतुर्दिग्विजयैः, नृपाश्रयैः, हयैः, (कृत्वा) हरीणाम्, त्रपा, इति, नम्रिताननैः, रवेः, हयैः, वारुणदिक्, प्रपद्यते ॥ २७ ॥*

वृत्तिः—दिवाकराश्वीयजिगीषया-दिवा दिनं करोतीति दिवाकरः प्रभाकरः सूर्य्य इति यावत्, तस्य अश्वास्तुरङ्गमाः दिवाकराश्वास्तेषामियम् दिवाकराश्वीया, सा चासौ जिगीषा जेतुमिच्छा-दिवाकराश्वीयजिगीषा तया तथा, सूर्य्यसम्बन्धिनोऽश्वान् जेतुमिच्छयेति यावत् । उद्गतैः-उत ऊर्ध्वं गताः प्राप्ता उद्गतास्तैस्तथा । उपर्य्युत्पतितैरिति यावत् । चतुर्दिग्विजयैः-चतसृषु दिक्षु दिशासु विजयो जयो यैस्ते चतुर्दिग्विजयास्तैस्तथा । नृपाश्रयैः-नॄन् जनान् पाति रक्षतीति नृपो राजा, भगवान् शान्तिनाथ इति यावत् स आश्रयः शरणं येषान्ते नृपाश्रयास्तैस्तथा । हयैः-अश्वैः । कृत्वेतिशेषः । हरीणाम्-अश्वानाम् सूर्य्यसम्बन्धिनामित्यर्थः । त्रपा-लज्जा । समजनीतिशेषः । इति-अस्माद्धेतोः । नम्रिताननैः-नम्रितम्-आनतीकृतम् आननं मुखम् यैस्ते नम्रिताननास्तैस्तथा । व्यानम्रीकृतवदनैरिति यावत् । रवेः-सूर्य्यस्य । हयैः-अश्वैः । वारुणदिक्-वरुणस्य यादसांपतेः प्रचेतस-इति यावत् इयम् वारुणी, सा चासौ दिक् दिशा वारुणदिक् पश्चिमदिशेत्यर्थः । प्रपद्यते-प्राप्यते ॥२७॥

गतं त्रपापात्रतया दिगन्तरे, महोदयं नः समवेक्ष्य पाक्षिकैः ।
दिनेश्वराश्वैरिति चक्रिसप्तिभि-र्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥२८॥

अन्वयः—*पाक्षिकैः, दिनेश्वराश्वैः, नः, महोदयम्, समवेक्ष्य, त्रपापात्रतया, दिगन्तरे, गतम्, इति, अर्धनभःकृतक्रमैः, तैः, चक्रिसप्तिभिः, न्यवर्ति ॥ २८ ॥*

वृत्तिः—पाक्षिकैः-पक्षे उदयास्तदिग्द्वयमात्रैकपक्षे चरन्तीति पाक्षिकास्तैस्तथा । दिनेश्वराश्वैः-दिनस्य दिवसस्य ईश्वरः स्वामी दिनेश्वरस्तस्य अश्वास्तुरङ्गमा दिनेश्वराश्वास्तैस्तथा । नः-अस्माकं शान्तिनाथाश्रितानामश्वानामिति यावत् । महोदयम्-महान् अतिशयितश्चासौ उदयोऽभ्युदयः, समुन्नतिरिति यावत् महोदयस्तन्तथा । समवेक्ष्य-समवलोक्य । त्रपापात्रतया-त्रपाया लज्जायाः पात्रम् भाजनम् आधार इति यावत्, त्रपापात्रम् तस्य भावस्त्रपापात्रता तया तथा । दिगन्तरे-दिशां दिशानामन्तरं बहिर्दिगन्तरम् तस्मिँस्तथा । गतम्-यातम् । इति-अस्माद्धेतोः । अर्धनभःकृतक्रमैः-अर्धेन पूर्वार्धेन नभसि आकाशे कृतो विहितः क्रमः पादविक्षेपो यैस्तेऽर्धनभःकृतक्रमास्तैस्तथा । तैः-प्रसिद्धैः । चक्रिसप्तिभिः-चक्रिणश्चक्रवर्तिनः शान्तिनाथस्य सप्तयोऽश्वाश्चक्रिसप्तयस्तैस्तथा । न्यवर्ति-परावर्ति ॥ २८ ॥

**चमूचरास्तस्य नृपस्य सादिनो, विनोदिनोऽप्यस्य दिनोदये जयम् ।**
**विधाय सर्वत्र विचित्रवादिनो, निवेदयामासुरथो रथोद्धताः ॥२९॥**

अन्वयः—*तस्य, नृपस्य, चमूचराः, विनोदिनः, अपि, सादिनः, दिनोदये, अस्य, जयम्, विधाय, रथोद्धताः, विचित्रवादिनः, सर्वत्र, अथो, निवेदयामासुः ॥ २९ ॥*

वृत्तिः—तस्य-सकलैश्वर्य्यादिसम्पन्नत्वेन प्रसिद्धस्य । नृपस्य-राज्ञः शान्तिनाथस्येति यावत् । चमूचराः-चमूषु सेनासु तद्विशेषेषु वा चरन्तीति चमूचराः । विनोदिनः-विनोदआमोदोऽस्त्येषामिति विनोदिनः । अपि-सम्भावनायाम् । सादिनः-हस्त्यश्ववारादयः । दिनोदये-दिनस्य दिवसस्य, उदय उत्पत्तिर्दिनोदयस्तस्मिँस्तथा, दिनस्य आद्यक्षणावच्छेदेनैवेति यावत् । अस्य-भगवतः शान्तिनाथस्य । जयम्-विजयम् । विधाय-सम्पाद्य । कृत्वेति यावत् । रथोद्धताः-रथैः स्यन्दनैः उद्धता-उच्छृङ्खला रथोद्धताः । विचित्रवादिनः-विचित्रमाश्चर्यजनकं यथा स्यात्तथा वादयन्ति तच्छीला विचित्रवादिनः । "अजातेः शीले" ५।१।१५४॥ इत्यनेन ताच्छील्ये 'णिन्' प्रत्ययः । सन्त इतिशेषः । सर्वत्र-सर्वस्मिन् स्थले । अथो-मङ्गलम् 'अथाथोसंशये स्याता-मधिकारे च मङ्गले' इति शेषः । निवेदयामासुः-बोधयामासुः, प्रख्यापयामासुरिति यावत् ॥ २९ ॥

**अलङ्कृताः केचन राजवाजिनो, जिनोक्तिषु श्राद्धतयैव सैन्धवाः ।**
**शनैश्चरन्तश्च-रणेऽतिकौशलाद्, धृतास्ययन्त्रा अपि निर्वृतिं दधुः ॥३०॥**

अन्वयः—*जिनोक्तिषु, श्राद्धतया, इव, अलङ्कृताः, केचन, सैन्धवाः, राजवाजिनः, रणे, अतिकौशलात्, शनैः, चरन्तः, च, धृतास्ययन्त्राः, अपि, निर्वृतिम्, दधुः ॥ ३० ॥*

वृत्तिः—जिनोक्तिषु—जिनस्य अर्हतः भगवतः शान्तिनाथस्येतियावदुक्तय–उपदेशामृतवचनानि जिनोक्तयस्तासु तथा। श्राद्धतया—आस्तिक्यम्, गुर्वागमादिवाक्येषु विश्वासो वा श्रद्धा तत्प्रयोजनमस्येति श्राद्धस्तस्य भावः श्राद्धता तया तथा। इव—यथा। अलङ्कृताः—प्रसाधिताः, अलङ्कारैर्विभूषिता इति यावत्। केचन—अनीर्वचनीयाश्चशुभलक्षणलक्षिता इत्यर्थः। सैन्धवाः—सिन्धुदेशोद्भवाः। राजवाजिनः—राज्ञः नृपतेः शान्तिनाथस्य वाजिनोऽश्वाः राजवाजिनः। रणे—युद्धे। अतिकौशलात्—अत्यन्तनैपुण्यात्। शनैः—मन्दं यथा स्यात्तथा। चरन्तः—विचरन्तः, मध्येसैन्यं गच्छन्त इति यावत्। च—पुनः। धृतास्ययन्त्राः—धृतमास्ययन्त्रम् मुखयन्त्रम् यैर्येषां वा तथा। अपि—सम्भावनायाम्। श्रावकपक्षे च— सैन्धवाः—सिन्धुदेशोद्भवाः। जिनोक्तिषु—जिनवचनामृतेषु। श्राद्धतया—श्रद्धया। चरणे—चरित्रे, आचारे इति यावत्। 'चरित्रं चरिताचारौ, चारित्रचरणे अपि' ३।५०७। इत्यभि० चि०। अतिकौशलात्—नितान्तनैपुण्यात्। शनैश्चरन्तः—जीवानुपमर्दनाभिप्रायेण मदं विचरन्तः। धृतास्ययन्त्राः—धृतमास्ययन्त्रं मुखवस्त्रकादि यैस्ते तथा। अपि—सम्भावनायाम्। निर्वृतिम्—सौख्यम्। दधुः—धारयामासुः ॥ ३० ॥

**निनंसुना भूमिभुजापि भक्तये, पदे पदे भूर्युपदाप्रदायिना।**
**विहारदेशं तमवाप्य मण्डली, निवेश्य चक्री शमकार्य्यतानुगैः ॥३१॥**

अन्वयः—*भक्तये, पदे पदे, भूर्युपदाप्रदायिना, निनंसुना, भूमिभुजा, अपि, तम्, विहारदेशम्, अवाप्य, मण्डलीः, निवेश्य, अनुगैः, चक्री, शम्, अकार्य्यत ॥ ३१ ॥*

वृत्तिः—भक्तये-सेवायै। पदे पदे—प्रतिस्थानम्। भूर्युपदाप्रदायिना—भूरि सुवर्णन्तस्य उपदा उपहारो भूर्युपदा तां प्रदातुं वितरितुं शीलमस्येति भूर्युपदाप्रदायी तेन तथा। 'यद्वा' भूरिः प्रचुरा चासावुपदोपहारः भूर्युपदा तां प्रदातुं शीलमस्येत्यादि पूर्ववत्। निनंसुना—प्रणिनंसुना प्रणन्तुमिच्छुकेनेति यावत्। भूमिभुजा—भूमिं पृथिवीं भुनक्ति पालयतीति भूमिभुक् तेन तथा। अपि—सम्भावनायाम्। तम्—प्रसिद्धम्। विहारदेशम्—विहारस्य विचरणस्य भ्रमणस्येति यावद्देशो विषयो विहारदेशस्तन्तथा। यद्वा—विहरन्त्यस्मिन्निति विहारो जिनसद्म जिनमन्दिरमित्यर्थः। तस्य देशो विहारदेशस्तन्तथा। अवाप्य—समधिगत्य। मण्डलीः—मण्डलानि। चक्रवालानीति यावत्। यद्वा—मण्डली इति प्रथमैकवचनान्तमेव पदमवगन्तव्यम् कर्मार्थप्रत्ययेन कर्मण उक्तत्वाद् द्वितीयाया अभावः। निवेश्य—संस्थाप्य, संयोज्येति यावत्। अनुगैः—अनु पश्चाद् गच्छतीति अनुगास्तैस्तथा। अनुयायिभिरिति यावत्। चक्री—चक्रवर्ती, सार्वभौम इत्यर्थः। भगवाञ्शान्तिनाथ इति यावत्। शम्—कल्याणम्, मङ्गलमिति यावत्। अकार्य्यत—समपाद्यत ॥ ३१ ॥

**स्थितस्य तस्यां पुरतो निजाङ्गजा, मतङ्गजाश्चाकरजा महाध्वजाः ।**
**उपायनान्येभिरमुष्य भूमिपा, अकारयन् भूरितुरङ्गमानपि ॥३२॥**

अन्वयः—*भूमिपाः, तस्याम्, स्थितस्य, अमुष्य, पुरतः, निजाङ्गजाः, आकरजाः, महाध्वजाः, मतङ्गजाः, एभिः, भूरितुरङ्गमान्, अपि, अमुष्य, उपायनानि, अकारयन् ॥ ३२ ॥*

वृत्तिः—**भूमिपाः**–भूमिं पृथिवीं पान्ति रक्षन्ति इति भूमिपाः राजानः । **तस्याम्**–मण्डल्याम् । **स्थितस्य**–अवस्थितस्य विराजमानस्येति यावत् । **अमुष्य**–भगवतः शान्तिनाथस्य । **पुरतः**–अग्रतः । **निजाङ्गजाः**–अङ्गाच्छरीराज्जायन्त इत्यङ्गजाः कन्याः, निजाः स्वीयाश्च ता अङ्गजा निजाङ्गजाः स्वपुत्रिकाः । **आकरजाः**–आकुर्वन्त्यस्मिन्निति आकरः खनिः, खानिर्गञ्जेति यावत्, तस्माज्जाता आकरजाः, तानि रत्नादीनि । **महाध्वजाः**–महान्तो अतिशयिताश्च ते ध्वजाः शौण्डिकाः क्षीबा इति यावत् । महाध्वजाः । **च**–पुनः । **मतङ्गजाः**–करटिनः दन्तावला इति यावत् । **एभिः**–एतैर्वस्तुभिः । **भूरितुरङ्गमान्**–भूरयः प्रचुराः पर्याप्ताश्च ते तुरङ्गमाः अश्वा भूरितुरङ्गमास्ताँस्तथा । **अपि**–सम्भावनायाम् । **उपायनानि**–उपहारान् उपदा इति यावत् । **अकारयन्**–समपादयन् ॥ ३२ ॥

**द्विषद्भिरेवास्य विलङ्घिता दिशः, पुरेषु दग्धेष्वयशोनिवेशनात् ।**
**प्रभञ्जनैर्देवयशो रथायितं, प्रभञ्जनैर्वैरिपुरां धुरां बलात् ॥३३॥**

अन्वयः—*अस्य, द्विषद्भिः, एव, पुरेषु, दग्धेषु, अयशोनिवेशनात्, दिशः, विलङ्घिताः वैरिपुराम्, धुराम्, बलात्, प्रभञ्जनैः, प्रभञ्जनैः, देवयशः, रथायितम् ॥ ३३ ॥*

वृत्तिः—**अस्य**–भगवतः शान्तिनाथस्य । **द्विषद्भिः**–द्विषन्त्यप्रीतयन्तीति द्विषन्तः शत्रवस्तैस्तथा । **एव**–अवधारणेऽव्ययम् । **पुरेषु**–स्वनगरेषु । **दग्धेषु**–प्रज्वालितेषु । भस्मसात्कृतेष्विति यावत् । **अयशोनिवेशनात्**–अयशसः पराजयादिजनितदुष्कीर्त्तेर्निवेशनम्, संस्थापनम् आरोप इति यावत् । अयशोनिवेशनम् तस्मात्तथा । **दिशः**–आशाः, दिशा इति यावत् । **विलङ्घिताः**–आक्रान्ताः । **वैरिपुराम्**–वैरिणां शत्रूणां पुरो नगराणि वैरिपुरस्तासान्तथा । **धुराम्**–अग्रप्रान्तानाम् । **बलात्**–हठात् । **प्रभञ्जनैः**–विध्वंसनैः विध्वंसजनकैरिति यावत् । **प्रभञ्जनैः**–पवनैः । करणैरित्यर्थः । **देवयशः**–देवस्य राज्ञः श्रीमतः शान्तिनाथस्य यशः कीर्त्तिः देवयशः । **रथायितम्**–स्यन्दनायितम्, स्यन्दनमिवाचरितमिति यावत् ॥ ३३ ॥

**यथेष्टदानाम्बुभिरम्बुधिः सरो, यशोभिरेवाब्धिरकारि गोष्पदम् ।**
**व्यधायि पूर्णा वसतिर्भुवस्तले, रिपुस्थले वाऽप्यमुना ह्यमातमा ॥३४॥**

अन्वयः—*अमुना, यथेष्टदानाम्बुभिः, सरः, अम्बुधिः, यशोभिः, एव, अब्धिः, गोष्पदम्, अकारि, भुवस्तले, पूर्णा, वसतिः, वा, रिपुस्थले, अमातमा, व्यधायि, हि ॥ ३४ ॥*

वृत्तिः—अमुना-अनेन, विप्रकृष्टतया दृश्यमानेनेति यावत् । यथेष्टदानाम्बुभिः-यथेष्टं निकामम् पर्य्याप्तमिति यावद्दानम्-वितरणम् दीनेभ्यः प्रतिपादनमिति यावद्यथेष्टदानम् तत् प्रयोजकानि अम्बूनि जलानि यथेष्टदानाम्बूनि तैस्तथा । "मयूरव्यंसकेत्यादयः" ३।१।११६॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासः । सरः-कासारः । अम्बुधिः-अम्बूनि जलानि धीयन्तेऽस्मिन्निति अम्बुधिः समुद्रः । अकारि-समपादि । यशोभिः-कीर्तिभिः । एव-अवधारणार्थकमव्ययम् । अब्धिः-समुद्रः । गोष्पदम्-गोपदश्वभ्रम्, गोखुरप्रमाणोऽनायासेन लङ्घ्य एवंविध इति यावत् । भुवस्तले-भूमण्डले । पूर्णा-प्रचुरा, पर्य्याप्तेति यावत् । वसतिः-निवासस्थानम् । वा-समुच्चये । रिपुस्थले-रिपूणां शत्रूणां स्थलम् स्थानम् रिपुस्थलम् तस्मिँस्तथा । अमातमा-दर्शरात्रिः । किञ्च "अरिपुस्थले" इतिच्छेदं विधाय । अरिपुस्थले-मित्रस्थाने । अमातमा-अमाताऽगणिता चासौ मा लक्ष्मीरमातमा । व्यधायि-अकारि । हि-निश्चयेन ॥ ३४ ॥

**सुवर्णधारामवलोक्य मार्गणे, कृपाणधारां समरे समार्गणे ।**
**इतीव धारामवधीर्य्य मण्डली, कृता घनैश्चापधरैस्तनूह्रिया ॥३५॥**

अन्वयः—*मार्गणे, सुवर्णधाराम्, समार्गणे, समरे, कृपाणधाराम्, अवलोक्य, इतीव, धाराम्, अवधीर्य्य, घनैः, चापधरैः, तनूह्रिया, मण्डली, कृता ॥ ३५ ॥*

वृत्तिः—मार्गणे-याचने । सुवर्णधाराम्-सुवर्णस्य काञ्चनस्य धारा निरवच्छिन्नप्रवाहः सुवर्णधारा तान्तथा । (च-पुनः । ) समार्गणे-मार्गणैर्बाणैः सहितः समार्गणस्तस्मिँस्तथा । समरे-युद्धे, सम्प्रहारे इति यावत् । कृपाणधाराम्-निरवच्छिन्नखड्गपातम् । अवलोक्य-संवीक्ष्य । इतीव-अस्माद्धेतोरिव । धाराम्-सैन्याग्रिमस्कंदम् जलधारां वा । अवधीर्य्य-अनादृत्य, त्यक्त्वेति यावत् । घनैः-सान्द्रैः, बहुलैरिति यावत् मेघैर्वा । चापधरैः-धरन्तीति धराश्चापानां धराश्चापधरास्तैस्तथा । धनुर्धारिभिरिति यावत् । इन्द्रचापधरैर्वा मेघविशेषणमिदम् । तनूह्रिया-तन्वाः शरीरस्य ह्रीः सङ्कोचस्तनूह्रीस्तया तथा । शरीरसंकोचविशेषेणेति यावत् । मण्डली-धनुर्धाराणां, स्थानविशेषः स्थलान्तरस्थितिः । कृता-विहिता ॥ ३५ ॥

**भुजङ्गमैर्वक्रगतौ नृपाद् भिया, धृतं तलं शून्यपदं विलासिभिः ।**
**विहङ्गमैः सा सकला ततश्चल-क्रियाश्रियाऽमण्डि तुरङ्गमैः स्थली ॥३६॥**

अन्वयः—*विलासिभिः भुजङ्गमैः, वक्रगतौ, नृपात्, भिया, तलम्, धृतम्, (विलासिभिः) विहङ्गमैः, शून्यपदम्, ( धृतम् ) ततः, तुरङ्गमैः, चलक्रियाश्रिया, सा, सकला, स्थली, अमण्डि ॥३६॥*

**वृत्तिः**—**विलासिभिः**–बिलेषु छिद्रेषु आसते तच्छीला बिलासिनस्तैस्तथा, "अजाते. शीले" ५।१।१५४॥ इत्यनेन तच्छीले 'णिन्' प्रत्ययः । **भुजङ्गमैः**–भुजेन कौटिल्येन गच्छन्तीति भुजङ्गमाः पवनाशनः, सर्पा इति यावत्, तैस्तथा । **वक्रगतौ**–वक्रा कुटिला चासौ गतिर्गमनम् वक्रगतिस्तस्यां तथा । कौटिल्यावलम्बने इति यावत् । **नृपात्**–राज्ञः श्रीमतः शान्तिनाथादिति भावः । **भयात्**–साध्वसात् । **तलम्**–अनूर्ध्वम्, पातालतलमिति यावत् । **धृतम्**–आश्रितम् । निजावस्थानेनालङ्कृतमितियावत् । **विलासिभिः**–विषु पक्षिषु लासिनः शोभवन्तो विलासिनस्तैस्तथा । **विहङ्गमैः**–पक्षिभिः । **शून्यपदम्**–शून्यम् अभाववत् च तत्पदम् स्थानम् शून्यपदम्, आकाशमिति यावत् । **धृतम्**–अवलम्बितम् । **ततः**–तदनन्तरम् । **तुरङ्गमैः**–अश्वैः । **चलक्रियाश्रिया**–चलनम् चल एव क्रिया व्यापारश्चलक्रिया तत्र श्रीः शोभा चलक्रियाश्रीस्तया तथा । "क्रियाशब्दस्य नित्यस्त्रीत्वात्पुंवत् कर्मधारयः" इत्यनेन पुंवत्त्वाभाव इति द्रष्टव्यम् । **सा**–प्रसिद्धा । **सकला**–निखिला । **स्थली**–अकृत्रिमा भूमिः । **अमण्डि**–अलमकारि, समभूषीति यावत् ॥ ३६ ॥

**अचीकरच्चारुहयेन या भ्रमीः, श्रमी मनाग् नेति चमूचरः परम् ।**
**न्यवेदयत् ताभिरलाभि तेऽरिणा, नरेश ! देशभ्रमिरेव नाश्रयः ॥३७॥**

अन्वयः—*चमूचरः, मनाक्, श्रमी, चारुहयेन, याः, भ्रमीः, न, अचीकरत्, परम्, ताभिः, नरेश ! तव, अरिणा, देशभ्रमिः, एव, अलाभि, आश्रयः, न, इति, न्यवेदयत् ॥ ३७ ॥*

**वृत्तिः**—**चमूचरः**–चमूषु सेनामात्रेषु तदाख्यसेनाविशेषेषु वा चरतीति चमूचरः । **मनाक्**–ईषत् । **श्रमी**–परिश्रमो, बहुतरशरीरव्यापारजन्मा निःश्वासङ्गसम्मर्दनिद्रादिकारणीभूतः खेदविशेष इति यावत्, श्रमस्तादृशश्रमविशिष्टः । **चारुहयेन**–चारुर्मनोरमश्चासौ हयोऽश्वाश्चारुहयस्तेन तथा । **याः**–यादृशीः । **भ्रमीः**–घूर्णनानि, घूर्णीरिति यावत् । **न**–नहि । **अचीकरत्**– स्वार्थिकणिजन्तकृधातोरद्यतन्या रूपमिदम् तेन अकार्षीदित्यर्थः । "दशवर्षसहस्राणि रामो राज्यमचीकरत्" इति वाल्मीकिप्रयोगदर्शनात् । **परम्**–केवलम् । **ताभिः**–भ्रमीभिः । **नरेश !**–मनुजेन्द्र ! । **तव**–भवतः । **अरिणा**–शत्रुणा । **देशभ्रमिः**–विषयभ्रमणम् । **एव**–अवधारणार्थकमव्ययम् । **अलाभि** समवापि । **आश्रयः**–अवलम्बः

आश्रीयतेऽत्रेति व्युत्पत्या स्वनिर्वाहोचितस्थानमित्यर्थः । न–नहि । इति–एवंप्रकारेण । न्यवेदयत्–व्यज्ञापयत् ॥ ३७ ॥

**अयं समारुह्य हयं प्रभामयं, निजातपत्रस्य तलस्थलेऽनलः ।**
**दिदेश नीराजनकर्मणे जनान्, महौजसाऽऽविष्करणाय तेजसः ॥३८॥**

*अन्वयः*—*प्रभामयम्, हयम्, समारुह्य, निजातपत्रस्य, तलस्थले, ( स्थितः ), महौजसा, अनलः, अयम्, तेजसः, आविष्करणाय, नीराजनकर्मणे, जनान्, दिदेश ॥ ३८ ॥*

**वृत्तिः**—प्रभामयम्-कान्तिप्रचुरम् । हयम्–अश्वम् । समारुह्य–सम्यक्प्रकारेण आरुह्येत्यर्थः । निजातपत्रस्य–निजमात्मीयञ्च तदातपत्रम्–स्वर्णच्छत्रम् निजातपत्रम् तस्य तथा । तलस्थले–अधोभागे । ( स्थितः–अवस्थितः । ) महौजसा–महदतिशयितञ्च तदोजो बलम् महौजस्तेन तथा । अनलः–अग्निस्वरूपः । अयम्–भगवान् शान्तिनाथः । तेजसः–प्रभावस्य । आविष्करणाय–प्रादुर्भावहेतवे । नीराजनकर्मणे–राज्ञामभावो नीराजम् तच्च तत्कर्म नीराजनकर्म तस्मै तथा यद्वा आरात्रिककर्मणे । जनान्–लोकान् । दिदेश–उपदिदेश, आदिशदिति वा ॥ ३८ ॥

**प्रभोः प्रभावर्द्धिविधौ समादधौ, सहायता या मरुतांपतिर्भुवि ।**
**मरुत् किमद्यापि न ताः सुशिक्षते, सनाऽप्यनालस्यधियाऽनले सुहृत् ॥३९॥**

*अन्वयः*—*मरुतांपतिः, भुवि, प्रभोः, प्रभावर्द्धिविधौ, याः, सहायताः, समादधौ, ताः, अद्यापि, मरुत्, सुहृत्, ( भूत्वा ) सना, अपि, अनालस्यधिया, अनले, न, सुशिक्षते, किम् ॥३९॥*

**वृत्तिः**—मरुतांपतिः–देवानाम् पतिः स्वामी इन्द्र इति यावत् । भुवि–पृथिव्याम् । प्रभोः–त्रिभुवनस्वामिनः, श्रीमतः शान्तिनाथस्येति यावत् । प्रभावर्द्धिविधौ–प्रभावस्य प्रतापस्य तेजस इति यावत् । ऋद्धिः–समृद्धिः सम्पत्तिरित्यर्थः, प्रभावर्द्धिस्तस्या विधिर्विधानम्, सम्पादनमिति यावत्, प्रभावर्द्धिविधिस्तस्मिँस्तथा । याः–यादृशीः । सहायताः–साहाय्यानि । समादधौ–व्यदधात्, कृतवानिति यावत् । ताः–तादृशीः, सहायता इति यावत् । अद्यापि–अद्यत्वेऽपि । मरुत्–पवनः । सुहृत्–मित्रम् ( भूत्वा ) सना–सर्वदा । अपि–सम्भावनायाम् । अनालस्यधिया–अलसस्य मन्दस्य भाव आलस्यम् मान्द्यम्, न आलस्यमनालस्यम्, स्फूर्तिरिति यावत् । तद्विशिष्टा धीर्बुद्धिरनालस्यधीस्तया तथा । अनले–वह्नौ । न–नहि । सुशिक्षते–सम्यगभ्यस्यति । किम्–प्रश्नार्थकम्, निषेधार्थकम् वाऽव्ययम् । अपि तु सम्यगभ्यस्यति एवेति भावः । तथा च कुमारसम्भवमहाकाव्ये तृतीयसर्गे महाकविः कालिदासः "मधुश्च ते मन्मथसाहचर्य्या–दसावनुक्तोऽपि सहाय एव । समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य" इति ॥ ३९ ॥

प्रभूतदूतैरपि यः कृताहवो-ऽप्यनाश्रवोऽभूत् पुरुहूतविक्रमः ।
तदत्ययः प्रत्ययतः कृतोऽमुना, वितत्य वात्यामयचक्रचंक्रमान् ॥४०॥

अन्वयः—प्रभूतदूतैः, अपि, कृताहवः, अपि, यः, पुरुहूतविक्रमः, अनाश्रवः, अभूत्, अमुना, प्रत्ययतः, वात्यामयचक्रचङ्क्रमान्, वितत्य, तदत्ययः, कृतः ॥ ४० ॥

वृत्तिः—प्रभूतदूतैः–प्रभूताः प्रचुराः बहव इति यावत् च ते दूता दूत्यव्यापारपारङ्गमाः, किङ्करा इति यावत्, प्रभूतदूतास्तैस्तथा । बहुभिर्भृत्यैरिति यावत् । अपि–सम्भावनायाम् । कृताहवः–कृतो विहित आहव आह्वानं यस्य स तथा । अपि–सम्भावनायाम् । यः–अयुक्तानुष्ठानादनिर्दिष्टनामधेयः कश्चित् । पुरुहूतविक्रमः–पुरु प्रभूतं हूतं आह्वानं यस्य स पुरुहूत इन्द्रस्तस्य विक्रम इव विक्रमः पराक्रमो यस्य स तथा । इन्द्रतुल्यपराक्रमविशिष्ट इति यावत् । अनाश्रवः–वचनस्थितः आज्ञाकारीति यावदाश्रवः न आश्रवोऽनाश्रवः वशवर्तित्वाभाववान् इति यावत् । अभूत्–अभवत् । अमुना–प्रतिपक्षपक्षविध्वंसनपटीयसा, भगवता शान्तिनाथेनेति यावत् । प्रत्ययतः–सम्मुखगमनात् । वात्यामयचक्रचङ्क्रमान्–वातानां पवनानां समूहो वात्या, सा प्रचुराऽस्त्यत्रेति वात्यामयम् तच्च तच्चक्रम् 'अस्त्रविशेषः' वात्यामयचक्रम्, तस्य चङ्क्रमाश्चङ्क्रमणानि वात्यामयचक्रचंक्रमास्तान् तथा । वितत्य–विस्तीर्य । तदत्ययः–तस्य प्रभूतदूतद्वारेण आह्वाने कृतेऽप्यनाश्रवस्य पुरुहूतविक्रमस्य राज्ञोऽत्ययो ध्वंसः, विनाश इति यावत् तदत्ययः । कृतः–विहितः ॥ ४० ॥

विवेश गत्वा स विलासकाननं, विहारयुक्तं मुनिराजिराजितम् ।
तदन्तिके पातककर्मणोऽन्तके, न के चिदानन्दविदस्तदानके ? ॥४१॥

अन्वयः—सः, मुनिराजराजितम्, विहारयुक्तम्, विलासकाननम्, गत्वा, तदन्तिके, विवेश, पापकर्मणः, अन्तके, तदानके, के, न, चिदानन्दविदः, ॥ ४१ ॥

वृत्तिः—सः–सकलगुणगणशालितया चक्रवर्तित्वादिना वा प्रसिद्धः, भगवाञ्छान्तिनाथ इति यावत् । मुनिराजिराजितम्–मुनीनां श्रमणानां राजयः श्रेणयो मुनिराजयस्ताभी राजितम्–शोभितम् मुनिराजराजितम् । विहारयुक्तम्–विहरन्त्यत्र जना इति विहारो जिनमन्दिरम् तेन युक्तम् विहारयुक्तम् । विलासकाननम्–विलासस्य क्रीडायाः काननम्–वनम् विलासकाननम् ,यद्वा-विलासस्य प्रयोजकम्-विलास प्रयोजकम् तच्च तत्काननम् विलासकाननम् "मयूरव्यंसकेत्यादयः" ३।१।११६। इत्यनेन शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासः । गत्वा–सम्प्राप्य । तदन्तिके–तेषां मुनीनामन्तिकम् समीपम् तदन्तिकम् तस्मिँस्तथा । सर्वनाम्नां प्रधानपरामर्शित्वात् प्रकृते समासेऽप्रधानीभूतस्य मुनेः परामर्शकत्वमनु-

पपन्नमिति नो शङ्क्यम्—"दृश्यैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः" "दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ" इत्यादौ प्रामाणिकानां प्रयोगेऽपि तथादर्शनात्तस्या व्युत्पत्तेः प्रायिकत्वात्। विवेश–अविशत्। पापकर्मणः–पापम्–पापविशिष्टञ्च तत् कर्म आचरणम् पापकर्म तस्य तथा। यद्वा–पापस्य दुष्कृतस्य प्रयोजकम् पापप्रयोजकम् तच्च तत्कर्म पापकर्म तस्य तथा। अन्तके–विनाशके। तदानके–तेषाम् मुनीनाम् तस्य भगवतः शान्तिनाथस्य वा आनकः पटहः तदानकस्तस्मिँस्तथा। के–कीदृशास्तावत् जना इति शेषः। न–नहि। चिदानन्दविदः–चिदानन्दम् चित्स्वरूपमानन्दस्वरूपञ्च विदन्ति जानन्ति इति चिदानन्दविदः। अपि तु सर्व एव चिदानन्दविद इति भावः। नञः काकर्थकत्वात्—"मध्नामि कौरवशतं समरे न कोपाद्, दुःशासनस्य रुधिरं न पिबाम्युरस्तः। सञ्चूर्णयामि गदया न सुयोधनोरूँ सन्धिं करोतु भवतां नृपतिः पणेन॥" इत्यादौ नञः काकर्थकत्वात्–मध्नाम्येवेति बोधनात्॥ ४१॥

**स सात्त्विकस्तात्त्विकवर्गसङ्गत–स्ततः क्षणात् क्षोणिपतिर्धृतीच्छया।**
**चकार चर्चां श्रमणाश्रमेऽश्रमः, स्वसम्पदो वैश्रवणः स्वसम्पदाम्॥४२॥**

**अन्वयः**—*सात्त्विकः, तात्त्विकवर्गसङ्गतः, स्वसम्पदाम्, वैश्रवणः, क्षोणिपतिः, सः, ततः, क्षणात्, धृतीच्छया, अश्रमः, (सन्) श्रमणाश्रमे, स्वसम्पदः, चर्चाम्, चकार॥ ४२॥*

**वृत्तिः**—सात्त्विकः–प्रसीदति मनोऽस्मिन्निति व्युत्पत्तेः सत्त्वगुणोत्कर्षात् साधुत्वाच्च प्रभात्मकं वस्तु सत्त्वम् तत्र भवः सात्त्विकः। सत्त्वगुणविशिष्ट इति यावत्। तात्त्विकवर्गसङ्गतः-तात्त्विकानां याथार्थ्यविशिष्टानां वर्गः समूहस्तात्त्विकवर्गस्तेन सङ्गतस्तथा। स्वसम्पदाम्–स्वानि धनानि च सम्पदः सम्पत्तयश्च स्वसम्पदस्तासान्तथा। 'द्वन्द्वतत्पुरुषसमासयोः, परवल्लिङ्गत्वानुशासनात्। वैश्रवणः–कुबेरः। क्षोणिपतिः–क्षोणेः पृथिव्याः पतिः स्वामी, ईशितेति यावत्, क्षोणिपतिस्तस्य तथा। सः–प्रसिद्धो भगवान् शान्तिनाथ इति यावत्। ततः–मुनिराजिराजितविहारैकलितकाननप्राप्तिसमनन्तरमित्यर्थः। क्षणात्–उत्सवात्। क्षणात्मकसूक्ष्मकालविशेषेणैव वा। धृतीच्छया–शोकभयवियोगादिजनितोपप्लवनिवारणकारणीभूतः चित्तवृत्तिविशेषो धृतिस्तस्या इच्छा अभिलाषो धृतीच्छा तया तथा। अश्रमः–नास्ति श्रमः बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसम्मर्दनिद्रादिकारणीभूतः खेदविशेषो यस्य स तथा। (सन्) श्रमणाश्रमे–श्रमणानां मुनीनामाश्रमः स्थानम् श्रमणाश्रमस्तस्मिँस्तथा। स्वसम्पदः–स्वस्य आत्मनः सम्पत् सम्पत्तिर्धनधान्यादिरिति यावत्, स्वसम्पत् तस्यास्तथा। चर्चाम्–चिन्ताम् आत्मश्रेयःसाधनमीमांसामिति यावत्। चकार–कृतवान्॥ ४२॥

**ततः समुत्थाय महाशयः शयं, निवेशयन् वज्रभृदर्पिते शये।**
**प्रवालरागच्छुरितं सुषुप्सया, ययौ वनं यौवनभृत् कृतावनम्॥४३॥**

अन्वयः—*महाशयः, ततः, समुत्थाय, वज्रभृदर्पिते, शये, शयम्, निवेशयन्, यौवनभृत्, ( सः ) सुषुप्सया, प्रवालरागच्छुरितम्, कृतावनम्, वनम्, ययौ ॥ ४३ ॥*

वृत्तिः—महाशयः–महान् विशाल आशयोऽभिप्रायो यस्य स महाशयः । ततः–तदनन्तरम्, मुनिमण्डलीतो वा । समुत्थाय–समुत्थितो भूत्वा । वज्रभृदर्पिते–वज्रं कुलिशं बिभर्ति धारयतीति वज्रभृत् इन्द्रस्तेन अर्पितो दत्तः, नियोजित इति यावत् वज्रभृदर्पितस्तस्मिँस्तथा । शये–शय्यते सुप्यतेऽत्रेति शयः शय्या, तस्मिँस्तथा । शयम्–हस्तम् । निवेशयन्–संस्थापयन् । यौवनभृत्–यौवनम् तारुण्यम् बिभर्ति धारयति इति यौवनभृत्, युवावस्थाविशिष्ट इति यावत् । ( सः–भगवान् शान्तिनाथः । ) सुषुप्सया–निद्रातु कामेन । प्रवालरागच्छुरितम्–प्रवालस्य विद्रुमस्य रागो लौहित्यम् प्रवालरागस्तेनच्छुरितम् समुज्जृम्भितम्, विलासितमिति यावत् प्रवालरागच्छुरितम् । कृतावनम्–कृतं विहितमवनं रक्षणं प्राणिनां यत्र तत् कृतावनम् । अथवा कृतं विहितमवनं शान्तिप्रदानेन स्वरक्षणं येन तत्तथा । वनम्–काननम् । ययौ–जगाम । गतवानिति यावत् ॥ ४३ ॥

**वयोनिनादैर्जयवादमादधत्, प्रवालवालविजनैः समीरयत् ।**
**निसर्गसम्यग् वनमेष पिप्रिये, हरिर्घनच्छायमिवार्णसां निधिम् ॥४४॥**

अन्वयः—*हरिः, अर्णसाम्, निधिम्, इव, एषः, वयोनिनादैः, जयवादम्, आदधत्, प्रवालवालविजनैः, समीरयत्, निसर्गसम्यक्, घनच्छायम्, वनम्, पिप्रिये ॥ ४४ ॥*

वृत्तिः—हरिः–भगवान् विष्णुः । अर्णसाम्–जलानाम् । निधिम्–निधानम् । समुद्रमित्यर्थः । इव–यथा । एषः–भगवाञ्शान्तिनाथः । वयोनिनादैः–वयसां पक्षिणां निनादाः शब्दा वयोनिनादाः तैस्तथा । जयवादम्–जयशब्दम् । आदधत्–कुर्वन् । प्रवालवालव्यजनैः–प्रवालाः किसलया एव बालव्यजनानि नूतनपवनोत्पादकपदार्थाः प्रवालवालव्यजनानि तैस्तथा । समीरयत्–समीरं पवनं करोतीति समीरयत् । निसर्गसम्यक्–स्वभावमनोरमम् । घनच्छायम्–घना सान्द्रा छाया आतपाभावो यत्र तत्तथा । वनम्–काननम् । पिप्रिये–समधिजगाम ॥ ४४ ॥

**वनान्तपर्य्यन्तमुपेत्य सस्पृहं, समेत्य तच्छासनमन्यभूधनैः ।**
**पटालयाः शिश्रियिरे घटालयान्, पुरोदधानैर्बहुगन्धसिन्धुरान् ॥४५॥**

अन्वयः—*पुरः, घटालयान्, बहुगन्धसिन्धुरान्, दधानैः, अन्यभूधनैः, सस्पृहम्, वनान्तपर्य्यन्तम्, उपेत्य, तच्छासनम्, समेत्य, पटालयाः, शिश्रियिरे ॥ ४५ ॥*

**वृत्तिः**—**पुरः**–अग्रतः । **घटालयान्**–घटा हस्तिघटना आलयो वसतिर्येषान्ते ताँस्तथा । 'करिणां घटना घटा' इत्यमरः । **बहुगन्धसिन्धुरान्**–गन्धप्रधानाः सिन्धुरा गजा गन्धसिन्धुरा बहवश्च ते गन्धसिन्धुरा बहुगन्धसिन्धुरास्ताँस्तथा । **दधानैः**–धारयद्भिः । **अन्यभूधनैः**–भूः पृथिव्येव रक्षणीयत्वादुपभोग्यत्वात्प्रतिष्ठापादकत्वाच्च धनं वित्तमैश्वर्य्यमिति यावद्येषान्ते भूधना राजानः, अन्ये अपरे च ते भूधना अन्यभूधनास्तैस्तथा । **सस्पृहम्**–स्पृहया अभिलाषेण सहितं सस्पृहं यथा स्यात्तथा । **वनान्तपर्य्यन्तम्**–वनान्तस्य वनस्वरूपस्य पर्य्यन्तो मर्य्यादा वनान्तपर्य्यन्तस्तन्तथा । **उपेत्य**–गत्वा । **तच्छासनम्**–तस्य भगवतः शान्तिनाथस्य शासनमनुज्ञा तच्छासनम् तत्तथा । **समेत्य**–समधिगम्य । **पटालयाः**–पटो वस्त्रम् तस्य आलया गृहाः पटालयाः वस्त्रनिर्मितगृहा इति यावत् । **शिश्रियिरे**–सिषेविरे ॥ ४५ ॥

**परेऽप्यथासन्नचराश्चराचराः, क्रमेण तस्मिन्नवतीर्णदृक्पथे ।**
**विशश्रमुस्तच्छिबिरे बिलम्बिनि, भरावतारारवदुष्ट्रमालिनि ॥४६॥**

अन्वयः—*अथ, तस्मिन्, क्रमेण, अवतीर्णदृक्पथे, ( सति ) परे, अपि, आसन्नचराः, चराचराः, भरावतारारवदुष्ट्रमालिनि, विलम्बिनि, तच्छिबिरे, विशश्रमुः ॥ ४६ ॥*

**वृत्तिः**—**अथ**–अनन्तरम् । **तस्मिन्**–परममहःशालितया प्रसिद्धे भगवति शान्तिनाथे । **क्रमेण**–क्रमशः । **अवतीर्णदृक्पथे**–दृशोर्नयनयोः पन्था मार्गो दृक्पथः अवतीर्णो दृक्पथो येन सोऽवतीर्णदृक्पथः तस्मिँस्तथा । चक्षुविषयतामतिक्रान्ते इति यावत् । सतीतिशेषः । **परे**–अन्ये । **अपि**–सम्भावनायाम् । **आसन्नचराः**–आसन्ने समीपे चरन्ति विचरन्तीत्यासन्नचराः समीपवर्तिन इत्यर्थः । **चराचराः**–जङ्गमस्थावराः । **भरावतारारवदुष्ट्रमालिनि**–भरस्य भारस्य अवतारोऽधसंस्थापनम् भरावतारः आसमन्तादियर्ति नक्षत्रेष्वित्यारो मङ्गलः, वक्रो वा प्रकृते आरपदस्य भावप्रधानत्वान्माङ्गल्यं वक्रता वाऽस्त्येषामित्यारवन्तस्ते च त उष्ट्राः कण्टकाशनाः, दाशेरा इति यावत् आरवदुष्ट्रास्ते भरावतारेण आरवदुष्ट्रा भरावतारवदुष्ट्रास्तेषां माला श्रेणी भरावतारारवदुष्ट्रमाला सा ऽस्त्यस्मिन्निति भरावतारारवदुष्ट्रमालि तस्मिँस्तथा । **विलम्बिनि**–विशेषेण लम्बते तच्छीलम् विलम्बि तस्मिँस्तथा । अतिदीर्घे इति यावत् । **तच्छिबिरे**–तस्य भगवतः शान्तिनाथस्य शिबिरम् सेनासन्निवेशः तच्छिबिरम् तस्मिँस्तथा । **विशश्रमुः**–विश्रामं प्रापुः ॥ ४६ ॥

**मतङ्गजं वारिनिवारणं द्विधा, व्रजन्तमन्तःशिबिरं दिदृक्षताम् ।**
**न्यवर्ति दृष्टिप्रकरैः पुरौकसा–मसान्द्रभावाध्वजुषामुपेयुषाम् ॥४७॥**

*अन्वयः*—*वारिनिवारणम्, वा, अरिनिवारणम्, द्विधा, अन्तःशिबिरम्, व्रजन्तम्, मतङ्गजम्, दिदृक्षताम्, असान्द्रभावाध्वजुषाम्, उपेयुषाम्, पुरौकसाम्, दृष्टिप्रकरैः, न्यवर्ति ॥ ४७ ॥*

**वृत्तिः**—**वारिनिवारणम्**–वारि जलं निवारयति प्रतिरुणद्धि इति वारिनिवारणः सेतुस्तन्तथा। सेतुं प्रतीत्यर्थः। **व्रजन्तम्**–गच्छन्तम्। **वा**–अथवेत्यर्थकम् समुच्चयार्थकं वाऽव्ययम्। **अरिनिवारणम्**–अरीन् शत्रून् निवारयति प्रतिरुणद्धीति अरिनिवारणः शत्रुप्रतिरोधकस्तन्तथा। **अन्तःशिबिरम्**–शिबिरे सैन्यसन्निवेश इति अन्तःशिबिरम् शिबिरमध्य इति यावत्। **व्रजन्तम्**–गच्छन्तम्। **द्विधा**–प्रकारद्वयविशिष्टम्, प्रकारद्वयेन वा। **मतङ्गजम्**–दन्तावलम्, हस्तिनमिति यावत्। **दिदृक्षताम्**–दर्शनेच्छावताम्। **असान्द्रभावाध्वजुषाम्**–सान्द्रो निबिडः स्थिर इति यावत्। भावः स्वभावश्चेष्टा वा यस्य स सान्द्रभावः, न सान्द्र भावोऽसान्द्रभावस्तस्य अध्वा मार्गः, असान्द्रभावाध्वा पलायनमित्यर्थः, तं जुषन्ति सेवन्त इति असान्द्रभावाध्वजुषस्तेषान्तथा। **उपेयुषाम्**–सामीप्यमधिगतानाम्। **पुरौकसाम्**–पुरम् नगरमोको निवासस्थानम् येषान्ते पुरौकसस्तेषान्तथा। नगरवासिनामितियावत्। **दृष्टिप्रकरैः**–नेत्रसमूहैः। **न्यवर्ति**–निवर्तितम् ॥ ४७ ॥

**प्रविश्य तत्तन्नगरे ससाधनै–र्धनैरुपादाय यथेष्टवास्तवम् ।**
**स्फुटं दिदीपे कटकं भटैर्जनै–<u>रनुव्रजद्बन्धुसमाजबन्धुभिः</u> ॥४८॥**

*अन्वयः*—*तत्तन्नगरे, प्रविश्य ससाधनैः, धनैः, यथेष्टवास्तवम्, उपादाय, अनुव्रजद्बन्धुसमाजबन्धुभिः, भटैः, जनैः, कटकम्, स्फुटम्, दिदीपे ॥ ४८ ॥*

**वृत्तिः**—**तत्तन्नगरे**–तस्मिँस्तस्मिन्पुरे। **प्रविश्य**–प्रवेशमासाद्य। **ससाधनैः**–साध्यत एभिरिति साधनान्युपकरणानि तैः सहितानि ससाधनानि तैस्तथा। **धनैः**–मणिकाञ्चनप्रभृतिवित्तैरितियावत्। **यथेष्टवास्तवम्**–वस्त्वेव वास्तवम् यथेष्टं यथाभिलषितञ्च तद् वास्तवम् यथेष्टवास्तवम्। **उपादाय**–गृहीत्वा। **अनुव्रजद्बन्धुसमाजबन्धुभिः**–अनुव्रजन् अनुगच्छन् चासौ बन्धुसमाजो बान्धववर्गोऽनुव्रजद्बन्धुसमाजः तेन बन्धुभिः सदृशैस्तथा। **भटैः**–योधैः, वीरैरिति यावत्। **जनैः**–लोकैः। **कटकम्**–कटत्यावृणोति पृथिवीमिति कटकम् सैन्यम्, अनीकमिति यावत्। **स्फुटम्**–प्रकटं यथास्यात्तथा। **दिदीपे**–दिद्युते, विराजितमिति यावत् ॥ ४८ ॥

**<u>ततः प्रसूने च फले च मञ्जुले</u>, निवेश्य देश्ये वनपालपुङ्गवे ।**
**नृनाथसभ्येभ्यपटाश्रयान्तरं विनीयमानेऽत्र चरैर्मुदोऽभवन् ॥४९॥**

अन्वयः—*ततः, चरैः, मञ्जुले, प्रसूने, च, फले, च, निवेश्य, देश्ये, वनपालपुङ्गवे, नृनाथसभ्येभ्यपटाश्रयान्तरम् विनीयमाने, अत्र, मुदः, अभवन् ॥ ४९ ॥*

वृत्तिः—ततः–तदनन्तरम् । चरैः–चरन्ति मध्ये राष्ट्रं गच्छन्तीति चरा दूतास्तैस्तथा । मञ्जुले–मनोहरे । प्रसूने–कुसुमे, पुष्पे इति यावत् । च–पुनः । फले–प्रसवे । 'प्रसवो''' फलं च कुसुमेऽपि च' इति मेदिनी । च–पादपूर्णार्थकमव्ययम् । निवेश्य–संस्थाप्य । देश्ये–देशनयोग्ये, उपदेशार्हे इति यावत् । वनपालपुङ्गवे–वनम् क्रीडाकाननम् पालयति रक्षति जलसेकादिभिरिति वनमालास्तेषां मध्ये पुङ्गवः श्रेष्ठस्तथा । नृनाथसभ्येभ्यपटाश्रयान्तरम्–नृणां मनुष्याणां नाथः स्वामी, प्रभुरिति यावत् नृनाथः नरपतिः, सभायां सदसि साधवः सभ्याः, इभ्या धनाढ्याः, नृनाथाश्च सभ्याश्च इभ्याश्च नृनाथसभ्येभ्यास्तेषां पटाश्रयाः वस्त्रालयाः नृनाथसभ्येभ्यपटाश्रयास्तेषामन्तरम् मध्यम् नृनाथसभ्येभ्यपटाश्रयान्तरम् तत्तथा । विनीयमाने–शिक्ष्यमाणे । अत्र–तादृशवस्त्रालये । मुदः–हर्षाः । अभवन्–अभूवन् समाजायन्त इति यावत् ॥ ४९ ॥

**कृतप्रसादो वनमालिनाऽवदत्, स सन्मुखस्थाङ्गुलिना जनाधिपः ।**
**निवेदिते पुष्पफलादिवस्तुनि, सुनिश्चलं तिष्ठ सुतुष्टचेतसा ॥५०॥**

अन्वयः—*सन्मुखस्थाङ्गुलिना, वनमालिना, पुष्पफलादिवस्तुनि, निवेदिते, कृतप्रसादः, जनाधिपः, सः, सुतुष्टचेतसा, सुनिश्चलम्, तिष्ठ ( इति ) अवदत् ॥ ५० ॥*

वृत्तिः—संमुखस्थाङ्गुलिना–सन्मुखेऽभिमुखे तिष्ठन्तीति सन्मुखस्थास्तादृशोऽङ्गुलयो यस्य स सन्मुखस्थाङ्गुलिस्तेन तथा । वनमालिना–माला स्रक् निर्मातव्यत्त्वेनास्त्यस्येति माली वनस्य काननोद्यानस्य माली मालिको वनमाली तेन तथा । पुष्पफलादिवस्तुनि–पुष्पाणि कुसुमानि च फलानि प्रसवाश्च पुष्पफलानि तान्यादिः प्रधानं यस्मिन् तत् पुष्पफलादि तच्च तद्वस्तु च पुष्पफलादिवस्तु तस्मिँस्तथा । निवेदिते–प्रतिपादिते । सतीतिशेषः । कृतप्रसादः–कृतो विहितः प्रसादः प्रसन्नता यस्य सः कृतप्रसादः । जनाधिपः–अधि–अधिकं पाति रक्षतीत्यधिपः, जनानां लोकानामधिपः प्रभुर्जनाधिपः, लोकनाथः । सः–प्रसिद्धः, भगवाञ्शान्तिनाथ इति यावत् । सुतुष्टचेतसा–सु अतिशयेन तुष्टं सन्तुष्टञ्च सुतुष्टम् तच्च तच्चेतोऽन्तःकरणम् सुतुष्टचेतस्तेन तथा । सुनिश्चलम्–सुनिष्कम्पम् । अत्यन्तनिर्भयमिति यावत् । तिष्ठ–अवतिष्ठस्व, निवसेति यावत् । इति–इत्येवम् वाक्यार्थः कर्म । अवदत्–अकथयत् ॥५०॥

**विदेशजैः पुष्पफलादि सादरं, मनःप्रसादाय विदायलिप्सया ।**
**निवेद्यमानं वनपालपाणिना, प्रपद्य भूपैर्मुमुदे पदे पदे ॥५१॥**

अन्वयः—*विदेशजैः, भूपैः, मनःप्रसादाय, विदायलिप्सया, वनपालपाणिना, सादरम्, निवेद्यमानम्, पुष्पफलादि, प्रपद्य, पदे पदे, मुमुदे ॥ ५१ ॥*

वृत्तिः—**विदेशजैः**–विभिन्नाश्च ते देशा विषया विदेशास्तत्र जातानि उत्पन्नानि इति विदेशजास्तैस्तथा। **भूपैः**–राजभिः। **मनःप्रसादाय**–मनसश्चित्तस्य प्रसादः प्रसन्नता मनःप्रसादस्तस्मै तथा। **विदायलिप्सया**–वेदनं वित् ज्ञानम् आयो लाभः विच्च आयश्चेति विदायौ तयोर्लिप्सा प्राप्तीच्छा विदायलिप्सा, तया तथा। **वनपालपाणिना**–वनपालस्य उद्यानसंरक्षकस्य मालाकारस्येति यावत् पाणिर्हस्तो वनपालपाणिस्तेन तथा। **सादरम्**–ससत्कारम्, सश्रद्धमिति यावत्। **निवेद्यमानम्**–प्रतिपाद्यमानम्, उपहारीक्रियमाणमिति यावत्। **पुष्पफलादि**–पुष्पाणि कुसुमानि च फलानि प्रसवाश्च पुष्पफलानि तानि आदिः प्रधानं यस्य तत् पुष्पफलादि वस्तिवतिशेषः। **प्रपद्य**–सम्प्राप्य। **पदे पदे**–स्थाने स्थाने प्रतिशब्दम्, प्रतिवाक्यम्, प्रतिवस्तु वा। विप्सायां द्विर्भावः। **मुमुदे**–तुतोष प्रासीददिति यावत् ॥५१॥

**विवेकिलोकैः कृतकेलिकर्मभि–र्विलोक्य लोकम्पृणतागुणे स्तुते।**
**महाजनश्चारुसभाजनाश्रितो, व्यलोकयत् काननकामनीयकम् ॥५२॥**

अन्वयः—*कृतकेलिकर्मभिः, विवेकिलोकैः, विलोक्य, लोकम्पृणतागुणे, स्तुते, ( सति ) चारुसभाजनाश्रितः, महाजनः, काननकामनीयकम्, व्यलोकयत् ॥ ५२ ॥*

वृत्तिः—**कृतकेलिकर्मभिः**–केलीनां नर्मणाम् क्रीडानामिति यावत्, कर्माणि क्रिया आचरणानीति यावत्, केलिकर्माणि, कृतानि विहितानि केलिकर्माणि यैस्ते कृतकेलिकर्माणस्तैस्तथा। **विवेकिलोकैः**–विवेकः सदसद्वस्तुविचारोऽस्त्येषामिति विवेकिनः, "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः, ते च ते लोकाः जनाः विवेकिलोकास्तैस्तथा। **विलोक्य**–विशेषेण दृष्ट्वा, सम्यगालोच्येति यावत्। **लोकम्पृणतागुणे**–लोकं प्रजां पृणातीति लोकम्पृणो जनोपकारकस्तस्य भावो लोकम्पृणता, सैव गुण उत्कर्षहेतुर्दयादाक्षिण्यत्यागशौर्यादिरिति यावत, लोकम्पृणतागुणस्तस्मिँस्तथा। **स्तुते**–प्रशंसिते। ( सति ) **चारुसभाजनाश्रितः**–चारवः शोभनाश्च ते सभाजनाः सभ्याः सदस्या इति यावत्, चारुसभाजनास्तानाश्रितोऽनुसृतश्चारुसभाजाश्रितः। **महाजनः**–महान् विशाल उदाराशय इति यावच्च जनो लोको महाजनः, **काननकामनीयकम्**–कमनीयस्य रमणीयस्य 'मनोहरस्येति यावद्' भावः कामनीयकम्, काननस्य वनस्य कामनीयकम् काननकामनीयकम्। उद्यानसम्बन्धिनीं सुन्दरतामिति यावत्। **व्यलोकयत्**–प्रैक्षिष्ट, समदर्शदिति यावत् ॥ ५२ ॥

**फलानि पुष्पाणि च पल्लवे करे, समं समादाय जने परस्परम्।**
**प्रसर्पति प्रीतिमना महामना, अमन्यतास्मिन् समये स्वधन्यताम् ॥५३॥**

अन्वयः—पल्लवे, करे, पुष्पाणि, च, फलानि, समम्, समादाय, जने, परस्परम्, प्रसर्पति, ( सति ) अस्मिन्, समये, प्रीतिमनाः, महामनाः, स्वधन्यताम्, अमन्यत ॥ ५३ ॥

वृत्तिः—पल्लवे-किसलयरूपे । करे-हस्ते । "मुखं चन्द्रः" इत्यादिवद्रूपकालङ्कारः, करस्य पल्लवत्वेन रूपणात् तादात्म्याध्यासादिति यावत् । पुष्पाणि-कुसुमानि । च-पुनः । फलानि-प्रसवान् । समम्-सहैव एककालावच्छेदेनेति यावत् । समादाय-गृहीत्वा । जने-लोके । परस्परम्-अन्योन्यम् । प्रसर्पति-गच्छति ( सति ) । अस्मिन्-युगपन्मिथस्तादृशफलपुष्पाऽऽदानपूर्वकप्रसर्पणावसरे इत्यर्थः । समये-काले । प्रीतिमनाः-प्रीतिर्हर्षो मनस्यन्तःकरणावच्छेदेन यस्य स तथा । व्यधिकरणबहुव्रीहिसमासः । महामनाः-महत् उदारं मनोऽन्तःकरणं यस्य स तथा । स्वधन्यताम्-स्वस्य आत्मनो धन्यता धन्यवादार्हता स्वधन्यता तान्तथा । अमन्यत-अबुध्यत । लोकाः पल्लवे तद्रूपे हस्ते फलानि पुष्पाणि च गृहीत्वा राजपूजार्थं यथा तिष्ठन्ति तथा वृक्षा अपि फलपुष्पादिभिर्मुनिजनेषु सत्कारातिशयमातिथ्यमकार्षुरितिभावः ॥ ५३ ॥

**न याऽजनिष्टाऽप्यनयाऽजनिष्टया, वयोऽतिपातोद्गतवातवेपिते ।**
**पुरा जने नीतिरियं पुराघृता-वयोऽतिपातोद्गतवातवेपिते ॥५४॥**

अन्वयः—अजनिष्टया, या, नीतिः, जने, पुरा, न, अजनिष्ट, अनया, पुरा, वयोऽतिपातोद्गतवातवेपिते, ( च ) वयोऽतिपातोद्गतवातवेपिते, इयम्, नीतिः, घृता ॥ ५४ ॥

वृत्तिः—अजनिष्टया-परमेश्वरकृतसन्तोषेण । या-यादृशी । नीतिः-नयः । जने-लोके । पुरा-पूर्वम् । न-नहि । अजनिष्ट-समुदपद्यत उत्पद्यते स्मेतियावत् । अनया-एतया, शान्तिनाथावस्थानपवित्रयेत्यर्थः । पुरा-नगर्य्या । वयोऽतिपातोद्गतवातवेपिते-वयसः अवस्थाया अतिपातोऽतिशयो वयोतिपातस्तेन उद्गतं समुत्पन्नं वातवेपितम्-वातरोगप्रयुक्तकम्पनं यस्य स वयोऽतिपातोद्गतवातवेपितस्तस्मिँस्तथा । वृद्धे इति यावत् । ( च-पुनः । ) वयोतिपातोद्गतवातवेपिते-वयसो यौवनस्य अतिपातोऽतिशयो वयोऽतिपातस्तेन उत् ऊर्ध्वं गतमुद्गतम् विनष्टमिति यावत्, वातवेपितं वातप्रयोज्यकम्पनं यस्य स वयोऽतिपातोद्गतवातवेपितस्तस्मिँस्तथा । इयम्-पूर्वोक्तविलक्षणा । नीतिः-न्यायः । समुचिताचरणात्मा नय इति यावत् । धृता-अवलम्बिता ॥ ५४ ॥

**नृणां क्रियास्मिन् शिबिरे पुरीप्रिया, क्रयादिकाऽभूदधिकाप्यनेकशः ।**
**स्थितैः समादाय महर्षिवार्धका-नुगैर्जनैर्वस्तु विसिष्मिये ततः ॥५५॥**

अन्वयः—नृणाम्, अस्मिन्, शिबिरे, अनेकशः, अधिका, अपि, क्रयादिका, क्रिया, पुरीप्रिया, अभूत्, स्थितैः, महर्षिवार्धकानुगैः, जनैः, ततः, वस्तु, समादाय, विसिष्मिये ॥ ५५ ॥

**वृत्तिः**—**नृणाम्**–जनानाम् । **अस्मिन्**–साम्प्रतिके । भगवच्छान्तिनाथाधिष्ठिते । **शिबिरे**–सैन्यसन्निवेशे । **अनेकशः**–बहुशः । **अधिका**–प्रचुरा । **अपि**–सम्भावनायामव्ययम् । **क्रयादिका**–क्रयो द्रव्यविनिमय आदिः प्रधानं यस्यां सा तथा । **क्रिया**–कर्म । **पुरीप्रिया**–पुर्य्या नगर्य्याः तात्स्थ्यनिमित्तलक्षणया पुरीस्थलोकानाम् इति यावत् प्रिया रुचिकारी पुरीप्रिया तथा चोक्तम्—परमलघुमञ्जूषायां नागोजीभट्टैः—"तात्स्थ्यात्तथैवताद्धर्म्यात्तत्सामीप्यात्तथैव च" इति । **अभूत्**–समभवत् । **स्थितैः**–अवस्थितैः, तन्नगराधिकरणकावस्थानवद्भिरिति यावत् । **महर्षिवार्धकानुगैः**–वृद्धानाम् परिणतवयसाम्, जरठानामिति यावत् समूहो वार्धकम्, महर्षीणां महामुनीनां वार्धकम् महर्षिवार्धकम् तस्य अनुगा अनुगामिनो महर्षिवार्धकानुगास्तैस्तथा । **जनैः**–लोकैः । **ततः**–तस्मात् स्थानात् । **वस्तु**–पदार्थ जातम् । **समादाय**–गृहीत्वा । **विसिष्मिये**–विस्मितम् आश्चर्य्यमासावदितमिति यावत् ॥ ५५ ॥

**यदत्र तन्त्रे विषयान्तरागते, स्वसजने तथ्यमकार्षुरुत्तमाः ।**
**फलैः प्रसूनैर्बहुमानमादराद्, वने तदातिथ्यमशिक्षि शाखिभिः ॥५६॥**

**अन्वयः**—*अत्र, विषयान्तरागते, तन्त्रे, स्वसज्जने, उत्तमाः, यत्, तथ्यम्, अकार्षुः, वने, शाखिभिः, बहुमानम्, आदरात्, फलैः, प्रसूनैः, तत्, आतिथ्यम्, अशिक्षि ॥ ५६ ॥*

**वृत्तिः**—**अत्र**–अस्मिन्नगरे । **विषयान्तरागते**–अन्यो अपरो विषयो देशो विषयान्तरम् तस्मादागत आयातो विषयान्तरागतस्तस्मिँस्तथा । **तन्त्रे**–प्रधाने । **स्वसज्जने**–स्व आत्मीयश्चासौ सज्जनः स्वसज्जनस्तस्मिँस्तथा । **उत्तमाः**–महान्तः उत्तमप्रकृतिका इति यावत् । नागरिका इति शेषः । **तथ्यम्**–सत्यम् वस्तुगत्येतियावत् । **यत्**–यादृशम् आतिथ्यमिति यावत् । **अकार्षुः**–कृतवन्तः । **वने**–कानने । अपीतिशेषः । **शाखिभिः**-शाखा विटपाः सन्त्यस्येति शाखिनो वृक्षास्तैस्तथा । **बहुमानम्**–बहुरधिको मानः सत्कारो यस्मिन् कर्मणि तद्बहुमानं यथास्यात्तथा । **आदरात्**–श्रद्धातिशयात् । **फलैः**–वृक्षप्रसवैः । **प्रसूनैः**–पुष्पैः । **तत्**–तादृशम् । **आतिथ्यम्**–अतिथयेऽभ्यागताय इदमातिथ्यम् । **अशिक्षि**–अभ्यस्तम् । राज्ञः प्रति यादृशआतिथ्यात्मकव्यवहारविशेषस्तत्रत्यानामुत्तमप्रकृतिकानाम् अदर्शि शाखिभिस्तदनन्तरन्तैरपि तान् प्रतिफलैः पुष्पादिभिस्तथा कर्तुमशिक्षीति ॥ ५६ ॥

**विनिद्रपत्रालिगतालिकैतवाद्, व्रजैरुतापीयत सोमजं नृणाम् ।**
**तदप्यभूदुन्मदसम्पदेऽपदेऽप्यहो महाविभ्रमकारणं धियाम् ॥५७॥**

**अन्वयः**—*विनिद्रपत्रालिगतालिकैतवात्, नृणाम्, व्रजैः, उत, सोमजम्, अपीयत, अहो, अपदे, अपि, तत्, धियाम्, महाविभ्रमकारणम्, अपि, उन्मदसम्पदे, अभूत् ॥ ५७ ॥*

**वृत्तिः**—**विनिद्रपत्रालिगतालिकैतवात्**—विगता निद्रा यस्याः सा विनिद्रा त्यक्तनिद्रा, विकसितेति यावत् सा चासौ पत्रालिर्दलश्रेणी विनिद्रपत्रालिस्तत्र गतास्तां वा गताः प्राप्ता अलयो भ्रमरा विनिद्रपत्रालिगतालयस्तेषां कैतवम् व्याजो विनिद्रपत्रालिगतालिकैतवम् तस्मात्तथा । **नृणाम्**—जनानाम् । **व्रजैः**—समूहैः । **उत**—अत्यर्थकम् । **सोमजम्**—दुग्धम् । **अपीयत**—पानक्रियानिरूपितकर्मतावदक्रियतेत्यर्थः । **अहो**—आश्चर्य्यम् । **अपदे**—अस्थाने । **अपि**—सम्भावनायम् । **तत्**—पीतं सोमजमित्यर्थः । **धियाम्**—बुद्धीनाम् । **महाविभ्रमकारणम्**—महान् अतिशयितश्चासौ विभ्रमो विशिष्टो भ्रमः महाविभ्रमस्तस्य कारणम्—निदानम् महाविभ्रमकाकरणम् । **अपि**—सम्भावनायाम् । **उन्मदसम्पदे**—उद्गतो विनष्टो मदो गर्वो ( लोकानाम् ) यतः सा उन्मदा, सा चासौ सम्पत् सम्पतिः उन्मदसम्पत् तस्यै तथा । **अभूत्**—अभवत् । अथवा—उन्मदसम्पदे, अपि, तत्, अपदे, अपदे, अपि, धियाम्, महाविभ्रमकारणम्, अहो, उन्मदसम्पादकत्वेऽपि तत्पानस्य अस्थानेऽपि बुद्धीनामतिशयविस्फुरणकारणत्वं सञ्जातमित्याश्चर्य्यमिति सङ्क्षेपार्थः ॥ ५७ ॥

**चतुर्दिगन्तेषु जयात् ससाधनं, मृगाङ्कचूडामणिवर्जनार्जितम् ।**
**धनं विरेजे शिबिरे चयीकृतं, सुराचलस्पर्धनया नयाश्रितम् ॥५८॥**

**अन्वयः**—*चतुर्दिगन्तेषु, जयात्, ससाधनम्, मृगाङ्कचूडामणिवर्जनार्जितम्, नयाश्रितम्, सुराचलस्पर्धनया, शिबिरे, चयीकृतम्, धनम्, विरेजे ॥ ५८ ॥*

**वृत्तिः**—**चतुर्दिगन्तेषु**—चतस्रश्च ता दिश आशा, दिशा इति यावत् । चतुर्दिशस्तासामन्ताऽवसानानि पर्य्यन्तभागा इति यावत् चतुर्दिगन्तास्तेषु तथा । **जयात्**—विजयात् । पञ्चम्यर्थो जन्यत्वं प्रयोज्यत्वं वाऽवधेयम्, तथा च चतुर्दिगन्ताधिकविजयजन्यम्, तादृशविजयप्रयोज्यं वा । **ससाधनम्**—साधनैर्विजयोपकरणैरश्वादिभिः सहितं ससाधनम् । **मृगाङ्कचूडामणिवर्जनार्जितम्**—मृगो हरिणोऽङ्के उत्सङ्गे यस्य स मृगाङ्कः पञ्चमचक्रवर्ती भगवाञ्छान्तिनाथ इति यावत् । तं चूडामणौ शिरोरत्ने वरयतीति क्विपि मृगाङ्कचूडामणिवर् स चासौ जनो लोकोसेनान्यादिः मृगाङ्कचूडामणिवर्जनस्तेन अर्जितमुपार्जितम् तथा । **नयाश्रितम्**—नयेन नीत्या आश्रितम् समुपबृंहितम्, समुल्लसितमिति यावन्नयाश्रितम् । **सुराचलस्पर्धनया**—सुराणां देवानामचलः पर्वतः सुराचलो मेरुस्तेन स्पर्धना श्रेष्ठत्व निबन्धना स्पर्धा सुराचलस्पर्धना तया तथा । **शिबिरे**—सैन्यसन्निवेशे । **चयीकृतम्**—एकत्रीकृतम् । सञ्चयीकृतमिति यावत् । **धनम्**—मुक्तामणिमाणिक्यादि वित्तम् । **विरेजे**—दिदीपे, शुशुभे इतियावत् ॥५८॥

**प्रभोर्भयाद् वैरिकदम्बकं बकं, धिया गुरूकृत्य विलक्षमानने ।**
**दधानमाशासु चरिष्णुदुर्यशः, पयोधिरोधः खलु संनिधौ दधौ ॥५९॥**

अन्वयः—*वैरिकदम्बकम्, प्रभोः, भयाद्, धिया, बकम्, गुरूकृत्य, आशासु, चरिष्णु, दुर्यशः, दधानम्, आनने, विलक्षम्, संनिधौ, पयोधिरोधः, खलु, दधौ ॥ ५९ ॥*

वृत्तिः—**वैरिकदम्बकम्**–शत्रुसमूहः । **प्रभोः**–भगवतः पञ्चमचक्रवर्तिनः । **भयाद्**–भीतितः । **धिया**–बुद्धया, मानसकल्पनयेतियावत् । **बकम्**–तन्नामविश्रुतमसुरं पक्षिविशेषं वा । **गुरूकृत्य**–गुरुबुद्धयाङ्गीकृत्य । **आशासु**–दिक्षु । **चरिष्णु**–विहरणशीलम् । **दुर्यशः**–अवर्णम् । **दधानम्**–धारयत् । अत एव, **आनने**–मुखे, वदनावच्छेदेनेतियावत् । **विलक्षम्** वैलक्ष्यमापन्नम् । **संनिधौ**–सन्निधाने, निकट इति यावत् । **पयोधिरोधः**–नीरनिधितीरम् । **खलु**–नूनम् । **दधौ**–अधारयत् । राजराजेश्वरसाध्वसान् कान्दिशिकोऽरिनिकरो बकवत् प्रपलाय्याम्बुधितीरमाश्रित इति भावः ॥ ५९ ॥

**वने चरन् सानुचरः पयोरुहां, परागभागैरिव पूजितोऽम्बरे ।**
**जिनेश्वरः पञ्चमचक्रिपञ्चमः, स कौतुकी तत्र ददर्श केतकम् ॥६०॥**

अन्वयः—*सानुचरः, वने, चरन्, अम्बरे, पयोरुहाम्, परागभागैः, पूजितः, इव, पञ्चमचक्रिपञ्चमः, कौतुकी, सः, जिनेश्वरः, तत्र, केतकम्, ददर्श ॥ ६० ॥*

वृत्तिः—**सानुचरः**–अनु पश्चाच्चरन्ति गच्छन्तीत्यनुचरा अनुगामिनः भृत्या इति यावत्, तैः सहितः सानुचरः । **वने**–कानने । **चरन्**–विचरन्, भ्रमन्, विहरन्निति यावत् । **अम्बरे**–आकाशे । **पयोरुहाम्**–पयसि जले रोहन्त्युत्पद्यन्ते इति पयोरुहः कमलानि तेषान्तथा । **परागभागैः**–परागाणां किञ्जल्कानां सुमनोरेणूनामिति यावद् भागा एकदेशा अवयवा इति यावत् परागभागास्तैस्तथा । **पूजितः**–अर्चितः । **इव**–यथा । वाच्योत्प्रेक्षालङ्कारः । **पञ्चमचक्रिपञ्चमः**–पञ्चानां पूरणः पञ्चमः चक्रिषु चक्रवर्तिषु पञ्चमः चक्रिपञ्चमः, पञ्चमो रुचिरश्चासौ चक्रिपञ्चमः पञ्चमचक्रिपञ्चमः । **कौतुकी**–अपूर्वपुष्पादिदर्शनोत्सुकः । **सः**–प्रसिद्धः । **जिनेश्वरः**–जिनाधिपतिर्भगवाञ्छान्तिनाथ इति यावत् । **तत्र**–तस्मिन् वने । **केतकम्**–केतकीपुष्पम् । **ददर्श**–व्यलोकयत् ॥ ६० ॥

**वियोगभाजां हृदि कण्टकैः कटुः, पटुः स्मरायोधनसाधने भटः ।**
**त्वदीय मदनेन दिग्जये, निधीयते तार्किकवादिनाऽऽदितः ॥६१॥**

अन्वयः—*वियोगभाजाम्, हृदि, कण्टकैः, ( कृत्वा ) कटुः, स्मरायोधनसाधने, पटुः, भटः, त्वदीयपत्त्रम्, तार्किकवादिना, ( इव ) मदनेन, दिग्जये, आदितः, निधीयते ॥ ६१ ॥*

वृत्तिः—**वियोगभाजाम्**–वियोगं प्रियतमाविप्रयोगम् भजन्ते सेवन्ते प्राप्नुवन्तीति यावत् । वियोगभाजस्तेषान्तथा, विरहिणामित्यर्थः । **हृदि**–अन्तःकरणे । **कण्टकैः**–अतिशयतीक्ष्णद्रुमाङ्गविशेषैः ।

( कृत्वा ) कटुः-तीव्रः, कटुतासम्पादकः । स्मरायोधनसाधने-स्मरः कामस्तत्प्रयुक्तमायोधनं युद्धम् स्मरायोधनम् तस्य साधनं निष्पादनम् स्मरायोधनसाधनम् तस्मिँस्तथा । पटुः-चतुरः । भटः-वीरः । त्वदीयपत्त्रम्-तव भवतश्चम्पकस्येदम् त्वदीयम् तच्च तत्पत्रम् दलम् त्वदीयपत्त्रम् । तार्किकवादिना-तर्कः-धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्याकारक ऊहविशेषः प्रयोजनमस्येति तार्किकः, स चासौ वादी वादशीलः, विचारचातुरीपण्डित इति यावत् तार्किकवादी तेन तथा । ( इव-यथा ) मदनेन-कन्दर्पेण । दिग्जये-दिग्विजय प्रसङ्गे । आदितः-प्रथमतः । निधीयते-स्थाप्यते ॥ ६१ ॥

**अलं दलं त्वं युगपज्जगज्जये, निधीयसे कर्णिशरः स्मरेण यत् ।**
**ततः कृतं तत् करपत्त्रदारुणं, वियोगिनां हृद्दलनात् सनाऽन्वितम् ॥६२॥**

अन्वयः—*यत्, स्मरेण, युगपज्जगज्जये, त्वम्, कर्णिशरः, निधीयसे, ततः वियोगिनाम्, सना, हृद्दलनात्, करपत्त्रदारुणम्, कृतम्, दलम्, अलम्, अन्वितम् ॥६२॥*

वृत्तिः—यत्-यस्माद्धेतोः । स्मरेण-कन्दर्पेण । युगपत्-सहसा, सद्य इत्यर्थः, एककालावच्छेदेनेति भावः । जगज्जये-जगतां भुवनानां जयो विजयो जगज्जयस्तस्मिँस्तथा । त्वम्-त्वल्लक्षणः । कर्णिशरः-कर्णः श्रवणस्तदाकृतिरेखाविशेषो वाऽस्त्येति कर्णी कर्णयुक्तः, स चासौ शरो बाणः कर्णिशरः । निधीयसे-ध्रियसे, निक्षिप्यसे, प्रहारविषयीक्रियसे इति यावत् । ततः-तस्माद्धेतोः । वियोगिनाम्-वियोगः प्रियतमासंयोगाभावोऽस्त्येषामिति वियोगिनो विरहिणस्तेषान्तथा । सना-सर्वदा । हृद्दलनात्-हृदो हृदयस्य दलनं संपीडनम्, हृद्दलनम् तस्मात्तथा । करपत्त्रदारुणम्-करपत्त्रवत्ककचवद्दारुणमसह्यत्वात्कठिनम् करपत्त्रदारुणम् । कृतम्-विहितम् । दलम्-( तव ) पत्रम् । अलम्-पर्य्याप्त्या । अन्वितम्-अन्वर्थतामुपगतम् ॥ ६२ ॥

**यदाहनिष्यत्यमुना स्मरश्चलन्, प्रपद्य वैरं किमिति स्मरन् हरः ।**
**ततो दुराकर्षतया तदन्तकृद्, न्यवारयत् केतक ? चेतसा त्वकाम् ॥६३॥**

अन्वयः—*केतक ! यत्, चलन्, स्मरः, अमुना, आहनिष्यति, इति, स्मरन्, वैरम्, प्रपद्य, तदन्तकृत्, हरः, ततः, ( अपि ) दुराकर्षतया, चेतसा, त्वकाम, न्यवारयत्, किम् ? ॥६३॥*

वृत्तिः—केतक !-अयिकेतकीकुसुम ! । यत्-यस्माद्धेतोः । चलन्-चाञ्चल्यमावहन् ? । स्मरः-कन्दर्पः । अमुना-केतकीपुष्पेण । आहनिष्यति-प्रहरिष्यति । अत्र हन्धातोराङ्पूर्वकत्वेऽपि स्वाङ्गकर्मकत्वाभावान्नात्मनेपदमित्यनुसंधेयम् । इति-इत्थम् । स्मरन्-ध्यायन्, अनुशीलयन्निति

यावत् । वैरम्–शत्रुताम् । प्रपद्य–प्राप्य, समधिगत्येति यावत् । लोकेऽपि प्रहरणोद्यतं प्रति वैरस्थापन्नमानसो जनो दृश्यते । अत एव, तदन्तकृत्–तस्य स्मरस्य अन्तो विनाशस्तदन्तस्तं करोतीति तदन्तकृत् मदनान्तक इत्यर्थः । हरः–शम्भुस्त्रिलोचन इति यावत् । ततः–मदनात् ( अपि ) दुराकर्षतया–दुर्निवारतया, सद्योदुःखदायितयेति यावत् । चेतसा–अन्तःकरणेन । त्वकाम्–त्वाम् । न्यवारयत्–न्यषेधयत्, अवारुणदिति यावत् । किम्–वितर्केऽव्ययम् । अत्र 'चेतसस्त्वकामि'ति पाठः साधीयान् प्रतिभाति । चेतसोऽन्तःकरणान्न्यवारयत्, अन्तःकरणे स्थानं न दत्तमिति यावत् ॥ ६३ ॥

**दधामि पत्रं करपत्त्रकैतवात्, समार्दवत्वेऽपि जनार्दनोचितम् ।**
**कृतालिपानं तत एव सेवनाद्, विगीयसे मन्मथदेहदाहिना ॥६४॥**

अन्वयः—*समार्दवत्वे, अपि, जनार्दनोचितम्, करपत्त्रकैतवात्, कृतालिपानम्, पत्रम्, दधासि, ततः, सेवनात्, एव, मन्मथदेहदाहिना, ( त्वम् ) विगीयसे ॥६४॥*

वृत्तिः—समार्दवत्वे–मृदोः कोमलस्य भावो मार्दवम्, मार्दवेन सहितं समार्दवम्, तस्य भावः समार्दवत्वम्, तस्मिँस्तथा । अपि–सम्भावनायाम् । जनार्दनोचितम्–जनानां लोकानामर्दनं पीडनम् जनार्दनम् तस्य उचितम् युक्तम् जनार्दनोचितम् । करपत्त्रकैतवात्–करपत्त्रस्य क्रकचस्य कैतवं व्याजः करपत्त्रकैतवम् तस्मात्तथा । कृतालिपानम्–कृतं विहितमलिभिर्भ्रमरैः पानं यस्य तत्तथा । पत्रम्–दलम् । दधासि–धारयसि । ततः–तस्माद्धेतोः । सेवनात्–आश्रयणात् । पत्रस्येति यावत् । एव–अवधारणार्थकमव्ययम् । मन्मथदेहदाहिना–मनश्चित्तं मथ्नातीति मन्मथः कन्दर्पः, तस्य देहः शरीरम् मन्मथदेहस्तं दहति भस्मीकरोति तच्छीलो मन्मथदेहदाही, "अजातेः शीले" ५।१।१५४॥ इत्यनेन तच्छीले 'णिन्' प्रत्ययः, तेन मन्मथदेहदाहिना शङ्करेण, मदनान्तकेनेति यावत् । ( त्वम्–केतकम् ) विगीयसे–निन्द्यसे ॥ ६४ ॥

**त्वदग्रसूच्या सचिवेन कामिनो–र्मनोयुगं योजयते मनोभवः ।**
**भवेत्तदाश्लेषविशेषणे नयाद्, न शीतभीतिर्नववाससीव सा ॥६५॥**

अन्वयः—*मनोभवः, त्वदग्रसूच्या, सचिवेन, कामिनोः, मनोयुगम्, योजयते, अनया, तदा, आश्लेषविशेषणे, नववाससि, इव, सा, शीतभीतिः, न, भवेत् ॥६५॥*

वृत्तिः—मनोभवः–मनसोऽन्तःकरणाद् भव उत्पत्तिर्यस्य स मनोभवः कामः, कन्दर्प इतियावत् । यद्वा मनसि भवतीति मनोभवः । त्वदग्रसूच्या–तव भवतः केतकस्य अग्रम्–पुरोभागस्त्वदग्रम्, तदेव सूक्ष्मत्वात्तीक्ष्णत्वाच्च सूची सूचिका, सेवनीद्रव्यमिति यावत् । त्वग्रसूची तया तथा, तद्रूपेणेत्यर्थः,

रूपकालङ्कारः । **सचिवेन**-सहायेन, उपकारकेणेति यावत् । **कामिनोः**-कामः सम्भोगाद्यभिलाषोऽस्त्यस्येति कामी, कामोऽस्त्यस्या इति कामिनी, कामी च कामिनी चेति कामिनौ तयोः कामिनोः, सानुरागयोर्दम्पत्योरिति यावत्, संभोगाभिलाषयोः स्त्रीपुंसयोरिति यावत् । "पुरुषः स्त्रिया" ३।१।१२६।। इत्यनेन पुंवाचकस्य कामिशब्दस्य स्त्रीवाचकस्य कामिनीशब्दस्य लोपः । **मनोयुगम्**-मनसोः स्त्रीपुंसान्तःकरणयोर्युगम्-द्वयम्, मनोयुगम् । **योजयते**-संयोजयति, एकीकरोतीति यावत् । तत्प्रथमकलिकयाऽतिसुरभितयोद्दीपनभावहेतुभूतया कामिनावुचितानुचितसम्बन्धमप्यविचार्य्य मिथो रिरंसू प्रवर्तेते इति भावः । उत्तरार्द्धस्य अस्फुटत्वात्कथंचिद् व्याख्यायते । **तदा**-मनोयुगस्यैकीकरणानन्तरम् । **अनया**-कामिन्या **आश्लेषविशेषणे**-आश्लेषस्य आलिङ्गनस्य अङ्कपाल्या इति यावद्विशेषणम् संविधानं, आश्लेषविशेषणम् तस्मिँस्तथा । सतीतिशेषः । **नववाससि**-नवं नूतनञ्च तद्वासो वसनमंशुकमिति यावत् । नववासस्तस्मिँस्तथा । **इव**-यथा । **सा**-प्रसिद्धा । **शीतभीतिः**-शीताद् जाड्याद् भीतिर्भयम्, शीतभीतिः । **न**-नहि । **भवेत्**-जायेत । यथा नूतनवस्त्रधारणे शीतभयं निवर्तते तथा कामिनोः परस्परालिङ्गने सत्यपि शीतभीतिर्निवर्तते इत्यनुभववेद्यमिति ॥ ६५ ॥

**त्वयि प्रपन्ने तरुणस्य योषितां, मनोभवः सीव्यति दुर्यशःपटौ ।**
**प्रसह्य संकेतपदेऽपि केतनं, त्वमेव तत् केतकवाग्निकेतनम् ॥६६॥**

**अन्वयः**—*मनोभवः, त्वयि, प्रपन्ने, तरुणस्य, योषिताम्, ( च, ) दुर्यशःपटौ, सीव्यति, सङ्केतपदे, अपि, त्वम्, एव, प्रसह्य, केतनम्, तत्, केतकवाग्निकेतनम्, ( असि ) ॥६६॥*

**वृत्तिः**—**मनोभवः**-मनसोऽन्तःकरणात्, सङ्कल्परूपाद्वा भव उत्पत्तिर्यस्य स तथा । **त्वयि**-त्वल्लक्षणे, केतक इतियावत् । **प्रपन्ने**-प्राप्ते, सुसज्जित इति यावत्,विकसित इति तु हृदयम् । **तरुणस्य**-यूनः । ( **च**-पुनः ) । **योषिताम्**-सीमन्तिनीनाम् । **दुर्यशःपटौ**-दुष्कीर्ती एव पटौ वस्त्रे दुर्यशःपटौ तौ तथा, दुर्यशोलक्षणमम्बरयुगलमिति यावत् । **सीव्यति**-संयोजयति, युवभिः कर्तव्याकर्तव्यविवेकं हारयतीतिभावः । **सङ्केतपदे**-रमणार्थपूर्वनियोजितस्थानविशेषे । **अपि**-खलु । **त्वम्**-केतकम् । **एव**-अवधारणे । **प्रसह्य**-हठतः । **केतनम्**-चिह्नम् । भवसीति शेषः । अथवा सङ्केतपदे अपि त्वं प्रसह्य केतनमुत्पातविशेष एव, कण्टकितत्वादितिभावः । केतनशब्दः केत्वर्थः, केतुस्तु प्रसिद्ध उत्पातलक्ष्मार्थयोरिति । **तत्**-ततो हेतोः । ( **त्वमेव** ) **केतकवाग्निकेतनम्**-केतकवाचः केतकेतिशब्दस्य निकेतनम् लक्षणयाऽर्थस्तथा । असीति शेषः ॥ ६६ ॥

**करेऽधिकुर्य्यात्तव पत्त्रमेव यो, धृतिः सपत्राकृतिमेति तस्य यत् ।**
**स्फुटं च पत्रैः करपत्त्रमूर्तिभि-र्वियोगियोगे परमोहकृत् त्वकम् ॥६७॥**

अन्वयः—*यत्, यः, तव, पत्त्रम्, एव, करे, अधिकुर्यात्, तस्य, धृतिः, सपत्राकृतिम्, एति, च, करपत्त्रमूर्तिभिः, पत्त्रैः, त्वकम्, वियोगियोगे, स्फुटम्, परमोहकृत् ॥६७॥*

वृत्तिः—**यत्**–यस्माद्धेतोः। **यः**–विप्रयोगमापन्नः पुरुषः स्त्रीजनो वा कश्चित्। **तव**–त्वल्लक्षणस्य केतकस्य। **पत्त्रम्**–दलम्। **एव**–अवधारणार्थकमव्ययम्। किं पुनः पुष्पादिकमपीति भावः। **करे**–हस्ते। **अधिकुर्यात्**–धातूनामनेकार्थत्वात्, गृह्णीयादित्यर्थः। **तस्य**–तादृशस्य जनस्य। **धृतिः**–धैर्य्यम्। **सपत्त्राकृतिम्**–दुःखम्। **एति**–गच्छति। **च**–पुनः। **करपत्त्रमूर्तिभिः**–करपत्त्रवत् क्रकचवन्मूर्तिः स्वरूपमाकारविशेषो वा येषान्ते तथा। **पत्त्रैः**–दलैः। **त्वकम्**–त्वम्। **वियोगियोगे**–वियोगिनां विरहिणां योगोऽपूर्वार्थसम्प्राप्तिर्वियोगियोगस्तस्मिँस्तथा। अत्र–'वियोगयोगे' इति पाठः साधीयान् प्रतिभाति, वियोगस्य विच्छेदस्य योगः सम्बन्धो वियोगयोगस्तस्मिँस्तथा, वियोगावस्थायामिति यावत्। अस्मिन्पक्षे–वियोगिनामित्याहर्तव्यमिति विशेषः। **स्फुटम्**–व्यक्तं यथास्यात्तथा। **परमोहकृत्**–परोऽतिशयितश्चासौ मोहोऽज्ञानम् परमोहस्तं करोतीति तथा ॥६७॥

**फलं न सुस्वादु दलं सधूलिकं, तवास्ति वा पल्लव एव चादरः।**
**विना फलं केतक! केन पर्शुवद्, वियोगिहृद्दारुणि दारुणायसे ॥६८॥**

अन्वयः—*तव, सुस्वादु, फलम्, न, अस्ति, वा, दलम्, सधूलिकम्, अस्ति, पल्लवे, एव, आदरः, केतक!, फलम्, विना, केन, पर्शुवत् वियोगिहृद्दारुणि, दारुणायसे ॥६८॥*

वृत्तिः—**तव**–भवतः केतकस्य। **सुस्वादु**–सम्यगास्वादनयोग्यम्। **फलम्**–प्रसवः। **न**–नहि। **अस्ति**–वर्तते। **वा**–अथवा समुच्चयार्थकं वाऽव्ययम्। **दलम्**–पत्रम्। **सधूलिकम्**–धूल्या पांशुना रजसेति यावत् सहितम् सधूलिकम्। **अस्ति**–विद्यते। **पल्लवे**–किसलये। (सति) **एव**–अवधारणार्थकमव्ययम्। **आदरः**–सत्कारः। अथवा—"आपल्लवे एव आदरः" इत्येवंच्छेदः, पल्लवानभिव्याप्याापल्लवम्, तस्मिँस्तथा। **केतक!**–तन्नामकपुष्पविशेषवृक्षः! **फलम्**–प्रसवम्। **विना**–अन्तरेण। अपीतिशेषः। **केन**–केन हेतुना, किंकारणेनेति यावत्। **पर्शुवत्**–परशुवत्, तन्नामकास्त्रविशेषवदिति यावत्। **वियोगिहृद्दारुणि**–वियोगिनां प्रियतमाविप्रयुक्तानां पुंसाम् प्रियतमविप्रयुक्तानामङ्गनानामिति यावत्, हृदयम् अन्तःकरणम्, वियोगिहृत् तदेव दारु काष्ठम् वियोगिहृद्दारु तस्मिँस्तथा। **दारुणायसे**–दारुणं भीषणवदाचरतीति तथा भीषणायते इति यावत्। केतकाग्रदर्शनाद्वियोगिनोः स्त्रीपुंसयोर्धैर्य्यभङ्गः, पत्रदर्शनाच्च हृदयं विदीर्णं भवतीति भावः ॥६८॥

धनुर्मधुस्विन्नकरोऽपि भीमजा–प्रियं परागैरनुरागमुन्नयन् ।
मनो हिनस्त्येव हि नस्तिरोभवन्, मनोभवः स्वाश्रयभित् कृशानुवत्॥६९॥

अन्वयः—*धनुर्मधुस्विन्नकरः, अपि, परागैः, अनुरागम्, उन्नयन्, तिरोभवन्, मनोभवः, स्वाश्रयभित्, कृशानुवत्, भीमजाप्रियम्, नः, मनः, हिनस्ति, एव, हि ॥६९॥*

वृत्तिः—**धनुर्मधुस्विन्नकरः**–धनुषः कार्मुकस्य पुष्पस्येति यावत् मधु रसो धनुर्मधु तेन स्विन्नः क्लिन्नः आर्द्र इति यावत्। करो हस्तो यस्य स धनुर्मधुस्विन्नकरः। **अपि**–सम्भावनायाम्। **परागैः**–केतकीपुष्परजोभिः। **अनुरागम्**–प्रेमाख्यचित्तवृत्तिविशेषम्। **उन्नयन्**–संवर्द्धयन्। **तिरोभवन्**–अन्तर्दधत्, अलक्ष्यतामादधान इति यावत्। **मनोभवः**–कामः। **स्वाश्रयभित्**–स्वस्य आत्मन आश्रय आधारः स्वाश्रयस्तं भिनत्ति छिनत्ति विनाशयतीति यावत् तथा। **कृशानुवत्**–अग्नितुल्यः। **भीमजाप्रियम्**–भीमजाया भीमोत्पन्नायाः प्रियमभीष्टम्, कमनीयमिति यावत् भीमजाप्रियम्। **नः**–अस्माकम्। **मनः**–चित्तम् अन्तःकरणमिति यावत्। **हिनस्ति**–पीडयति। **एव हि**–अवधारणार्थकमव्यययुगलम्॥६९॥

मुनेर्मनोऽवामनकामनाशने, परं परागैस्तव धूलिहस्तयन् ।
स्मरः स्मरन् विश्वजयं शरैर्व्यधाद्,व्यथान्वितं धिग् मुनिघातपातकम् ।७०।

अन्वयः—*अवामनकामनाशने, परम्, मुनेः, मनः, स्मरन्, तव, परागैः, धूलिहस्तयन्, स्मरः, शरैः, विश्वजयम्, व्यधात्, ( अतः ) व्यथान्वितम्, मुनिघातपातकम्, ( त्वाम् ) धिक् ॥७०॥*

वृत्तिः—**अवामनकामनाशने**–अवामनः सज्जश्चासौ कामः कन्दर्पः अवामनकामस्तस्य नाशनम् ध्वंसनम् अवामनकामनाशनम् तस्मिँस्तथा। **परम्**–तत्परम्, पटीय इति यावत्। **मुनेः**–अनगारस्य श्रमणस्येति यावत्। **मनः**–अन्तःकरणम्, चित्तमिति यावत्। **स्मरन्**–विध्वंसकत्वेनानुचिन्तयन्। **तव**–भवतः। केतकस्य। **परागैः**–कुसुमकिञ्जल्कैः। **धूलिहस्तयन्**–धूलियुक्तं हस्तं कुर्वन्नित्यर्थः। तव धूलिर्यदि न स्यात्तदा कामः स्विन्नकरत्वाच्च्युतसायकः स्यात्तदा वियोगिनां जीवनं सम्भाव्येत, तदेव तु नास्त्यतोऽयमपराधस्तवैव। स्विन्नकरो धनुर्धरो धूलियुक्तं हस्तं करोतीति जातिः। धूलिहस्तयन्निति धूलियुक्तं हस्तं करोतीति ण्यन्ताच्छतेति बोध्यम्। **स्मरः**–कन्दर्पः। **शरैः**–बाणैः। **विश्वजयम्**–विश्वानां जगतां जयो विश्वजयस्तन्तथा। विश्वेषां सर्वेषां पिपीलिकादिब्रह्मपर्यन्तानां ( उपरि ) जयो विजयो विश्वजयस्तन्तथा। **व्यधात्**–कृतवान्। ( **अतः**–अस्माद्धेतोः ) **व्यथान्वितम्**–व्यथया पीडया अन्वितम् सम्बद्धम् व्यथान्वितम्, पीडासम्बन्धिनमित्यर्थः। दुःखदायकमिति यावत्। **मुनिघातपातकम्**–मुनीनामनगाराणाम् श्रमणानामिति यावत्। घातः कामव्यथादायकत्वाद् वधो

मुनिघातस्तेन पातकम्-पापम् यस्य तत् मुनिघातपातकम् । ( त्वाम्-केतकम् ) धिक्-तव धिक्कारोऽस्त्वितिभावः । "गौणात् समयानिकषाहाधिगन्तराऽन्तरेणातियेनतेनैर्द्वितीया" २।२।३३।। इत्यनेन धिक्शब्दयोगे द्वितीया भवतीति वेदितव्यम् ।।७०।।

**रतिप्रसक्तं तदसक्तमाशये-ऽप्यसंशयं नः सकलं बलं बलात् ।**
**प्रसूनधन्वा शरसात् करोति मा, विमुच्य रुच्योपशमस्य चेतसि ।।७१।।**

अन्वयः—*प्रसूनधन्वा, चेतसि, उपशमस्य, रुच्या, ( हेतुना ) मा, विमुच्य, आशये, तदसक्तम्, अपि, रतिप्रसक्तम्, नः, सकलम्, बलम्, बलात्, असंशयम्, शरसात्करोति ।।७१।।*

वृत्तिः—**प्रसूनधन्वा**-प्रसूनम् पुष्पमेव धनुः कार्मुकं यस्य स प्रसूनधन्वा, कन्दर्प इति यावत् । **चेतसि**-अन्तःकरणे । **उपशमस्य**-प्रशमस्य, शान्तेरिति यावत् । **रुच्या**-तेजसा दीप्त्येति यावत् । **मा**-माम् । मल्लक्षणं जनमिति यावत् । **विमुच्य**-परित्यज्य विहायेति यावत् । **आशये**-अभिप्राये, मानसिकसंकल्पावच्छेदेनेति यावत्, अभिप्रायेणेति यावत् । **तदसक्तम्**-तस्यां रतौ असक्तम् अनासक्तम् तदसक्तम् । **अपि**-सम्भावनायाम् । **रतिप्रसक्तम्**-फलतो रतिप्रसञ्जनमधिगतम् । **नः**-अस्माकम् । **सकलम्**-समस्तम् । **बलम्**-सैन्यम् । **बलात्**-हठात्, सहसेत्यर्थः । प्रसह्येति यावत् । **असंशयम्**-निःसन्देहम् । **शरसात्करोति**-बाणाधीनं करोतीत्यर्थः । केवलं मां विहाय सकलं मत्सैन्यवर्गं कन्दर्पः त्वदीयमुद्दीपकत्वमादाय निजबाणाधीनं करोतीति भावः ।।७१।।

**उदीर्य्य वीर्य्यादतिविप्रियं वशे, निधित्सता शान्तरसाख्यमानसम् ।**
**प्रपद्य वेलां समितेर्हृतारते-रिति क्रुधाऽक्रुश्यत तेन केतकम् ।।७२।।**

अन्वयः—*इति, वीर्यात्, अतिविप्रियम्, उदीर्य्य शान्तरसाख्यमानसम्, वशे, निधित्सता, तेन, हृतारतेः, समितेः, वेलाम्, प्रपद्य, क्रुधा, केतकम्, अक्रुश्यत ।।७२।।*

वृत्तिः—**इति**-मां विहाय सकलं मत्सैन्यवर्गं निजबाणाधीनं करोति, यतस्त्वां निमित्तीकृत्य कन्दर्पस्तस्माद्धेतोरित्यर्थः । **वीर्य्यात्**-शौर्य्यात्, ओजस इति यावत् । **अतिविप्रियम्**-अति अत्यन्तं विप्रियम्-व्यलीकं यस्मिँस्तद्यथा स्यात्तथा । **उदीर्य्य**-उक्त्वा । **शान्तरसाख्यमानसम्**-शान्तरसं निर्वेदस्थायिकरसमाचष्टे कथयति इति शान्तरसाख्यम्, तच्च तन्मानसमन्तःकरणम् शान्तरसाख्यमानसम् । वस्तुतस्तु 'शान्तरसाढ्यमानसमिति पाठः' इति साधीयान् प्रतिभाति । शान्तरसेन आढ्यं परिपूर्णम् शान्तरसाढ्यम् तच्च तन्मानसम् अन्तःकरणम् शान्तरसाढ्यमानसम्, इति तात्पर्यमालोचनीयम् । **वशे**-आयत्तत्वे । **निधित्सता**-स्थापनेच्छावता । **तेन**-भगवता शान्तिनाथेन । **हृतारतेः**-

हृता दूरंगता आरतिरारामो यत्र सा हृतारतिस्तस्यास्तथा। हृता अपहृता अरतिः खिन्नता यया सा तथेति वा। समितेः—युद्धस्य, यतिपरिषदश्चापीत्यर्थः। श्रमणसमितेरिति यावत्। वेलाम्—समयम्। प्रपद्य—समधिगत्य। क्रुधा—क्रोधेन। केतकम्—तन्नामकप्रसिद्धपुष्पवृक्षविशेषम्। अक्रुश्यत—अनिन्द्यत ॥७२॥

**विदर्भसुभ्रूस्तनतुङ्गताप्तये, तपस्यतोऽद्रीन् नृपतिर्व्यतिव्रजन्।**
**ततः प्रयाणात् तदुपत्यकाश्रये, जहार तुङ्गत्वमदं पटालयैः ॥७३॥**

अन्वयः—*विदर्भसुभ्रूस्तनतुङ्गताप्तये, तपस्यतः, अद्रीन्, व्यतिव्रजन्, नृपतिः, ततः, प्रयाणात्, तदुपत्यकाश्रये, पटालयैः, तुङ्गत्वमदम्, जहार ॥७॥*

वृत्तिः—विदर्भसुभ्रूस्तनतुङ्गताप्तये—विदर्भाणाम् तदाख्यदेशानाम् सुभ्रुवः शोभननेत्रोपरिविद्यमानरोमविशिष्टाङ्गना विदर्भसुभ्रुवः तासां स्तना विदर्भसुभ्रूस्तनास्तेषां तुङ्गतोच्चता विदर्भसुभ्रूस्तनतुङ्गता तस्या आप्तिः समधिगमो विदर्भसुभ्रूस्तनतुङ्गताप्तिस्तस्यै तथा। तपस्यतः—तपस्यामादधतः। अद्रीन्—गिरीन्, पर्वतानिति यावत्। व्यतिव्रजन्—व्यतिगच्छन्, व्यतिक्रामन्निति यावत्। नृपतिः—राजा चक्री भगवाञ्छ्रीशान्तिनाथ इति यावत्। ततः—तस्मात्स्थानात्, तदनन्तरं वेति यावत्। प्रयाणात्—प्रस्थानात्। तदुपत्यकाश्रये—तेषां पर्वतानामुपत्यका अधोभूमयस्तदुपत्यकास्तासामाश्रय आधारस्तदुपत्यकाश्रयस्तस्मिँस्तथा। स्थितैरितिशेषः। पटालयैः—पटानां तन्तुसमवायिकारणकानामंशुकानाम् वस्त्रानामिति यावत्। आलया गृहा पटालयास्तैस्तथा। तुङ्गत्वमदम्—तुङ्गत्वस्य उच्चताया मदो गर्वस्तुङ्गत्वमदस्तन्तथा। जहार—हृतवान् ॥७३॥

**प्रतिस्थलं तत्र गजान् समुन्मिलद्-वटानिवापश्यदलं तपस्यतः।**
**स्वकुम्भयोस्तत्कुचशोभयाऽभयं, तथैव धित्सून् शिरसा नमस्यतः॥७४॥**

अन्वयः—*तत्र, प्रतिस्थलम्, स्वकुम्भयोः, तत्कुचशोभया, अभयम्, धित्सून्, तथैव, शिरसा, नमस्यतः, तपस्यतः, समुन्मिलद्वटान्, इव, ( स्थितान् ) गजान्, अपश्यत् ॥७४॥*

वृत्तिः—तत्र—पूर्वोक्तपर्वतोपत्यकायाम्, तस्मिन् स्थाने वा। प्रतिस्थलम्—प्रतिस्थानम्, सर्वत्रेति यावत्। स्वकुम्भयोः—स्वस्य आत्मनः कुम्भौ कुम्भाकृती शिरस्सम्बन्धिमांसपिण्डौ स्वकुम्भौ तयोस्तथा। तत्कुचशोभया—तासाम् विदर्भसुभ्रुवाम् कुचशोभा स्तनसौन्दर्य्यम् तत्कुचशोभा तया तथा। अभयम्—भयाभावम्, अभयदानमिति यावत्। धित्सून्—धारणेच्छावतः। तथैव—तेनैव प्रकारेण किञ्चेत्यर्थः। शिरसा—मस्तकेन। नमस्यतः—नमस्कुर्वतः। अत एव, तपस्यतः—तपश्चर्य्यामादधतः,

समुन्मिलद्वटान्-समुन्नतान् न्यग्रोधवृक्षान् । इव-यथा । ( स्थितान् ) गजान्-हस्तिनः । अलम्-अतिशयेन । अपश्यत्-अदर्शत्, दृष्टवानिति यावत् ॥७४॥

**विभुर्वनातिक्रमणे स चक्रभृत्, क्वचिद् घटान् वैक्षत संतपस्यतः ।**
**फलानि धूमस्य धयानधोमुखान्, कुचोपमाप्त्यै पथि दाडिमागमे ॥७५॥**

अन्वयः—*वनातिक्रमणे, क्वचित्, पथि, सः, चक्रभृद्, विभुः, कुचोपमाप्त्यै, अधोमुखान्, धूमस्य, धयान्, संतपस्यतः, घटान्, व, दाडिमागमे, फलानि, ऐक्षत् ॥७५॥*

वृत्तिः—**वनातिक्रमणे**-वनस्य गहनस्य अतिक्रमणमुल्लङ्घनम् तस्मिँस्तथा । **क्वचित्**-कुत्रचित् । **पथि**-मार्गे । **सः**-प्रसिद्धः । **चक्रभृद्**-चक्रवर्ती । **विभुः**-प्रभुः, श्रीशान्तिनाथभगवानितियावत् । **कुचोपमाप्त्यै**-स्तनसादृश्यमधिगन्तुम् । **अधोमुखान्**-निम्नवदनान् । **धूमस्य**-वह्निध्वजस्य । **धयान्**-पानं विदधतः । अतएव, **संतपस्यतः**-तपस्यां प्रकुर्वतः । **घटान्**-कुम्भान् । **व**-इव, 'मणी वोष्ट्रस्य' इत्यादौ व शब्दस्येवार्थकताप्रसिद्धेः । **दाडिमागमे**-दाडिमस्य फलानि दाडिमानि फलेऽर्थे विहितस्य तद्धितप्रत्ययस्य लुक्. तेषामागमः समधिगमः सम्प्राप्तिरिति यावत्, अत्रेति दाडिमागमो दाडिमवृक्षस्तस्मिँस्तथा । **फलानि**-दाडिमप्रसवान् । **ऐक्षत**-अपश्यत्, दृष्टवानिति यावत् । एतानि दाडिमीफलानि न किन्तु घटा एवैते तानिवेत्युत्प्रेक्षा ॥७५॥

**कपालिनः क्वापि कपालिपालिता-सनस्थितानैक्ष्य तदाकृतेस्तुलाम् ।**
**अदीधरद् वीरतया फलान्विते, स दाडिमे दोहदधूपिनि द्रुमे ॥७६॥**

अन्वयः—*सः, क्वापि, कपालिपालितासनस्थितान्, कपालिनः, ऐक्ष्य, फलान्विते, दोहदधूपिनि, दाडिमे, द्रुमे, वीरतया, तदाकृतेः, तुलाम्, अदीधरत् ॥७६॥*

वृत्तिः—**सः**-महामहिमशालितया तीर्थकृत्पञ्चमचक्रवर्तितया च प्रसिद्धो भगवाञ्छान्तिनाथ इत्यर्थः । **क्वापि**-कुत्रापि, कस्मिँश्चित्प्रदेशे इति यावत् । **कपालिपालितासनस्थितान्**-कपालमस्यवत्वेनास्त्यस्येति कपाली घटस्तेन पालितम् संरक्षितम्, विशिष्टमित्यर्थः, कपालिपालितम् तच्च तत् आसनम्-आस्यतेऽत्रेत्यासनम् कपालिपालितासनम् तत्र स्थिता अवस्थिता विराजमाना इति यावत् । कपालिपालितासनस्थितास्ताँस्तथा । **कपालिनः**-संन्यासिविशेषान् । **ऐक्ष्य**-समवलोक्य । **फलान्विते**-प्रसवविशिष्टे । **दोहदधूपिनि**-अतिशयितफलादिसमृद्धिर्येन भवति तद्दोहदम् दाडिमीवृक्षस्य दोहदाय यो धूपः, अगुर्वादिसुगन्धिद्रव्यविशेषः दोहदधूपः सोऽस्यास्तीति दोहदधूपी तस्मिँस्तथा । **दाडिमे**-स्वनामप्रसिद्धे । **द्रुमे**-वृक्षे । **वीरतया**-शौर्यशालितया । **तदाकृतेः**-संन्यासिविशेषस्वरूपस्य । **तुलाम्**-सादृश्यम् । **अदीधरत्**-धारयामास ॥७६॥

वियोगिनीमैक्षत दाडिमीमसौ, तपस्तपन्तीं बहुलातपे तपे ।
समुद्गिरन्तीं करुणाऽरुणास्रवं, पदे तदासेविभिरीहितं रसम् ॥७७॥

अन्वयः—*असौ, बहुलातपे, तपे, तपः, तपन्तीम्, पदे, तदासेविभिः, ईहितम्, करुणाऽरुणास्रवम्, रसम्, समुद्गिरन्तीम्, वियोगिनीम्, दाडिमीम्, ऐक्षत ॥७७॥*

**वृत्तिः**—**असौ**—भगवाञ्शान्तिनाथः। **बहुलातपे**—बहुलोऽतिशयित आतपः सूर्य्यप्रकाशात्मकस्तेजोविशेषो यस्मिन् बहुलातपस्तस्मिँस्तथा। **तपे**—ग्रीष्मर्तौ। **तपः**—तपस्याम्। **तपन्तीम्**—विदधतीम्, कुर्वन्तीमिति यावत्। **पदे**—चरणे। चरणयोरिति यावत्। **तदासेविभिः**—तामासेवन्ते शुश्रूषन्ते तच्छीलास्तदासेविनस्तैस्तथा। **ईहितम्**—अभिवाञ्छितम्, अभिलषितमिति यावत्। **करुणाऽरुणास्रवम्**—अरुणो नेत्रजलस्यायम्, आस्रवः, करुणया तदासेवाप्रयुक्तपरमपरिश्रमस्मरणसञ्जातया दयया अरुणः करुणाऽरुणः, करुणाऽरुणश्चासौ आस्रवः करुणाऽरुणास्रवः तन्तथा। **रसम्**—रस्यते आस्वाद्यते इति रसो रतिस्तन्तथा। **समुद्गिरन्तीम्**—प्रकाशयन्तीम्, अभिव्यञ्जयन्तीमिति यावत्। **वियोगिनीम्**—वियोगः प्रियतमविप्रयोगस्तद्विच्छेद इति यावदस्त्यस्या इति वियोगिनी तान्तथा। "अतोऽनेकस्वरादेः" ७।२।६॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः। **दाडिमीम्**—नायिकामिव दाडिमीम्। **ऐक्षत**—समवलोकयत् ॥७७॥

वनेचरीं कामपि तद्भटैर्धृतां, प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् ।
त्रसन्मृगाक्षीमचिरादमोचय-लतामिवायं गिरिजां रजोन्विताम् ॥७८॥

अन्वयः—*अयम्, तद्भटैः, धृताम्, प्रियस्मृतेः, स्पष्टम्, उदीतकण्टकाम्, गिरिजाम्, रजोन्विताम्, लताम्, इव, त्रसन्मृगाक्षीम्, कामपि, वनेचरीम्, अचिरात्, अमोचयत् ॥७८॥*

**वृत्तिः**—**अयम्**—असौ भगवाञ्शान्तिनाथ इति यावत्। **तद्भटैः**—तस्य भगवतः शान्तिनाथस्य भटा योधा, वीरा, इति यावत् तद्भटाः यद्वा—ते दिग्विजयौपयिकत्वेन प्रसिद्धाश्च ते भटा योद्धास्तद्भटास्तैस्तथा। **धृताम्**—गृहीताम्। **प्रियस्मृतेः**—प्रियतमस्मरणात्। **स्पष्टम्**—व्यक्तं यथा स्यात्तथा। **उदीतकण्टकाम्**—उदीताः उदयं प्रकाशमिति यावदापन्नाः कण्टकाः रोमाञ्चाः, पक्षे—द्रुमाङ्गानि, सात्त्विकभावविशेषा इति यावद्यस्याः सोदीतकण्टका तान्तथा। "स्तम्भः स्वेदोऽथ रोमाञ्चः, स्वरभेदोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय, इत्यष्टौ सात्त्विका रसाः।" इति साहित्यदर्पणे विश्वनाथः। **गिरिजाम्**—गिरौ पर्वते जातोत्पन्ना गिरिजा तान्तथा। **रजोन्विताम्**—रजस्वलाम्, पक्षे रजोभिः धूलिभिरन्विता सम्बद्धा रजोन्विता धूलिधूसरितामिति यावत्। **लताम्**—वल्लीम्। **इव**—यथा। **त्रसन्मृगाक्षीम्**—त्रसन्तो भयविह्वलाश्च ते मृगा हरिणास्त्रसन्मृगास्तेषामक्षिणी नयने इव अक्षिणी नयने यस्याः सा त्रसन्मृगाक्षी

तान्तथा । "उष्ट्रमुखादयः" ३।१।२३॥ इत्यनेन बहुव्रीहिसमासः, पूर्वपदस्योपमानसरूपस्य लोपश्च निपात्यते । **कामपि**–अनिर्वचनीयसौन्दर्य्यशालिनीम् । **वनेचरीम्**–वने कानने चरति विचरतीति वनेचरी तान्तथा । भिल्लीमिति यावत् । **अचिरात्**–झटिति, शीघ्रमेवेत्यर्थः । **अमोचयत्**–पर्य्यत्याजयत् ॥७८॥

**शिशूनपि स्वान् सममोचयद् नृपं, कृपाप्रपारूपमुपेत्य सत्यगीः ।**
**फलस्तनस्थानविदीर्णरागिहृन्निदर्शनात् सा सृजती तदाशिषम् ॥७९॥**

अन्वयः—*तदा, आशिषम्, सृजती, सत्यगीः, सा, उपेत्य, फलस्तनस्थानविदीर्णरागिहृन्निदर्शनात्, कृपाप्रपारूपम्, नृपम्, स्वान्, शिशून्, अपि, सममोचयत् ॥७९॥*

**वृत्तिः**—तदा–तस्मिन् समये । **आशिषम्**–आशीर्वादम्, शुभाशंसनमिति यावत् । **सृजती**–कुर्वन्ती । शुभाशिषा संयोजयन्तीति यावत् । **सत्यगीः**–सत्या तथ्या समीचीनेति यावत्, गीर्वाणी यस्याः सा सत्यगीः । **सा**–पूर्ववर्णितप्रकारा वनेचरीति यावत् । **कृपाप्रपारूपम्**–कृपा दयैव प्रपा पानीयशाला कृपाप्रपा तस्या इव रूपम् लोकोपकारकत्वस्वभावो यस्य स कृपाप्रपारूपस्तन्तथा । **नृपम्**–राजानम् भगवन्तं शान्तिनाथमिति यावत् । **उपेत्य**–समधिगत्य । **फलस्तनस्थानविदीर्णरागिहृन्निदर्शनात्**–फलवत् प्रसवतुल्यौ स्तनौ कुचौ फलस्तनौ, तयोः स्थानम् अवकाशः फलस्तनस्थानम्, तत्र विदीर्णम् विरहासह्यत्वाद्द्विधाभूतम् । अथ च रागि अनुरागविशिष्टम् यद् हृत् हृदयम् अन्तःकरणम् इति यावत् । फलस्तनस्थानविदीर्णरागिहृत् तस्य निदर्शनम् प्रकाशनम् फलस्तनस्थानविदीर्णरागिहृन्निदर्शनम्, तस्मात्तथा । **स्वान्**–निजान्, आत्मीयानिति यावत् । **शिशून्**–बालकान् । **अपि**–समुच्चये । **सममोचयत्**–पर्यत्याजयत् ॥७९॥

**अभिक्रमे भीमसुतां वियोजितां, श्रियाऽथ सस्मार सुराङ्गनाजिताम् ।**
**नृपश्चलन् वीक्ष्य लतां फलान्तराद्, विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥८०॥**

अन्वयः—*अथ, अभिक्रमे, चलन् नृपः, फलान्तराद्, विशच्छुकास्यस्मरकिंशुकाशुगाम्, लताम्, वीक्ष्य, श्रिया, सुराङ्गनाजिताम्, वियोजिताम्, भीमसुताम्, सस्मार ॥८०॥*

**वृत्तिः**—**अथ**–अनन्तरम् । **अभिक्रमे**–निर्भीकतया शत्रून् प्रति युद्धार्थगमने उद्देश्यत्वं सप्तम्यर्थः, तादृशगमनोद्देशेनेत्यर्थः । **चलन्**–प्रतिष्ठमाणः, प्रस्थानमादधदिति यावत् । **नृपः**–प्रभुः, भगवान् शान्तिनाथ इति यावत् । **फलान्तरात्**–फलानां प्रसवानाम् अन्तरम् मध्यभागः फलान्तरम्, तस्मात्तथा । **विशच्छुकास्यस्मरकिंशुकाशुगाम्**–विशन्ति प्रविशन्ति यानि शुकास्यानि शुकमुखानि तान्येव स्मरस्य किंशुकानि पलाशपुष्पाण्येव आशुगा बाणा यस्याम्, सा विशच्छुकास्यस्मरकिंशुकाशुगा, तान्तथा ।

लताम्-वल्लीम्। वीक्ष्य-अवलोक्य। श्रिया-शोभया। सुराङ्गनाजिताम्-प्रशस्तान्यङ्गान्यस्य सन्तीति अङ्गनाः, सुराणां देवानामङ्गनाः सुराङ्गनास्ता जिता निजसौन्दर्येण पराजिता यया सा सुराङ्गनाजिता, तान्तथा। वियोजिताम्-विच्छेदिताम्, विप्रयोजितामिति यावत्। भीमसुताम्-भीमदुहितरम्। भीमपुत्रीमिति यावत्। सस्मार-दध्यौ, स्मृतिपथमानयदिति यावत्॥८०॥

**स्मरार्धचन्द्रेषुनिभे कृशीयसां, समापतत्पान्थनृणां कदम्बके।**
**प्रभुः पलाशे तुलनामदीदृशद्, गलज्जरद्वस्त्रितपत्रसङ्करे॥८१॥**

अन्वयः— *प्रभुः, कृशीयसाम्, समापतत्पान्थनृणाम्, कदम्बके, स्मरार्धचन्द्रेषुनिभे, गलज्जरद्वस्त्रितपत्रसङ्करे, पलाशे, तुलनाम्, अदीदृशत्॥८१॥*

वृत्तिः—प्रभुः-प्रकर्षेण प्रकृष्टगुणशालितया भवतीति प्रभुर्भगवान् शान्तिनाथ इति यावत्। कृशीयसाम्-अतिशयेन कृशाः कृशीयांसस्तेषान्तथा, कृशतराणामिति यावत्। समापतत्पान्थनृणाम्-पन्थानं नित्यं गच्छन्तीति पान्थाः पथिकाः प्रवासिन इति यावत्, ते च ते नरो मानवाः पान्थनरः समापतन्तः सम्यक्पतनशीलाश्च ते पान्थनरः समापतत्पान्थनरस्तेषान्तथा। कदम्बके-निकुरुम्बे समूहे इति यावत्। स्मरार्धचन्द्रेषुनिभे-अर्धचन्द्रस्य चन्द्रार्धस्य आकारोऽर्धचन्द्राकारः, स चासाविषुर्बाणोऽर्धचन्द्रेषुः, "मयूरव्यंसकेत्यादयः" ३।१।११६॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वादाकारपदस्य लोपः स्मरस्य कामस्य, अर्धचन्द्रेषुः स्मरार्धचन्द्रेषुस्तन्निभस्तत्सदृशः स्मरार्धचन्द्रेषुनिभस्तस्मिँस्तथा। गलज्जरद्वस्त्रितपत्रसङ्करे-गलद्भिगलच्च तज्जरज्जीर्णतामादधद् गलज्जरत्, "शीतोष्ण" मित्यादिवद्यथाकथञ्चिद्गुणप्रधानभावमादाय समासः,गलज्जरच्च तद्वस्त्रम् वसनम् गलज्जरद्वस्त्रम् तद्वदाचरितम् गलज्जरद्वस्त्रितम् तादृशम् पत्त्रम् दलम् छदनमिति यावत्, गलज्जरद्वस्त्रितपत्त्रम्, तेन सङ्कीर्यते व्याप्यते इति गलज्जरद्वस्त्रितपत्त्रसङ्करस्तस्मिँस्तथा। अथवा वस्त्रमिवाचरितम् वस्त्रितम्, वस्त्रितञ्च तत्पत्त्रम् वस्त्रितपत्त्रम्, गलज्जरच्च तद्वस्त्रितपत्त्रम् गलज्जरद्वस्त्रितपत्त्रम्, तेन सङ्करः सङ्कीर्णः, व्याप्त इति यावत्, गलज्जरद्वस्त्रितपत्त्रसङ्करस्तस्मिँस्तथा इति व्युत्पत्तिरनुसरणीया। पलाशे-पलं मांसमश्नाति भक्षयतीति पलाशः, पलाश इव पलाशः तस्मिँस्तथा। तुलनाम्-सादृश्यम्। अदीदृशत्-अलूलुकत्॥८१॥

**वियुक्ततापत्रधनैर्विनाशने, स्फुटं पलाशेऽध्वजुषां पलाशनात्।**
**मुखेऽपि मालिन्यदशा ह्यमन्यता-ऽमुनोचिता पातकचिन्तयाऽध्वनि॥८२॥**

अन्वयः—*वियुक्ततापत्त्रधनैः, विना, अशने, ( सत्यपि ) पलाशनात्, स्फुटम्, पलाशे, अध्वजुषाम्, मुखे, अपि, अध्वनि, पातकचिन्तया, उचिता, मालिन्यदशा, अनेन, हि, अमन्यत॥८२॥*

वृत्तिः—वियुक्ततापत्त्रधनैः–विपूर्वकाद्युज्धातोर्भावे क्तः प्रत्ययः वियुक्तम् विरहः, वियोग इति यावत्, तस्य तापो सन्तापो वियुक्ततापः, वियुक्ताद्वा तापो वियुक्ततापस्तस्मात् त्रायन्ते रक्षन्तीति वियुक्ततापत्राणि तानि च तानि धनानि तैस्तथा। यद्वा–वियुक्तस्य विरहिणो भावो वियुक्तता सा चासौ सैव वा आपत् विपत् विपत्तिरिति यावत वियुक्ततापत् तस्यास्त्रायन्ते इति वियुक्तता पत्त्राणि तानि च तानि नान्येव वा धनानि वियुक्ततापत्त्रधनानि तैस्तथा। विना–अन्तरेण। अशने–भोजने। (सत्यपि) पलाशनात् मांसभक्षणात्। विरहिजनानामिति शेषः। स्फुटम्–प्रकटं यथा स्यात्तथा। पलाशे–पलं मांसमश्नातीति मांसभक्षणादन्वर्थसंज्ञके, पलाशवृक्षे। अध्वजुषाम्–अध्वानं मार्गं जुषन्ते सेवन्ते इति अध्वजुषस्तेषान्तथा। मुखे–वदने। अपि–सम्भावनायाम्। अध्वनि–मार्गे। पातकचिन्तया–पापानुध्यानेन। उचिता–युक्ता। मालिन्यदशा–मलिनत्वावस्था। अनेन–चक्रवर्तिना भगवता शान्तिनाथेनेत्यर्थः। हि–निश्चयेन। अमन्यत–अबाबुध्यत ॥८२॥

**स किंशुकः किं शुकवक्त्रतुल्यतां, धरे(द्)विपत्रीभवनादिति स्मरन्।**
**स वृन्तमालोकत खण्डमन्वितं, विशङ्कमुद्यत्सुमनः सुवर्णरुक् ॥८३॥**

अन्वयः—*सः, किंशुकः, (द्वि)विपत्त्रीभवनात्, किम्, शुकवक्त्रतुल्यताम्, धरेत्, इति, स्मरन्, सः, विशङ्कम्, उद्यत्सुमनः, सुवर्णरुक्, अन्वितम्, खण्डम्, वृन्तम्, आलोकत ॥८३॥*

वृत्तिः—सः–प्रसिद्धः। किंशुकः–पलाशः। विपत्रीभवनात्–विगतञ्च तत्पत्रम् विपत्रम् अविपत्रम् अविपत्रस्य विपत्रस्य भवनम् सम्पत्तिर्विपत्रीभवनम् तस्मात्तथा। (द्विपत्रीभवनात् द्वे च ते पत्रे दले द्विपत्रे, तयोर्द्विपत्रयोः, अद्विपत्रयोर्द्विपत्रयोर्भावः सम्पत्तिर्द्विपत्रीभवनम्, तस्मात्तथा।) अभूततद्भावार्थे 'च्विः' प्रत्ययः। किम्–वितर्केऽव्ययम्। शुकवक्त्रतुल्यताम्–शुकस्य कीरस्य, रक्ततुण्डस्य प्रसिद्धस्य पक्षिण इति यावत् वक्त्रम् मुखम् शुकवक्त्रम् तस्य तुल्यता शादृश्यम् शुकवक्त्रतुल्यता तान्तथा। धरेत्–आश्रयेत्, गृह्णीयादिति यावत्। इति–एवंप्रकारेण। स्मरन्–चिन्तयन् सः–प्रसिद्धः, भगवाञ्शान्तिनाथ इति यावत्। विशङ्कम्–विगता शङ्का, किमनिष्टं मे भविष्यतीत्याकारश्चित्तवृत्तिविशेषः, यस्मिन् कर्मणि तद्विशङ्कम् यथास्यात्तथा, निःशङ्कमिति यावत्। उद्यत्सुमनः–उद्यन्त्यो विकसन्त्यो सुमनसः सुष्ठु मन्यते पूज्यते आभिरिति सुमनसः, स्त्रीलिङ्गा वा बहुवचनान्तश्च "विहायस्सुमनस्" (उणा. ९७६) इत्यसि निपात्यते, इति सुमनसः कुसुमानि यस्मिंस्तत्तथा। सुवर्णरुक्–सुवर्णस्य काञ्चनस्य रुक् कान्तिरिव रुक् कान्तिर्यस्य तत्तथा। अन्वितम्–सम्बद्धम्। खण्डम्–खण्डमिव खण्डम् अंशम्। वृन्तम्–वृणोतीति वृन्तम् प्रसवबन्धनम्। यत् कात्यः—"बन्धनं पुष्पफलयोर्वृन्तमाहुः" आलोकत–समैक्षिष्ट ॥८३॥

क्वचित् पुनः शाल्मलिशालमालिनि, शिलोच्चये राजपथावरोधिनि ।
ददर्श भूपः सुमनो निबन्धनं, वियोगिहृत्खण्डिनि कालखण्डजम् ॥८४॥

अन्वयः—पुनः, शाल्मलिशालमालिनि, राजपथावरोधिनि, वियोगिहृत्खंडिनि, क्वचित्, शिलोच्चये, भूपः, सुमनोनिबन्धनम्, कालखण्डजम्, ददर्श ॥८४॥

वृत्तिः—पुनः–किञ्च। शाल्मलिशालमालिनि–शाल्मलिशालस्य तदाख्यवृक्षस्य माला पङ्क्तिः श्रेणीति यावत्। शाल्मलिशालमाला साऽस्यास्तीति शाल्मलिशालमाली तस्मिंस्तथा। राजपथावरोधिनि–राज्ञो नरपतेः पन्था मार्गो राजपथस्तमवरुणद्धि तच्छीलो राजपथावरोधी, तस्मिंस्तथेति । वियोगिहृत्खण्डिनि–वियोगिनाम् विप्रयुक्तानां हृत् अन्तःकरणम् वियोगिहृत् तत् खण्डयति भिनत्ति कामज्वालासन्तप्तं करोतीति यावत् वियोगिहृत्खण्डी तस्मिंस्तथा। क्वचित्–कुत्रचित्। शिलोच्चये–शिलानां पाषाणानामुच्चयोऽत्रेति शिलोच्चयः पर्वतस्तस्मिंस्तथा। भूपः–भुवं पृथिवीं पाति रक्षतीति भूपो राजा, भगवाञ्छान्तिनाथ इति यावत्। कालखण्डजम्–दक्षिणपार्श्वस्थं कृष्णं मासं कालखण्डम् तस्माज्जातमुत्पन्नम् कालखण्डजम्। सुमनोनिबन्धनम्–सुमनसाम् पुष्पाणाम्, निबन्धनम्–निःशेषेण बन्धनमत्रेति सुमनोनिबन्धनम्, वृन्तमिति यावत्। ददर्श–अवलोकितवान्, अपश्यदिति यावत्॥८४॥

नबालतागन्धवहेन चुम्बिता, जिनेशपादा युवराजताभृता ।
समीयुषा स्वाङ्गभुवा प्रणेमुषा, गजाश्ववृन्देन समं समङ्गलम् ॥८५॥

अन्वयः—गजाश्ववृन्देन, समम्, समङ्गलम्, नबालतागन्धवहेन, समीयुषा, प्रणेमुषा, युवराजताभृता, स्वाङ्गभुवा, जिनेशपादाः, चुम्बिताः ॥८५॥

वृत्तिः—गजाश्ववृन्देन–गजा हस्तिनश्च अश्वाः तुरङ्गमाश्च गजाश्वम् प्राण्यङ्गत्वादेकवद्भावः, तस्य वृन्दम् कदम्बकम् समूह इति यावत् गजाश्ववृन्दम् तेन तथा। समम्–सह । समङ्गलम्–मङ्गलेन कल्याणेन सर्वार्थरक्षणेन वा सहितं समङ्गलम् यथास्यात्तथा । नबालतागन्धवहेन–बालस्य भावो बालता, कौमार्य्यम् कैशोर्य्यं वा तस्या गन्धो लेशो बालतागन्धः, वहति धारयतीति वहः, "अच्" ५।१।४९॥ इत्यनेन अच्प्रत्ययः, बालतागन्धस्य वहो बालतागन्धवहः, न बालतागन्धवहो नबालतागन्धवहः, नैकधेत्यादिवत्समासो निषेधार्थकेन नशब्देन तेन तथा, यूनेत्यर्थः । समीयुषा–सामीप्यमधिगतवता । प्रणेमुषा–अधिगतप्रणामभावेन, प्रणतवतेतियावत्। युवराजताभृता–युवा तरुणो राजा नृपतिर्युवराजः तस्य भावो युवराजता तां बिभर्ति धारयतीति युवराजभृत् तेन तथा । स्वाङ्गभुवा–स्वस्य आत्मनोऽङ्गम् शरीरम् स्वाङ्गम् तस्माद् भवत्युत्पद्यते इति स्वाङ्गभूस्तेन तथा, पुत्रेणेति यावत् ।

**जिनेशपादाः**–जिनेशस्य अर्हच्छ्रेष्ठस्य भगवतः शान्तिनाथस्येति यावत् पादाश्चरणा जिनेशपादाः, वस्तुतस्तु "पादा भट्टारको देवः प्रयोज्यः पूज्यनामतः" । २।२५०।। इत्यभिधानचिन्तामण्युक्तप्रकारेण जिनपादा इत्यस्य जिनश्रेष्ठाः इत्यर्थः, अर्हद्भट्टारका इति यावत् । **चुम्बिताः**–चुम्बते वक्त्रसंयोगानुकूलव्यापारार्थकत्वेऽपि आलिङ्गनार्थे लक्षणया आलिङ्गिता इत्यर्थः ।।८५।।

**प्रिया तदीया जननी नृपेण सा, करम्बिताङ्गी मकरन्दसीकरैः ।**
**समालिलिङ्गे शुचिवासरे रसं, प्रकाशयन्ती गिरिजेव तापमुक् ।।८६।।**

अन्वयः—*रसम्, प्रकाशयन्ती, तापमुक्, गिरिजा, इव, मकरन्दसीकरैः, करम्बिताङ्गी, सा, तदीया, प्रिया, जननी, शुचिवासरे, समालिलिङ्गे ।।८६।।*

वृत्तिः—**रसम्**–अनुरागम् । **प्रकाशयन्ती**–प्रकटयन्ती, अभिव्यञ्जयन्तीति यावत् । **तापमुक्**–तापं सन्तापं मुञ्चति अन्तर्भावितणिगर्थत्वान्मोचयतीति तापमुक्, सन्तापहारिणीत्यर्थः । **गिरिजा**–गिरेः पर्वताज्जाता गिरिजा पार्वती अन्या वा काचन महादेवी । **इव**–यथा । **मकरन्दसीकरैः**–पुष्परसकणैः । **करम्बिताङ्गी**–करम्बितं व्याप्तमङ्गं शरीरम् यस्या सा तथा । **सा**–प्रसिद्धा । **तदीया**–तस्य भगवतः शान्तिनाथस्य इयं तदीया । **प्रिया**–मनोज्ञा समधिकस्नेहशालिनीति यावत् । **जननी**–प्रसूः, अचिरा मातेति यावत् । **शुचिवासरे**–शुचिः शुद्धश्चासौ वासरो दिवसः, दिनमिति यावत् । शुचिवासरस्तस्मिंस्तथा । **समालिलिङ्गे**–समाश्लिष्टा सम्यगालिङ्गितेति यावत् ।।८६।।

**लतेव तन्वी विभुविप्रयोगतः, प्रतापमेवादिशती नवोदयम् ।**
**दृशा नृपेण स्मितशोभिकुड्मला, भृशाऽङ्कुशारूढरतिर्न्यपीयत ।।८७।।**

अन्वयः—*विभुविप्रयोगतः, लता, इव, तन्वी, नवोदयम्, प्रतापम्, एव, आदिशती, स्मितशोभिकुड्मला, भृशाऽङ्कुशारूढरतिः, नृपेण, दृशा, अपीयत ।।८७।।*

वृत्तिः—**विभुविप्रयोगतः**–विभोस्त्रिभुवननायकस्य तेन वा विभुविप्रयोगो वियोगः, विच्छेद इति यावत् विभुविप्रयोगस्तस्मात्तथा । **लता**–वल्ली । **इव**–यथा । **तन्वी**–कृशा, कृशाङ्गीति यावत् । **नवोदयम्**–नवो नवीन उदयोऽभ्युदयः प्रकाशो वा यस्य स नवोदयस्तन्तथा । **प्रतापम्**–प्रभावम्, तेज इति यावत् । **एव**–अवधारणार्थकमव्ययम् । **आदिशती**–प्रतिपादयन्ती, अभिव्यञ्जयन्तीति यावत् । **स्मितशोभिकुड्मला**–स्मितेन ईषद्धासेन शोभते तच्छीलः स्मितशोभी, तादृशः कुड्मलो मुकुलो यस्याः सा स्मितशोभिकुड्मला । **भृशाऽङ्कुशारूढरतिः**–भृशमतिशयेन अकुशं यथास्यात्तथा आरूढा सम्प्राप्ता रति-

रनुरागो यया सा भृशाऽङ्कुशारूढरतिः । तदीयधर्मपत्नी-महिषीति यावत् । नृपेण-राज्ञा, भगवता शान्तिनाथेनेति यावत् । न्यपीयत-पपे, सादरमवलोकिता ॥८७॥

**अदम्भसंरम्भविमुक्तमानसा, न सा प्रियं प्राप्य न विप्रिये प्रिया ।**
**नृपेण सर्वा प्रमदा मदालसा, दरादराभ्यां दरकम्पिनी पपे ॥८८॥**

अन्वयः—*नृपेण, अदम्भसंरम्भविमुक्तमानसा, प्रियम्, प्राप्य, विप्रिये, न, प्रिया, न, दरादराभ्याम्, दरकम्पिनी, मदालसा, सा, सर्वा, प्रमदा, पपे ॥८८॥*

**वृत्ति**—नृपेण-राज्ञा, भगवता शान्तिनाथेनेति यावत् । अदम्भसंरम्भविमुक्तमानसा—दम्भनं दम्भो व्याजः, न दम्भो यस्मिन् कर्मणि तददम्भं यथा स्यात्तथा । संरम्भेण कोपेन विमुक्तं परित्यक्तं मानसमन्तःकरणं यस्याः सा तथा । "इदं किलाऽव्याजमनोहरं वपुः" इत्यादिवत् क्रियाविशेषणवाचकेन पदेन समासोऽङ्गीकरणीयः । प्रियम्—अभीप्सितम्, वल्लभं वा । प्राप्य—समधिगत्य । विप्रिये—व्यलीके, प्रियापराधेऽपीति यावत् । नप्रिया—अप्रिया, अमनोज्ञेति यावत् । न—नहि । अपि तु प्रियैवेति भावः । दरादराभ्याम्—दरो भयम् अदरो भयाभावः दरश्चादरश्च दरादरौ ताभ्यान्तथा । भयेन भयाभावेन ( हर्षेण ) चेत्येवमुभाभ्यामुपलक्षिता । दरकम्पिनी—दरमीषत्कम्पते वेपते तच्छीला दरकम्पिनी । "अजातेः शीले" ५ । १ । १५४ ॥ इत्यनेन तच्छीले 'णिन्' प्रत्ययः । मदालसा—मदेन हर्षेण अलसा चेतसः क्रियानुन्मुखताऽऽलस्यं तद्वती मदालसा । "अतितृप्तिगर्भव्याधिश्रमादिजन्या चेतसः क्रियानुन्मुखताऽऽलस्य 'मिति रसगङ्गाधरे पण्डितराजजगन्नाथः । सा—रूपसौन्दर्यलावण्यादिना भुवनत्रयप्रसिद्धा । सर्वा—निखिला । प्रमदा—नितम्बिनी, ललनेति यावत् । पपे—सादरमवलुलोके, ददृशे इति यावत् ॥८८॥

**विचिन्वतीः पान्थपतङ्गहिंसनै-र्विना शुभान्यभ्रगताः प्रकाशिकाः ।**
**निशि व्यधुः स्वालयसंमुखोत्सुक-प्रयाणयोगादपि दीपिका भटाः ॥८९॥**

अन्वयः—*भटाः पान्थपतङ्गहिंसनैः, विना, शुभानि, विचिन्वतीः, अभ्रगताः, निशि, प्रकाशिकाः, अपि, दीपिकाः, स्वालयसम्मुखोत्सुकप्रयाणयोगात् , व्यधुः ॥८९॥*

**वृत्तिः**—भटाः-योधाः । पान्थपतङ्गहिंसनैः—पन्थानं नित्यं गच्छन्तीति पान्थाः पथिकाः, त एव पतङ्गाः शलभाः पान्थपतङ्गास्तेषां हिंसनानि मारणानि पान्थपतङ्गहिंसनानि तैस्तथा । विना—अन्तरेण । शुभानि—कल्याणानि । विचिन्वतीः—एकत्र कुर्वन्तीः, अर्जयन्तीरितियावत् । अभ्रगताः—आकाशगताः । निशि—रात्रौ । प्रकाशिकाः—बोधिकाः । वस्तूनि इति यावत् । अपि—सम्भावनायाम् ।

दीपिकाः–प्रदीपान् । स्वालयसम्मुखोत्सुकप्रयाणयोगात्–स्वस्य आत्मनः आलयो गृहम्, स्वालयः तत्र सम्मुखोऽभिमुखः स्वालयसम्मुखस्तत्रोत्सुकः उत्सुकः, स्वालयसम्मुखोत्सुकः, अत एव प्रयाणम् प्रस्थानम् स्वालयसम्मुखोत्सुकप्रयाणम् तेन योगः सम्बन्धः स्वालयसम्मुखोत्सुकप्रयाणयोगस्तस्मात्तथा । व्यधुः–अकार्षुः, कृतवन्त इति यावत् ॥८९॥

**घटा गजानां मदसंकटैः कटै–रपुण्यकर्माण्यलिकज्जलच्छलात् ।**
**निदर्शयन्ती बहुधागमोदित–प्रभञ्जनोन्मग्नवपुः सरस्यभूत् ॥९०॥**

अन्वयः—*गजानाम्, घटा, मदसंकटैः, अलिकज्जलच्छलात्, अपुण्यकर्माणि, निदर्शयन्ती, बहुधागमोदितप्रभञ्जनोन्मग्नवपुः, सरसी, अभूत् ॥९०॥*

वृत्तिः—गजानाम्–हस्तिनाम् । घटा–घटना । मदसङ्कटैः–मदो दानजलम् तेन सङ्कटाः सम्बाधाः व्याप्ता इति यावत्, मदसङ्कटास्तैस्तथा । कटैः–कपोलैः । उपलक्षितेत्यर्थः । अलिकज्जलच्छलात्–अलयो भ्रमरा एव कज्जलमञ्जनम् अलिकज्जलम् तस्य छलम् व्याजोऽलिकज्जलच्छलम् तस्मात्तथा । अपुण्यकर्माणि–अपुण्यानि अपवित्राणि च तानि कर्माण्याचरणानि, अपुण्यकर्माणि तानि तथा । निदर्शयन्ती–अभिव्यञ्जयन्ती । बहुधागमोदितप्रभञ्जनोन्मग्नवपुः–बहुधाऽनेकवारमागम आगमनम् बहुधागमस्तेन उदिता उदयमधिगता बहुधागमोदितास्ते च ते प्रभञ्जना पवमानाः पवना इत्यर्थः, बहुधागमोदितप्रभञ्जनास्तत्र उन्मग्नं वपुः शरीरम् यस्याः सा तथा । सरसी–कासारः । अभूत्–अभवत् ॥९०॥

**सहेत न क्वापि स हेमपुष्पकः, कलङ्कपङ्कं मधुपोज्झितस्ततः ।**
**व्यलोकयच्चम्पककोरकावली–र्नृपः पथि क्वापि सुवर्णभास्वराः ॥९१॥**

अन्वयः—*सः, हेमपुष्पकः, मधुपोज्झितः, (सन्) क्वापि, कलङ्कपङ्कम्, न, सहेत, ततः, नृपः पथि, क्वापि, सुवर्णभास्वराः, चम्पककोरकावलीः, व्यलोकयत् ॥९१॥*

वृत्तिः—सः–प्रसिद्धः । हेमपुष्पकः–चम्पकपुष्पवृक्षः । मधुपोज्झितः–मधु पुष्परसं पिबन्तीति मधुपा भ्रमरास्तैरुज्झितस्त्यक्तो मधुपोज्झितः । (सन्) क्वापि–कुत्रापि । कलङ्कपङ्कम्–कलङ्कोऽपवादः पङ्कः कर्दम इवेति कलङ्कपङ्कस्तन्तथा । "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२॥ इत्यनेन उपमितसमासः । न–नहि । सहेत–मर्षेत् । ततः–तस्माद्धेतोः । नृपः–नॄन्–नरान् जनानिति यावत् पाति रक्षतीति नृपो राजा भगवाञ्शान्तिनाथ इति यावत् । पथि–मार्गे । क्वापि–कुत्रापि । कस्मिँश्चित् स्थले इति यावत् । सुवर्णभास्वराः–सुवर्णं काञ्चनमिव भास्वरा देदीप्यमानाः सुवर्णभास्वरास्तास्तथा ।

**चम्पककोरकावली:**–चम्पकस्य स्वनामप्रसिद्धपुष्पविशेषस्य कोरकाः कलिकाः चम्पककोरकाः तेषामावलयो राजयः, श्रेणय इति यावत्, चम्पककोरकावलयस्तास्तथा । **व्यलोकयत्**–अद्राक्षीत्, अपश्यदिति यावत् ॥९१॥

**अहर्पतेर्दर्पभरात् प्रसर्पति, प्रभाभरे भूमिभुजां महोदये ।**
**ददर्श ताराः पतनोन्मुखाः प्रगे, स–संवरारेर्बलिदीपिका इव ॥९२॥**

*अन्वयः—अहर्पतेः, महोदये, ( सति ) दर्पभरात्, भूमिभुजाम्, प्रभाभरे, प्रसर्पति, ( सति ) यद्वा अहर्पतेः, प्रभाभरे, भूमिभृताम्, महोदये, प्रसर्पति, ( सति ) सः, संवरारेः, बलिदीपिकाः, इव, प्रगे, पतनोन्मुखाः, ताराः, ददर्श ॥९२॥*

**वृत्तिः**—**अहर्पतेः**–अह्नो दिवसस्य पतिः स्वामी, प्रकाशकत्वात् अहर्पतिर्भगवान् सूर्य्यः, तस्य तथा । "वाऽहर्पत्यादयः" १ । ३ । ५८ ॥ इत्यनेन विसर्गता । **महोदये**–उदयात्मकमहोन्नतौ । (सति) **दर्पभरात्**–दर्पस्य गर्वस्य भरोऽतिशयो दर्पभरस्तस्मात् । **भूमिभुजाम्**–भूमिं पृथिवीं भुञ्जन्ति पालयन्ति इति भूमिभुजो राजानस्तेषान्तथा । प्रतिपक्षाणां नृपतिकदम्बकानामिति यावत् । **प्रभाभरे**–प्रभायास्तेजसो भरोऽतिशयः प्रभाभरस्तस्मिंस्तथा । **प्रसर्पति**–समुल्लसति । ( सति ) यद्वा **अहर्पतेः**–सूर्य्यस्य । **प्रभाभरे**–तेजोऽतिशये । **भूमिभृताम्**–पर्वतानाम् । **महोदये**–समुन्नतौ । **प्रसर्पति**–समुल्लसति । ( सति ) **सः**– प्रसिद्धः, भगवान् शान्तिनाथ इति यावत् । **संवरारेः**–कन्दर्पस्य । **बलिदीपिकाः**–बल्यर्थमपहारार्थम् दीपिकाः प्रदीपाः, बलिदीपिकाः, तास्तथा । **इव**–यथा । **प्रगे**–प्रातः । **पतनोन्मुखाः**–पतने पाने उन्मुखा उत्सुकास्तत्परा इति यावत् । पतनोमुखाः । **ताराः**–तारकाः, नक्षत्राणीति यावत्, **ददर्श**–अवलोकयाञ्चकार । दृष्टवानिति यावत् ॥९२॥

**अमन्यताऽसौ कुसुमेषु–सम्भवं, जिनोऽपरागः स परागमाश्रयन् ।**
**दिशां जयाल्लोहितचन्दनेज्यया, कृतां रुचिं पद्मनिवासिपद्मया ॥९३॥**

*अन्वय—दिशाम्, जयात्, लोहितचन्दनेज्यया, पद्मनिवासिपद्मया, कृताम्, रुचिम्, ( प्रति ) अपरागः, सः, असौ, जिनः, परागम्, आश्रयन्, कुसुमेषु–सम्भवम्, अमन्यत ॥९३॥*

**वृत्तिः**—**दिशाम्**–आशानाम्, दिशानामिति यावत् । **जयात्**–विजयात् । **लोहितचन्दनेज्यया**–लोहितचन्दनेन रक्तचन्दनेन इज्या पूजा यस्याः सा लोहितचन्दनेज्या तया तथा । **पद्मनिवासिपद्मया**–पद्मे कमले निवसति तच्छीला पद्मनिवासिनी स चासौ पद्मा कमला लक्ष्मीरिति यावत्, पद्मनिवासिपद्मा तया तथा । **कृताम्**–विहिताम् । **रुचिम्**–अभिलाषम् । (प्रति) **अपरागः**–

आगतो रागोऽनुरागो यस्मात् स तथा। सः–प्रसिद्धः। असौ–विप्रकृष्टः। जिनः–भगवानर्हन् शान्तिनाथ इत्यर्थः। परागम्–किञ्जल्कम्। सुमनोरेणुमिति यावत्। आश्रयन्–सेवमानः। कुसुमेषुसम्भवम्–कुसुमानि पुष्पाणि इषवो बाणा यस्य स कुसुमेषुः कन्दर्पस्तस्य सम्भव उदयः प्रादुर्भाव इति यावत्। कुसुमेषुसम्भवस्तन्तथा। यद्वा कुसुमेषु पुष्पेषु सम्भवम्–उत्पन्नम् इति परागविशेषणम्। अमन्यत–अवाबुध्यत ॥ ९३ ॥

## क्वचित् सरोऽन्तर्जलकेलिकर्मणि, परागमन्धङ्करणं वियोगिनाम् ।
## तदप्यभूद् राज्ञि सुवर्णवर्णित–तनूत्विषां नूनमनूनवृद्धये ॥९४॥

अन्वयः—*क्वचित्, सरोऽन्तः, परागम्, जलकेलिकर्मणि, वियोगिनाम्, अन्धङ्करणं, नूनम्, तत्, अपि, राज्ञि, सुवर्णवर्णिततनूत्विषाम्, अनूनवृद्धये, अभूत् ॥९४॥*

वृत्तिः—क्वचित्–कुत्रापि। सरोऽन्तः–सरसः कासारस्य अन्तर्मध्यम् सरोऽन्तः। परागम्–कुसुमरेणुः, पुष्पधूलिरित्यर्थः। जलकेलिकर्मणि–जलकेलिर्जलक्रीडा सैव कर्म क्रिया जलकेलिकर्म तस्मिँस्तथा। वियोगिनाम्–वियोगो विच्छेदोऽस्त्येषामिति वियोगिनस्तेषान्तथा। अन्धङ्करणम्–नेत्रोपघातकम्। नूनम्–निश्चयेन। तत्–वियोगिनेत्रोपघातकत्वेन प्रसिद्धं परागम्। अपि–सम्भावनायाम्। राज्ञि–नृपतौ। चक्रिणि शान्तिनाथे इति यावत्। सुवर्णवर्णिततनूत्विषाम्–तन्वाः शरीरस्य त्विषः कान्तयस्तनूत्विषः, सुवर्णं काञ्चनम् तस्य वर्णम् रूपम् सुवर्णवर्णम्, तद्वदाचारिताः सुवर्णवर्णिताः, यद्वा–सुवर्णवर्णं सञ्जातमासामितिसुवर्णवर्णिताः, सुवर्णवर्णिताश्च तास्तनूत्विषः सुवर्णवर्णिततनूत्विषस्तासान्तथा। अनूनवृद्धये–न ऊना हीना अनूना सा चासौ वृद्धिरनूनवृद्धिस्तस्यै तथा। अभूत्–अभवत्। 'यदेव परागं वियोगिनामन्धङ्करणं तदेव भगवति शान्तिनाथेऽतिशयितवृद्धिकरं जातमित्याश्चर्यमिति भावः ॥९४॥

## वनेचरेणापि वनेऽत्र पत्रिणि, फलाढ्यपुष्पैस्तदघानि तज्जनः ।
## स्मरेण मुक्तेषु पुरा पुरारये, शरेषु लेभे विफला क्रिया यतः ॥९५॥

अन्वयः—*अत्र, पत्रिणि, वने, वनेचरेण, अपि, स्मरेण, तज्जनः, फलाढ्यपुष्पैः, अघानि, यतः, पुरा, पुरारये, ( केवलेषु ) शरेषु, मुक्तेषु, क्रिया, विफला, लेभे ॥९५॥*

वृत्तिः—अत्र–अस्मिन्। पत्रिणि–पत्राणि, दलानि सन्त्यस्मिन्निति पत्रि तस्मिँस्तथा। दलान्विते इति यावत्। वने–कानने। वनेचरेण–वने कानने चरति मध्ये मार्गं गच्छतीति वनेचरः

तेन तथा । अपि–सम्भावनायाम् । स्मरेण–कन्दर्पेण । तज्जनः–सः सैनिकश्चासौ जनो लोकस्तज्जनः, सैन्यवर्ग इत्यर्थः । फलाढ्यपुष्पैः–फलैर्वृक्षप्रसवैराढ्यानि पूर्णानि फलाढ्यानि तानि च तानि पुष्पाणि कुसुमानि फलाढ्यपुष्पाणि तैस्तथा । बाणत्वमापन्नानां पुष्पाणां केवलत्वे (सकलसम्पत्तिसंवलितत्वाभावे) तादृशशक्तिर्न भवतीति भावः । यतः–यस्मात् । पुरा–पूर्वम् । "मधुश्च ते मन्मथसाहचर्य्या–दसावनुक्तोऽपि सहाय एव । समीरणो नोदयिता भवेति, व्यादिश्यते केन हुताशनस्य" इत्यादिना पुरन्दरप्रोत्साहितेन कामदेवेनेति शेषः । पुरारये–त्रिपुरविनाशिने । शङ्करायेति यावत् । (कवलेषु) शरेषु–पुष्पात्मकबाणेषु । मुक्तेषु–प्रक्षिप्तेषु । क्रिया–कर्म । प्रयास इति यावत् । विफला–व्यर्था । लेभे–प्रापे । समासादितेति यावत् ॥९५॥

**वने चरच्चारुचमूचराशुग–स्थले बभौ पुष्परजोव्रजः क्वचित् ।**
**हृदि ज्वलत्काममहानलार्चिष–स्तदङ्गभस्मेव शरेषु सङ्गतम् ॥९६॥**

अन्वयः—*वने, क्वचित्, चरच्चारुचमूचराशुगस्थले, पुष्परजोव्रजः, बभौ, हृदि, ज्वलत्काममहानलार्चिषः, शरेषु, सङ्गतम्, तदङ्गभस्म, इव ॥९६॥*

वृत्तिः—वने–कानने । क्वचित्–कुत्रापि । चरच्चारुचमूचराशुगस्थले–आशु शीघ्रं गच्छन्त्याशुगा बाणाः, चमूचराणां सैनिकानामाशुगाश्चमूचराशुगाः, चरन्तश्चचलाश्च ते चारवः शोभनाश्चरच्चारवः, "शीतोष्णम्" इत्यादिवत् । यथाकथञ्चिद् गुणप्रधानभावमभ्युपगम्य कर्मधारयः समासः, चरच्चारवश्च ते चमूचराशुगाश्चरच्चारुचमूचराशुगास्तेषां स्थलं स्थानविशेषश्चरच्चारुचमूचराशुगस्थलम् तस्मिँस्तथा । पुष्परजोव्रजः–पुष्पाणां कुसुमानां रजांसि परागाः, धूलय इति यावत्, पुष्परजांसि तेषां व्रजः समूहस्तथा । बभौ–शुशुभे । हृदये–अन्तःकरणे, मनसीति यावत् । ज्वलत्काममहानलार्चिषः–ज्वलन् दीप्यमानश्चासौ कामः कन्दर्पः ज्वलत्कामः स एव महानलो बृहदग्निः ज्वलत्काममहानलस्तस्य अर्चिर्ज्वाला, ज्वलत्काममहानलार्चिस्तस्य तथा । शरेषु–बाणेषु । सङ्गतम्–संलग्नम् । तदङ्गभस्म–तस्य शिवस्य अङ्गम् शरीरम् तदङ्गम् । यद्वा तस्य शिवस्य अङ्गानि शरीरावयवास्तदङ्गानि तेषु लग्नम् तदङ्गलग्नम् तच्च तद् भस्म भसितम् तदङ्गभस्म, "मयूरव्यंसकेत्यादयः" ३।१।११६॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वात् समासः । मध्यवर्तिनो लग्नपदस्य लोपश्च । इव–यथा ॥९६॥

**पिकाद् वने शृण्वति भृङ्गहुङ्कृतैः, स्फुटं भटानां वचनानुवादिभिः ।**
**जयारवोद्घोषणमेव चक्रिणो, जनोऽनजन्यस्तदमन्यताध्वगः ॥९७॥**

अन्वयः—*पिकात्, भटानाम्, वचनानुवादिभिः, भृङ्गहुङ्कृतैः, स्फुटम्, शृण्वति, (सति) अनजन्यः, अध्वगः, जनः, चक्रिणः, जयारवोद्घोषणम्, एव, अमन्यत ॥९७॥*

वृत्तिः—पिकात्-कोकिलात् । भटानाम्-योधानाम्, वीराणामिति यावत् । वचनानुवादिभिः—वचनानि भाषितानि अनुवदन्ति अनुकुर्वन्तीति वचनानुवादीनि तैस्तथा । "अजातेः शीले" ५।१।१५४। इत्यनेन तच्छीले 'णिन्' प्रत्ययः । भृङ्गहुङ्कृतैः—भृंगाणां भ्रमराणां हुङ्कृतानि हुङ्कारा भृङ्गहुङ्कृतानि तैस्तथा । कृत्वेतिशेषः । स्फुटम्—व्यक्तम् यथास्यात्तथा । शृण्वति—आकर्णयति । सतीतिशेषः । अनजन्यः—अजन्येनोत्पातेन रहितोऽनजन्यः । अध्वगः—अध्वानं पन्थानं मार्गमिति यावत् गच्छन्तीत्यध्वगः पथिकः । जनः—लोकः । चक्रिणः—चक्रवर्तिनः, शान्तिनाथस्येति यावत् । जयारवोद्घोषणम्—जयस्य विजयस्य आरवः शब्दो जयारवः, तस्य उद्घोषणम् विज्ञापनम् जयारवोद्घोषणम् । एव—अवधारणार्थकमव्ययम् । अमन्यत—अवाबुध्यत ॥९७॥

**स्वसैनिकानां नृपतिः स्वमानसे, दशामुदञ्चत्करुणो वियोगिनाम्* ।**
**निधाय चाज्ञापयदागमं पुन-र्निजावरोधस्य परस्परेच्छया ॥९८॥**

*अन्वयः—उदञ्चत्करुणः, नृपतिः, स्वमानसे, वियोगिनाम्, स्वसैनिकानाम्, दशाम्, निधाय, पुनः, च, परस्परेच्छया, निजावरोधस्य, आगमम्, आज्ञापयत् ॥९८॥*

वृत्तिः—उदञ्चत्करुणः—उदञ्चन्ती विलसन्ती उत्कर्षमापादयन्तीति यावत्, करुणा दया यस्य स उदञ्चत्करुणः । नृपतिः—जनाधिनाथः । चक्री भगवान् शान्तिनाथ इति यावत् । स्वमानसे—स्वस्य आत्मनः स्वमात्मीयं वा मानसमन्तःकरणम्, हृदयमिति यावत्, स्वमानसम्, तस्मिँस्तथा । वियोगिनाम्—प्रियतमाविप्रयुक्तानां । स्वसैनिकानाम्—आत्मीयचमूचराणाम् । दशाम्—अवस्थाम् । निधाय—परिचिन्त्य । पुनः च—पुनः पुनः, अनेकवेति यावत् । परस्परेच्छया—अन्योन्याभिलाषेण । निजावरोधस्य—निजः स्वीयश्चासाववरोधस्तस्य तथा । षष्ठ्यर्थः कर्मत्वम्, निजावरोधकर्मकमित्यर्थः । आगमम्—आगमनमागमनस्तन्तथा । अज्ञापयत्—समादिशत् ॥९८॥

**नृपाज्ञयाऽऽमन्त्रितकामिनीजने, पुरस्तथान्वागमने मनस्विनाम् ।**
**अनास्थया सूनकरप्रसारिणीं, स्त्रियं श्रमेणानुनिनाय कश्चन ॥९९॥**

* "पिकाद्वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणे वियोगिनाम् ।"

इति यथाश्रुतनैषधीये श्लोके "उदञ्चत्करुणे" इति सप्तम्यन्तपाठस्योपलम्भादत्रापि तत्समस्यापूरणात्मकग्रन्थे यथाश्रुतसप्तम्यन्तपाठेनैव भवितव्यमिति कैश्चिदाशङ्क्येतेति चेदस्तु नामात्रापि 'उदञ्चत्करुणे' इति सप्तम्यन्तपाठ एव, एवञ्च उदञ्चन्तो विकासं प्राप्नुवन्तः करुणाः करुणसंज्ञका वृक्षा यस्मिँस्तत् उदञ्चत्करुणं तस्मिँस्तथा इति वने विशेषणतयैवेति ।

*अन्वयः—नृपाज्ञया, आमन्त्रितकामिनीजने, तथा, मनस्विनाम्, पुरः, अन्वागमने, कश्चित्, अनास्थया, सूनकरप्रसारिणीम्, स्त्रियम्, श्रमेण, अनुनिनाय ॥९९॥*

**वृत्तिः—नृपाज्ञया**–नृपस्य भगवतः शान्तिनाथस्य आज्ञा निर्देशो नृपाज्ञा तया तथा, भगवच्छान्तिनाथानुशासनेनेति यावत्। **आमन्त्रितकामिनीजने**–कामिन्यो रमण्य एव जनो लोकः कामिनीजनः आमन्त्रितः आहूतश्चासौ कामिनीजनः आमंत्रितकामिनीजनस्तस्मिँस्तथा। **तथा**–किञ्च। **मनस्विनाम्**–मनीषिणाम्। **पुरः**–अग्रे। **अन्वागमने**–पश्चादागमने। **कश्चित्**–कश्चन जनः। **अनास्थया**–अधीरतया। **सूनकरप्रसारिणीम्**–सूनानि पुष्पाणीव करौ हस्तौ सूनकरौ तौ प्रसारयति तच्छीलाः सूनकरप्रसारिणी तान्तथा। **स्त्रियम्**–वनिताम्। **श्रमेण**–परिश्रमेण। **अनुनिनाय**–अनुनीतवान् ॥९९॥

**चलन् नृपादेशनिवेशपेशलः, पुरः स्वसेनान्वयतो नृपो गुणैः।**
**स्वगेहमाप्यापि वियोगिनीं प्रियां, ददर्श दूनः स्थलपद्मिनीं नलः ॥१००॥**

*अन्वयः—नृपादेशनिवेशपेशलः, स्वसेनान्वयतः, पुरः, चलन्, गुणैः, (कृत्वा) नलः (इव) दूनः, नृपः, स्वगेहम्, आप्य, स्थलपद्मिनीम्, (इव) वियोगिनीम्, प्रियाम्, ददर्श ॥१००॥*

**वृत्तिः—नृपादेशनिवेशपेशलः**–नृपेषु सार्थवर्तिषु राजसु आदेश उपदेशः, निदेशो वा नृपादेशः, तस्य निवेशः स्थापनम्, विधानमिति यावत्। नृपादेशनिवेशस्तत्र पेशलः चतुरो नृपादेशनिवेशपेशलः। **स्वसेनान्वयतः**–स्वसेनया निजसैन्येन अन्वयः सम्बन्धः स्वसेनान्वयस्तस्मात् तथा। **पुरः**–अग्रतः। **चलन्**–गच्छन्। **गुणैः**–विनयसारल्यसत्यपरायणता-त्यागसत्त्वशौर्य्यादिभिः। (कृत्वा) **नलः**–प्रातःस्मरणीयत्वेन दमयन्तीपतित्वेन च प्रसिद्धः, स इव नलः, यद्वा-रलयोरभेदान्नरोऽर्जुनः कृष्णो वा, स इव प्रतापीत्यर्थः। अथ च **दूनः**–सन्तप्तः। **नृपः**–राजा। **स्वगेहम्**–निजगृहम्, आत्मसदनमित्यर्थः। **आप्य**–सम्प्राप्य। **स्थलपद्मिनीम्**–स्थलकमलिनीम्। इवेति लुप्तोपमा। **वियोगिनीम्**–प्रियतमविच्छेदवतीमित्यर्थः। **प्रियाम्**–वल्लभाम्, हृदयेश्वरीमिति यावत्। **अपि**–सम्भावनायामव्ययम्। **ददर्श**–अवलोकयामास। दृष्टवानिति यावत् ॥१००॥

**रसालसालः समदृश्यताऽमुना, स्वदेशजन्मा वसुधातपत्रितः।**
**सृजन् दलैस्तोरणधोरणीं चलैः, फलैः पुनर्न्युञ्छनकर्म शर्म्मणे ॥१०१॥**

*अन्वयः—चलैः, दलैः, तोरणधोरणीम्, पुनः, फलैः, शर्म्मणे, न्युञ्छनकर्म, सृजन्, वसुधातपत्रितः, स्वदेशजन्मा, रसालसालः, अमुना, समदृश्यत ॥१०१॥*

वृत्तिः—चलैः–चञ्चलैः चलाचलैरिति यावत्। दलैः–पत्रैः। तोरणधोरणीम्–तोरणस्य बहिर्द्वारस्य धोरणी परम्परा तोरणधोरणी तान्तथा। पुनः–अथ च। फलैः–प्रसवैः। शर्म्मणे–सुखाय कल्याणायेति यावत्। न्युञ्छनकर्म–फलादेः कणश आदानम् उञ्छनम्, नितरामुञ्छनम् न्युञ्छनम् तच्च तत्कर्म न्युञ्छनकर्म तत्तथा। सृजन्–विदधत्, कुर्वन्निति यावत्। वसुधातपत्रितः–वसुधायाः पृथिव्या आतपत्रम् छत्रमिवाचरितो वसुधातपत्रितः। स्वदेशजन्मा–स्वदेशे निजमण्डले जन्मोत्पत्तिर्यस्य स स्वदेशजन्मा। रसालसालः–रसाल आम्रलक्षणश्चासौ सालो वृक्षो रसालसालः। अमुना–अनेन, भगवता शान्तिनाथेनेति यावत्। समदृश्यत–समलक्ष्यत। अवलोकित इति यावत् ॥१०१॥

**जगर्ज गर्जेषु मणिर्मदोत्कटः, स्फुरद्द्विरेफारवरोषहुँकृतिः।**
**स्पृशंश्च सत्तावयवैर्भुवं जयै–र्दिशां गजानामिव साङ्गजश्रियाम् ॥१०२॥**

अन्वयः—*साङ्गजश्रियाम्, दिशाम्, गजानाम्, जयैः, सत्तावयवैः, भुवम्, स्पृशन्, इव, च, स्फुरद्द्विरेफारवरोषहुँकृतिः, मदोत्कटः, गर्जेषु, मणिः जगर्ज ॥१०२॥*

वृत्तिः—साङ्गजश्रियाम्–अङ्गाच्छरीराज्जाता उत्पन्ना अङ्गजास्तेषां श्रीः शोभा अङ्गजश्रीस्तया सहिताः साङ्गजश्रियस्तेषान्तथा। दिशाम्–आशानाम्, तत्सम्बन्धिनामिति यावत्। गजानाम्–मतङ्गजानाम्, हस्तिनामिति यावत्। जयैः–विजयैः। हेतुभिरित्यर्थः। सत्तावयवैः–सत्तायाः अवस्थितेरवयवा अंशाः सत्तावयवास्तैस्तथा। लाघवकलितावस्थितिभिरिति यावत्। भुवम्–पृथिवीम्। स्पृशन्–समाश्रयन्। इव–यथा। च–पुनः। स्फुरद्द्विरेफारवरोषहुंकृतिः–स्फुरन्ती विलसन्ती द्विरेफारवरोषेण भ्रमरशब्दजनितक्रोधेन हुंकृतिः हुमित्याकारकः शब्दविशेषो यस्य स तथा। व्यधिकरणबहुव्रीहेरपि साध्याभाववदवृत्तित्वमितिपूर्वपक्षीयव्याप्तिलक्षणादाविव शिष्टैरभ्युपगमात् तत्करणं प्रकृतेऽप्यविरुद्धमिति द्रष्टव्यम्। मदोत्कटः–मदेन दानजलेन उत्कट उच्छ्रितः मदोत्कटः। गर्जेषु–गर्जन्तीति गर्जा हस्तिनस्तेषु तथा। मणिः–रत्नम्, श्रेष्ठ इति यावत्। जगर्ज–गर्जितवान्, अगर्जदितियावत् ॥१०२॥

**समुच्छ्रिते चाम्रतरौ समीपगे, ध्वजे महेन्द्रस्य चलोच्चकेतनैः।**
**समीरलोलैर्मुकुलैर्वियोगिने–हितः स्वलोकाय सुखाकरोद् नृपः ॥१०३॥**

अन्वयः—*समीरलोलैः, मुकुलैः, चलोच्चकेतनैः, (उपलक्षिते) महेन्द्रस्य, ध्वजे, (इव) समीपगे, च, समुच्छ्रिते, आम्रतरौ, वियोगिना, ईहितः, नृपः, स्वलोकाय, सुखाकरोत् ॥१०३॥*

वृत्तिः—समीरलोलैः-समीरैर्वायुभिः पवनैरिति यावद् लोलाश्चञ्चलाः समीरलोलास्तैस्तथा । मुकुलैः-कुड्मलैः । चलोच्चकेतनैः-चलानि चपलानि च उच्चकेतनानि चिह्नानि चलोच्चकेतनानि तैस्तथा समीरलोलमुकुलरूपोच्चकेतनत्वेन रूपणाद्रूपकालङ्कारः । ( उपलक्षिते ) महेन्द्रस्य-सुराधिपतेः । ध्वजे-पताकायाम् ( इव, स्थिते, इति शेषः ) । समीपगे-निकटस्थे । च-पुनः । समुच्छ्रिते-विशाले । आम्रतरौ-सहकारवृक्षे । वियोगिना-प्रियतमाविप्रयुक्तेन, चमूचरकदम्बकेनेति यावत् । ईहितः-वाञ्छितः । नृपः-राजा, भगवाँश्चक्रीति यावत् । स्वलोकाय-स्वः स्वकीयश्चासौ लोकः प्रजा स्वलोकः स्वस्य आत्मनो वा लोकः स्वलोकस्तस्मै तथा । सुखाकरोत्-असुखयत् ॥१०३॥

**वियत्युदीयाय जिनेशचक्रिणः, सदानुयानादिव चक्रकैतवात् ।**
**अनीतिनिष्ठाय नु शक्रबान्धवो, जनाय दित्सन्निव तर्जनीभियम् ॥१०४॥**

अन्वयः—*जिनेशचक्रिणः, चक्रकैतवात्, सदा, अनुयानात्, इव, चक्रबान्धवः, अनीतिनिष्ठाय, जनाय, तर्जनीभियम्, दित्सन्, इव, वियति, उदीयाय ॥१०४॥*

वृत्तिः—जिनेशचक्रिणः-जिनेशो जिनेश्वरो, शान्तिनाथ इति यावत् । एवं चक्री चक्रवर्ती जिनेशचक्री तस्य तथा । चक्रकैतवात्-तदाख्यास्त्रव्याजात् । छत्रकदम्बस्य चक्रशब्दपर्यायतया अति-प्रसिद्धिः । सदा-सर्वदा । अनुयानात्-अनुगमनात् । इव-यथा । चक्रबान्धवः-चक्राणां कोकानां बान्धवः स्वजनः विकासकारकत्वाच्चक्रबान्धवः सूर्यः, भगवान् दिवानाथ इति यावत् । अनीतिनिष्ठाय-अनीतौ अन्याये नयरहिते इति यावत् निष्ठा निर्बन्धो यस्य सोऽनीतिनिष्ठस्तस्मै तथा । अनुचिताचार-निरतायेति यावत् । जनाय-लोकाय, प्रजायै इति यावत् । तर्जनीभयम्-तर्जन्यास्तदाख्याङ्गुलिवि-शेषाद् भीर्भयम्, तर्जनीभीस्ताम् तथा । दित्सन्-दातुमिच्छन् । इव-यथा । वियति-आकाशे । उदीयाय-उदयं प्राप्तवानित्यर्थः ॥१०४॥

**दिने दिने त्वं तनुरेधि रेऽधिकं, मणे ! करस्पर्शनतो ममेति सः ।**
**निजातपत्राय जगत्त्रयीविभु-र्नृणां विपत्त्राय ददौ प्रभाभरम् ॥१०५॥**

अन्वयः—*रे मणे !, मम, करस्पर्शनतः, त्वम्, दिने दिने, अधिकम्, तनुः, एधि, इति जगत्त्रयीविभुः, सः, नृणाम्, विपत्त्राय, निजातपत्राय, प्रभाभरम्, ददौ ॥१०५॥*

वृत्तिः—रे मणे !-अरे रत्न ! मम-मल्लक्षणस्य जनस्य । करस्पर्शनतः-करस्य हस्तस्य अंशोश्च स्पर्शनम् स्पर्शः करस्पर्शनम् तस्मात्तथा । त्वम्-तेजस्त्वेन कान्तिमत्त्वेन लोकप्रसिद्धोऽपि मणिः । दिने दिने-अनुदिनम्, दिनानुदिनमिति यावत् । अधिकम्-अत्यन्तम् । तनुः-कृशः । एधि-भव,

सम्पथरवेति यः । इति-इत्येवंप्रकारेण । जगत्त्रयीविभुः-त्रयोऽवयवा अस्या इति त्रयी, जगतां भुवनानां त्रयी जगत्त्रयी, भुवनत्रयमित्यर्थः । तस्या विभुः प्रभुर्नायक इति यावत्, जगत्त्रयीविभुः । सः-प्रसिद्धः, भगवान् शान्तिनाथ इति यावत् । नृणाम्-जनानाम् । विपत्त्राय-विपदो विपत्तेस्त्रायते रक्षतीति विपत्त्रम्, तस्मै तथा । निजातपत्राय-स्वीयच्छत्राय । प्रभाभरम्-प्रभायाः कान्तेर्भरोऽतिशयः प्रभाभरस्तन्तथा । ददौ-वितताार, दत्तवानिति यावत् । स्वप्रभाया आधिक्यात् स्वोपरि धरणेन छत्राय प्रभादानं व्यदधादिति भावः ॥१०५॥

**कृपाणरत्नं कृपणे कृपाधनं, पुनः पुनर्मूर्च्छ च तापमृच्छ च ।**
**द्विषे मिषेण स्वकराकरस्य य-दितीव नित्यं समुपादिशत् प्रभोः ॥१०६॥**

अन्वयः—*यत्, कृपणे, कृपाधनम्, प्रभोः, कृपाणरत्नम्, स्वकराकरस्य, मिषेण, द्विषे, पुनः पुनः, मूर्च्छ, च, तापम्, ऋच्छ, च, इतीव, नित्यम्, समुपादिशत्, इव ॥१०६॥*

वृत्तिः—यत्-यस्माद्धेतोः । कृपणे-दीने । कृपाधनम्-कृपया दयैव धनमैश्वर्यं यस्य तत् तथा । कृपाविशिष्टमित्यर्थः । अत्र-"कृपाघनमिति" पाठः साधीयान् प्रतिभाति, तस्य च कृपामयमित्यर्थः, कृपायाश्चेतनवृत्तित्वाद्यद्यपि कृपाणरत्ने कृपामयत्वमप्रसिद्धं तथापि उपदेशकत्वेनोत्प्रेक्षणादुपदेशकस्य कृपामयत्वमपेक्षितमेवेति नासमुञ्जसमुत्प्रेक्षासाधकत्वेन कृपामयात्वारोपस्यावश्यकत्वादिति ध्येयम् । प्रभोः-विभोश्चक्रवर्तिनः शान्तिनाथस्येति यावत् । कृपाणरत्नम्-कौक्षेयकश्रेष्ठम् । स्वकराकरस्य-स्वस्य आत्मनः करः किरणः स्वकरः तस्य आकरः खानिः स्वकराकरस्तस्य तथा । मिषेण-व्याजेन । द्विषे-शत्रवे । पुनः पुनः-मुहुर्मुहुः, वारंवारमिति यावत् । मूर्च्छ-मूर्च्छां प्राप्नुहि । च-पुनः । तापम्-सन्तापम् । ऋच्छ-अधिगच्छ, प्राप्नुहीति यावत् । च-पादपूरणे । इतीव-इत्येवंप्रकारेणेव । नित्यम्-सर्वदा । समुपादिशत्-समुपदिदेश । इव-यथा ॥१०६॥

**कृतं पदं वार्धकिरत्नयत्नतो, मृषाऽकरोद् भूरिकृतोपभोगदम् ।**
**इतीव पान्थं शपतः पिकान् द्विजान्, क यासि हित्वा वनितानितान्तमुक् ॥१०७**

अन्वयः—*हे पान्थ ! (त्वम्) वनितानितान्तमुक्, क, यासि ?, (इति) पान्थम्, शपतः, इव, पिकान्, (वा) द्विजान्, भूरिकृतोपभोगदम्, वार्धकिरत्नयत्नतः, कृतम्, पदम्, (कट्) मृषा, अकरोत् ॥१०७॥*

वृत्तिः—हे पान्थ !-हे पथिक ! (त्वम्) वनितानितान्तमुक्-अत्यन्तं त्यक्तनितम्बिनीकः,

(सन्) क्व–कुत्र। यासि–गच्छसि। इति–एवंप्रकारेण। पान्थम्–पन्थानं, नित्यं गच्छतीति पान्थस्तन्तथा। शपतः–शापं ददतः। इव–यथा। पिकान्–कोकिलान्। द्विजान्–पक्षिणः। भूरिकृतोपभोगम्–भूरिणा स्वर्णेन कृता भूरिकृताः, ते च ते उपभोगा भूरिकृतोपभोगाः, "मयूरव्यंसकेत्यादयश्च" ३।१।११६। इत्यनेन शाकपार्थिवादेराकृतिगणत्वाद् मध्यमपदलोपी समासः; तान् ददातीति भूरिकृतोपभोगदम्॥ वार्धकिरत्नयत्नतः–वार्धकिरत्नस्य मनुष्यजातीयचक्रवर्तिसम्बन्धिविश्वकर्मकर्मसम्पादकस्य यत्नः प्रयत्नो वार्धकिरत्नयत्नस्तस्मात्तथा। कृतम्–विहितम्। पदम्–स्थानम्। मृषा–मिथ्या। अकरोत्–व्यदधात्॥ तैः कृतस्य वारणस्य वैयर्थ्यम् अन्यथापि स्थानलोभादेव तेषां गमनाभावस्य सिद्धत्वात्॥१०७॥

यथेष्टदानेन विशिष्टशिष्टधीः, स्वसैन्यजन्ये शिबिरे प्रपापदे।
कयापि रीत्या पथिकान्न दैन्यतः, सखेदमैक्षिष्ट स लोहितेक्षणान्॥१०८

अन्वयः—*विशिष्टशिष्टधीः, सः, यथेष्टदानेन, स्वसैन्यजन्ये, शिबिरे, प्रपापदे, कया, अपि, रीत्या, दैन्यतः, सखेदम्, लोहितेक्षणान्, पथिकान्, न, ऐक्षिष्ट*॥१०८॥

वृत्तिः—विशिष्टशिष्टधीः–विशिष्टा विलक्षणा, शिष्टा साधीयसी, शिष्टजनोपकारिणी वा धीर्बुद्धिर्यस्य स तथा। सः–प्रसिद्धः चक्रवर्ती श्रीशान्तिनाथ इति यावत्। यथेष्टदानेन–इष्टमभिलषितमनतिक्रम्य यथेष्टम्, तस्य वस्तुनो, दानं वितरणम्, यथेष्टदानम्, तेन तथा। स्वसैन्यजन्ये–स्वस्य आत्मनः सैन्यम् स्वसैन्यम्, तेन जन्यमुत्पन्नम्, सम्पन्नमिति यावत् स्वसैन्यजन्यम् तस्मिंस्तथा। शिबिरे–सन्निवेशे, स्थिताविति यावत्। प्रपापदे–प्रपायाः पानीयशालिकायाः पदं स्थानम् प्रपापदम् तस्मिँस्तथा। कया–कीदृशा। अपि–सम्भावनायाम् अव्ययम्। रीत्या–प्रकारेण। दैन्यतः–दीनतातः। सखेदम्–खेदेन शोकापरपर्य्यायेण सहितं सखेदम् यथास्यात्तथा। लोहितेक्षणान्–लोहिते रक्ते ईक्षणे नयने येषां ते लोहितेक्षणास्तेषान्तथा। पथिकान्–पान्थान्। न–नहि। ऐक्षिष्ट–अपश्यत्॥१०८॥

अलिस्रजा कुड्मलमुच्चशेखरं, निरीक्ष्य मेने ह्यमुनापि चक्रिणा।
द्रुमेऽपि दानातिशयः फलोदय–श्रिये पुनः किं पुरुषे सचेतसि ?॥१०९॥

अन्वयः—*अमुना, चक्रिणा, अपि, अलिस्रजा, उच्चशेखरम्, कुड्मलम्, निरीक्ष्य, "द्रुमे, अपि, फलोदयश्रिये, दानातिशयः, (चेत्) सचेतसि, पुरुषे, किं, पुनः", (इति) मेने*॥१०९॥

वृत्तिः—अमुना–विप्रकृष्टेन। चक्रिणा–तीर्थकृत्पञ्चमचक्रवर्तिना भगवता शान्तिनाथेनेति

यावत्। अपि-सम्भावनायाम् । अलिस्रजा-भ्रमरपङ्क्त्या, भ्रमरसमूहेनेति यावत् । उच्चशेखरम्-उन्नताग्रभागम् । कुड्मलम्-चाम्पेयमुकुलम् । निरीक्ष्य-अवलोक्य । द्रुमे-वृक्षे । अपि-सम्भावनायाम् । फलोदयश्रिये-फलस्य तरुशस्यस्य उदयोऽभ्युदयः फलोदयस्तस्य श्रीः शोभा फलोदयश्रीस्तस्यै तथा । यद्वा-फलोदयाच्छ्रीर्लक्ष्मीः फलोदयश्रीस्तस्यै तथा । दानातिशयः-दानस्य वितरणस्य अतिशय आधिक्यम् दानातिशयः (चेत्) सचेतसि-चेतसा हृदयेन सहितः सचेताः सहृदयस्तस्मिँस्तथा । पुरुषे-जने । किं पुनः-किमु वक्तव्यमित्यर्थः । अचेतनवृक्षस्यापि यत्र फलोदयश्रीनिमित्तं दानातिशयितं किमु वक्तव्यं सचेतसः पुरुषस्येति कैमुतिकन्यायमूलत्वादर्थापत्तिरलङ्कारः । "दण्डापूपिकयाऽन्यर्थागमोऽर्थापत्तिरिष्यते" इति तल्लक्षणं साहित्यदर्पणे ॥१०९॥

( पाठान्तरम् )

**अलिस्रजा कुड्मलमुच्चशेखरं, श्रिया जयच्चर्ममणिं नृणां मणिः ।**
**दधार धाराधरधारणे रणे, क्षमं गुरु द्वादशयोजनप्रमम् ॥१०९॥**

अन्वयः---*नृणाम्, मणिः, अलिश्रिया, उच्चशेखरम्, कुड्मलम्, श्रिया, च, मणिम्, जयत्, धाराधरधारणे, रणे, क्षमम्, गुरु, द्वादशयोजनप्रमम्, चर्म, दधार ॥१०९॥*

वृत्तिः—नृणाम्-जनानाम् मध्ये इति शेषः । मणिः-रत्नम् । मनुष्यश्रेष्ठ इति यावत् । "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" इत्यत्र मेदिनीकोशे रत्नपर्यायवाचकानामपि "विद्वन्मणिः" इत्यादिप्रयोगदर्शनात् स्वजातिश्रेष्ठत्ववाचकत्वमङ्गीकरणीयम्, षष्ठ्या निर्धारणार्थकत्वात् समासाभावः । अलिस्रजा-भ्रमरपङ्क्त्या । उच्चशेखरम्-उन्नताग्रम् । कुड्मलम्-मुकुलम् । मणिम्-रत्नम् । कुड्मलरूपं मणिमिति व्यस्तरूपकमलङ्कारः । श्रिया-शोभया । जयत्-अधरीकुर्वत् । धाराधरधारणे-धारायाः निशिताग्रभागस्य धरो धारको धाराधरः कृपाणः खड्ग इति यावत्, तस्य धारणं यस्मिन् स धाराधरधारणस्तस्मिँस्तथा । रणे-युद्धे । क्षमम्-समर्थम् । गुरु-महत् । द्वादशयोजनप्रमम्-द्वादशयोजनप्रमाणम् विस्तृतं तद्द्वादशयोजनप्रमितं भवतीति भावः । चर्म-तदभिधं रत्नम् । दधार-धृतवान् ॥

**वनं घनच्छायमिहाग्रतोऽग्रहीद्, निपीय चाम्पेयमधीरया धिया ।**
**मणिः पुरोधा अवरोधसङ्गतं, स्वकान्तकान्तागमनात् स्मरं गतः॥११०॥**

अन्वयः---*इह, अधीरया, धिया, चाम्पेयम्, निपीय, अग्रतः, घनच्छायम्, वनम्, अग्रहीत्, मणिः, पुरोधाः, स्वकान्तकान्तागमनात्, अवरोधसंगतम्, स्मरम्, गतः ॥११०॥*

**वृत्तिः**—इह–अत्र । **अधीरया**–धैर्य्यरहितया । **धिया**–बुद्धया । **चाम्पेयम्**–चम्पकम् । **निपीय**–सादरमवलोक्य । **अग्रतः**–पुरतः । **घनच्छायम्**–घना सान्द्रा छाया आतपाभावो यत्र तत्र घनच्छायम् । **वनम्**–काननम् । **अग्रहीत्**–गृहीतवान्, समाश्रयदिति यावत् । **मणिः**–मणिस्वरूपः । तेजसा देदीप्यमान इति यावत् । **पुरोधाः**–पुरोऽग्रतो धीयते स्थाप्यते इति पुरोधाः परोहितः । **स्वकान्तकान्तागमनात्**–कान्ता प्रिया चासौ कान्ता रमणी कान्तकान्ता स्वस्य कान्तकान्ता तस्या आगमनम् स्वकान्तकान्तागमनम् तस्मात्तथा । **अवरोधसङ्गतम्**–अवरोधस्य अन्तःपुरस्य सङ्गतः सम्बन्धी अवरोधसङ्गतस्तं तथा, अन्तःपुरविषयकमित्यर्थः । **स्मरम्**–स्मरणम् । **गतः**–प्राप्तः ॥११०॥

**अखण्डदण्डं महसाऽभिपिण्डितं, सुवर्णवर्णांशुककेतुमण्डितम् ।**
**स धूमकेतुं विपदे वियोगिना–मजीगणद् नाशयितुं गणं द्विषाम् ॥१११॥**

*अन्वय—सः, महसा, अभिपिण्डितम्, सुवर्णवर्णांशुककेतुमण्डितम्, वियोगिनाम् विपदे, धूमकेतुम्, अखण्डदण्डम्, द्विषाम्, गणम्, विनाशयितुम्, अजीगणत् ॥१११॥*

**वृत्तिः**—सः–चक्रवर्तित्वेन प्रसिद्धो भगवान् शान्तिनाथः । **महसा**–तेजसा । **अभिपिण्डितम्**–सम्मिलितम् । **सुवर्णवर्णांशुककेतुमण्डितम्**–सुवर्णवर्णं काञ्चनाभञ्च तदंशुकम् वस्त्रम् सुवर्णवर्णांशुकम् तदेव केतुः पताका तेन मण्डितो भूषितः, सुवर्णवर्णांशुककेतुमण्डितस्तं तथा । **वियोगिनाम्**–विप्रयुक्तानाम्, प्रियतमाविरहितानामिति यावत् । **विपदे**–विपत्तये । विपत्तिदानार्थमिति यावत् । **धूमकेतुम्**–उत्पातविशेषरूपमिवेति यावत् । **अखण्डदण्डम्**–अखण्डः सम्पूर्णश्चासौ दण्डः तदाख्यं रत्नम् अखण्डदण्डस्तन्तथा । **द्विषाम्**–द्विषन्त्यप्रीतयन्तीति द्विषः, शत्रवस्तेषां तथा । **गणम्**–व्यूहम्, समूहमिति यावत् । **विनाशयितुम्**–समुन्मूलयितुम् । **अजीगणत्**–समख्यात्, अगणयदिति यावत् ॥१११॥

**ह्रदः पयोधेः स गभीरताभृतः, समुच्छलत्स्वच्छमहामहोमणिम् ।**
**स्वतेजसां बीजमिव द्युतिं नय–दुदीतमातङ्कितवानशङ्कत ॥११२॥**

*अन्वयः—सः, गभीरताभृतः, ह्रदः, पयोधेः, समुच्छलत्स्वच्छमहामहोमणिम्, द्युतिम्, नयत्, उदीतम्, स्वतेजसाम्, बीजम्, इव, आतङ्कितवान्, ( सन् ) अशङ्कत ॥११२॥*

**वृत्तिः**—सः–प्रसिद्धः भगवान् शान्तिनाथः । **गभीरताभृतः**–गभीरतां गाम्भीर्य्यं, बिभर्ति-धारयतीति गभीरताभृत् तस्मात्तथा । **ह्रदः**–ह्रदयात्मकात् । **पयोधेः**–पयांसि जलानि, धीयन्तेऽस्मि-

न्निति पयोधिः समुद्रस्तस्मात्तथा । "व्याप्यदाधारे" ५।३।८८ इत्यनेन किः' प्रत्ययः । **समुच्छलत्स्वच्छमहामहोमणिम्**–महसा-तेजसा युक्तो मणीरत्नम् महोमणिः, स्वच्छो-निर्मलो, महान् विशालश्चासौ महोमणिः, स्वच्छमहामहोमणिः, समुच्छलन्-निर्गच्छँश्चासौ स्वच्छमहामहोमणिः, तं तथा । **द्युतिम्**–प्रकाशम्, दीप्तिमिति यावत् । **नयत्**–प्रापयत् । **उदीतम्**–प्राप्तोदयम् । **स्वतेजसाम्**–निजप्रतापानाम् । **बीजम्**–निदानम् । **इव**–यथा । **आतङ्कितवान्**–चकितः । (सन्) **अशङ्कत**–शङ्कितवान् ॥ ११२ ॥

**गलत्परागं भ्रमिभङ्गिभिः पत–द्धृतालिदूरीकरणेऽब्जमावहन् ।**
**स काकिणीरत्नसयत्नपाणिना, रराज राजन्यजयी कृपाणिना ॥११३॥**

अन्वयः—*भ्रमिभङ्गिभिः, पतद्धृतालिदूरीकरणे, गलत्परागम्, अब्जम्, आवहन्, राजन्यजयी, सः, कृपाणिना, काकिणीरत्नसयत्नपाणिना, रराज ॥ ११३ ॥*

वृत्तिः—**भ्रमिभङ्गिभिः**–भ्रमणरचनाविशेषैः । **पतद्धृतालिदूरीकरणे**–पतन्तो वृक्षादागच्छन्तो धृताश्च तेऽलयो भ्रमराः पतद्धृतालयस्तेषां दूरीकरणमपनयनम्, पतद्धृतालिदूरीकरणम् तस्मिँस्तथा सतीति शेषः । **गलत्परागम्**–गलन्तो भ्रश्यन्तः परागाः पुष्परजांसि यस्मात्तद्गलत्परागम्, तत्तथा । **अब्जम्**–अप्सु जलेषु जायते इत्यब्जम् कमलम् तत्तथा । **आवहन्**–धारयन् । **राजन्यजयी**–राजन्यान् क्षत्रियान् जयति तच्छीलो राजन्यजयी । "अजातेः शीले" ५।१।१५४ । इत्यनेन तच्छीले 'णिन्' प्रत्ययः । **सः**–चक्रित्वेन प्रसिद्धो भगवान् शान्तिनाथः । **कृपाणिना**–कृपाणः खड्गोऽस्त्यस्मिन्निति कृपाणी तेन तथा । **काकिणीरत्नसयत्नपाणिना**–काकिणीरत्ने तदाख्यमणौ सयत्नः सप्रयासः काकिणीरत्नसयत्नः स चासौ पाणिर्हस्तः काकिणीरत्नसयत्नपाणिस्तेन तथा । **रराज**–शुशुभे ॥ ११३ ॥

**नृपेण चक्रे ह्यवनीवना पुरं, प्रसक्तभृङ्गावलिनागकेसरम् ।**
**व्यधायि तस्मिन्नभिषेचनान्नृपै – र्महोत्सवो द्वादशवार्षिकोऽन्वहम् ॥११४॥**

अन्वयः—*नृपेण, अवनीवनी, प्रसक्तभृङ्गावलिनागकेसरम्, पुरम्, चक्रे, तस्मिन्, नृपैः, अभिषेचनात्, अन्वहम्, द्वादशवार्षिकः, महोत्सवः, व्यधायि ॥११४॥*

वृत्तिः—**नृपेण**–राज्ञा, भगवता शान्तिनाथेन । **अवनीवनी**–अवन्यां भूमौ वनी वनराजी अवनीवनी । **प्रसक्तभृङ्गावलिनागकेसरम्**–भृङ्गावलिभिर्भ्रमरराजिभिर्विलसितानि भृङ्गावलिविल-

सितानि, तादृशानि नागकेसराणि यत्र तत्तथा, शाकपार्थिवादेराकृतगणत्वान्मध्यमपदलोपिबहुव्रीहिसमासः। पुरम्—नगरम्। चक्रे—विरचे; कृतमिति यावत्। तस्मिन्—तत्र, नगरे। नृपैः—अधिकृतै राजिभिः। अभिषेचनात्—राज्याभिषेकविधानात्। भगवतः शान्तिनाथस्येतिशेषः। अन्वहम्—प्रत्यहम्। द्वादशवार्षिकः—द्वादशवर्षात्मककालव्यापकः। महोत्सवः—महानतिशयितश्चासावुत्सवो महः, उद्धव इति यावत्, महोत्सवः। व्यधायि—अकारि ॥ ११४॥

जने वधूनां लसदञ्जने दृशि, परस्परेणाभिनये तदुत्सवे।
स मारनाराचनिघर्षणस्खल-त्कृतारणैराभरणैरमन्यत ॥११५॥

*अन्वयः— तदुत्सवे, परस्परेण, अभिनये, लसदञ्जने, दृशि, वधूनाम्, जने, मारनाराचनिघर्षणस्खलत्कृतारणैः, आभरणैः, सः, अमन्यत ॥११५॥*

वृत्तिः—तदुत्सवे—स द्वादशवार्षिकश्चासावुत्सवो महः, तदुत्सवस्तस्मिँस्तथा। परस्परेण—अन्योन्येन। कृते इति शेषः। अभिनये—रूपके। लसदञ्जने—लसद्विलसच्छोभामानमिति यावदञ्जनं-कज्जलं नेत्रघटकतया यस्य सलसदञ्जनस्तस्मिँस्तथा। दृशि—वीक्षके। जने—लोके, यद्वा—दृशि, लसदञ्जने, वधूनां जने, इत्यवमन्येयम्, दृशोत्यत्र सप्तम्यर्थोऽवच्छिन्नत्वम्, एवञ्च दृशोत्यस्य दृगवच्छेदेनेत्यर्थः, शेषं पूर्ववत्। मारनाराचनिघर्षणस्खलत्कृतारणैः—मारस्य-कामस्य, नाराचा बाणशल्यानि, मारनाराचाः तेषां निघर्षणम्, मारनाराचनिघर्षणम् तस्मात् स्खलन्तः भ्रश्यन्तः कृता विहिताश्च आरणाः सर्वतोभावेन शब्दा येषु तानि, मारनाराचनिघर्षणस्खलत्कृतारणानि तैस्तथा। आभरणैः—आभ्रियन्ते सम्भूष्यन्तेऽङ्गान्येभिरित्याभरणानि अलंकाराः तैस्तथा। उपलक्षित इति शेषः। सः—प्रसिद्धो भगवान् शान्तिनाथ इति यावत्। अमन्यत—अवाबुध्यत ॥ ११५॥

न वीतरागस्य रतौ नवाऽरता—वनामनस्यं मन एव तज्जनः।
अवीतरागस्य तु वीतरागता—ज्वलत्कणं शाणमिव व्यलोकयत् ॥११६॥

*अन्वयः—जनः, वीतरागस्य, रतौ, न, ( विद्यमानम् ) वा, अरतौ न, ( विद्यमानम् ) तत्, एव, अनामनस्यम्, तु, अवीतरागस्य, वीतरागताज्वलत्कणम्, शाणम्, इव, मनः, व्यलोकयत् ॥ ११६ ॥*

वृत्तिः—जनः—नागरिको लोकः। वीतरागस्य—वीतो विशेषेण-इतो-गतो, रागः-अनुरागः, द्वेषो वा, तत्समुच्चयश्च यस्मात् स वीतरागस्तस्य तथा। रतौ—अनुरागे। न—नहि। (विद्यमानमिति-

शेषः) वा-अथवा । अरतौ-अननुरागे, द्वेषे इति यावत् । रागावच्छिन्नद्वेषावच्छिन्नत्वविरहितमिति यावत् । तत्-तस्माद्धेतोः । एव-अवधारणार्थकमव्ययम् । अनामनस्यम्-न आमनस्यं दुःखं यत्र तदनामनस्यम् । तु-पुनः । अवीतरागस्य-वीतरागशब्दः पूर्वार्थः, न-वीतरागोऽवीतरागस्तस्य तथा । वीतरागताज्वलत्कणम्-वीतरागो-रागाभाववान्, तस्य भावा वीतरागताः रागाभावा इत्यर्थः वीतरागताः रागाभावरूपा, ज्वलत्कणा देदीप्यमानस्फुलिङ्गा यस्मात् सः वीतरागताज्वलत्कणस्तन्तथा । शाणम्-निकषम् । इव-यथा । मनः-अन्तःकरणम् । व्यलोकयत्-अपश्यत्, अजानादिति यावत् ॥ ११६ ॥

( पाठान्तरम् )

कृपालयं पालयतोऽर्हदीशितु—रवामनं वा मननेन तन्मनः ।
जगत्परं पौरजने जगद्भुजि-ज्वलत्कणं शाणमिव व्यलोकयत् ॥११६॥

*अन्वयः—पौरजनः, जगत्, पालयतः, अर्हदीशितुः, कृपालयम्, वा, मननेन, अवामनम्, तत्, परम्, मनः, जगद्भुजिज्वलत्कणम्, शाणम्, इव, व्यलोकयत् ॥११६॥*

वृत्तिः—पौरजनः-नागरिकलोकः । जगत्-भुवनम् । पालयतः-रक्षतः । अर्हदीशितुः-अर्हन्-तीर्थकृच्चासावीशिता प्रभुर्नायक इति यावदर्हदीशिता, तस्य तथा । कृपालयम्-दयानिलयम् । वा-समुच्चये । मननेन-ज्ञानेन । अवामनम्-अखर्वम् । पटुतरमिति यावत् । परम्-विशिष्टम्, श्रेष्ठमिति यावत् । मनः-हृदयम् । जगद्भुजिज्वलत्कणम्-जगतो जगल्लोकस्य भुजिर्भोजनम् बहुभोजनम्, तत्र ज्वलन्तः कणाः स्फुलिङ्गा यस्मिन् सज्ज्वलद्भुजिज्वलत्कणस्तं तथा । शाणम्-सशब्दम् । इव-यथा । व्यलोकयत्-अपश्यत् । अजानादितियावत् ॥११६॥

गच्छाधीश्वरहीरहीरविजयाम्नाये निकाये धियां,
भृत्यः श्रीविजयप्रभाख्यसुगुरोः श्रीमत्तपाख्ये गणे ।
शिष्यः प्राज्ञमणेः कृपादिविजय-स्याशास्यमानाग्रणी—
श्चक्रे वाचकनाममेघविजयः शस्यां समस्यामिमाम् ॥११७॥

( व्याख्यातपूर्वोऽयं श्लोकः । )

इति वाचकप्रवरश्रीमेघविजयजिद्गणिराजविरचिते श्रीनैषधीयमहाकाव्यप्रथमसर्गपादपूर्तिस्वरूपे श्रीशान्तिनाथचरित्रे शासनसम्राट्सूरिचक्रचक्रवर्तितपागच्छाधिपतिभट्टाचार्यमहाराजाधिराज-श्रीविजयनेमिसूरीश्वरमहाराजपट्टालङ्कारशास्त्रविशारदकविरत्नपीयूषपाणिपूज्यपादाचार्य महाराज-श्रीविजयामृतसूरीश्वरविरचितः विद्वद्विनोदिनीनामवृत्तिविभूषिते-

## ॥ तृतीयः सर्गः समाप्तः ॥

卐

## ॥ ❀ ॥ अथ चतुर्थः सर्गः ॥ ❀ ॥

**तदङ्गमुद्दीश्य सुगन्धिपातुका, महौषधिप्राप्तरसा रसाधिकाः ।**
**अपः प्रपद्याम्बुनिधेरधैर्य्यता-ऽजनिष्ट मृष्टान्यपयोनिधेर्भिया ॥१॥**

*अन्वयः—तदङ्गम्, उद्दीश्य, सुगन्धिपातुकाः, महौषधिप्राप्तरसाः, रसाधिकाः, अपः, प्रपद्य, मृष्टान्यपयोनिधेः, भिया, अम्बुनिधेः, अधैर्य्यता, अजनिष्ट ॥१॥*

**वृत्तिः**—**तदङ्गम्**-तस्य भगवतः शान्तिनाथस्य अङ्गम् शरीरम् तदवयवत्वोपाधिविशिष्टं वा तदङ्गम् । **उद्दीश्य**-लक्ष्यीकृत्य । **सुगन्धिपातुकाः**-शोभनो गन्धो यस्य स सुगन्धिः, शोभनगन्धवद्द्रव्यम्, पातयन्ति निक्षिपन्तीति पातुकाः । तस्य पातुकाः सुगन्धिपातुकाः । **महौषधिप्राप्तरसाः**-महत्यश्च ताः औषधय फलपाकावसानिका इति यावत् महौषधयस्ताभिः प्राप्तोऽधिगतो रस आस्वादो याभिस्ता महौषधिप्राप्तरसास्तास्तथा । **रसाधिकाः**-रसैः मधुराम्ललवणकटुकाषायादिभिरधिका रसाधिकाः, रसैः कृत्वा आधिक्यमुपगता इति भावः । **अपः**-जलानि । **प्रपद्य**-समधिगत्य । **मृष्टान्यपयोनिधेः**-अन्योऽपरश्चासौ पयोनिधिः समुद्रोऽन्यपयोनिधिः मृष्टः शुद्धश्चासावन्यपयोनिधिर्मृष्टान्यपयोनिधिस्तस्मात्तथा । **भिया**-भयेन । **अम्बुनिधेः**-अम्बूनि जलानि निधीयन्तेऽस्मिन्निति अम्बुनिधिः समुद्रस्तस्य तथा "न्याप्यादाधारे" ५ । ३ । ८८ ॥ इत्यनेन आधारे 'कि' प्रत्ययः । **अधैर्य्यता**-धीरो धैर्य्यान्वितस्तस्य भावो धैर्य्यम्, न धैर्यं यस्य सोऽधैर्य्यस्तस्य भावोऽधैर्य्यता, धैर्य्याभाव इत्यर्थः । **अजनिष्ट**-समजायत, समुदपद्यतेति यावत् । समुद्रस्य भयसम्बन्धाभावेऽपि तत्सम्बन्धोक्तेरसम्बन्धे सम्बन्धरूपाऽतिशयोक्तिरलङ्कारः "भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्य्ययः" इति साहित्यदर्पणः ॥१॥

**कृतेऽभिषेके नृपरूपभाद्दशः, शिलीमुखालीः कुसुमाद् गुणस्पृशः ।**
**स्त्रियः समुद्दिश्य मनोभवोऽमुचत्, समं रसावेशवशां दशां गताः ॥२॥**

**अन्वयः**—अभिषेके, कृते, (सति) मनोभवः, नृपरूपभाद्दशः, समम्, रसावेशवशाम्, दशाम्, गताः, स्त्रियः, समुद्दिश्य, कुसुमात्, गुणस्पृशः, शिलीमुखालीः, अमुचत् ॥२॥

वृत्तिः—अभिषेके–राज्याभिषेके । कृते–विहिते । सतीति शेषः । मनोभवः–कन्दर्पः । नृपरूपभादृशः–नृपस्य भगवतो राज्ञः शान्तिनाथस्य रूपभे सौन्दर्यकान्ती नृपरूपभे ते पश्यन्तीति; नृपरूपभादृशस्तास्तथा । रूपशब्दापेक्षया भाशब्दस्याल्पाक्षरत्वेऽपि अभ्यर्हितत्वात् रूपशब्दस्यैव पूर्वनिपातः । समाम्–निखिलाम् । रसावेशवशाम्–शृङ्गारादिरसातिरेकाधीनाम् इत्यर्थः । दशाम्–अवस्थाम् । गताः–आप्ताः । स्त्रियः–नितम्बिनीः, रमणीरिति यावत् । समुद्दीश्य–लक्ष्यीकृत्य । कुसुमात्–पुष्पत्वजात्यवच्छिन्नात् । कुसुमलक्षणाद्धनुषः सकाशादिति यावत् । गुणस्पृशः–मौर्वीस्पृशः । शिलीमुखालीः–बाणालीः, भ्रमररूपबाणसमूहानिति यावत् । अमुचत्–अत्यजत् ॥२॥

**कुतूहलेऽस्मिन् जनराजिसङ्कुले, मिलच्चलाक्षीजनलक्षवीक्षणात् ।**
**स्वचापदुर्निर्गतमार्गणभ्रमाद्, न कस्य हास्याय भटा विलक्षिताः ॥३॥**

अन्वयः—*जनराजिसङ्कुले, अस्मिन्, कुतूहले, मिलच्चलाक्षीजनलक्षवीक्षणात्, स्वचापदुर्निर्गतमार्गणभ्रमात्, भटाः, कस्य, हास्याय, न, विलक्षिताः* ॥३॥

वृत्तिः—जनराजिसङ्कुले–जनानां लोकानां राजिः श्रेणी, समुदय इति यावत्, जनराजिः, तया सङ्कुलम् व्याप्तम्, जनराजिसङ्कुलम् तस्मिँस्तथा । अस्मिन्–दिग्विजयप्रयुक्तद्वादशवार्षिकोत्सवाभिषेकयोः सम्बन्धिनीत्यर्थः । कुतूहले–कौतूहले । मिलच्चलाक्षीजनलक्षवीक्षणात्–चले चञ्चले अक्षिणी नयने यासां ताश्चलाक्ष्यस्ता एव जनो लोकश्चलाक्षीजनः, तस्य लक्षम् चलाक्षीजनलक्षम्, मिलत् संगच्छमानत् च तत्–चलाक्षीजनलक्षम् मिलच्चलाक्षीजनलक्षम् तस्य वीक्षणम् अवलोकनम् मिलच्चलाक्षीजनलक्षवीक्षणम्, तस्मात्तथा । स्वचापदुर्निर्गतमार्गणभ्रमात्–स्वचापात् निजधनुषः दुर्निर्गताः निःसृताः स्वचापदुर्निर्गताः । ते च ते मार्गणा बाणाः, स्वचापदुर्निर्गतमार्गणास्तेषां भ्रमो भ्रान्तिः, स्वचापदुर्निर्गतमार्गणभ्रमस्तस्मात्तथा । भटाः–योधाः, वीराः इति यावत् । कस्य–किमात्मकस्य जनस्येत्यर्थः । हास्याय–हास्यहेतवे । न–नहि । विलक्षिताः–दृष्टाः । अपि तु सर्वस्यापीत्यर्थः । "दुर्निर्गतो हि बाणे ध्वनति लक्ष्यं च न स्पृशति तेन, धानुष्को लज्जते इति लोकस्वभावोक्त्या स्वभावोक्तिरलङ्कारः । स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्" इति काव्यप्रकाशकारो मम्मटः ॥ ३ ॥

**सुराङ्गनाः स्वामिगुणाङ्कनाटने, स्वरागभागात् कृतशूरपूरणे ।**
**निजप्रियां मौनरुचिं रतिं स्मरन्, स्मरः स्वनन्तीरवलोक्य लज्जितः ॥४॥**

अन्वयः—*कृतशूरपूरणे, (सति) स्वरागभागात्, स्वामिगुणाङ्कनाटने, स्वनन्तीः, सुराङ्गनाः,*

*अवलोक्य, मौनरुचिम्, निजप्रियाम्, रतिम्, स्मरन्, स्मरः, लज्जितः ॥४॥*

**वृत्तिः—कृतशूरपूरणे**—कृतं विहितं शूरैर्भटैः पूरणं येन, अथवा कृतं शूराणां वीराणां पूरणमभिलाषस्य येन स कृतपूरणस्तस्मिँस्तथा, सतीति शेषः। **स्वरागभागात्**—स्वस्य आत्मनो रागोऽनुरागः स्वरागस्तस्य भागोंऽशः स्वरागभागस्तस्मात्तथा। **स्वामिगुणाङ्गनाटने**—स्वामिनः प्रभोः श्रीशान्तिनाथस्य गुणा दयादाक्षिण्यपरोपकारित्वत्यागशौर्यादयः स्वामिगुणास्तेषामङ्गम् प्रतीकः स्वामिगुणाङ्गम् तस्य नाटनम् अभिनयनादि स्वामिगुणाङ्गनाटनम् तस्मिँस्तथा। **स्वनन्तीः**—शब्दायमानाः। **सुराङ्गना**—सुराणां देवानामङ्गनाः प्रशस्ताङ्गवत्यः कामिन्यः सुराङ्गनास्तास्तथा। **अवलोक्य**—प्रेक्ष्य, दृष्ट्वेति यावत्। **मौनरुचिम्**—मौनेऽभाषणे रुचिरभिलाषो यस्याः सा मौनरुचिस्तान्तथा। **निजप्रियाम्**—निजा स्वीया चासौ प्रिया वल्लभा निजप्रिया तान्तथा। **रतिम्**—तदाख्यद्वितीयाम्। **स्मरन्**—चिन्तयन्। **स्मरः**—कन्दर्पः। **लज्जितः**—लज्जा-त्रपा सञ्जाता अस्येति लज्जितः। तारकादित्वादितः प्रत्ययः। अभूदिति शेषः ॥४॥

**मरुल्ललत्पल्लवकण्टकैः क्षतं, वनेषु पात्रं न पुनर्जनेषु तत्।**
**जिने दिनेशेऽभ्युदितेऽवरोधनं, वधूजनेष्वेव न पूर्जने मनाक् ॥५॥**

अन्वयः—*वनेषु, पात्रम्, मरुल्ललत्पल्लवकण्टकैः, क्षतम्, पुनः, जनेषु, तत्, न, दिनेशे, जिने, अभ्युदिते, अवरोधनम्, वधूजनेषु, एव, पूर्जने, मनाक्, न ॥५॥*

**वृत्तिः—वनेषु**—काननेषु। एवेति शेषः। **पात्रम्**—पर्णम्, वृक्षसम्बन्धीतिशेषः। 'पात्रं तु कूलयोर्मध्ये, पर्णे नृपतिमन्त्रिणि। योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्तरि' इत्यनेकार्थः। **मरुल्ललत्पल्लवकण्टकैः**—मरुता वायुना ललन्तो विलसन्तो ये पल्लवाः शाखाग्राणि मरुल्ललत्पल्लवास्तेषां कण्टकानि द्रुमाङ्गानि, मरुल्ललत्पल्लवकण्टकानि तैः क्षतम, मरुल्ललत्पल्लवकण्टकक्षतम्। **पुनः**—किन्तु। **जनेषु**—लोकेषु। प्रजास्विति यावत्। **तत्**—पात्रम्। योग्यजन इति यावत्। **न**—नहि। क्षतमिति शेषः। **दिनेशे**—सूर्ये। **जिने**—अर्हति भगवति शान्तिनाथ इति यावत्। दिनेशरूपे जिने इति जिने दिनेशत्वारोपणाद्रूपकमलङ्कारः। **अभ्युदिते**—समुन्नते। सतीति शेषः। "तद्रूपकमभेदो य उपमानोपमेययोः" इति काव्यप्रकाशकारो मम्मटः। **अवरोधनम्**—अवरोधः, स्वैरनिर्गमनप्रतिरोध इति यावत्। **वधूजनेषु**—रमणीलोकेषु। **एव**—अवधारणार्थकमव्ययम्। **पूर्जने**—पुरो नगरस्य जनो लोकः पूर्जनस्तस्मिँस्तथा। **मनाक्**—ईषत् अपीति शेषः। अवरोध इति च शेषः। **न**—नहि। परिसङ्ख्यालङ्कारः ॥५॥

**जिनेऽभिषिक्तेऽनुपदं तदञ्चने, समुच्चरच्चन्दनसारसौरभम् ।**
**वनं बभूवाऽऽगतदृग्गुणप्रम – सहस्रदेशेशकृतैर्महोत्सवैः ॥६॥**

*अन्वयः—जिने, अभिषिक्ते, ( सति ) आगतदृग्गुणप्रमसहस्रदेशेशकृतैः, महोत्सवैः, तदञ्चने, वनम्, अनुपदम्, समुच्चरच्चन्दनसारसौरभम्, बभूव ॥ ६ ॥*

वृत्तिः—जिने-अर्हति, तीर्थंकरे भगवति शान्तिनाथे इति यावत् । **अभिषिक्ते**-राजत्वसम्पादनजननाभिषेकमधिगते सतीत्यर्थः । **आगतदृग्गुणप्रमसहस्रदेशेशकृतैः**- "दृक्शब्देन द्वयम्, गुणशब्देन त्रयम्, अङ्कानां वामतो गतिः" इति कविसम्प्रादायत् समुपागतद्वात्रिंशत्सहस्रराजसम्पादितैरित्यर्थः । **महोत्सवैः**— महान्तोऽतिशयिताश्च त उत्सवा महांसि उद्धर्षा इति यावत् महोत्सवास्तैस्तथा । **तदञ्चने**-तस्य भगवतः शान्तिनाथस्य अञ्चनम् पूजनम्, तदञ्चनम् तस्मिँस्तथा । सतीति शेषः । **वनम्**-उद्यानकाननम् । **अनुपदम्**-त्वरितमेवेत्यर्थः । **समुच्चरच्चन्दनसारसौरभम्**-समुच्चरत् समुद्गच्छच्चन्दनवत् पटीरवत् सारं श्रेष्ठं सौरभं यस्मादिति वा तथा । सारशब्देन घनसारः कर्पूरो लक्षणया, श्रीखण्डयुक्तः सार इति वा । **बभूव**-अभवत् ॥ ६ ॥

**विशुद्धमुक्ताभरणाद् गुणान्वितं, सदोन्नतं काममलीनताश्रयम् ।**
**स वारनारीकुचसञ्चितोपमं, शमेन मेने प्रभुतापदं प्रभुः ॥ ७ ॥**

*अन्वयः—सः, प्रभुः, विशुद्धमुक्ताभरणात्, गुणान्वितम्, सदोन्नतम्, काममलीनताश्रयम्, वारनारीकुचसञ्चितोपमम्, प्रभुतापदम्, शमेन, मेने ॥ ७ ॥*

वृत्तिः—**सः**-त्रिभुवनप्रसिद्धः । **प्रभुः**-स्वामी, ईशितेत्यर्थः । **विशुद्धमुक्ताभरणात्**-विशुद्धाऽतिनिर्मलाश्च ता मुक्ता मौक्तिकानि विशुद्धमुक्ताः, तासामाभरणम्, अलङ्कारो, विशुद्धमुक्ताभरणम् तस्मात्तथा । **गुणान्वितम्**-गुणैः त्यागसत्त्वशौर्य्यादिभिरन्वितम् सम्बद्धम्, गुणान्वितम् । **सदोन्नतम्**-सदा सर्वदा उन्नतमुच्छ्रितम् सदोन्नतम् 'साहङ्कारमिति यावत् । **काममलीनताश्रयम्**-कामेन कन्दर्पेण, मलीनताश्रयम्-मालिन्यास्पदम् । चुचुके श्यामत्वात् पक्षे-कामः-स्मरः, लोभो वा, तस्य मलीनताश्रयम् । यद्वा कामम् अत्यर्थम्-अलीनताश्रयम् क्वापि न लीनम् चञ्चलमिति यावत् । **वारनारीकुचसञ्चितोपमम्**-वारनारी वेश्या, तस्याः कुचौ स्तनौ वारनारीकुचौ ताभ्यां सञ्चिताऽर्जिता उपमा सादृश्यं येन तत्तथा । **प्रभुतापदम्**-प्रभुतायाः स्वामितायाः पदमास्पदम् प्रभुतास्पदम् तत्तथा । **शमेन**-शान्त्या । **मेने**-अवबुबोधे ॥ ७ ॥

यतः प्रिया सानुमतिक्रियोचिता, धृताऽमुना पीतरसानुगामिनी ।
पुरो निधायेति जनोऽत्र चक्रिणा, ददर्श मालूरफलं पचेलिमम् ॥ ८ ॥

अन्वयः—*अमुना, चक्रिणा, पुरः, निधाय, यतः, सानुमति, उचिता, पीतरसानुगामिनी, प्रिया, क्रिया, धृता, इति, जनः, अत्र, पचेलिमम्, मालूरफलम्, ददर्श ॥ ८ ॥*

**वृत्तिः**—अमुना–विप्रकृष्टेन । चक्रिणा–चक्रवर्तिना, सार्वभौमेनेत्यर्थः । पुरे–अग्रे । निधाय–संस्थाप्य । यतः–यस्मात्, मालूरफलादिति यावत् । सानुमति–सानुः प्रस्थोऽस्त्यस्येति सानुमान् पर्वतस्तस्मिँस्तथा 'स्नुः प्रस्थः सानुरस्त्रिया' मित्यमरः । उचिता–योग्या। पीतरसानुगामिनी–पीत आस्वादितश्चासौ रसः पीतरसस्तमनुगमयति तच्छीला पीतरसानुगामिनी । प्रिया–हृद्या । क्रिया–क्रीडादिः । धृता–अवलम्बिता, आश्रितेति यावत् । 'पक्षे'–नु–वितर्के । सा–प्रसिद्धा । उचिता, मतिक्रिया–बुद्धिकार्यम् । राज्ञां वर्धन-विदायनादिः धृतेति; यद्वा प्रिया–भैमी सानुमतिक्रिया–अनुमतिक्रियया सहिता, पीतरसा–अनुभूतरसा, अनुगामिनी–(सार्थे) धृतेत्यादिक-मनुसन्धेयम् । इति–एवंप्रकारेण विचार्य्य । जनः–लोकः । अत्र–राजधान्याम् । पचेलिमम्–पक्वम् । मालूरफलम्–बिल्वफलम् । ददर्श–दृष्टवान्, अपश्यदिति यावत् ॥ ८ ॥

युवद्वयीचित्तनिमज्जनोचितं, स्थलं बभूवोत्सवतः सरःसमम् ।
समुच्छलत्तुङ्गतरङ्गवीचिभि-र्मरुत्प्रयुक्ताम्बुकणाभमौक्तिकैः ॥ ९ ॥

अन्वयः—*उत्सवतः, स्थलम्, मरुत्प्रयुक्ताम्बुकणाभमौक्तिकैः, समुच्छलत्तुङ्गतरङ्गवीचिभिः, सरःसमम्, युवद्वयीचित्तनिमज्जनोचितम्, बभूव ॥ ९ ॥*

**वृत्तिः**—उत्सवतः–महसः, पूर्ववर्णितद्वादशवार्षिकोत्सवादित्यर्थः । स्थलम्–राजधानीरूपं 'स्थानम्' । मरुत्प्रयुक्ताम्बुकणाभमौक्तिकैः–अम्बुनो जलस्य, कणा लेशा, अम्बुकणाः मरुत्प्रयुक्ताः वायुप्रेरिताश्च तेऽम्बुकणा, मरुत्प्रयुक्ताम्बुकणास्तदाभानि तत्सदृशानि, मरुत्प्रयुक्ताम्बुकणाभानि तानि मौक्तिकानि ये मुक्ताफलानि, येषु ते मरुत्प्रयुक्ताम्बुकणाभमौक्तिकाः तैस्तथा । समुच्छलत्तुङ्गतरङ्गवीचिभिः–समुच्छलन्तः सम्यगूर्ध्वं गच्छन्तश्च ते तुङ्गतरङ्गा उन्नतोर्म्मयः समुच्छलत्तुङ्गतरङ्गास्त एव वीचयो मुखानि समुच्छलत्तुङ्गतरङ्गवीचयस्तैस्तथा । सरःसमम्–कासारतुल्यम् । युवद्वयीचित्तनिमज्जनोचितम्–युवा तरुणश्च, युवतिस्तरुणी च युवानौ, तयोर्द्वयी युगली युवद्वयी, स्त्रीपुंसद्वयी तस्याश्चित्तेऽन्तःकरणे युवद्वयीचित्ते तयोर्निमज्जनम् ब्रुडनम्, युवद्वयीचित्तनिमज्जनम् तत्र उचितं योग्यम्

श्रुवद्वयीचित्तनिमज्जनोचितम् । बभूव–अभवत् ॥९॥

**जिनेशभीतस्मरपाणितः पतत्–प्रसूनशून्येतरगर्भगह्वरम् ।**
**वनं तदुच्चैर्भवनं सभावनं, दिशो दशामोदभरैरपूपुषत् ॥१०॥**

अन्वयः—*जिनेशभीतस्मरपाणितः, पतत्प्रसूनशून्येतरगर्भगह्वरम्, उच्चैर्भवनम्, सभावनम्, तत्, वनम्, आमोदभरैः, दश, दिशः, अपूपुषत् ॥१०॥*

वृत्तिः—जिनेशभीतस्मरपाणितः–जिनेशेन भगवता शान्तिनाथेन, भीतः–त्रस्तः प्राप्तसाध्वस इति यावत् । जिनेशभीतः, स चासौ स्मरः कन्दर्पः, जिनेशभीतस्मरस्तस्य पाणिर्हस्तो जिनेशभीतस्मरस्तस्मात्तथा । पतत्प्रसूनशून्येतरगर्भगह्वरम्–पतन्ति अधोदेशसंयोगमाश्रयन्ति च तानि प्रसूनानि पुष्पाणि पतत्प्रसूनानि तैः शून्येतरं पूर्णं गर्भगह्वरं मध्यबिलं यस्य तत्तथा । उच्चैर्भवनम्–उच्चैरुन्नतानि सप्तभौमाष्टभौमानीति यावद्, भवनानि हर्म्याणि यस्मिँस्तत्तथा । सभावनम्–अवति रक्षति इत्यवनम् रक्षकम् नन्द्यादित्वादनः प्रत्ययः, सभायाः समितेर्लोकसमुदयस्येति यावदवनम् सभावनम् । "वर्णसाम्यमनुप्रासश्छेकवृत्तिगतो द्विधा । सोऽनेकस्य सकृत्पूर्वं, एकस्याप्यसकृत् परः" इति मम्मटोपाध्यायकृतानुप्रासलक्षणे अनेकस्य सकृदावृत्तौ सत्यामेव छेकानुप्रासस्य सत्त्वप्रतिपादनादत्र 'वने' ति वर्णद्वयस्य सकृदावृत्तेरभावाच्छेकानुप्रासाभावेऽपि वृत्त्यनुप्रासोऽक्षत एवेति मन्तव्यम् । तत्–प्रसिद्धम् । वनम्–काननम् । आमोदभरैः–सौरभातिशयैः । दश–दशत्वसंख्याविशिष्टाः । दिशः–आशाः, दिशा इति यावत् । अपूपुषत्–अपोषयत् ।

**हरेण वैरे कविना व्यनीयत, सिसृक्षया तद्विजयैषिणाऽङ्गजः ।**
**स्मरेषुधीकृत्य धियाऽभयाधयाः, पदौ प्रभोराश्रय तज्जयश्रियः ॥११॥**

अन्वयः—*स्मर, प्रभोः, पदौ, इषुधीकृत्य, धिया, अभयाधयाः, तज्जयश्रियः, आश्रय, (इति) हरेण, वैरे, (सति) तद्विजयैषिणा, कविना, सिसृक्षया, अङ्गजः, व्यनीयत ॥११॥*

वृत्तिः—स्मर !–स्मरन्त्यनेन जनः प्रियतमानिति स्मरः कामः तदामन्त्रणे हे स्मर ! हे मन्मथ ! (त्वम्) प्रभोः–ईशस्य भगवतः शान्तिनाथस्येति यावत् । पदौ–चरणौ । इषुधीकृत्य–इषवो बाणा धीयन्तेऽनयोरिति इषुधी तुणीरौ, अनीषुधी इषुधी कृत्वा इषुधीकृत्य तुणीरीकृत्येति यावत् । धिया–बुद्धया । अभयाधयाः–अभयमासमन्ताद्धयन्तीत्यभयाधयाः । तज्जयश्रियः–तस्य शङ्करस्य जयश्रियो जयलक्ष्म्यस्तज्जयश्रियस्तास्तथा । आश्रय–समवलम्बस्व, प्राप्नुहीति यावत् । (इति–

इत्येवंप्रकारेण) । हरेण–शङ्करेण । वैरे–विद्वेषे । (सति) तद्विजयैषिणा–तस्य स्मरस्य विजयस्तद्विजयस्तमिच्छत्यभिलषतीति तद्विजयैषी, तेन तथा । "अजातेः शीले" ५।१।१५४।। इत्यनेन तच्छीले 'णिन्' प्रत्ययः । कविना–बुधेन । सिसृक्षया–जगतो निर्माणेच्छयेत्यर्थः । अङ्गजः–अङ्गाच्छरीराज्जायते इत्यङ्गजः कामः, कन्दर्प इति यावत् । व्यनीयत–शिक्षितः, शिक्षां प्रापित इति यावत् ।।११।।

**पुरीव पूर्वापणरत्नबिम्बितं, प्रतीच्यभागस्थितमर्जुनान्वितम् ।**
**वणिग्मणिर्वीक्ष्यहृतार्थशङ्कया, स पाटलायाः स्तवकं प्रकम्पितः ।।१२।।**

*अन्वयः*—*सः, वणिग्मणिः, पुरि, पूर्वापणरत्नबिम्बितम्, इव, अर्जुनान्वितम्, प्रतीच्यभागस्थितम्, पाटलायाः, स्तवकम्, वीक्ष्य, हृतार्थशङ्कया, प्रकम्पितः ।।१२।।*

**वृत्तिः**—सः–प्रसिद्धः कश्चिदनिर्दिष्टनामधेयः । वणिग्मणिः–वणिक्षु नैगमिकेषु मणिः श्रेष्ठः, वणिग्मणिः, वणिक्छ्रेष्ठ इति यावत्, मणिशब्दस्यापि रत्नपर्य्यायतया । पुरि–नगरे । पूर्वापणरत्नबिम्बितम्–पूर्वस्मिन् पूर्वभागे आपणो विपणिः पूर्वापणस्तत्र रत्नानि मणयः पूर्वापणरत्नानि तैर्बिम्बितं प्रतिबिम्बितम्, पूर्वापणरत्नबिम्बितम् । इव–यथा । अर्जुनान्वितम्–अर्जुनाख्यतृणसंवलितम् । प्रतीच्यभागस्थितम्–पश्चिमदिगवस्थितम् । पाटलायाः–पाटयति दौर्गन्ध्यं स्वीयसौरभेणेति पाटला "मृदिकन्दि" (उणा०) ४६५ । इत्यलः प्रत्ययः । तस्यास्तथा पाटलेत्यर्थः । 'पाटलिः पाटला' इत्यभि० चि० । स्तवकम्–गुच्छम् । वीक्ष्य–समवलोक्य । प्रकम्पितः–चकितः ।।१२।।

**मुनिद्रुमः कोरकितः सितद्युति–स्तदुत्सवेऽभ्यागतकामिनीमुखैः ।**
**स्फुरद्विभूषाङ्गमयूखसंमुखै – र्वनेऽपि मेने सुमनोभिरन्वहम् ।।१३।।**

*अन्वयः*—*सुमनोभिः, स्फुरद्विभूषाङ्गमयूखसम्मुखैः, वने, अपि, तदुत्सवे, अभ्यागतकामिनीमुखैः, सितद्युतिः, मुनिद्रुमः, अन्वहम्, कोरकितः, मेने ।।१३।।*

**वृत्तिः**—सुमनोभिः–सुष्ठु शोभनं मनोऽन्तःकरणं येषां ते सुमनसस्तैस्तथा । देवैर्विद्वद्भिर्वेत्यर्थः । स्फुरद्विभूषाङ्गमयूखसम्मुखैः–स्फुरन्ती विलसन्ती चासौ विभूषा विभूषणम्, स्फुरद्विभूषा, सेव अङ्गमयूखाः शरीरावयवकिरणाः स्फुरद्विभूषाङ्गमयूखास्तेषां सम्मुखानि अभिमुखानि स्फुरद्विभूषाङ्गमयूखसम्मुखानि तैस्तथा । वने–कानने । अपि–सम्भावनायामव्ययम् । तदुत्सवे–पूर्ववर्णितप्रकारद्वादशवार्षिके महसि । अभ्यागतकामिनीमुखैः–अभ्यागताः समायाताश्च ताः कमिन्यो वामलोचना, अभ्यागतकामिन्यस्तासां मुखानि वदनानि, अभ्यागतकामिनीमुखानि तैस्तथा । सितद्युतिः–

सिताशुक्ला द्युतिः कान्तिर्यस्य स सितद्युतिः । मुनिद्रुमः-अगस्त्यवृक्षः । अन्वहम्-प्रत्यहम् । कोरकितः-कोरकः कलिका सञ्जातोऽस्य कोरकितः । सञ्जातकोरक इति यावत् । मेने-अवबुबुधे । ज्ञात इति यावत् ॥ १३ ॥

**उपायनैः श्याममणीर्गिरिर्जनै-र्वनेऽमुनाऽमन्यत सिंहकासुतः ।**
**विलोक्य कान्तामिह राजमण्डलीं, स्वमार्गभेदानुगमात् सचेतसा ॥१४॥**

अन्वयः---*इह, वने, कान्ताम्, राजमण्डलीम्, विलोक्य, स्वमार्गभेदानुगमात्, सचेतसा, अमुना, जनैः, (विहितैः) उपायनैः, श्याममणीः, गिरिः, सिंहकासुतः, अमन्यत ॥१४॥*

वृत्तिः---इह-अस्मिन् । वने-कानने । कान्ताम्-मनोहराम् । राजमण्डलीम्-राज्ञां नृपतीनां मण्डली, राजमण्डली तां तथा । विलोक्य-प्रेक्ष्य । स्वमार्गभेदानुगमात्-स्वमार्गभेदस्य निजपथविशेषस्य अनुगमोऽवबोधः स्वमार्गभेदानुगमस्तस्मात्तथा । सचेतसा-चेतसाऽन्तःकरणेन बुद्धयेति यावत् । अमुना-सहितः सचेतास्तेन तथा । पण्डितेनेति यावत् । भगवता शान्तिनाथेन । जनैः-लोकैः । (विहितैः=कृतैः) उपायनैः- उपहारैः । श्याममणीः-श्यामः श्यामलो मणीरिव रत्नमिव । श्याममणीः । "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३ । १ । १०२ ॥ इत्यनेन समासः अथवा । श्याममणीर्नीलकान्तमणिरिवेति, लुप्तोपमा । गिरिः-पर्वतः । नीलगिरिरितियावत् । सिंहिकासुतः-सिंहिकायास्तदाख्यराहुजनन्याः सुतः पुत्रः सिंहिकासुतो राहुः । अमन्यत-साक्षाद्राहुरेवायमित्यवाबुध्यत ॥ १४ ॥

**बभौ तदा रात्रिपदेऽप्यहः सुकृन्महो द्विधाप्याहवनैर्हविर्भुजाम् ।**
**तमिस्रपक्षं त्रुटिकूटभक्षितं, तमेव धूमभ्रमतोऽपि दूरयत् ॥१५॥**

अन्वयः---*तदा, रात्रिपदे, अपि, द्विधा, अपि, सुकृत्, महः, अहः, बभौ, (किंकुर्वत्) हविर्भुजाम्, आहवनैः, त्रुटिकूटभक्षितम्, तमिस्रपक्षम्, तम्, धूमभ्रमतः, अपि, दूरयत् ॥१५॥*

वृत्तिः---तदा-तस्मिन्नवसरे । रात्रिपदे-रात्रेर्निशायाः पदम्-स्थानम् तस्मिन् रात्रिपदे । 'अधुना रात्रिः' इतिप्रतीतिविषयकालेऽपीति यावत् । अपि-सम्भावनायाम् । द्विधा-प्रकारद्वयेन । अपि-सम्भावनायाम् । सुकृत्-सु-अतिशयेन करोति सम्पादयति कृत्यानि इति सुकृत् । महः-तेजःस्वरूपम् । अहः-दिनम् । बभौ-शुशुभे । किंकुर्वदित्याकाङ्क्षायामाह- हविर्भुजाम्-हविराज्यादिकः भुञ्जते इति

हविर्भुजोऽग्नयस्तेषां तथा । आहवनैः-आ सर्वतोभावेन हवनानि होमाः, आज्यप्रक्षेपाः, आहवनानि तैस्तथा । त्रुटिकूटभक्षितम्-नाशकपटेन भक्षितम् । तमिस्रपक्षम्-अन्धकारपक्षम् । भरम्-तमोभरम्, अन्धकारातिशयम् । एव-अप्यर्थः, स च प्रकृते, समुच्चयः । धूमभ्रमतः-धूमस्य दहनकेतनस्य भ्रमो भ्रान्तिर्धूमभ्रमस्तस्मात्तथा । अपिशब्दादन्यदपि । दूरयत्-दूरीकुर्वत्, विनाशयदिति यावत् ॥१५॥

**नरक्षणे कुत्रचिदेव पुत्रिका-कदम्बकं विभ्रमभाविताम्बकम् ।**
**ददर्श लोकः स्वयमेव नर्तने, कलाकलापं किल वैधवं वमन् ॥१६॥**

अन्वयः—*स्वयम्, एव, नर्तने, वैधवम्, कलाकलापम् वमन्, किल, लोकः, नरक्षणे, कुत्रचित्, एव, (स्थाने) विभ्रमभाविताम्बकम्, पुत्रिकाकदम्बकम्, ददर्श ॥१६॥*

वृत्तिः—स्वयम्-आत्मना । एव-अवधारणार्थकमव्ययम् । नर्तने-नटने । वैधवम्-विधोरच्युतस्यायं वैधवस्तं तथा । अच्युतसम्बन्धिनमिति यावत् । कलाकलापम्-कौशलसमुदयम् । यद्वा-विधोश्चन्द्रस्यायं वैधवस्तं तथा । चन्द्रसम्बन्धिनम् इति । कलाकलापम्-कलासमूहम् । इत्येवमर्थोऽनुसन्धेयः । वमन्-उद्गिरन् । किल-सम्भावनायाम् । लोकः-जनः । नरक्षणे-न रक्षणं त्राणं यत्र तत् नरक्षणम्, निषेधार्थकेन न-शब्देन समासः । तस्मिँस्तथा । कुत्रचित्-कस्मिँश्चित् । एव-अवधारणार्थकमव्ययम् । स्थानविशेष इति यावत् । विभ्रमभाविताम्बकम्-विभ्रमेण भाविते संस्कारिते अम्बके लोचने यस्य तत् विभ्रमभाविताम्बकम् तत्तथा । पुत्रिकाकदम्बकम्-पुत्रिकायाः (कन्यकायाः) पुत्तलिकायाः वा कदम्बकम् समूहः पुत्रिकाकदम्बकम् तत्तथा । ददर्श-दृष्टवान् ॥१६॥

पाठान्तरम्—

**अथ प्रवृत्ते स महे महाशयः, पणाङ्गनास्ता नररूपधारिणीः ।**
**पुरप्रवेशे नटयन् ययौ स्वयं, कलाकलापं किल वैधवं वमन् ॥१६॥**

अन्वयः—*अथ, स्वयम्, वैधवम्, कलाकलापम्, वमन्, किल, सः, महाशयः, पुरप्रवेशे महे, प्रवृत्ते, (सति) ताः, नररूपधारिणीः, पणाङ्गनाः, नटयन्, ययौ ॥१६॥*

वृत्तिः—अथ-अनन्तरम् । स्वयम्-आत्मना । वैधवम्-चन्द्रसम्बन्धिनम् । कलाकलापम्-कलासमूहम् । वमन्-उद्गिरन् । किल-निश्चयेन । सः-प्रसिद्धः । महाशयः-महान् विशाल आशयोऽभि-

प्रायो यस्य स महाशयः, महानुभाव इति यावत । पुरप्रवेशे–नगरप्रवेशनसमय इत्यर्थः । महे–उत्सवे । महतीति मह इति व्युत्पत्याऽकारान्त महशब्दस्यापि समुत्सववाचित्वदर्शनात् । प्रवृत्ते–सञ्जातप्रारम्भे । (सति) ताः–प्रसिद्धाः । नररूपधारिणीः–नरस्य पुंस्त्वविशिष्टस्य पुरुषस्य रूपमाकृतिर्नररूपम् तद्धरन्ति तच्छीला नररूपधारिण्यः । तास्तथा । पणाङ्गनाः–पणेन मूल्येन लभ्याः पणलभ्यास्ताश्च ता अङ्गनाः प्रशस्तावयवविन्यासवत्यो रमण्यः पणाङ्गनाः, "मयूरव्यंसकेत्यादयः" ३ । १ । ११६ ॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासः । नटयन्–नर्तयन् । ताभिर्नृत्यं कारयन्निति यावत् । ययौ–जगाम । गतवानिति यावत् ॥१६॥

**पुरो हठात् क्षिप्ततुषारपाण्डुर–च्छदावृतं गोपुरमस्य चक्रिणः ।**
**प्रवेशयोगेऽप्यरुचत् सतोरणं, रणद्द्विपाश्वेन समं समन्ततः ॥१७॥**

अन्वयः—*अस्य, चक्रिणः, हठात्, पुरः, प्रवेशयोगे, क्षिप्ततुषारपाण्डुरच्छदावृतम्, सतोरणम्, गोपुरम्, रणद्द्विपाश्वेन, समम्, समन्ततः, अपि, अरुचत् ॥१७॥*

वृत्तिः—अस्य–षोडशतीर्थकृत्तया प्रसिद्धस्यैतस्य । चक्रिणः–चक्रं सन्यम् राष्ट्रं वाऽस्तीति चक्री चक्रवर्ती, सार्वभौम इति यावत्, तस्य तथा । हठात्–प्रसह्य । पुरः–नगरस्य । प्रवेशयोगे–प्रवेशसम्बन्धे । क्षिप्ततुषारपाण्डुरच्छदावृतम्–क्षिप्तानि प्रक्षिप्तानि तुषारपाण्डुराणि च क्षिप्ततुषारपाण्डुराणि तानि च तानि छदानि दलानि, क्षिप्ततुषारपाण्डुरच्छदानि तैरावृत्तमाच्छादितम् तथा । सतोरणम्–तोरणेन बहिर्द्वारेण सहितम् सतोरणम् । गोपुरम्–पुरद्वारम् । रणद्द्विपाश्वेन–द्विपा हस्तिनश्च, अश्वास्तुरङ्गमाश्च द्विपाश्वम्, "प्राण्यङ्गत्वादेकवद्भावः" रणत्–शब्दायमानश्च तद्द्विपाश्वम् रणद्द्विपाश्वम् तेन तथा । समम्–सार्धम् । समन्ततः–चतुर्दिक्षु । अपि–सम्भावनायाम् । अरुचत्–अद्युतत् ॥१७॥

**अवाकिरँस्तं सुदृशोऽथ मौक्तिकै–श्छदावृतेर्वीरुधि बद्धविभ्रमाः ।**
**पदे पदे पौरगिरा 'जय प्रभो'–ऽप्युदीरयन्त्यः प्रमदात् तदाशिषः ॥१८॥**

अन्वयः—*अथ, छदावृतेः, वीरुधि, बद्धविभ्रमाः, तदा, प्रमदात्, पदे पदे, 'जय प्रभो' (इति) पौरगिरा, आशिषः अपि, उदीरयन्त्यः, सुदृशः, तम्, मौक्तिकैः, अवाकिरन् ॥१८॥*

वृत्तिः—अथ–नगरप्रवेशान्तरम् । छदावृतेः–छदनसम्बन्ध्यावरणस्य । सम्बन्धिन्यामिति शेषः । वीरुधि–लतायाम् । बद्धविभ्रमाः–कृतविशिष्टभ्रमाः, कृतपक्षिभ्रमणा वा । तदा–तस्मिन्

समये । प्रमदात्–निरतिशयहर्षात् । पदे पदे–प्रतिपदम् । 'जय प्रभो !–हे स्वामिन् ! विजयस्व' (इति प्रभुसम्बन्धिविजयप्रतिपादिकया) । पौरगिरा–नागरिकभारत्या । आशिषः–आशीर्वादान्, शुभाशंसनानीति यावत् । उदीरयन्त्यः–व्याहरन्त्यः । सुदृशः–सुष्ठु शोभने दृशौ नयने यासां–तास्तथा, सुनयना इति यावत् । तम्–सर्वत्र प्रसिद्धम्, भगवान् शान्तिनाथ इति यावत् । मौक्तिकैः–मुक्ताफलैः । अवाकिरन्–व्यापयन् ॥१८॥

**चतुष्पथे जग्मुषि राजराजिभि-र्विभाविभाश्वोदितरेणवो नृणाम् ।**
**मिलन्निमीलं समृजुर्विलोकिता, न चक्षुरक्षुब्धसमक्षवीक्षणात् ॥१९॥**

अन्वयः—*राजराजिभिः, (समम्) चतुष्पथे, जग्मुषि, विभौ, इभाश्वोदितरेणवः, विलोकिताः, (सत्यः) नृणाम्, अक्षुब्धसमक्षवीक्षणात्, मिलन्निमीलम्, चक्षुः, न, ससृजुः ॥१९॥*

**वृत्तिः**—राजराजिभिः–राज्ञां नरपतीनाम्, पृथिवीपालकत्वेन स्थितानाम्, राजयः–श्रेण्यो, राजराजयस्ताभिस्तथा । (समम्–सह) चतुष्पथे–चतुर्णां पथां, मार्गाणाम् समाहारश्चतुष्पथम् तस्मिँस्तथा । जग्मुषि–गतवति । विभौ–प्रभौ, भगवति शान्तिनाथ इति यावत् । इभाश्वोदितरेणवः–इभाः–हस्तिनश्च अश्वाः–तुरङ्गमाश्च इभाश्वम्, प्राण्यङ्गत्वादेकवद्भावः, तेन उदिता अन्तर्भावितणिगर्थत्वादुत्थापिता, इभाश्वोदिताः ताश्च ता रेणवो धूलयः, पृथ्वीकणा इति यावत्, इभाश्वोदितरेणवः । विलोकिताः–अवलोकिताः दृष्टा इति यावत् । सत्य इति शेषः । नृणाम्–नराणाम् 'नुर्वा' १ । ४ । ४८ । इति वा दीर्घः । अक्षुब्धसमक्षवीक्षणात्–अक्षुब्धं यथा स्यात्तथा समक्षस्य प्रत्यक्षस्य वस्तुनो वीक्षणमवलोकनम् अक्षुब्धसमक्षवीक्षणन्तस्मात्तथा । मिलन्निमीलम्–कृतनेत्रसङ्कोचम् । चक्षुः–नयनम् । न–नहि । ससृजुः–चक्रुः ॥१९॥

**पुरन्दरेणापि समीयुषा सुरैः, प्रतिष्ठितास्तुष्टिपरेण वृष्टिभिः ।**
**स्वकेतनैश्छादयता प्रणेमुषा, नभस्वतस्तं कुसुमेषु केलयः ॥२०॥**

अन्वयः—*सुरैः, तुष्टिपरेण, स्वकेतनैः, वृष्टिभिः, तम्, छादयता, प्रणेमुषा, समीयुषा, पुरन्दरेण, अपि, कुसुमेषु, नभस्वतः, केलयः, प्रतिष्ठिताः ॥२०॥*

**वृत्तिः**—सुरैः–देवैः । तुष्टिपरेण–तुष्टिः सन्तुष्टिः परा श्रेष्ठा यस्य स तुष्टिपरस्तेन तथा परः श्रेष्ठारिदूराग्र्यो–त्तरे क्लीबं तु केवले' इति मेदिनी । स्वकेतनैः–निजचिह्नभूतैः । वृष्टिभिः–वर्षणैः । तम्–प्रसिद्धं, भगवन्तं शान्तिनाथमिति यावत् । छादयता–आच्छादयता, छायामापादयतेति यावत् । समीयुषा–सामीप्यमुपगतवतेति यावत् । पुरन्दरेण–इन्द्रेण । अपि–समुच्चये । कुसुमेषु–

पुष्पेषु। नभस्वतः–पवनस्य । केलयः–क्रीडाः, विलसनानि इति यावत् । प्रतिष्ठता–प्रतिष्ठां नीताः ॥२०॥

**गता यदुत्सङ्गतले विशालतां, तनूजपौत्रानुजपुत्रतत्सुताः ।**
**अलङ्कृताश्चेभकृताधिरोहणाः, पुरस्सरा रेजुरदःप्रसत्तये ॥२१॥**

अन्वयः—*यदुत्सङ्गतले, तनूजपौत्रानुजपुत्रतत्सुताः, विशालताम्, गताः, अलङ्कृताः, च, इभकृताधिरोहणाः, (ते) पुरस्सराः, (सन्तः) अदः प्रसत्तये, रेजुः ॥२१॥*

वृत्तिः—यदुत्सङ्गतले–यस्य भगवतः शान्तिनाथस्य उत्सङ्गः क्रोडो यदुत्सङ्गस्तस्य तलम्–अधोभागो यदुत्सङ्गतलम्, तस्मिँस्तथा । तनूजपौत्रानुजपुत्रतत्सुताः–तनूजाः–पुत्राश्च, पौत्रा नप्तारश्च अनुजपुत्रा भ्रातृसुताश्च तत्सुताः भ्रातृपुत्रपुत्राश्चेत्येतेषामितरेतरयोगद्वन्द्वसमासे तनूजपुत्रानुजपुत्रतत्सुताः । विशालताम्–वृद्धिम्, अवस्थाधिकतामिति यावत् । गताः–प्राप्ताः । अलङ्कृताः-विभूषणविभूषिताः । च–पुनः । इभकृताधिरोहणाः–इभेषु गजेषु कृतं विहितमारोहणमधिरोहणं यैस्ते, इभकृताधिरोहणा, गजारूढा इति यावत् । (ते–तनूजपुत्रानुजपुत्रतत्सुताः) पुरस्सराः–अग्रसराः । सन्त इति शेषः । अदःप्रसत्तये–अमुष्य, भगवतः शान्तिनाथस्य, प्रसत्तिः प्रसन्नता, अदःप्रसत्तिस्तस्यै तथा । रेजुः–दिदीपिरे, शुशुभिरे इति यावत् ॥२१॥

**नमन्ति नूनं विनयेन मेदिनीं, द्रुमाः शिरोभिः फलगौरवेण ताम् ।**
**नृपोऽप्यतोऽन्तःपुरमाप्य तां नतो-ऽचिरात् सवित्रीमचिरां चिरागतः ॥२२**

अन्वयः—*द्रुमाः, फलगौरवेण, विनयेन, ताम्, मेदिनीम्, नूनम्, शिरोभिः, नमन्ति, अतः, नृपः, अपि, अन्तःपुरम्, आप्य, चिरागतः, (सन्) अचिरात्, सवित्रीम्, (ताम्) अचिराम्, नतः ॥२२॥*

वृत्तिः—द्रुमाः–वृक्षाः । फलगौरवेण–फलैः प्रसवैः गौरवम्–गुरुता, भारातिशय इति यावत्, फलगौरवम् तेन तथा । विनयेन–नम्रतया। ताम्–प्रसिद्धाम् । मेदिनीम्–पृथिवीम् । नूनं–निश्चयेन। शिरोभिः–मस्तकैः। नमन्ति–प्रणमन्ति, नम्रीभवन्तीति यावत् । अतः–अस्माद्धेतोः अचेतनानां वृक्षादीनामपि विनयभावेन निजजननीप्रणामदर्शनात्, चेतनेन, न पुनश्चेतनेनैव प्रत्युत उत्तमोत्तमप्रकृतिकेन मया किं कथमाचरणीयमिति विचारणाद्धेतोर्वा (असौ=विप्रकृष्टवर्ती) नृपः–नॄन् जनान्, पाति रक्षतीति नृपो–राजा, भगवान् शान्तिनाथ इति यावत् । अपि–सम्भावनायाम् । अन्तःपुरम्–

अवरोधम् । आप्य-प्राप्य । 'अन्तःपुरमागत्य' इति यावत् । चिरागतः-दीर्घकालप्रत्यागतः, चिरकालतो भवन समागत इति यावत् । अचिरात्-झटिति । सवित्रीम्-समुत्पादिकाम्, जननीमित्यर्थः । ताम्-लोकविश्रुतामिति यावत् । अचिराम्-तदाख्याम्, निजमातरम् । नतः-प्रणतः । इति ॥

यथामुद्रितं तु-"नृपोऽप्यतोऽन्यः पुरमाप्य सो नतो" इति पाठस्तु प्रामादिकः प्रतीयते नकारात्मकव्यञ्जनाव्यवहितमपूर्वत्वविशिष्टस्य तच्छन्दप्रकृतिकस्य सेः, "एतदश्च व्यञ्जनेऽनग्-नञ्समासे" १ । ३ । ४६ ॥ इत्यनेन नित्यलोपविधानात् । प्रतीतिशेषः ॥२२॥

सलाजराजन्नवमौक्तिकौक्तिका-शिषां प्रसारैरवरोधसङ्गताम् ।
कथं न धात्रीमतिमात्रनामितैः, स नाभ्यनन्दद् विभवैः सनाऽमितैः ॥२३॥

अन्वयः—*सलाजराजन्नवमौक्तिकौक्तिकाशिषाम्, प्रसारैः, अवरोधसङ्गताम्, धात्रीम्, अतिमात्रनामितैः, सना, अमितैः, विभवैः, सना, कथम्, न अभ्यनन्दत् ॥२३॥*

वृत्तिः—सलाजराजन्नवमौक्तिकौक्तिकाशिषाम्-नवानि-नूतनानि च तानि मौक्तिकानि मुक्ताफलानि, नवमौक्तिकानि राजन्ति शोभमानानि च तानि नवमौक्तिकानि, राजन्नवमौक्तिकानि, लाजैराचारलाजैस्तण्डुलविशेषैः सहितानि सलाजानि, सलाजानि च तानि राजन्नवमौक्तिकानि, सलाजराजन्नवमौक्तिकानि, तानि च औक्तिकाशिषश्च वाचिकशुभाशंसनानि च सलाजराजन्नवमौक्तिकौक्तिकाशिषस्तासांतथा । प्रसारैः-प्रसारणानि, प्रसारास्तैस्तथा प्रतिपादनैरितियावत् । अवरोधसङ्गताम्-अवरोधेऽन्तःपुरे सङ्गता सम्मिलिताऽवरोधसङ्गता, तान्तथा । धात्रीम्-जननीम्-मातरमिति यावत् । अतिमात्रनामितैः-अतिमात्रमतिशयेन नामिता नम्रिता यैस्ते अतिमात्रनामितास्तैस्तथा । सना-सर्वदा सदा सनाऽनिशं शश्वत्' इति हैमः । अमितैः-अपरिमितैः, इयत्तया परिच्छेतुमशक्यैरिति यावत् । विभवैः-ऐश्वर्य्यैः, सम्पत्तिभिरिति यावत् । सना-सदा । अथवा नयति प्रापयति, धर्ममार्गमिति वा "नियो डित्" (उणा० ८५४) इति ऋः, ना, नेता, सन्, सः, प्रसिद्धश्चक्रीति च्छेदोऽनुसन्धेयः । कथम्-केन प्रकारेण । न-नहि । अभ्यनन्दत्-अन्तर्भावितणिगर्थत्वादभ्यनन्दयदित्यर्थः ॥ इति ॥ अत्र "सना-भिनन्देद् विभवैः सनामितैः" इति पाठः साधीयान् । प्रतिभातीति सुधीभिरुन्नेयम् ॥२३॥

सभाजनाधीननिलीनचेतसः, सभाजनान् वीक्ष्य विशेषत-स्त्रिधा ।
यथार्हमानेन समं विसर्जनैः, स वन्दमानानभिनन्दति स्म तान् ॥२४॥

अन्वयः—*सभाजनाधीननिलीनचेतसः, सभाजनान्, विशेषतः, वीक्ष्य, सः, यथार्हमानेन, समम्,*

*त्रिधा, विसर्जनैः, तान्, वन्दमानान्, अभिनन्दति, स्म ॥२४॥*

वृत्तिः—सभाजनाधीननिलीनचेतसः–अधीनमायत्तञ्च तन्निलीनं संलग्नम् अधीननिलीनम्, सभाजनेषु-पारिषदेषु, अधीननिलीनम् चेतो मानसं येषाम्, अथवा सभाजनेषु-अधीनं निलीनञ्च चेतो येषाम् ते सभाजनाधीननिलीनचेतसस्ताँस्तथा। सभाजनान्–सभ्यान्, सामाजिकानिति यावत्। विशेषतः–विशेषरूपेण। वीक्ष्य–समवलोक्य। सः–भगवानर्हन् शांतिनाथ इति यावत्। यथार्हमानेन–यथायोग्यसम्मानेन। त्रिधा–प्रकारत्रयेण। कायिकवाचिकमानसिकात्मिकैरिति यावत्। विसर्जनैः–त्यागैः दीनानुद्दिश्य कायिकवाचिकमानसिकयथोचितसम्मानपुरःसरं धनादिप्रतिपादनैरिति यावत्। तान्–प्रसिद्धान्–तनूजपुत्रानुजतत्सुतादीनिति यावत्। वन्दमानान्–वन्दनशीलान् वन्दनां वक्तुकामान्! विदधद्वन्दनान् इति यावत्। अभिनन्दति स्म–अभ्यनन्दत् ॥२४॥

## नृपाय तस्मै हिमितं वनानिलै–स्तपेऽपि धाराधरयन्त्रवेश्मनि।
## ययावहोरात्रकदम्बकं सुखं, स्वराजधान्यां सततोदयोन्मुखम् ॥२५॥

अन्वयः—*तस्मै, नृपाय, तपे, अपि, धाराधरयन्त्रवेश्मनि, वनानिलैः, हिमितम्, सततोदयोन्मुखम्, अहोरात्रकदम्बकम्, सुखम्, स्व, राजधान्याम्, ययौ ॥२५॥*

वृत्तिः—तस्मै–पञ्चमचक्रिवर्तित्वेन षोडशतीर्थंकरत्वेन च, भुवनत्रयप्रसिद्धाय। नृपाय–राज्ञे, शान्तिनाथायेति यावत्। तपे–ग्रीष्मर्तौ। अपि–सम्भवनायाम्। धाराधरयन्त्रवेश्मनि–धारायाः जलप्रपातस्य, धरो–धर्ता, धाराधरः स चासौ यन्त्रः साधनविशेषः, धाराधरयन्त्रस्तस्य वेश्म निकेतनम्, धाराधरयन्त्रवेश्म तस्मिँस्तथा। वनानिलैः–वनस्य काननस्य अनिलाः पवना वनानिलास्तैस्तथा। हिमितम्–हिमं शीतं सञ्जातमस्य हिमितम्, "तदस्य सञ्जातं तारकादिभ्य इतः" ७।१।१३८॥ इत्यनेन 'इतः प्रत्ययः। सततोदयोन्मुखम्–उदयाय अभ्युदयाय उन्मुखम् उत्कण्ठितम् उदयोन्मुखम्, सततं—सर्वदा उदयोन्मुखम्, सततोदयोन्मुखम्। अहोरात्रकदम्बकम्–अहानि–दिनानि च रात्रयो निशाश्च अहोरात्रास्तेषां कदम्बकम् समूहम् अहोरात्रकदम्बकम्। सुखम्–अनायासेन, आनन्दपूर्वकं यथास्यात्तथा। स्वराजधान्याम्–धीयन्तेऽस्यामिति धानी, राज्ञो धानी राजधानी, प्रधाननगरम्, स्वस्य सा तस्याँ तथा। ययौ–जगाम, अगच्छत्, गतम्–व्यतीतमिति यावत्॥२५॥

## असौरभेऽप्यत्र ससौरभीभवत्, सुधीकृतं पुष्परसैरहर्महः।
## असौ ससौख्यं समये शुचेरपि, विभासमानो मनसाऽप्यमन्यत ॥२६॥

अन्वयः—*अत्र, असौरभे, अपि, ससौरभीभवत्, अहर्महः, पुष्परसैः, सुधीकृतम्, असौ, ससौख्यम्, शुचेः, समये, अपि, मनसा, अपि, विभासमानः, अमन्यत ॥२६॥*

**वृत्तिः**—**अत्र**–चक्रवर्तिशान्तिनाथराजधान्याम् । **असौरभे**–सुष्ठु रभते इति सुरभिर्वसन्तस्तस्य भावः सौरभम्, न सौरभमसौरभम् तस्मिँस्तथा । **अपि**–सम्भावनायाम् । **ससौरभीभवत्**–असौरभम् ससौरभं भवत् सम्पद्यमानम् ससौरभीभवत् । "कृभ्वस्तिभ्यां कर्मकर्तृभ्याम्" ७ । २ । १२६ ॥ इत्यनेन 'च्विः' प्रत्ययः । "ईश्चवाववर्णस्यानव्ययस्य" ४ । ३ । १११ ॥ इत्यनेन च्वौ परेऽवर्णस्य ईकारान्तादेशः । **अहर्महः**–दिवसतेजः । **पुष्परसैः**–मकरन्दैः । **सुधीकृतम्**–अमृतीकृतम् । **असौ**–भगवान् शान्तिनाथः । **ससौख्यम्**–सौख्येन निर्वृत्या सातेनेति यावत्, ससौख्यम् यथास्यात्तथा । **शुचेः**-आषाढस्य । **समये**-काले । **अपि**–सम्भावनायाम् । **मनसा**–अन्तःकरणेन । **अपि**–सम्भावनायामेव । **विभासमानः**–विशेषेण भासमानो राजमानः, शोभमान इति यावत् । **अमन्यत**–अवाबुध्यत लोकैरज्ञायतेति यावत् । **शुचेः**-सूर्य्यात् अपि । **विभासमानः**–विभया असमानोऽतुल्यो विभासमानः, सूर्य्यादप्यधिकतेजोवानिति ज्ञेयोऽर्थः ॥ २६ ॥

**तपात्यये नन्दनि तद्दिनं घनै-र्घनाघनैः श्यामलिते नभस्यपि ।**
**विनिर्मितं केतकरेणुभिः सितं, स्वतेजसा वाऽनुबभूव सस्मितम् ॥२७॥**

अन्वयः—*नन्दिनि, तपात्यये, घनैः, घनाघनैः, नभसि, अपि, श्यामलिते,* (सति) *तद्दिनम्, केतकरेणुभिः, सितम्, विनिर्मितम्, स्वतेजसा, सस्मितम्, वा, अनुबभूव ॥२७॥*

**वृत्तिः**—**नन्दिनि**–नन्दयत्यानन्दयति तच्छीलो नन्दी, तस्मिँस्तथा सर्वलोकानन्दकारिणीति यावत् । **तपात्यये**–तपतीति तपः "अच्" ५ । १ । ३९ ॥ इत्यनेन 'अच्' प्रत्ययः, ग्रीष्मकालः, तस्य अत्ययो नाशो यत्र स तपात्ययो वर्षाकालः, श्रावणभाद्रोभयमासव्यापिकालविशेष इति यावत्, तस्मिँस्तथा । **घनैः**–सान्द्रैः, निबिडैरिति यावत् । **घनाघनैः**–घ्नन्ति मारयन्ति प्रवासिन इति घनाघना मेघाः "चराचरचलाचल" ४ । १ । १३ ॥ इत्यादिना अजन्तो निपातितः, तैस्तथा । **नभसि**–आकाशे । **अपि**–सम्भावनायाम् । **श्यामलिते**–श्यामल इवाचरितं श्यामलितम् तस्मिँस्तथा सतीति शेषः । **तद्दिनम्**–तत् वर्षाकालिकञ्च तद्दिनं दिवसस्तद्दिनम् । **केतकरेणुभिः**–चाम्पेयपरागैः । **सितम्**–श्वेतम्, शुक्लमिति यावत् । **विनिर्मितम्**-विरचितम्, सम्पादितमिति यावत् । **स्वतेजसा**–निजप्रतापेन । **सस्मितम्**–स्मितमिषद्धासस्तेन सहितं सस्मितम् । **वा**–इव । **अनुबभूव**-अनुभूतवान् ॥ २७ ॥

**यथेष्टकार्य्यस्य स सर्जनाज्जने, सनिर्भरं निर्भयसंकथे पथे ।**
**सदैव राजा प्रिययोगिनेऽङ्गिने, वियोगिनेऽदत्त न कौमुदीमुदः ॥२८॥**

अन्वयः—*जने, यथेष्टकार्य्यस्य, सर्जनात् , सदा, एव, निर्भयसंकथे, पथे, सनिर्भरम् , (स्थितः) सः, राजा, प्रिययोगिने, (च) वियोगिने, अङ्गिने, कौमुदीमुदः, न, अदत्त ॥२८॥*

वृत्तिः—जने–लोके, प्रजायामिति यावत् । यथेष्टकार्य्यस्य–यथाभिलषितकर्मणः । प्रजाभिलाषोचितकार्य्यस्येति यावत् । सर्जनात्–सम्पादनात् । सदैव–सर्वदा खलु । निर्भयसंकथे–निर्भयं भयरहितम् यथास्यात्तथा संकथा सम्यगालापः गोष्ठी वा यत्र स निर्भयसंकथस्तस्मिँस्तथा । पथे–मार्गे । सनिर्भरम्–सातिशयं यथास्यात्तथा । स्थित इति शेषः । सः–प्रसिद्धश्चक्रितया षोडशतीर्थंकृत्तया वा । राजा–चन्द्र इव राजा नृपः, भगवान् शान्तिनाथ इति यावत् । प्रिययोगिने–प्रियेण हृद्येन जनेन योगः सम्बन्धः प्रिययोगः सोऽस्त्यस्येति प्रिययोगी तस्मै तथा । (च–पुनः) वियोगिने–विरहिणे विप्रयुक्तायेति यावत् । अङ्गिने–प्राणिने जनायेति यावत् । कौमुदीमुदः–कौमुदीप्रयुक्ताश्चन्द्रिकाप्रयोज्या मुद आनन्दविशेषाः कौमुदीमुदः, "मयूरव्यंसकेत्यादयः" ३।१।११६॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी तत्पुरुषसमासः, तास्तथा । न–नहि । अदत्त–दत्तवान् । नञः काकर्थकत्वाद्दत्तवानेवेति भावः । राजेव राजा भगवान् शान्तिनाथः प्रिययोगिने वियोगिने चापि कौमुदीमुदमदत्तेति, चन्द्रस्य वियोगिसन्तापकत्वात् उपमानचन्द्रापेक्षयोपमेये नृपे उभयानन्ददायकत्वात्मकाऽऽधिक्यवर्णनाद् व्यतिरेकालङ्कारः । "उपमानाद्यदन्यस्य व्यतिरेकः स एव सः" इति काव्यप्रकाशकारो मम्मटः ॥२८॥

**अयोगभाजोऽपि नृपस्य पश्यता, यथेष्टदानं स्वजनेन मन्त्रणे ।**
**कृतेऽफलत् कामनया द्युरत्नवत् , स्वसिद्धिदे स्वामिनि नाद्भुताय तत् ॥२९॥**

अन्वयः—*अयोगभाजः, अपि, नृपस्य, यथेष्टदानम् , पश्यता, स्वजनेन, कामनया, मन्त्रणे, कृते, (सति) तत् , स्वसिद्धिदे, स्वामिनि, अद्भुताय, न, अफलत् ॥२९॥*

वृत्तिः—अयोगभाजः–न योगं प्रियतमासंयोगं भजतीत्ययोगभाक् तस्य तथा । अपि–सम्भावनायाम् । नृपस्य–राज्ञः, शान्तिनाथस्येति यावत् । यथेष्टदानम्–यथेष्टं पर्य्याप्तं निकाममिति यावत् । दानम्–दीनेभ्यो वितरणम् , यथेष्टदानम् तत्तथा । पश्यता–अवलोकयता । स्वजनेन–आत्मीयपुरुषेण । कामनया–इच्छया, अभिलाषेणेति यावत् । मन्त्रणे–विचारणे । कृते–विहिते । (सति) तत्–मन्त्रणम् । स्वसिद्धिदे–स्वस्य धनस्य सिद्धिर्निष्पत्तिः स्वसिद्धिस्तां ददातीति स्वसि-

द्विदस्तस्मिँस्तथा । स्वामिनि–प्रभौ । अद्भुताय–आश्चर्याय । न–नहि । अफलत्–समकल्पत, जातमिति यावत् ॥२९॥

**क्वचिज्जलक्रीडनकेऽपि भूभुज–स्तदेव साक्षादमृतांशुमाननम् ।**
**निरीक्ष्य युक्ताम्बुजशङ्कयाऽरजा, उपेयुषी राजमरालमण्डली ॥३०॥**

अन्वयः—क्वचित्, *जलक्रीडनके, अपि, भूभुजः, साक्षात्, अमृतांशुम्, एव, तत्, आननम्, निरीक्ष्य, अरजाः, राजमरालमण्डली, युक्ताम्बुजशङ्कया, उपेयुषी ॥३०॥*

वृत्तिः—**क्वचित्**–कुत्रचित् । **जलक्रीडनके**–सलिलक्रीडायाम् । **अपि**–सम्भावनायाम् । **भूभुजः**–भुवं पृथिवीं भुनक्तीति भूभुक् तस्य तथा, राज्ञः शान्तिनाथस्येति यावत् । **साक्षात्**–प्रत्यक्षं यथास्यात्तथा । **अमृतांशुम्**–अमृतसंपृक्तः सुसंवलितोऽशुः किरणो यस्य सोऽमृतांशुश्चन्द्र-स्तन्तथा । **एव**–अवधारणार्थकमव्ययम् । **तत्**–प्रसिद्धम्, श्रीमच्छान्तिनाथसम्बन्धीति यावत् । **आननम्**–वदनम्, मुखमिति यावत् । **निरीक्ष्य**–समवलोक्य । **अरजाः**–न रजो मलं यस्याः साऽरजाः, निर्मलेत्यर्थः । **राजमरालमण्डली**–राजहंससमूहः । **उपेयुषी**–सामीप्यमुपगता । शान्तिनाथमुखम-वलोक्य 'चन्द्रोऽयम्' इति । भ्रान्तिमापेति भावः भ्रान्तिमानलङ्कारः । "भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने" इति तदलङ्कारः लक्षणमाह काव्यप्रकाशकारो मम्मटोपाध्यायः ॥ ३० ॥

**क्वचित्तथाऽसौ मतिशालिमालयो–पवीणितस्तत्क्वणनैपुणे गुणे ।**
**पिकेन रोषारुणचक्षुषा मुहुः, कृताऽप्यवज्ञा विफला यथाऽभवत् ॥३१॥**

अन्वयः—क्वचित्, *असौ, मतिशालिमालया, तथा, उपवीणितः, यथा, तत्क्वणनैपुणे, गुणे, रोषारुणचक्षुषा, पिकेन, मुहुः, कृता, अपि, अवज्ञा, विफला, अभवत् ॥३१॥*

वृत्तिः—**क्वचित्**—कुत्रापि । **असौ**–भगवान् शान्तिनाथः । **मतिशालिमालया**–मत्या बुद्ध्या शालंते शोभन्ते मतिशालिनस्तेषां माला पङ्क्तिः, समूह इति यावत्, मतिशालिमाला तया तथा । **तथा**–तेन प्रकारेण । **उपवीणितः**–वर्णितः, प्रशंसित इति यावत् । **यथा**–येन प्रकारेण । **तत्क्वणनैपुणे**–तत्क्वणस्य तत्प्रक्वाणस्य नैपुणं निपुणता तत्क्वणनैपुणम् तस्मिँस्तथा । **गुणे**–प्रशंसनीय-त्वात्मकगुणे । **रोषारुणचक्षुषा**–रोषेण–क्रोधेन, अरुणे–रक्ते, चक्षुषी–नयने यस्य स रोषारुणचक्षुस्तेन तथा । **पिकेन**–कोकिलेन । **मुहुः**–पुनः पुनः । **कृता**–विहिता **अपि**–सम्भावनायाम् । **अवज्ञा**–तिरस्कारः । **विफला**–व्यर्था । **अभवत्**–अभूत् ॥३१॥

**दिदृक्षया चन्द्रमसो वनेऽर्हता, न्यषेध्यतेशेन पिकस्वरोऽमुना ।**
**यतो मृगाङ्कत्वसुहृद्विधौ रिपुः, कुहूरुताहूयत चन्द्रवैरिणी ॥३२॥**

*अन्वयः*––*वने, ईशेन, अमुना, अर्हता, चन्द्रमसः, दिदृक्षया, पिकस्वरः, न्यषेध्यत, यतः, मृगाङ्कत्वसुहृद्विधौ, रिपुः, चन्द्रवैरिणी, कुहूरुता, आहूयत ॥३२॥*

**वृत्तिः**––वने–कानने । ईशेन–प्रभुणा । अमुना–विप्रकृष्टेन । अर्हता–तीर्थकृता, पञ्चमचक्रवर्तिना भगवता शान्तिनाथेनेति यावत् । चन्द्रमसः–चन्द्रस्य । दिदृक्षया–द्रष्टुमिच्छा दिदृक्षा तया तथा, दर्शनाभिलाषेणेति यावत् । पिकस्वरः–पिबति चूतरसमिति पिकः कोकिलः, "पापुलि" (उणा० ४१) इति 'किदिक्रः' प्रत्ययः । अपि कायतीति वा पिकः पृषोदरादित्वात्, तस्य स्वरः शब्दविशेषः पिकस्वरः । न्यषेध्यत–निषेधितः, निवारित इति यावत् । यतः–यस्माद्धेतोः । मृगाङ्कत्वसुहृद्विधौ–मृगो-हरिणोऽङ्कश्चिह्नं लाञ्छनं इति यावत्, यस्य स मृगाङ्कश्चन्द्रः तीर्थकृदपीत्यतः, मृगाङ्कत्वेन सुहृत् मित्रम् मृगाङ्कत्वसुहृत् स चासौ विधुश्चन्द्रो मृगाङ्कत्वसुहृद्विधुस्तस्मिँस्तथा । रिपुः–शत्रुः । चन्द्रवैरिणी–अमावास्या । कुहूरुता–कुहूः कुहूः इति रुत् शब्दो यस्य तेन तथा, पिकेन । आहूयत–आह्वास्यते, आकारयिष्यते अन्वयानुपपत्त्या तात्पर्य्यानुपपत्त्या वा लक्षणया भूतकालिकप्रत्ययस्यापि भविष्यत्कालार्थबोधकत्वात्तदभिप्रायेणैव भविष्यत्कालिकप्रयोगस्योपादानं न्याय्यमिति एवोट्टङ्कितः ॥३२॥

**अशोकमर्थान्वितनामताशया, स्वकानने तं निदधे स तन्मये ।**
**अनुक्रमेणाभ्युचिते ह्यनुक्रमात्, स केवले बोधबले यतोऽनुगः ॥३३॥**

*अन्वयः*––*सः, तन्मये, स्वकानने, अर्थान्वितनामताशया, तम्, अशोकम्, निदधे, हि, यतः, सः, अनुक्रमेण, अभ्युचिते, क्रमात्, अनु, केवले, बोधबले, अनुगः ॥३३॥*

**वृत्तिः**––सः–चक्रित्वादिना प्रसिद्धो भगवाञ्छान्तिनाथः । तन्मये–सोऽशोकः प्रचुरोऽस्मिन्निति तन्मयम् तस्मिंस्तथा । स्वकानने–स्वीयवने । अर्थान्वितनामताशया–अर्थान्वितमन्वर्थं नामाभिधानं यस्य सोऽर्थान्वितनामा, तस्य भावोऽर्थान्वितनामता, तस्य आशा अर्थान्वितनामताशा, तया तथा । तम्–अर्थान्वितनामानम् । अशोकम्–कङ्केल्लिम् । निदधे–स्थापितवान् । हि–निश्चयेन । यतः–यस्माद्धेतोः । सः–भगवान् शान्तिनाथः । अनुक्रमेण–परिपाट्या । अभ्युचिते–उपचयमापन्ने, समभ्युदिते इति यावत् । क्रमात्–आचारात् । अनु–पश्चात् । केवले–केवलात्मके । बोधबले–

ज्ञानशक्तौ । अनुगः—अनु पश्चाद् गच्छतीत्यनुगः, अनुगामीत्यर्थः । केवलज्ञानावाप्त्यनन्तरमशोकः सर्वदानुगो भवतीति भावः ॥३३॥

**पुरारिरूपेऽस्य पुरारिरूपिणो, गतान् शरण्यं गृहशोचिनोऽध्वगान् ।**
**चकार चक्री विषयैः प्रतिष्ठिता–नशल्यवात्सल्यमतिर्महत्यहो ! ॥३४॥**

अन्वयः—*पुरा, पुरारिरूपे, ( अस्मिन् ) अस्य, अरिरूपिणः, शरण्यम्, गतान्, गृहशोचिनः, अध्वगान्, चक्री, विषयैः, प्रतिष्ठितान्, चकार, अहो ! महति, अशल्यवात्सल्यमतिः ॥३४॥*

वृत्तिः—पुरा–पूर्वम्, दिग्विजयार्थप्रयाणकाले ! पुरारिरूपे–नगरशत्रुरूपे । ( अस्मिन् भगवति शान्तिनाथे) आक्रमणसमये समाक्रमणीयराजनगरशत्रुत्वस्य तस्मिन्निर्विवादात् । अस्य–भगवतः शान्तिनाथस्य । अरिरूपिणः–शत्रुभूतान्, प्रतिपक्षात्मन इति यावत् । शरण्यम्–शरणे रक्षणे साधुः शरण्यस्तन्तथा । गतान्–प्राप्तान् । गृहशोचिनः–स्त्रीशोचिनः 'गृहा दारेषु सद्मनि' इत्यनेकार्थः । 'न गृहं गृहमित्याहु–र्गृहिणी गृहमुच्यते' इत्यभियुक्तोक्तेश्च । अध्वगान्–अध्वानं पन्थानं गच्छन्तीत्यध्वगाः पथिकास्ताँस्तथा । "नाम्नो गमः खड्डौ च" ५।१।१३१॥ इत्यनेन 'डः' प्रत्ययः । चक्री–चक्रवर्ती भगवान् शान्तिनाथः । विषयैः–देशैः भोगैर्वा । प्रतिष्ठितान्–समारोपितमूलान्, प्रशस्तानिति यावत् । चकार–कृतवान् । अहो !–आश्चर्य्यम् । महति–महानुभावे । अशल्यवात्सल्यमतिः–शल्यं शङ्कु न शल्यमशल्यम् अमर्मच्छेदितेति यावत्, अशल्यञ्च वात्सल्यञ्च अशल्यवात्सल्ये ताभ्यां सहिता मतिर्बुद्धिस्तथा ॥३४॥

**अमन्यतावन्तमिवैष पल्लवैः, स्वरागयुक्तैः सुरसालमङ्गिनः ।**
**हितं गिरन्तं त्रिजगद्गुरुं जनो, जिनं विमुक्तः प्रभुशोभया भयात् ॥३५॥**

अन्वयः—*प्रभुशोभया, भयात्, विमुक्तः, एषः, जनः, हितम्, गिरन्तम्, त्रिजगद्गुरुम्, स्वरागयुक्तैः, पल्लवैः, अङ्गिनः, अवन्तम्, सुरसालम्, इव, अमन्यत ॥३५॥*

वृत्तिः—प्रभुशोभया–प्रकर्षेण भवतीति प्रभुः स्वामी । "शं-सं-स्वयं-वि-प्राद् भुवो डुः" ५।२।८४॥ इत्यनेन 'डुः' प्रत्ययः । तस्य शोभा छविः प्रभुशोभा । तया तथा । भयात्–भयभीतेः । विमुक्तः–विरहितः । जीवन्मुक्त इत्यर्थः, मिथ्याज्ञानजन्यवासनाराहित्ये सति जीवित्वं तत्त्वमित्यनुसन्धेयम् । एषः–अयम्, मिथ्याज्ञानजन्यवासनारहितः कश्चिदित्यर्थः । जनः–लोकः । हितम्–हितं कल्याणमस्त्यस्मिन्निति हितम्, वचनमित्यर्थः । गिरन्तम्–उच्चारयन्तम् । त्रिजगद्गुरुम्–त्रयाणां जगतां भुवनानां समाहारस्त्रिजगत्

तस्य गुरुराचार्य्यः महान् वा त्रिजगद्गुरुस्तन्तथा । स्वरागयुक्तैः–स्वीयानुरागसंवलितैः । पल्लवैः–वचनविस्तरैः । सुरसालपक्षे च लोहितैः किसलयैरिति बोध्यम् । अवन्तम्–रक्षयन्तम् । सुरसालः–देवपादपम्, कल्पवृक्षमिति यावत् । इव–यथा । अमन्यत–अवाबुध्यत ॥ ३५ ॥

स्वतः प्रशान्तं शतशो मृगीदृशां, निशान्तमाप्तं द्विविधं क्षमाधनम् ।
स्वरूपनिष्ठं वशमातनिष्ट न, प्रतीष्टकामज्वलदस्त्रजालकम् ॥३६॥

अन्वयः—*प्रतीष्टकामज्वलदस्त्रजालकम्, शतशः, मृगीदृशाम्, निशान्तम्, स्वतः, प्रशान्तम्, आप्तम्, द्विविधम्, क्षमाधनम्, (अत एव) स्वरूपनिष्ठम्, (तम्) वशम्, न, आतनिष्ट ॥३६॥*

वृत्तिः—प्रतीष्टकामज्वलदस्त्रजालकम्–ज्वलत् आरक्तञ्च तत् अस्त्रजालकमस्त्रसमूहो ज्वलदस्त्रजालकम्, कामस्य–मदनस्य ज्वलदस्त्रजालकम्, कामज्वलदस्त्रजालकम्, प्रतीष्टमङ्गीकृतञ्च तत् कामज्वलदस्त्रजालकम्, तथा । शतशः–शतपदस्यानेकपरत्वाद्बहुशः । मृगीदृशाम्–हरिणलोचनानाम् । निशान्तम्–गृहम् । अपीति शेषः । स्वतः–सम्बद्धत्वात्स्वयमेव, न गुरूपदेशतः । प्रशान्तम्–कामादिनिवृत्तम् । आप्तम्–यथार्थवक्तारम् । आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान् रागादिवशादपि नान्यथावादीति चरके पतञ्जलिः । द्विविधम्–द्विप्रकारम् । क्षमाधनम्–क्षमा–पृथिवी, धनं–सम्पत्तिर्यस्य स क्षमाधनो राजा, क्षमा क्षान्तिस्तितिक्षा धनं यस्य स क्षमाधनः शमी सन्तथा, राजानं शमिनं वेति भावः । (अत एव) स्वरूपनिष्ठम्–आत्मसंस्थम् । (तम्–भगवन्तं शान्तिनाथम्) वशम्–आयत्तम्, स्वाधीनमिति यावत् । न–नहि । आतनिष्ट–व्यधात्, अकार्षीदिति यावत् ॥ ३६ ॥

विलासवापीतटवीचिवादना–दनाविशन्मानसमेनमेनसि ।
रसेन लीलासु मनस्विनीजन–श्चकार नोद्भूतविकारकारणम् ॥३७॥

अन्वयः—*मनस्विनीजनः, एनसि, अनाविशन्मानसम्, एनम्, विलासवापीतटवीचिवादनात्, रसेन, लीलासु, उद्भूतविकारकारणम्, न, चकार ॥३७॥*

वृत्तिः—मनस्विनीजनः–प्रशस्तं मनोऽन्तःकरणम् अस्त्यस्या इति मनस्विनी स एव जनो लोकः मनस्विनीजनः । एनसि–पाप्मनि दुष्कृते इति यावत् । अनाविशन्मानसम्–अनाविशत् प्रवेशमलभमानं मानसं हृदयं मन इति यावत् यस्य सोऽनाविशन्मानसस्तन्तथा । एनम्–भगवन्तं शान्तिनाथम् । विलासवापीतटवीचिवादनात्–विलासार्थं केलिकलापार्थं वापी दीर्घिका विलासवापी

तस्यास्तटम् तीरम् विलासवापीतटम्, तत्र वीचिवादनं तरङ्गनादो विलासवापीतटवादनम् तस्मात्तथा। रसेन-रागेण। लीलासु-क्रीडासु। उद्भूतविकारकारणम्-उद्भूतं समुत्पन्नं विकारकारणं यस्य स उद्भूतविकारकारणस्तन्तथा। न-नहि। चकार-कृतवान् ॥३७॥

मनो मनोभूवशवर्ति नाऽभवत्, पिकालिगीतेः शिखिलास्यलाघवात्।
सरोरुहामोदविनोदतोऽप्यहो, महोदयार्थेऽस्य निलीनतावशात् ॥३८॥

अन्वयः—*महोदयार्थे, निलीनतावशात्, अस्य, मनः पिकालिगीतेः, शिखिलास्यलाघवात्, अपि, सरोरुहामोदविनोदतः, मनोभूवशवर्ति, न, अभवत्, अहो ! ॥३८॥*

वृत्तिः—महोदयार्थे-महानतिशयितश्चासावुदयोऽभ्युदयो महोदयो महानन्दः, मोक्ष इति यावत्, स एवार्थः प्रयोजनम् महोदयार्थस्तस्मिँस्तथा। निलीनतावशात्-निरतत्वाद्धेतोः, सावधानमवस्थितत्वाद्धेतोरिति यावत्। अस्य-भगवतः शान्तिनाथस्येति यावत्। मनः-मानसम्, चित्तमिति यावत्। पिकालिगीतेः-पिकानां कोकिलानामालिः पङ्क्तिः श्रेणिरिति यावत्। पिकालिस्तस्या गीतिर्गानं पिकालिगीतिस्तस्यास्तथा। शिखिलास्यलाघवात्-शिखा बर्हं पिच्छमिति यावत् अस्त्येषामिति शिखिनो मयूरास्तेषां लास्यलाघवम् नृत्यचातुर्य्यम्-शिखिलास्यलाघवम्। तस्मात्तथा। अपि-सम्भावनायाम्। सरोरुहामोदविनोदतः-सरसि कासारे रोहन्त्युत्पद्यन्ते इति सरोरुहाणि कमलानि तेभ्य आमोदविनोदा आनन्दसम्मदाः सरोरुहामोदविनोदास्तेभ्यस्तथा। मनोभूवशवर्ति-कामपराधीनम्। न-नहि। अभवत्-सञ्जातम्। अहो !-महाश्चर्य्यम् ॥३८॥

यथाऽऽलये तालविशालयन्त्रज-ध्वनिश्च गान्धर्वविशेषनर्तनात्।
वनेऽपि तौर्य्यत्रिकमारराध तं, तथामृदङ्गोदितवेणुवादनात् ॥३९॥

अन्वयः—*गान्धर्वविशेषनर्तनात्, यथा, आलये, तालविशालयन्त्रजध्वनिः, तम्, आरराध, वने, अपि, मृदङ्गोदितवेणुवादनात्, तौर्य्यत्रिकम्, (तम् आरराध) ॥३९॥*

वृत्तिः—गान्धर्वविशेषनर्तनात्-विशिष्यते साधारणादतिरिच्यते इति विशेषम्, विशिष्टमित्यर्थः, तच्च तन्नर्तनम् लास्यम् विशेषनर्तनम्, गन्धर्वाणां देवयोनिविशेषाणामिदं गान्धर्वम् तच्च तद्विशेषनर्तनम् गान्धर्वविशेषनर्तनम् तस्मात्तथा। यथा-येन प्रकारेण। आलये-निलये, सद्मनीति यावत्। तालविशालयन्त्रजध्वनिः-तालो गीतकालक्रियामानम् विशालं विशङ्कटञ्च तद्यन्त्रम् वस्तुनिर्माणसाधनविशेषद्रव्यम्, तालश्च विशालयन्त्रञ्च तालविशालयन्त्रे, ताभ्यां जातस्तालविशाल-

यन्त्रजः स चासौ ध्वनिः शब्दविशेषस्तालविशालयन्त्रजध्वनिः । तम्–चकितया प्रसिद्धं भगवन्तं शान्तिनाथमिति यावत् । आरराध–आराधनक्रियानिरूपितकर्मताश्रयमादधौ । वने–कानने । अपि–सम्भावनायामव्ययम् । मृदङ्गोदितवेणुवादनात्–मृदङ्गैर्मुरजैरुदितो वेणुर्मृदङ्गोदितवेणुस्तस्य वादनम् मृदङ्गोदितवेणुवादनम् तस्मात्तथा । तौर्य्यत्रिकम्–नृत्यगीतवाद्यत्रयमित्यर्थः । तमारराधेति शेषः ॥३९॥

अलीनचेता विषयोपभोगवान्, न–दीनवृत्त्याऽतिगभीरधीरधीः ।
अरीरमत् सारसनान्वितालिभिः,क्व भोगमाप्नोति न भाग्यभाग्जनः ॥४०॥

अन्वयः—*अलीनचेताः, विषयोपभोगवान्, अतिगभीरधीरधीः, (सन्) न दीनवृत्त्या, सारसनान्वितालिभिः, अरीरमत्, भाग्यभाक् जनः, क्व, भोगम्, न, आप्नोति* ॥४०॥

वृत्तिः—अलीनचेताः–अलीनमनिरतं चेतो मानसं यस्य सोऽलीनचेताः । विषयोपभोगवान्–विषयाणां स्रक्चन्दनवनितादीनां शब्दादीनां देशानां वा उपभोगो विषयोपभोगः, सोऽस्त्यस्येति विषयोपभोगवान्, "अतोऽनेकस्वरात्" ७ । २ । ६॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः । अतिगभीरधीरधीः–गभीरा गम्भीरा चासौ धीरा धैर्य्यवती प्रवणतुल्या स्थिरताशालिनीति यावत् गभीरधीरा तादृशी धीर्बुद्धिर्यस्य स तथा । नदीनवृत्त्या–न दीना–कृपणा दुर्गतेति यावत्, नदीना, नैकधेत्यादिवन्निषेधार्थकेन नशब्देन समासः, नदीना चासौ वृत्तिर्व्यापारो नदीनवृत्तिस्तया तथा । यद्वा नदीनः समुद्रस्तस्य वृत्त्या, विशालगभीरवृत्त्येति यावत् । सारसनान्वितालिभिः–सारसना कटिमेखला तयाऽन्विता विशिष्टा सारसनान्वितास्ताश्च ता आलयस्त्रियः सख्यः, सारसनान्वितालयस्ताभिस्तथा । पक्षे–सारसनं कवचविशेषस्तेनान्विता युक्ताः, सारसनान्विता वीरास्तेषामालयः श्रेणयः सारसनान्वितालयस्ताभिस्तथा । "आली संख्यावली सेत्वमर्षेषु विशदाशये" इत्यनेकार्थः । उक्तानेकार्थककोशे आलीशब्दोपादानात् प्रकृतश्लोके च आलिशब्दसद्भावादिकारान्तस्य तस्य श्रेणीबोधकत्वेऽपि सखीबोधकत्वं दुरूपपादमिति नो शङ्क्यम्, "वयस्यालिः सखी सध्रीची" ३।१९३॥ इत्यभिधानचिन्तामणौ, सख्यर्थकालिशब्दस्यापि दर्शनात् । राजिः–राजी श्रेणिः श्रेणीत्यादाविव, "इतोऽक्त्यर्थात्" इत्यनेन वैकल्पिकङीविधानात्तादृशद्वयस्याप्येकार्थकत्वेन पर्य्यायतास्वीकारात् । अरीरमत्–अक्रीडत्, अलीलसदिति यावत्, तमेवार्थमर्थान्तरन्यासेन द्रढयति । भाग्यभाक्–भाग्यं शुभात्मकविधिं भजति सेवते श्रयतीति यावत्, भाग्यभाक् । जनः–लोकः । क्व–कुत्र । भोगम्–सुखम् । न–नहि । आप्नोति–अधिगच्छति, लभते इति यावत्, अपि तु सर्वत्रैव भोगं प्राप्नोति यो हि सुखी स स्थानान्तरे गतोऽपि सुखं प्राप्नोति, यस्तु दुःखी स स्थानान्तरे गतोऽपि दुःख्येवेति वा, सुखिनस्तस्य वनेऽपि सुखप्रतिवादनं प्रसङ्गकृतमवसेयम् ॥४०॥

तदर्थमध्याप्यजनेन तदुवने, पटूकृता वा भवनेऽपि मागधाः।
तमभ्यनन्दन्नवभावभावनैः, स्वकाव्यभाव्यान्वयरञ्जिनं जिनम् ॥४१॥

अन्वयः—जनेन, तदर्थम्, अध्याप्य, पटूकृताः, मागधाः, वने, अपि, भवने, वा, नवभावभावनैः, स्वकाव्यभाव्यान्वयरंजिनम्, तम्, जिनम्, अभ्यनन्दत् ॥४१॥

वृत्तिः—जनेन–लोकेन । तदर्थम्–भगवच्छान्तिनाथमुद्दिश्य । अध्याप्य–पाठयित्वा । पटूकृताः–अपटवोऽनिपुणाः पटवो निपुणाः कृताः सम्पादिताः पटूकृताः, पण्डिताः कृताः इत्यर्थः। "कृभ्वस्तिभ्यां कर्मकर्तृभ्याम्" ७ । २ । १२६ ॥ इत्यनेन प्रागतत्त्वे "(अभूततद्भावे) ऽर्थे 'च्विः' प्रत्ययः।" "ईश्च्वावर्णस्यानव्ययस्य" ४ । ३ । १११ ॥ इत्यनेन च्वौ परेऽवर्णस्येकारान्त आदेशः। मागधाः–वन्दिनः। वने–कानने । अपि–सम्भावनायाम् । भवने–सद्मनि । वा–इव । नवभावभावनैः–नवो नूतनश्चासौ भावोऽभिप्रायो नवभावस्तत्सहितानि-भावनानि-ध्यानानि, स्तवनानीत्यर्थः, परमात्मचिन्तनानीति, यावत्, नवभावभावनानि तैस्तथा । स्वकाव्यभाव्यान्वयरञ्जिनम्–स्वस्य आत्मनः, काव्यं कविता स्वकाव्यम् तस्य भाव्यान्वयः मुहुर्मुहुश्श्रवणसम्बन्धःस्वकाव्यभाव्यान्वयस्तेन रजत्यनुरागमाधत्ते तच्छीलः स्वकाव्यभाव्यान्वयरञ्जी तथा । "अजातेः शीले" ५ । १ । १५४॥ इत्यनेन तच्छीले 'णिन्' प्रत्ययः'। तम्–प्रसिद्धम्, भगवन्तं शान्तिनाथमिति यावत् । अभ्यनन्दत्–समानन्दयत् ॥ ४१ ॥

वनेचरैः सार्धमुपात्तकिंशुकाः, शुका विमुक्ताः पटवस्तमस्तुवन् ।
तथा यशोभिर्विशदीकृताशयै-र्यथा प्रशस्याः सकृपैर्नृपैरपि ॥४२॥

अन्वयः—वनेचरैः, सार्धम्, उपात्तकिंशुकाः, विमुक्ताः, पटवः, शुकाः, तम्, तथा, अस्तुवन्, यथा, यशोभिः, विशदीकृताशयैः, सकृपैः, नृपैः, अपि, प्रशस्या ( सञ्जाता इति शेषः । ) ॥४२॥

वृत्तिः—वनेचरैः–वने कानने चरन्तीति वनेचराः, किरातप्रभृतयस्तैस्तथा । सार्धम्–सह । उपात्तकिंशुकाः–उपात्ताः–स्वीकृताः किंशुकाः, इत्युपात्तकिंशुकाः । विमुक्ताः–व्यक्ताः । जनेन–अध्याप्येति शेषः । पटवः–चतुराः । शुकाः–कीराः । तम्–श्रीमन्तं भगवन्तं शान्तिनाथमिति यावत् । तथा–तेन प्रकारेण । अस्तुवन्–अस्तुवन्तः–अवर्णयन्निति यावत् । यथा–येन प्रकारेण । यशोभिः–कीर्तिभिः। विशदीकृताशयैः–अविशदोऽस्वच्छो विशदः स्वच्छः कृतो विशदीकृतः अभूततद्भावेऽर्थे 'च्विः' प्रत्ययः, च्वौ परेऽवर्णस्येकारोऽन्तादेशश्च, विशदीकृत आशयोऽभिप्रायो येषान्ते विशदीकृताशयास्तैस्तथा । सकृपैः–कृपयाऽनुकम्पया सहिताः सकृपास्तैस्तथा । नृपैः–राजभिः, भगवदनुयायि-

भिर्नृपतिकदम्बकैरिति यावत्। अपि–सम्भावनायाम् । प्रशस्याः–प्रशंसनीयाः, सञ्जाता इति शेषः ॥४२॥

विभोः स्वशीलश्रुतिशालितालिभिः, समं निवृत्ताः सुरतेऽभिसारिकाः।
स्वरामृतोनोपजगुश्च सारिका, गृहे गृहे तच्चरितस्य कारिकाः ॥४३॥

अन्वयः—*विभोः, स्वशीलश्रुतिशालितालिभिः, समम्, अभिसारिकाः, सुरते, निवृत्ताः, च, सारिकाः, गृहे गृहे, तच्चरितस्य, कारिकाः, स्वरामृतेन, उपजगुः ॥४३॥*

वृत्तिः—**विभोः**–प्रभोः, स्वामिन इति यावत् । **स्वशीलश्रुतिशालितालिभिः**–स्वमात्मीयं शीलं चारित्रम्, स्वशीलम्, तस्य श्रुतिः श्रवणम्, स्वशीलश्रुतिस्तया शालिता शोभिताश्च ता आलयः सख्यः स्वशीलश्रुतिशालितालयस्ताभिस्तथा । **समम्**–सह । **अभिसारिकाः**–मदनेन मदेन वा याः श्लिष्टाः प्रियमभिसारयन्ति अभिसरन्ति वा तास्तथा । तथा च–भरतः—"हित्वा लज्जाभये श्लिष्टा मदेन मदनेन वा। अभिसारयते कान्तं सा भवेदभिसारिका" इति । **सुरते**–सम्भोगे । प्रियेभ्य इति शेषः । **निवृत्ताः**–निवृत्तिमुपगताः । **च**–पुनः । **सारिकाः**–पीतपादाः गोकिराटिका इति यावत् । 'शारिकेति तालव्यादिशब्दपाठादत्रापि तथैव पाठः साधीयान् प्रतिभातीति विचारणीयम् । **गृहे गृहे**–प्रतिगृहम्, प्रत्येकस्मिन्, सदन इति यावत्, विप्सायामर्थे द्विर्भावोऽवगन्तव्यः । **तच्चरितस्य**–तस्य भगवतः शान्तिनाथस्य चरितम्, वृत्तमिति यावत्, तच्चरितम्, तस्य तथा । **कारिकाः**–क्रियन्ते विरच्यन्ते यत्नेनेति कारिकाः श्लोकास्तास्तथा । कारिकाशब्दस्य श्लोकार्थत्वम् । यथा—"कारिकावली", "साकल्यकारिका" इत्यादौ प्रसिद्धमिति । **स्वरामृतेन**–स्वरो निषादर्षभादिरेवामृतम्–पीयूषम्, अथवा–स्वरोऽमृतमिवेत्युपमितसमासः "उपमेयं व्याघ्रादैः साम्यानुक्तौ" ३ । १ । १०२ ॥ इत्यनेनोपमितसमासः । **उपजगुः**–तुष्टुवुः ॥४३॥

सुरानुवृत्त्याऽप्सरसो, रसोर्मिभि–स्तरङ्गिताङ्ग्यः प्रभुवृत्तनर्तने ।
विभावयन्ति स्म सुविस्मयं हरे–स्तथैव तत्पौरुषगायनीकृताः ॥४४॥

अन्वयः—*हरेः, तत्पौरुषगायनीकृताः, रसोर्मिभिः, तरङ्गिताङ्ग्यः, अप्सरसः, सुरानुवृत्त्या, प्रभुवृत्तनर्तने, तथैव, सुविस्मयम्, विभावयन्ति स्म ॥४४॥*

वृत्तिः—**हरेः**–हरति दैत्यप्राणानिति हरिरिन्द्रस्तस्य तथा । **तत्पौरुषगायनीकृताः**–तस्य प्रभोः शान्तिनाथस्य पौरुषं पराक्रमस्तत्पौरुषम् तस्य गायना गायन्याश्च कृता गायनीकृताः । **रसोर्मिभिः**–अनुरागतरङ्गैः । **तरङ्गिताङ्ग्यः**–तरङ्गितमाप्लावितमङ्गं शरीरं यासान्तास्तरङ्गिताङ्ग्यः । **अप्सरसः**–

उर्वशीप्रमुखाः स्वर्वेश्याः । सुरानुवृत्त्या-सुराणां देवानामनुवृत्तिस्तया तथा । प्रभुवृत्तनर्तने-प्रभोः स्वामिनः शान्तिनाथस्य वृत्तं चरित्रम्, प्रभुवृत्तम् तस्य नर्तनं नटनम् प्रभुवृत्तनर्तनम्, तस्मात्तथा । तथैव-तेनैव प्रकारेण । सुविस्मयम्-सु-अतिशयितो विस्मय आश्चर्यं यस्मिन् कर्मणि तत् सुविस्मयं यथा स्यात्तथा । विभावयन्ति स्म-व्यभावयत ॥४४॥

इतीष्टगन्धाढ्यमटन्नसौ वनं, वधूतमाधूतमनाः स्वयौवनम् ।
त्रिवर्गसंसर्गनिसर्गसाधुधीः, पुपोष निर्दोषतयैव देवनैः ॥४५॥

अन्वयः—*इति, इष्टगन्धाढ्यम्, वनम्, अटन्, असौ, वधूतमाधूतमनाः, त्रिवर्गसंसर्गनिसर्गसाधुधीः, (सन्) देवनैः निर्दोषतयैव, स्वयौवनम्, पुपोष ॥४५॥*

वृत्तिः—इति-पूर्वोक्तप्रकारेण । इष्टगन्धाढ्यम्-इष्टोऽभीष्टश्चासौ गन्धो घ्राणतर्पणः, जनमनोहारी वा इष्टगन्धस्तेन आढ्यम्-समृद्धम्, इष्टगन्धाढ्यम् । वनम्-काननम् । अटन्-विचरन् । असौ-विप्रकृष्टो भगवाञ्छान्तिनाथः । वधूतमाधूतमनाः-वध्वः-सीमन्तिन्य एव तमा निशीथिन्यो वधूतमास्ताभ्यो धूतं त्यक्तं मनोऽन्तःकरणं यस्य स तथा । त्रिवर्गसंसर्गनिसर्गसाधुधीः-त्रिवर्गाणां धर्मार्थकामानां संसर्गः सम्पर्कस्त्रिवर्गसंसर्गस्तस्मिन् सत्यपि निसर्गात् स्वभावात् साध्वी समीचीना मोक्षोपयोगिनी धीर्बुद्धिर्यस्य स तथा । (सन्) देवनैः-रमणैः । निर्दोषतया-दोषेभ्यो दूषणेभ्यः पापेभ्य इति यावन्निर्गता निर्दोषास्तेषां भावो निर्दोषता तया तथा । स्वयौवनम्-निजयुवत्वम्, स्वीयतारुण्यमिति यावत् । पुपोष-अपोषयत् ॥४५॥

निधीयमानो हृदये सुरीजनैः, पिकोपगीतोऽपि शुकैः स्तुतोऽपि च ।
दिदृक्षितः कुण्डलिकामिनीमनो-रथैरथै प्रभुराप विष्णुताम् ॥४६॥

अन्वयः—*अथ, सुरीजनैः, हृदये, निधीयमानः, पिकोपगीतः, च, शुकैः, स्तुतः, अपि, कुण्डलिकामिनीमनोरथैः, दिदृक्षितः, एषः, प्रभुः, विष्णुताम्, आप ॥४६॥*

वृत्तिः—अथ-अनन्तरम् । सुरीजनैः-सुर्यो देवाङ्गना एव जनाः सुरीजनास्तैस्तथा । हृदये-अन्तःकरणे । निधीयमानः-संस्थाप्यमानः । पिकोपगीतः-पिकैः कोकिलैरुपगीतो वर्णितः पिकोपगीतः । च-पुनः । शुकैः-कीरैः । स्तुतः-प्रशंसितः । अपि-सम्भावनायाम् । कुण्डलिकामिनीमनोरथैः-कुण्डलाकारताऽस्त्येषामिति कुण्डलिनः सर्पास्तेषां कामिन्यो रमण्यो कुण्डलिकामिन्यस्तासां मनोरथा अभिलाषाः कुण्डलिकामिनीमनोरथास्तैस्तथा । दिदृक्षितः-दर्शनेच्छाविषयीकृतः । एषः-प्रसिद्धत्वात् । पुरोवर्तितयैव दृश्यमानः । प्रभुः-विभुः, ईश्वर इति यावत् । विष्णुताम्-वेवेष्टि

जगत्सर्वमिति विष्णुर्व्यापको तस्य भावो विष्णुता तान्तथा । आप-प्राप, अध्यगच्छदिति यावत् ॥४६॥

सुधाभुजामप्यतिशायिशासनाद्, निषेवितोऽयं वसुधाभुजां गणैः ।
अविन्दताऽऽमोदभरं बहिश्चरं, परं तमध्यात्मभरं दधौ चिरम् ॥४७॥

अन्वयः—सुधाभुजाम्, अपि, अतिशायिशासनात्, अयम्, वसुधाभुजाम्, गणैः, निषेवितः, बहिश्चरम्, आमोदभरम्, अविन्दत, परम्, तम्, अध्यात्मभरम्, चिरम्, दधौ ॥४७॥

वृत्तिः—सुधाभुजाम्-सुधाममृतं भुञ्जते भक्षयन्तीति यावत्, सुधाभुजो देवास्तेषां तथा । अपि-सम्भावनायाम् । अतिशायिशासनात्-अतिशेतेऽतिक्रामति सर्वमित्यतिशायि तच्च तच्छासनमनुशासनमतिशायिशासनम् तस्मात्तथा । अयम्-श्रीमाँश्चक्री शान्तिनाथ इति यावत् । वसुधाभुजाम्-वसुधां पृथिवीं भुञ्जन्ति पालयन्ति इति वसुधाभुजो राजानः, मध्यलोकेशाः, मध्यमलोकपाला इति यावत् । गणैः-समूहैः । निषेवितः-निःशेषेण सेवितः सुपूजितः, इति यावत् । बहिश्चरम्-बाह्यम् । आमोदभरम्-हर्षातिशयम् । अविन्दत-अलभत । परम्-उत्कृष्टम्, श्रेष्ठमिति यावत् । तम्-प्रसिद्धम् । अध्यात्मभरम्-आत्मनि इत्यध्यात्मम् तस्य भरोऽतिशयस्तं तथा । चिरम्-चिरकालम्, बहुकालमिति यावत् । दधौ-अनुध्यातवान् चिन्तयामासेति यावत् ॥४७॥

प्रियत्वमास्थाय च भीमभूमनो-विनोदसिद्ध्यै विषयेष्वरज्यत ।
धियाऽऽमुनाऽमानि सुखं भवेऽभव-द्विदर्भसुभ्रूविरहेण नान्तरम् ॥४८॥

अन्वयः—च, अमुना, प्रियत्वम्, आस्थाय, भीमभूमनोविनोदसिद्ध्यैः, विषयेषु, अरज्यत, धिया, भवे, सुखम्, अमानि, विदर्भसुभ्रूविरहेण, आन्तरम्, (सुखम्) न, अभवत् ॥४८॥

वृत्तिः—च-पुनः । अमुना-श्रीमता भगवता शान्तिनाथेन । प्रियत्वम्-स्नेहम्, अनुरागमिति यावत् । आस्थाय-आधाय । भीमभूमनोविनोदसिद्ध्यै-भीमभुवः भीमदुहितुर्मनोऽन्तःकरणम् भीमभूमनस्तस्य विनोद आमोदो भीमभूमनोविनोदस्तस्य सिद्धिर्निष्पत्तिर्भीमभूमनोविनोदसिद्धिस्तस्यै तथा । विषयेषु-स्रक्चन्दनादिविषयकदम्बकेषु । अरज्यत-रज्यते स्म । धिया-बुद्ध्या । भवे-संसारे । सुखम्-निर्वृतिम्, सौख्यमिति यावत् । अमानि-ज्ञातम् । विदर्भसुभ्रूविरहेण-विदर्भसुभ्रूर्वाविदर्भजाया विरहो विच्छेदः विप्रयोग इति यावत् । विदर्भसुभ्रूविरहस्तेन तथा । आन्तरम्-आभ्यन्तरिकम् । वास्तविकमिति यावत् । (सुखम्) न-नहि । अभवत्-अभूत् ॥४८॥

करेण मीनं निजकेतनं दधत्, स्मरः स्वरूपोपमया तमाश्रयत् ।
ततो रिरंसुः सुहृदा यथेच्छया, वने दिदीपे समधुर्मधुव्रतैः ॥४९॥

अन्वयः—*निजकेतनम्, मीनम्, करेण, दधत्, स्मरः, स्वरूपोपमया, तम्, आश्रयत्, ततः, सुहृदा, यथेच्छया, रिरंसुः, समधुः, (सन्) वने, मधुव्रतैः, दिदीपे ॥४९॥*

वृत्तिः—निजकेतनम्–निजं स्वीयम् आत्मीयमिति यावत्, केतनं लाञ्छनम् चिह्नमिति यावत्, निजकेतनम् । मीनम्–मत्स्यम् । करेण–हस्तेन । दधत्–धारयन् । स्मरः–कामः, कन्दर्प इति यावत् । स्वरूपोपमया–स्वस्य आत्मनो रूपं सौन्दर्य्यम् स्वरूपम् तस्य उपमा साहश्यम् स्वरूपोपमा तया तथा । तम्–कामतुल्यसौन्दर्य्यवत्तया प्रसिद्धं भगवन्तं शान्तिनाथमिति यावत् । आश्रयत्–अवालम्बत, समाश्रितवानिति यावत् । ततः–तदनन्तरम् । सुहृदा–मित्रेण । यथेच्छया–स्वेच्छानुसारम् । रिरंसुः–रन्तुमिच्छुः, रमणाभिलाष इति यावत् । समधुः–मधुना वसन्तेन सहितस्तथा । (सन्) वने–कानने । मधुव्रतैः–भ्रमरैः । दिदीपे–दिद्युते, बभ्राजेति यावत् । तथा च कुमारसम्भवे कालिदासः–"मधुश्च ते मन्मथसाहचर्य्यादसावनुक्तोऽपि सहाय एव । समीरणो नोदयिता भवेति, व्यादिश्यते केन हुताशनस्य" ।

इति एतावता मधुना कामस्य मित्रत्वं सूचितमिति भावः ॥४९॥

पवित्रितोऽसावृषिकुल्यया लयात्, द्रुमालवालाम्बुनिवेशशङ्कया ।
सुसौरभासानुगतोऽथ तापसे, द्विधापि सन्तापनतापमादधौ ॥५०॥

अन्वयः—*द्रुमालवालाम्बुनिवेशशङ्कया, ऋषिकुल्यया, लयात्, असौ, पवित्रितः, अथ, सुसौरभासानुगतः, तापसे, द्विधा, अपि, सन्तापनतापम्, आदधौ ॥५०॥*

वृत्तिः—द्रुमालवालाम्बुनिवेशशङ्कया–द्रुमाणां वृक्षाणामालवालानि आवालानि द्रुमालवालानि तेष्वम्बु जलम् द्रुमालवालाम्बु तस्मिन्निवेशशङ्का द्रुमालवालाम्बुनिवेशशङ्का तया तथा । ऋषिकुल्यया–ऋषीणामनगाराणां, मुनीनामिति यावत् । कुल्या–कृत्रिमाल्पसरित् ऋषिकुल्या तया । लयात्–संश्लेषात् । असौ–चक्री, भगवाञ्छान्तिनाथ इति यावत् । पवित्रितः–पवित्रीकृतः । अथ–अनन्तरम् । सुसौरभासाऽनुगतः–सूरस्य सूर्यस्येयम् सौरी सा चासौ भाः किरणम्, सौरभाः, सु–समीचीना चासौ सौरभा सुसौरभास्तया तथा, अनुगतः सुसम्बद्धः । पक्षे—सु–सुष्ठु सौरभेण वसन्तभावेन, आसानु शिखरं मर्य्यादीकृत्य गतः प्राप्तस्तथा । तापसे–तप एव तापसम् तस्मिन्,

द्विधापि–उभयविधमपीति यावत् । अन्तः कामरूपम् बहिः सूर्य्यतापरूपञ्चेति यावत् । सन्तापनतापम्–सूर्य्यसम्बधिनं तापमित्यर्थः । आदधौ–दधार, धारयामासेति यावत् ॥५०॥

**मधुव्रतज्याजुषि पुष्पकार्मुके, निधीयमानेऽथ खगे युगेषुणा ।**
**व्यतर्कि सर्वर्तुवने घने मधुं, सहायमाधाय कृता हतिर्नृणाम् ॥५१॥**

अन्वयः—*अथ, मधुव्रतज्याजुषि, पुष्पकार्मुके, युगेषुणा, खगे, निधीयमाने, घने, सर्वर्तुवने, मधुम्, सहायम्, आधाय, कृता, नृणाम्, हतिः, व्यतर्कि ॥५१॥*

वृत्तिः—अथ–अनन्तरम् । मधुव्रतज्याजुषि–मधुव्रता भ्रमरा एव ज्या मौर्वी मधुव्रतज्या तां जुषते सेवते आश्रयतीति यावत् तस्मिँस्तथा । पुष्पकार्मुके–पुष्पाणि कुसुमान्येव कार्मुकं धनुः पुष्पकार्मुकम् तस्मिँस्तथा । युगेषुणा–कामेन । खगे–खे आकाशे गच्छतीति खगो बाणस्तस्मिँस्तथा । निधीयमाने–संस्थाप्यमाने । घने–सान्द्रे, निबिडे इति यावत् । सर्वर्तुवने–सर्वतौ सर्वस्मिन् ऋतौ सप्रसवम्, सर्वर्तुसप्रसवम् तच्च तद्वनम् काननम्, सर्वर्तुवनम् "मयूरव्यंसकेत्यादयः" ३ । १ । ११६ ॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासः । मधुम्–वसन्तम् । सहायम्–सहायकम् । आधाय–निधाय, समासाद्येति यावत् । कृता–विहिता । नृणाम्–मानवानाम् । हतिः–घातिः । व्यतर्कि–तर्किता, तर्कविषयमानीतेति यावत् । लोकैरिति शेषः ॥ ५१ ॥

**खगे द्विधा रागिणि पद्मिनीगणे, स्फुटे करस्पर्शनजाङ्गजज्वरे ।**
**स्वलोकसाम्राज्यममंस्त निर्भयं, स मित्रमत्रानुसरन्निव स्मरः ॥५२॥**

अन्वयः—*द्विधा, रागिणि, पद्मनीगणे, करस्पर्शनजाङ्गजज्वरे, खगे, स्फुटे, ( सति ) अत्र, निर्भयम्, मित्रम्, अनुसरन्, इव, सः, स्मरः, स्वलोकसाम्राज्यम्, अमंस्त ॥५२॥*

वृत्तिः—द्विधा–प्रकारद्वयेन । रागिणि–रागोऽनुरागो लौहित्यञ्चास्त्यास्येति रागी तस्मिँस्तथा । पद्मिनीगणे–पद्मनीलक्षणकलितप्रमदाकदम्बके कमलिनीसमूहे च । करस्पर्शनजाङ्गजज्वरे–करस्पर्शनजः हस्तसंस्पर्शजनितोऽङ्गजज्वरः कामसन्तापो यस्मात् स करस्पर्शनजाङ्गजज्वरस्तस्मिँस्तथा । खगे–बाणे । स्फुटे–प्रकटे सतीति शेषः । अत्र–अस्मिन्, कानने इति यावत् । निर्भयम्–भयरहितं यथा स्यात्तथा । मित्रम्–सुहृदम् सूर्य्यं वा सतेजसम् । अनुसरन्–अनुगच्छन्, स्वयमपि, तथा भवन्निति यावत् । इव–यथा । सः–सर्वलोकप्रसिद्धः । स्मरः–कामः कन्दर्प इति यावत् । स्वलोक-

साम्राज्यम्-स्वलोकस्य निजजनस्य, साम्राज्यमाधिपत्यम्, स्वलोकसाम्राज्यम् तत्तथा । अमंस्त-अमन्यत, अवबुध्यते स्मेति यावत् ॥५२॥

लताबलालास्यकलागुरुस्तरुः, शमी रणाद् न ह्यभवत् समीरणात् ।
स किङ्किरातोऽपि किरातजातवद्, भियेऽध्वगानां सपलाशवासनः ॥५३॥

अन्वयः—*लताबलालास्यकलागुरुः, तरुः, रणात्, न, शमी, अभवत्, हि, सपलाशवासनः, सः, किङ्किरातः, अपि, समीरणात्, किरातजातवत्, अध्वगानाम्, भिये, (अभवत्) ॥५३॥*

वृत्तिः—लताबलालास्यकलागुरुः-लता वल्लय एव अबला लताबलास्तासां लास्यकला नृत्यविद्या लताबलालास्यकला तस्या गुरुरध्यापकस्तथा । तरुः-वृक्षः । रणात्-युद्धात् शब्दाद्वा । न-नहि । शमी-शान्तः । अभवत्-अभूत् । हि-निश्चयेन । सपलाशवासनः-पलाशस्य मांसभक्षणस्य वासनाऽभिध्या, सङ्कल्प इति यावत् पलाशवासना, तया सहितः सपलाशवासनः । सः-प्रसिद्धः । किङ्किरातः-कुरण्टकः । अपि-सम्भावनायाम् । समीरणात्-वायोः, सकाशादिति शेषः । किरात-जातवत्-किरन्ति शरानिति किराता भिल्लाः पुलिन्दा इति यावत्, तेषां जातवत् समूहः किरातजातम् तस्येव तथा । इवार्थे 'वत्' प्रत्ययः । अध्वगानाम्-पान्थानाम्, विरहिणामिति यावत् । भिये-भयाय, आतङ्कायेति यावत् । ( अभवत् ) ॥ ५३ ॥

रजो दधानामपि मल्लिवल्लिकां, प्रसूनगन्धोत्करपश्यतोहरः ।
जहौ न दूरे मधुपोऽन्धसाऽऽदरा-दहोऽलिमत्ते समये न चेतना ॥५४॥

अन्वयः—*प्रसूनगन्धोत्करपश्यतोहरः, मधुपः, दूरे, (स्थितेऽपि) अन्धसा, आदरात्, रजः, दधानाम्, अपि, मल्लिवल्लिकाम्, न, जहौ, अहो, अलिमत्ते समये, चेतना, न ॥५४॥*

वृत्तिः-प्रसूनगन्धोत्करपश्यतोहरः-प्रसूननानाम् पुष्पाणां गन्धोत्करः गन्धसमूहः प्रसून-गन्धोत्करस्तस्य पश्यतोहरश्चोरस्तथा । "पश्यद्वाग्दिशः हरयुक्तिदण्डे" ३ । २ । ३२ ॥ इत्यनेन षष्ठ्या अलुक् । मधुपः-भ्रमरः मधुकर इति यावत् । दूरे-विप्रकृष्टे स्थितोऽपीति शेषः । अन्धसा-भोजनेन । आदरात्-सत्कारात्, स्नेहादिति यावत् । रजः-धूलिम्, परागमिति यावत् । दधानाम्-धारयन्तीम् । अपि-सम्भावनायाम् । मल्लिवल्लिकाम्-मल्लिकावल्लरीम् । न-नहि । जहौ-तत्याज । अहो-आश्चर्य्यम् । अलिमत्ते-भ्रमरगुञ्जारवपरिपूर्णे इत्यर्थः । समये-काले कुसुमाकर समय इति यावत् । चेतना-चैतन्यम्, कर्त्तव्याकर्तव्यविवेक इति यावत् । न-नहि । तिष्ठतीति शेषः ॥ ५४ ॥

**स्फुटार्तवाङ्का धृतकामधीर्गजं, प्रभिन्नगण्डं तदचण्डगर्जितम् ।**
**असेवतामुं मधुगन्धवारिणि, ह्रदे मदेनोच्चकरे करेणुका ॥५५॥**

*अन्वयः---स्फुटार्तवाङ्का, धृतकामधीः, करेणुका, प्रभिन्नगण्डम्, तदचण्डगर्जितम्, अमुम्, गजम्, उच्चकरे, ह्रदे, मधुगन्धवारिणि, मदेन, असेवत ॥५५॥*

**वृत्ति.**---स्फुटार्तवाङ्का-ऋतौ रजसोऽयमार्तवः, ऋतुसम्बन्धी, स्फुटो व्यक्त आर्तवोऽङ्कश्चिह्नं यस्याः सा तथा। धृतकामधीः-धृता कामधीः-स्मरबुद्धिर्यया सा तथा। करेणुका-हस्तिनी करोति प्रमोदमिति करेणुः सैव करेणुकेति बोध्यम्। प्रभिन्नगण्डम्-प्रभिन्नौ गण्डौ, करटौ, कटौ वा यस्य स प्रभिन्नगण्डस्तं तथा। तदचण्डगर्जितम्-तस्मादचण्डमनल्पमुग्रं गर्जितम् गर्जनम् यस्य स तदचण्डगर्जितस्तं तथा। अमुम्-विप्रकृष्टम्। गजम्-हस्तिनम्। उच्चकरे-उच्चोऽतिशयितकरो रश्मिर्यस्य स तस्मिँस्तथा। वस्तुतस्तु 'उच्चकरम्' इति पाठः समीचीनस्तावतापि च्छेकानुप्राससंरक्षणसम्भवात् व्यञ्जनसङ्घस्यैव सकृदावृत्तौ तत्स्वीकारात् "वर्णसाम्यमनुप्रासश्छेकवृत्तिगतो द्विधा। सोऽनेकस्य सकृत् पूर्व एकस्याप्यसकृत् परः" इति काव्यप्रकाशात् ह्रदे उच्चकरत्वविशेषणस्यानतिप्रयोजनकत्वाच्चेति विचारणीयम्। गजविशेषणतया द्वितीयान्तपाठे तु उच्चः करः शुण्डा यस्य स उच्चकरस्तंतथा। यद्वा उच्चं कं जलम् उच्चकम् तस्य रा लक्ष्मीः शोभा यस्मिन् स उच्चकरस्तस्मिँस्तथा। ह्रदे-अगाधजलसरोवरे। द्रहे इति यावत्। मधुगन्धवारिणि-मधु मद्यञ्च गन्धश्च मधुगन्धौ ताभ्यां सहितं वारि जलम् मधुगन्धवारि तस्मिँस्तथा। मदेन-हर्षेण। असेवत-सेवितवती ॥५५॥

**द्विधा बलं प्राप्य च सौरभस्थिते-रनूनसूनस्पृगसेव्यताङ्घ्रिभिः ।**
**सरिद्वरात्यक्तनिषद्वराम्भसि, प्रणीतलीलाप्लवनो वनानिलः ॥५६॥**

*अन्वयः---च, सौरभस्थितेः, द्विधा, बलम्, प्राप्य, सरिद्वरात्यक्तनिषद्वराम्भसि, प्रणीतलीलाप्लवनः, अनूनसूनस्पृक्, वनानिलः, अङ्घ्रिभिः, असेव्यत ॥५६॥*

**वृत्तिः**---च-पुनः। सौरभस्थितेः-सौरभस्य सौगन्ध्यस्य स्थितिः सत्ता सौमभस्थितिस्तस्यास्तथा। द्विधा-द्विविधम्। बलम्-सामर्थ्यम्। प्राप्य-समधिगत्य। सरिद्वरात्यक्तनिषद्वराम्भसि-अत्यक्तो निषद्वरो जम्बालं येन तदत्यक्तनिषद्वरम् तच्च तदम्भो जलम् अत्यक्तनिषद्वराम्भः, सरिद्वरस्य नदीश्रेष्ठस्य अत्यक्तनिषद्वराम्भः, सरिद्वरात्यक्तनिषद्वराम्भस्तस्मिँस्तथा। प्रणीतलीलाप्लवनः-प्रणीतं कृतं लीलाप्लवनं जलक्रीडा येन स तथा। अनूनसूनस्पृक्-अनूनानि प्रचुराणि च तानि सूनानि प्रसू-

नानि, कुसुमान्यनूनसूनानि तानि स्पृशतीति तथा। वनानिलः-काननपवनः। अङ्घ्रिभिः-पाणिभिः। असेव्यत-समाश्रीयत, सेवित इति यावत् ॥५६॥

अथ स्वमादाय भयेन मन्थनात्, तडागभागव्यपदेशलेशतः।
पुरोपकण्ठे शरणागतं प्रभुः, कदाचिदम्भोधिमिह व्यलोकयत् ॥५७॥

अन्वयः—*अथ, कदाचित्, प्रभुः, मन्थनात्, भयेन, स्वम्, आदाय, तडागभागव्यपदेशलेशतः, इह, पुरोपकण्ठे, शरणागतम्, अम्भोधिम्, व्यलोकयत् ॥५७॥*

वृत्तिः—अथ-अनन्तरम्। कदाचित्-अकस्मात्, जातुचित्। मन्थनात्-देवासुरकर्तृकमन्दराचलादिकरणविलोडनात्। भयेन-भीत्या। स्वम्-धनम्। आदाय-गृहीत्वा। तडागभागव्यपदेशलेशतः-तडागभागस्य-कासारैकदेशस्य व्यपदेशलेशो व्याजलवस्तडागभागव्यपदेशलेशस्तस्मात्तथा। इह-अत्र। पुरोपकण्ठे-नगरसमीपे। शरणागतम्-शरणे-रक्षणे, आगतः-समायातः शरणागतस्तं तथा। अम्भोधिम्-अम्भांसि जलानि धीयन्तेऽस्मिन्निरयम्भोधिः समुद्रस्तं तथा। व्यलोकयत्-अपश्यत् ॥५७॥

जडात्मकत्वादुपभोग्यताच्युतं, चिरत्नरत्नाधिकमुत्थितं चिरात्।
दधत् त्वधः स्वं विभवं स चक्रिणा-प्युपाललम्भे कृपणक्रियाश्रिया ॥५८॥

अन्वयः—*तु, जडात्मकत्वात्, उपभोग्यताच्युतम्, चिरत्नरत्नाधिकम्, चिरात्, उत्थितम्, स्वम्, विभवम्, अधः, दधत्, सः, चक्रिणा, कृपणक्रियाश्रिया, उपाललम्भे, अपि ॥५८॥*

वृत्तिः—तु-पुनः। जडात्मकत्वात्-जडश्चैतन्यविहीन आत्मा स्वरूपं स्वभावो वा यस्य स जडात्मकस्तस्य भावो जडात्मकत्वम् तस्मात्तथा। उपभोग्यताच्युतम्-उपभोक्तुं योग्यमुपभोग्यम्, तस्य भाव उपभोग्यता तया च्युतो रहित उपभोग्यताच्युतस्तं तथा। चिरत्नरत्नाधिकम्-चिरत्नानि-चिरन्तनानि प्राचीनानीति यावच्चरितानि रत्नानि चिरत्नरत्नानि ऐरावतादयस्तैरप्यधिकश्चिरत्नरत्नाधिकस्तं तथा। चिरात्-बहुकालात्। उत्थितम्-समृद्धम्। उषितमिति पाठेऽप्यर्थे न कोऽपि भेदः वृद्धिंगतमिति तदर्थः। स्वम्-आत्मीयम्। विभवम्-ऐश्वर्य्यम्, धनमिति यावत्। अधः-अन्तः। दधत्-धारयन्। सः-अम्भोधिः। चक्रिणा-चक्रवर्तिना, शान्तिनाथेन। कृपणक्रियाश्रिया-कृपणानां-कदर्य्याणां त्यक्तसद्व्ययानामिति यावत्। क्रिया-आचरणम् कृपणक्रिया तदुचिता श्रीर्लक्ष्मीः कृपणक्रियाश्रीस्तया तथा। वस्तुतस्तु 'कृपणक्रियाश्रयात्' इत्येवपाठः साधीयानिति सुधीभिर्विभावनीयम्।

कृपणक्रियाया आश्रय आश्रयणम् कृपणक्रियाश्रयस्तस्मात्तथा । उपाललम्भे-उपालभ्यते स्म । अपि-सम्भावनायाम् ॥५८॥

वदान्यलोकेन कृताः प्रपास्त्रपां, कथं न धत्से रसभृत् समीक्ष्य ताः ।
निलीय तस्मिन्निवसन्नपांनिधि--र्भवानतस्त्वां मकराकराऽस्तु धिक् ॥५९॥

*अन्वयः*—मकराकर!, वदान्यलोकेन, कृताः, ताः, प्रपाः, समीक्ष्य, त्रपाम्, कथम्, न, धत्से, अपांनिधिः, (सन्नपि) रसभृत्, भवान्, तस्मिन्, निलीय, निवसन्, (अस्ति) अतः, त्वाम्, धिक् ॥५९॥

वृत्तिः—मकराकर!—मकराणां जलजन्तुविशेषाणामाकरः खानिराधार इति यावत् मकराकरस्तदामन्त्रणे तथा । वदान्यलोकेन—वदान्यो दानशीलश्चासौ लोको जनो वदान्यलोकस्तेन तथा । कृताः—विहिताः । ताः—लोकोपकारकत्वेन प्रसिद्धाः । प्रपाः—प्रपिबन्त्यास्विति प्रपाः, पानीयशालास्तास्तथा । समीक्ष्य—समवलोक्य । त्रपाम्—लज्जाम् । कथम्—केन हेतुना । न—नहि । धत्से—धारयसि । अपांनिधिः—अपांपतिरिति यावत् । (सन्नपि) रसभृत्—रसान् मधुरादीन् । बिभर्ति धारयति इति रसभृत् । भवान्—भवल्लक्षणः त्वमिति यावत् । तस्मिन्—पुरोपकण्ठे । निलीय—प्रच्छन्नीभूय । निवसन्—वासं कुर्वन् । (अस्ति) अतः—अस्मात्कारणात् । त्वाम्—त्वल्लक्षणं जनम् । धिक्—तव धिक्कारोऽस्त्वित्यर्थः । "गौणात्-समया-निकषा-हा-धिगन्तरान्तरेण" २।२।३३॥ इत्यनेन धिक्शब्दयोगे द्वितीया । यज्जगन्नाथः कविः-'याते मय्यचिरान्निदाघसमये, ज्वालाशतैः शुष्कतां गन्ता कं प्रति पान्थसन्ततिरसौ, सन्तापमालाकुला । इत्थं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते, धन्यं जीवनमस्य मार्गसरसो धिग् वारिधीनां जनुः' इति ॥५९॥

इतीव मन्ये भगवद्गवीरसात्, सीतोपदेशां स सुधां सुधारयन् ।
विशिष्य पुष्यन् वसुधां रसागमै-र्वने तडागो ददृशेऽवनीभुजा ॥६०॥

*अन्वयः*—भगवद्गवीरसात्, सितोपदेशाम्, सुधाम्, सुधारयन्, रसागमैः, विशिष्य, वसुधाम्, पुष्यन्, इव, तडागः, वने, अवनीभुजा, ददृशे, इति, मन्ये ॥६०॥

वृत्तिः—भगवद्गवीरसात्—भगवतो महामहिमशालिनः शान्तिनाथस्य गौर्वाणी भगवद्गवी "गोस्तत्पुरुषात्" ७।३।१०५॥ इत्यनेन समासान्तोऽट्प्रत्ययष्टित्वान्ङीश्च तस्या रस आस्वादो भगवद्गवीरसस्तस्मात्तथा । सितोपदेशाम्—सितः शुक्लः उपदेशः प्रतिबोधो यस्यां सा सितोपदेशा

तां तथा । सुधाम्–अमृतम् । धारयन्–सम्यग्बिभ्रत् । रसागमैः–रसस्य तिक्तादेरागमाः सम्प्राप्तयो रसागमास्तैस्तथा । विशिष्य–विशेषरूपेण । वसुधाम्–पृथिवीम् । पुष्यन्–पोषयन्, पालयन्निति यावत् । इव–यथा । तडागः–पद्माकरः, कासार इति यावत् । वने–कानने । अवनीभुजा–अवनीं "पृथिवीं भुनक्ति पालयति इत्यवनीभुक् तेन तथा । राज्ञा शान्तिनाथेनेति यावत् । ददृशे–दृष्टः । इति–एवम् । मन्ये–अवबुध्ये, जानामि इति यावत् ॥६०॥

पयोनिलीनाऽभ्रमुकामुकावली–बलीयसां राजिरमुष्य दन्तिनाम् ।
पिपासुराक्रान्तिपदाद् दिवा दिवा, पुरस्य साम्यं सरसोऽब्धिनाऽवदत् ॥६१॥

*अन्वयः––पयोनिलीनाभ्रमुकामुकावलीबलीयसाम्, अमुष्य, दन्तिनाम्, दिवा, आक्रान्तिपदात्, पिपासुः, राजिः, दिवा, पुरस्य, अब्धिना, सरसः, साम्यम्, अवदत् ॥६१॥*

वृत्तिः––पयोनिलीनाऽभ्रमुकामुकावलीबलीयसाम्–पयसि जले, निलीना निमग्नाः पयोनिलीनास्ते च ते अभ्रमुकामुकाः–ऐरावता यद्धैमः 'ऐरावणोऽभ्रमातङ्गश्चतुर्दन्तोऽर्कसोदरः । ऐरावतो हस्तिमल्लः, श्वेतगजोऽभ्रमुप्रियः ॥२–॥९१॥ इति, अभ्रमुप्रियाभ्रमुकामुकौ समानार्थकाविति । पयोनिलीनाभ्रमुकामुकास्तेषामावलिः राजिः समूह इति यावत्, पयोनिलीनाभ्रमुकामुकावली, तत्र बलीयांसोऽतिशयेन बलवन्तः पयोनिलीनाभ्रमुकामुकावलीबलीयांसस्तेषां तथा । अमुष्य–चक्रिणः । दन्तिनाम्–करटिनाम्, मतङ्गजानामिति यावत् । दिवा–दिवसे । आक्रान्तिपदात्–आक्रमणस्थानात् । पिपासुः–पानेच्छवती । राजिः–श्रेणी । दिवा–स्वर्गेण । पुरस्य–राजधानीरूपात्मनगरस्य । अब्धिना–समुद्रेण । सरसः–सरोवरस्य, कासारस्येति यावत् । साम्यम्–तुलनाम् । अवदत्–अकथयत् ॥६१॥

जलान्तसद्भिन्नमदान्धसिन्धुर–रदाननन्तोरगपुच्छसच्छवीन् ।
निरीक्ष्य मेने नगरीं नु भोगिनां, समापतन्तीं जिनसेवया जनः ॥६२॥

*अन्वयः––जनः, अनन्तोरगपुच्छसच्छवीन्, जलान्तसद्भिन्नमदान्धसिन्धुररदान्, निरीक्ष्य, नु, जिनसेवया, समापतन्तीम्, भोगिनाम्, नगरीम्, मेने ॥६२॥*

वृत्तिः––जनः–लोकः । अनन्तोरगपुच्छसच्छवीन्–अनन्तोरगः अनन्तसंज्ञक उरगः सर्पः शेष इति यावत्, अनन्तोरगस्तस्य पुच्छं–लाङ्गूलम्, अनन्तोरगपुच्छम्, तद्वत् सुच्छविः–शोभनदीप्तिर्येषान्ते अनन्तोरगपुच्छसच्छवयस्तांस्तथा । जलान्तसद्भिन्नमदान्धसिन्धुररदान्–सन्तः साधवश्च भिन्ना गर्जिताः सद्भिन्नाः, सद्भ्यो भिन्ना अतिरिक्ता इतरे इति यावत् वा सद्भिन्नाः ते च ते

मदान्धा मदमत्ताः सद्भिन्नमदान्धाः ते च ते सिन्धुराः सामयोनयो मतङ्गजा इति यावत्, सद्भिन्नमदान्धसिन्धुरास्तेषां रदा दन्ता सद्भिन्नमदान्धसिन्धुररदास्ताँस्तथा । निरीक्ष्य–समवलोक्य । नु–वितर्के । जिनसेवया–जिनस्य कृथकृतः सेवा शुश्रूषा जिनसेवा तया तथा । हेत्वर्थे तृतीया तथा च जिनसेवानिमित्तमिति यावत् । समापतन्तीम्–समागच्छन्तीम् । भोगिनाम्–सर्पाणाम्, नागानामिति यावत् । नगरीम्–पुरीम् । मेने–अवाबुध्यत ॥६२॥

जिनेशितुर्दर्शनलालसाऽलसा–भुजङ्गकन्या हसितोन्मुखश्रियः ।
जलार्द्धरुद्धस्य तटान्तभूभिदः, पदात् पयोजन्मवनस्य रेजिरे ॥६३॥

*अन्वयः*—*जिनेशितुः, दर्शनलालसालसाः, हसितोन्मुखश्रियः, भुजङ्गकन्याः, जलार्द्धरुद्धस्य, तटान्तभूभिदः, पयोजन्मवनस्य, पदात्, रेजिरे ॥६३॥*

वृत्तिः—जिनेशितुः–जिनस्तीर्थकृदेव ईशिता प्रभुर्जिनेशिता, तस्य तथा । दर्शनलालसालसाः–दर्शनस्यावलोकनस्य लालसा लिप्सा दर्शनलालसा तयाऽलसाः–क्रियानुन्मुखताशालिन्यस्तथा । हसितोन्मुखश्रियः–हसितेन–उन्मुखा श्रीः शोभा यासां तास्तथा । भुजङ्गकन्याः–भुजङ्गानां नागानां कन्याः, कुमारिका इति यावद्, भुजङ्गकन्याः । जलार्द्धरुद्धस्य–जलेन सलिलेन अर्द्धरुद्धम्–अर्द्धावृतम् जलार्द्धरुद्धम् तस्य तथा । तटान्तभूभिदः–तटान्ते तीरसमीपे भूर्भूमिस्तटान्तभूस्तां भिनत्तीति तटान्तभूभित्तस्य तथा । पयोजन्मवनस्य–पयोजन्मनां पयोजानां कमलानामिति यावद्वनम्–काननम् पयोजन्मवनम् तस्य तथा । पदात्–स्थानात् । रेजिरे–शुशुभे ॥६३॥

वशीकृते तत्सरसाप्सरोजने–ऽवतारमाप्ते प्रतिबिम्बितोडुभिः ।
सरोरुहे सौरभचौरबन्धनं, मृणालजालस्य मिषाद् बभार यः ॥६४॥

*अन्वयः*–*तत्सरसा, अप्सरोजने, वशीकृते, प्रतिबिम्बितोडुभिः, अवतारम्, आप्ते, सरोरुहे, मृणालजालस्य, मिषात्, यः, सौरभचौरबन्धनम्, बभार ॥६४॥*

वृत्तिः—तत्सरसा–तत्कासारेण । अप्सरोजने–अप्सरसः उर्वशीमुखाः स्वर्वेश्या एव जनो लोकोऽप्सरोजनस्तस्मिँस्तथा । वशीकृते–आयत्तीकृते, अधीनीकृते इति यावत् । "कृभ्वस्तिभ्यां कर्मकर्तृभ्याम्" ७ । २ । १२६॥ इत्यनेन प्रागतत्त्वेऽर्थे 'च्वि'प्रत्ययः, "ईश्च्वाववर्णस्यानव्ययस्य" ४ । ३ । १११॥ इत्यनेन च्वौ परेऽवर्णस्येकारोन्तादेशः । प्रतिबिम्बितोडुभिः–प्रतिबिम्बितास्तडाग–

प्रफलिताश्च ता उडवो नक्षत्राणि प्रतिबिम्बितोडवस्ताभिस्तथा । कृत्वेति शेषः । अवतारम्–अवतरत्वम् । आप्ते–समधिगते । सरोरुहे कमले । मृणालजालस्य–बिसकदम्बकस्य । मिषात्–व्याजात् छलादिति यावत् । यः–तडागः । सौरभचौरबंधनम्–सौरभस्य सुगन्धस्य चौराः स्तेनाः, अपहारका इति यावत्, सौरभचौरास्तेभ्यो बन्धनम्–बध्यते संयम्यतेऽनेनेति बन्धनम् । रज्ज्वात्मकम्, सौरभचौरबन्धनम् । बभार–धारयामास । नेदं मृणालजालमपि तु कमलसौरभापहारकस्तेनबन्धनार्थं रज्जुविशेष इत्यपह्नुत्यलङ्कारः ॥६४॥

**तटान्तविश्रान्ततुरङ्गमच्छटा–स्तटाक एष प्रतिबिम्बितैर्दधौ ।**
**अमन्दनन्दी सरसो जिगीषया, चलाचलोत्तुङ्गतरङ्गसङ्गमैः ॥६५॥**

अन्वयः—*अमन्दनन्दी, एषः, तटाकः, चलाचलोत्तुङ्गतरङ्गसङ्गमैः, सरसः, जिगीषया, प्रतिबिम्बितैः, (कृत्वा) तटान्तविश्रान्ततुरङ्गमच्छटाः, दधौ ॥६५॥*

वृत्तिः—अमन्दनन्दी–अमन्दमत्यन्तं नन्दयति प्रसादयति जनान्, तच्छीलस्तथा । एषः–प्रत्यक्षं दृश्यमानस्तटाकः कासारः । चलाचलोत्तुङ्गतरङ्गसङ्गमैः–चलाचलाश्चञ्चलाश्च त उत्तुङ्गा उन्नताश्चलाचलोत्तुङ्गास्ते च ते तरङ्गाः वीचयो भङ्गा वा चलाचलोत्तुङ्गतरङ्गास्तैः सङ्गमाः सम्पर्काश्चलाचलोत्तुङ्गतरङ्गसङ्गमास्तैस्तथा । सरसः–कासारस्य । जिगीषया–जेतुमिच्छा जिगीषा, तया तथा । प्रतिबिम्बितैः–प्रतिफलितैः । ( कृत्वेति शेषः ) । तटान्तविश्रान्ततुरङ्गमच्छटाः–तटान्ते तीरप्रान्ते विश्रान्ता विश्रान्तिमुपगताः स्थिता इति यावत्, तटान्तविश्रान्तास्ते च ते तुरङ्गमास्तुरगा हया इति यावत्, तटान्तविश्रान्ततुरङ्गमास्तेषां छटाः कदम्बकानि तटान्तविश्रान्ततुरङ्गमच्छटास्तथा । दधौ–धारयामास ॥६५॥

**पिनाकिनाकिप्रभुराजराजिभिः, समं तटस्थे क्षितिपे पटालये ।**
**स्फुटानुबिम्बोदयचुम्बनेन यः, स्फुटीचकाराप्सरसां प्रभोः सभाम् ॥६६॥**

अन्वयः—*यः, पिनाकिनाकिप्रभुराजराजिभिः, समम्, तटस्थे, पटालये, (स्थिते) क्षितिपे, स्फुटानुबिम्बोदयचुम्बनेन, अप्सरसाम्, भोः, सभाम्, स्फुटीचकार ॥६६॥*

वृत्तिः—यः–तटाकः । पिनाकिनाकिप्रभुराजराजिभिः–पिनाकी शङ्करश्च नाकिनः स्वर्गिणश्च प्रभवः स्वामिनश्च राजानो नृपतयश्च पिनाकिनाकिप्रभुराजानस्तेषां राजयः श्रेणयः कदम्बकानीति यावत् । पिनाकिनाकिप्रभुराजराजयस्तासां तथा । समम्–सह । तटस्थे–तीरप्रान्तविराज–

माने । पटालये—पटैर्वस्त्रैर्निर्मितः पटनिर्मितः, स चासावालयो निलयो गृहमिति यावत्, पटालयः—"मयूरव्यंसकेत्यादयः" ३ । १ । ११६ ॥ इत्यनेन शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासः तस्मिँस्तथा । स्थिते इति शेषः । क्षितिपे—क्षितिं पृथिवीं पाति रक्षतीति क्षितिपो राजा, शान्तिनाथ इति यावत् तस्मिँस्तथा । स्फुटानुबिम्बोदयचुम्बनेन—स्फुटः प्रकटश्चासावनुबिम्बोदयः प्रतिबिम्बोदयः स्फुटानुबिम्बोदयस्तस्य चुम्बनम् संयोगः स्फुटानु बिम्बोदयचुम्बनम् तेन तथा । अप्सरसाम्—उर्वशीप्रमुख-स्वर्वेश्यानाम् । प्रभोः—स्वामिनः । इन्द्रस्येत्यर्थः । सभाम्—परिषदम् । स्फुटीचकार—अस्फुटामप्रकटां स्फुटां चकार कृतवान् तथा ॥६६॥

जलान्तरुन्मज्जदनेककामिनी—मनोऽनुषङ्गात्तरलैरिवामलैः ।
बभौ चलद्वीचिकशान्तशातनै—र्हयानुबिम्बैरविलम्बमेव सः ॥६७॥

अन्वयः—सः, *जलान्तरुन्मज्जदनेककामिनीमनोऽनुसङ्गात्, इव, तरलैः, अमलैः, चलद्वीचि-कशान्तशातनैः, हयानुबिम्बैः, अविलम्बम्, एव, बभौ ॥६७॥*

वृत्तिः—सः—पुरोपकण्ठस्थितो वर्णितप्रकारविशेषस्तटाकः । जलान्तरुन्मज्जदनेककामि-नीमनोऽनुषङ्गात्—अनेका बह्वयश्च ताः कामिन्यो वामलोचनाः रमण्य इति यावत्, अनेककामिन्यः, जलान्तरुन्मज्जन्त्यः, सलिलान्तरवगाह्यमानाश्च ता अनेककामिन्यो जलान्तरुन्मज्जदनेककामिन्यस्तासां मनोऽनुषङ्गः चेतःसम्पर्को जलान्तरुन्मज्जदनेककामिनीमनोऽनुषङ्गस्तस्मात्तथा । इव—यथा । तरलैः—चञ्चलैः । अमलैः—स्वच्छैः, विशुद्धैरिति यावत् । चलद्वीचिकशान्तशातनैः—चलन्त्यश्चञ्चलाश्च ता वीचयस्तरङ्गाः स्वल्पतरङ्गा वा चलद्वीचयस्ता एव कशा अश्वताडन्यश्चलद्वीचिकशास्तदन्तैस्तत्प्रान्तभागैः शातनं ताडनं येषु तैस्तथा । हयानुबिम्बैः—तुरङ्गमप्रतिबिम्बैः । अविलम्बम्—सत्वरं यथा-स्यात्तथा । एव—अवधारणार्थकमव्ययम् । बभौ—शुशुभे ॥६७॥

तमेकमुच्चैःश्रवसं बिडौजसे, प्रकाशयन्तं मथितेऽपि चाशये ।
जिगाय वार्धिं तुरगानुबिम्बितैः, सहस्रमुच्चैःश्रवसामिव श्रयन् ॥६८॥

अन्वयः—*तुरगानुबिम्बितैः, उच्चैःश्रवसाम्, सहस्रम्, श्रयन्, इव, (यः) चः, आशये, मथिते, अपि, बिडौजसे, एकम्, उच्चैःश्रवसम्, प्रकाशयन्तम्, तम्, वार्धिम्, जिगाय ॥६८॥*

वृत्तिः—तुरगानुबिम्बितैः—तुरगाणामश्वानाम्, अनुबिम्बितानि प्रतिफलितानि तुरगानुबिम्बि-तानि तैस्तथा । उच्चैःश्रवसाम्—तदभिधानाश्वरत्नानां समुद्रोत्पन्नानामिति यावत् । सहस्रम्—दशश-

तीम् । श्रयन्-आश्रयन् । इव-यथा । (यः-तड़ागः) च-पुनः । आशये-तोयाधारे । मथिते-विलोडिते । अपि-सम्भावनायाम् । विड़ौजसे-वेवेष्टि व्याप्नोतीति विड् व्यापकमोजो बलं यस्य स विडौजा इन्द्रस्तस्मै तथा । एकम्-एकत्वसंख्याविशिष्टम् । उच्चैःश्रवसम्-तदाख्यसमुद्रमथनोद्भूत-मश्वरत्नम् । प्रकाशयन्तम्-प्रकटयन्तम् । प्रतिपादयन्तमिति यावत् । तम्-प्रसिद्धम् । वार्धिम्-जलनिधिम् । जिगाय-जितवान् अधरीचकारेति यावत् । तस्य एकोच्चैःश्रवोवत्त्वादात्मनश्च सहस्रस-ङ्ख्याकोच्चैःश्रवोवत्त्वादिति भावः ॥६८॥

सिताम्बुजानां निवहस्य यश्छलात्-पयोनिधेः पारगतं यशोभरम् ।
न्यवेदयत् पारगतस्य किन्नरैः, प्रगीयमानं लसदङ्गमानसैः ॥६९॥

अन्वयः—*यः, सिताम्बुजानाम्, निवहस्य, छलात्, लसदङ्गमानसैः, किन्नरैः, प्रगीयमानम्, पयोनिधेः, पारगतम्, पारगतस्य, यशोभरम्, न्यवेदयत् ॥६९॥*

वृत्तिः—यः-तड़ागः । सिताम्बुजानाम्-सितानि श्वेतानि च तान्यम्बुजानि कमलानि सिताम्बुजानि, तेषां तथा । निवहस्य-समूहस्य, कदम्बकस्येति यावत् । छलात्-व्याजात् । लसद-ङ्गमानसैः-अङ्गं शरीरञ्च मानसमन्तःकरणञ्च अङ्गमानसे येषान्ते लसदङ्गमानसास्तैस्तथा । किन्नरैः-देवयोनिविशेषैः । प्रगीयमानम्-प्रकर्षेण गीयमानम् । पयोनिधेः-समुद्रस्य । पारगतम्-अपरतटम-धिगतम् । पारगतस्य-संसारस्य प्रयोजनजातस्य वा पारं पर्यन्तभागं गतः पारगतः, परमेष्ठी जिन इति यावत्, तस्य तथा । यशोभरम्-यशसः कीर्तेर्भरोऽतिशयो यशोभरस्तन्तथा । न्यवेदयत्-व्यज्ञापयत् व्यस्तारयत् इति यावत् ॥६९॥

सरोरुहां तत्र च खण्डमण्डनं, बभावलिश्यामलितोदरश्रियाम् ।
स्वनाथदर्शिक्षितिकामिनीमुखं, विकस्वरेन्दीवरचारुनेत्रभृत् ॥७०॥

अन्वयः—*च, तत्र, अलिश्यामलितोदरश्रियाम्, सरोरुहाम्, खण्डमण्डनम्, विकस्वरेन्दीवर-चारुनेत्रभृत्, स्वनाथदर्शिक्षितिकामिनीमुखम्, बभौ ॥७०॥*

वृत्तिः—च-पुनः । तत्र-तस्मिंस्तटाके । अलिश्यामलितोदरश्रियाम्-अलिभिर्भ्रमरैः श्याम-लिता श्यामलीकृता उदरश्रीर्मध्यशोभा येषां तानि अलिश्यामलितोदरश्रीणि तेषान्तथा । सरोरुहाणाम्-कमलानाम् । खण्डमण्डनम्-खण्डं-विसाब्जादेव मण्डनमाभरणं यस्य तत्तथा । 'खण्डोऽस्त्रीविसमब्जादि'

इत्यमरः । विकस्वरेन्दीवरचारुनेत्रभृत्–विकस्वरं प्रस्फुटितञ्च तदिन्दीवरं–कमलम् नीलकमलमिति यावत्, विकस्वरेन्दीवरम्, तदेव, चारुनेत्रम्—शोभननयनम् विकस्वरेन्दीवरचारुनेत्रम्, जातावेकवचनम्, तद्बिभर्ति धारयति तथा । स्वनाथदर्शिक्षितिकामिनीमुखम्–क्षितिः पृथिव्येव कामिनी–रमणी, क्षितिः पृथिवी कामिनीव वा क्षितिकामिनी, स्वनाथं निजस्वामिनं पश्यति तच्छीला स्वनाथदर्शिनी सा चासौ क्षितिकामिनी स्वनाथदर्शिक्षितिकामिनी, कर्मधारयसमासः । "पुंवत् कर्मधारये" इत्यनेन पुंवद्भावश्च । तस्या मुखम् वदनम् तथा । बभौ–शुशुभे ॥७०॥

सकर्णिकं तत्र ललद्वधूमुखं, सपत्रलेखं कृतपद्मसौहृदम् ।
तमःसमच्छायकलङ्कसङ्कुलं, निरीक्ष्य चक्रे स्वमहर्निशं शशी ॥७१॥

अन्वयः—तत्र, कृतपद्मसौहृदम्, सकर्णिकम्, सपत्रलेखम्, ललत्, वधूमुखम्, निरीक्ष्य, शशी, अहर्निशम्, स्वम्, तमःसमच्छायकलङ्कसङ्कुलम्, चक्रे ॥७१॥

वृत्तिः—तत्र–तस्मिँस्तटाके । कृतपद्मसौहृदम्–कृतं विहितम् पद्मैः कमलैः, सौहृदम्–सख्यं येन तत् कृतपद्मसौहृदम, तत्तथा । सकर्णिकम्–कर्णिकया कर्णालङ्कारेण सहितम् सकर्णिकम् तत्तथा । सपत्रलेखम्–पत्रलेखेन रचनाविशेषेण सहितम्, सपत्रलेखम् तत्तथा । ललत्–विलासमादधत् । वधूमुखम्–वध्वा वनिताया मुखमेँ वदनम् वधूमुखम् । निरीक्ष्य–अवलोक्य । शशी–शशो मृगो लाञ्छनत्वेनास्त्यस्येति शशी चन्द्रः, "अतोऽनेकस्वरात्" ७ । २ । ६ ॥ इत्येन मत्वर्थे 'इन्' प्रत्ययः । अहर्निशम्–रात्रिन्दिवम् । स्वम्–आत्मानम् । तमःसमच्छायकलङ्कसङ्कुलम्–तमसा ध्वान्तेन समा तुल्या छाया दीप्तिः कान्तिर्वा यस्य स तमःसमच्छायः स चासौ कलङ्को गुरुतल्पगमनापवादः, तमःसमच्छायकलङ्कस्तेन सङ्कुलो व्याप्तस्तमःसमच्छायककलङ्कसङ्कुलस्तन्तथा । चक्रे–कृतवान् । उपमेयतया लोकप्रसिद्धे वधूमुखे कृतपद्मसौहृदत्वादिनाऽऽधिक्यवर्णनाद्व्यतिरेकालङ्कारः । "उपमानाद्यदन्यस्य व्यतिरेकः स एव सः" इति काव्यप्रकाशः ॥७१॥

अभात् सभा सा रसभासुरानना, नृपस्य नीरे प्रतिबिम्बिताश्रिता ।
यया तडागोऽब्जजयार्थमौर्जिजत्, कुलं सुधांशोर्बहुलं वहन्निव ॥७२॥

अन्वयः—नीरे, प्रतिबिम्बिताश्रिता, रसभासुरानना, नृपस्य, सा, सभा, अभात्, यया, तडागः, अब्जजयार्थम्, सुधांशोः, बहुलम्, कुलम्, वहन्, इव, औजिजत् ॥७२॥

वृत्तिः—नीरे–सलिले । तडागस्येति शेषः । प्रतिबिम्बिताश्रिता–प्रतिबिम्बितं प्रतिफलितमा-

श्रिता सेविता प्रतिबिम्बिताश्रिता। रसभासुराननाः–रसैः शृङ्गारादिभिरनुरागैर्वा भासुरं देदीप्यमानमाननं वदनम् यस्या सा तथा। नृपस्य–राज्ञः, शान्तिनाथस्येति यावत्। सा–प्रसिद्धा। सभा–परिषद्, समाज इति यावत्। अभात्–अदीप्यत, व्यराजतेति यावत्। यया–सभया। (करणेन) तडागः–कासारः। अभ्रजयार्थम्–अभ्रजयाय–मेघविजयायेदम् अभ्रजयार्थम् तद्यथास्यात्तथा। "तदर्थाऽर्थेन" ३। १। ७२॥ इत्यनेन समासः। सुधांशोः–चन्द्रस्य। बहुलम्–प्राज्यम्। प्रचुरमिति यावत्। कुलम्–सजातीयगणम्। वहन्–धारयन्। इव–यथा। ओर्जिजत्–ऊर्जितवान् (उत्प्रेक्षालङ्कारः)। 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् इति' मम्मटः ॥७२॥

रथाङ्गभाजा कमलानुषङ्गिणा, सरस्तदालोक्य स–सार–सं-गतम्।
क्षणाद् गणागाहननीरसं गतं, दधे मनोऽन्तर्भवनीरसङ्गतम् ॥७३॥

अन्वयः—*कमलानुषङ्गिणा, रथाङ्गभाजा, (तेन) ससार-सङ्गतम्, क्षणात्, गणागाहननीरसंगतम्, तत्, सरः, आलोक्य, अन्तर्भवनीरसङ्गतम्, मनः, दधे ॥७३॥*

वृत्तिः—कमलानुषङ्गिणा–कमला लक्ष्मीः, कमलमुत्पलम्, तया तेन च सह अनुषङ्गः सम्बन्धः कमलानुषङ्गः सोऽस्यास्तीति कमलानुषङ्गी तेन तथा। रथाङ्गभाजा–रथाङ्गं चक्रं भजतीति रथाङ्गभाक् तेन तथा। चक्रिणा तेन भगवता शान्तिनाथेनेति शेषः। ससारसङ्गतम्–सारं श्रेष्ठञ्च तत् सङ्गतम् मिलितम् सारसङ्गतम् तेन सहितं तथा। सारसेन हंसेन सहितं ससारसम् भावप्रधाननिर्देशतया ससारसतामित्यर्थः। गतं प्राप्तमिति वा। क्षणात्–उत्सवात्, उद्धर्षादिति यावत्। गणागाहननीरसंगतम्–गणस्य लोककदम्बकस्य आगाहनम्–सर्वतोभावेनावगाहनम् गणागाहनम्, तेन नीरसम्–भावप्रधाननिर्देशान्निरसत्वम्, गणागाहननीरसम्, तत्—गतं प्राप्तम्। तत्–वर्णितमहिमप्रसिद्धम्। सरः–कासारम्। आलोक्य–विलोक्य, दृष्ट्वेति यावत्। अन्तर्भवनीरसङ्गतम्–हृदयमध्यसमुत्पन्नजलसम्मिश्रमित्यर्थः। मनः–हृदयम्। दधे–धृतम् ॥७३॥

अकारि धर्मेण जगज्जया मया, शिली–मुखस्तोमसखेन शार्ङ्गिणा।
स चापरागः स्वत एव मां भजन्, परागसः किन्न विभागमानयेत् ॥७४॥

अन्वयः—*शिलीमुखस्तोमसखेन, शार्ङ्गिणा, मया, धर्मेण, जगज्जयः, अकारि, स्वतः, एव, माम्, भजन्, चापरागः, किम्, परागसः, विभागम्, न, आनयेत् ॥७४॥*

वृत्तिः—शिलीमुखस्तोमसखेन–शिलीमुखानां बाणानाम् स्तोमः समूहः शिलीमुखस्तोमः तस्य सखा मित्रम् शिलीमुखस्तोमसखः तेन तथा । "राजन्सखेः" ७ । ३ । १०६॥इत्यनेन समासान्तो 'ट' प्रत्ययः । शार्ङ्गिणा–शार्ङ्गम् धनुस्तदस्त्यस्येति शार्ङ्गी तेन तथा । धनुर्धरेणेति यावत् । मया–मल्लक्षणेन जनेन । धर्मेण–सुकृतेन, पुण्येनेति यावत् । जगज्जयः–जगतां भुवनानां जयो विजयो जगज्जयः अकारि–व्यधायि । कृत इति यावत् । यद्वा—"शिलीमुखस्तोमसखेन" इति शिली—मुखस्तोमसखेन इति पदद्वयम् । तत्र शिलीति जगज्जयस्य विशेषणवाचकम्; "शिलीमुखस्तोमसखेन" इति च धर्मेणेति-पदेन समानविभक्तिकम्, धर्मविशेषणवाचकम् एवञ्च शिलाः पाषाणाः सन्त्यस्येति शिली पर्वतः, शिलीव शिली लुप्तोपमा । महान् दुष्करः, गुरुर्वा जगज्जय इति भावः । मुखे प्रारम्भे स्तोमो यज्ञः पूजा, सखा मित्रं यस्य स मुखस्तोमसखस्तेन तथा । अथवा—धर्मविशेषणतया शिलीमुखस्तोमसखेन इत्य-खण्डम्, शिली जलौकाः तत्प्रमुखाणां स्तोमः समूहः शिलीमुखस्तोमस्तस्य सखा मित्रमिव सखा शिली-मुखस्तोमसखस्तेन तथा । स्वत एव–स्वयमेव । माम्–मल्लक्षणं जनम् । भजन्–आश्रयन् । चापरागः–धनूरागः । किम्–प्रश्नार्थकमव्ययम् । परागसः–परमतिशयितमागोऽपराधो येषान्ते परागसस्तांस्तथा । परमापराधिनः शत्रूनिति यावत् । विभागम्–विभङ्गम्, धातूनामनेकार्थत्वात्, पराजयमिति यावत् । न–नहि । आनयेत्–प्रापयेत् ? अपि तु प्रापयेदेवेति भावः । पक्षे स्वत एव मां भजन् अपरागः । सः–धर्मः । परागसः–परमतिशयितमागः पापं येषान्ते परागसः पापास्तांस्तथा । किम्–प्रश्नार्थक-मव्ययम् । विभागम्–विगता भा दीप्तिर्यत्र तद् विभम्, नरकस्तस्य अगो वृक्षः शाल्मलिर्विभागस्तन्तथा । न, नयेदिति काकुः ॥७४॥

**प्रबोधयत्येष तडागबान्धवः, कृताधिकोशाञ्जलिपद्मपाणिभिः ।**
**सरोजिनीस्तम्बकदम्बकैतवात्, श्रियश्चलत्वं निगदन्निवेह नः ॥७५॥**

*अन्वयः—एषः, तडागबान्धवः, इह, कृताधिकोशांजलिपद्मपाणिभिः, सरोजिनीस्तम्बकदम्ब-कैतवात्, श्रियः, चलत्वम्, निगदन्, इव, नः, प्रबोधयति ॥७५॥*

वृत्तिः—एषः–पुरोपकण्ठवर्तमानत्वेन सन्निकृष्टतया निर्दिश्यमानः । तडागबान्धवः–तडागः कासारो बान्धवः स्वजन इवेति तडागबान्धवः, "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३ । १ । १०२॥ इत्यनेनोपमितसमासः । इह–अत्र । कृताधिकोशाञ्जलिपद्मपाणिभिः–विहिताधिकुड्मलाञ्जलि-कमलकरैः । सरोजिनीस्तम्बकदंबकैतवात्–सरोजिनी कमलिनी तस्याः स्तम्बकदम्बो गुल्मसमूहः सरोजिनीस्तम्बकदम्बस्तस्य कैतवम् व्याजः सरोजिनीस्तम्बकदम्बकैतवम् तस्मात्तथा । श्रियः–लक्ष्म्याः । चलत्वम्–चञ्चलत्वम्, नैयत्येनैकत्रावस्थानाभावमिति यावत् । निगदन्–वदन् । इव–

यथा । नः-अस्मान् । प्रबोधयति-मोहनिद्रातो जागरयति ॥७५॥

( पाठान्तरम् )

जगच्चिरं जीवयता रसार्पणै-र्विरागता हंसविलासभाविता ।
सरोजिनीस्तम्बकदम्बकैतवात्, कृतामुना मे स्वरसानुषङ्गिणा ॥७५॥

अन्वयः—*रसार्पणैः, जगत्, चिरम्, जीवयता, स्वरसानुषङ्गिणा, अमुना, सरोजिनीस्तम्बकदम्बकैतवात्, मे, विरागता, हंसविलासभाविता, कृता ॥७५॥*

वृत्तिः—रसार्पणैः-रसस्य शृङ्गारादेर्मधुरादेर्वीर्य्यस्यानुरागस्य वा अर्पणानि-समर्पणानि, प्रतिपादनानीति यावत् रसार्पणानि तैस्तथा । जगत्-भुवनम् । चिरम्-दीर्घकालम् यावदिति शेषः । जीवयता-सरसत्वं सचेतनत्वं वा प्रापयतेत्यर्थः । स्वरसानुषङ्गिणा-स्वरसेन-निजाभिप्रायेण अनुषङ्गः सम्बन्धः स्वरसानुषङ्गः सोऽस्त्यस्येति स्वरसानुषङ्गी तेन तथा । स्वतन्त्रेणेति भावः । अमुना-भगवता शान्तिनाथेनेति यावत् । सरोजिनीस्तम्बकदम्बकैतवात्-सरोजिनी कमलिनी तस्याः स्तम्बकदम्बो गुल्मसमूहः सरोजिनीस्तम्बकदम्बस्तस्य कैतवं-व्याजः सरोजिनीस्तम्बकदम्बकैतवम्, तस्मात्तथा । मे-मम । विरागता-विषु-पक्षिषु रागोऽनुरागो यस्य स विरागस्तस्य भावो विरागता । पक्षे-विगतो रागोऽनुरागो मात्सर्य्यं वा यस्मात् स विरागस्तस्य भावस्तथा, विरक्तता, वैराग्यमिति यावत् । हंसविलासभाविता-हंसो जीवस्तस्य विलासो यत्र स हंसविलासः परमात्मा, तं भावयति चिन्तयतीति हंसविलासभावी तस्य भावस्तथा आध्यात्मविचार इति यावत् । कृता-विहिता ॥७५॥

प्रभासितं वा समयज्ञमुज्ज्वलं, विभावयेऽमुं कलहंसशिक्षितम् ।
प्रयोगकर्त्री विधुना पदे पदे-ऽमृणालशोषाहिभुवान्वयायि यः ॥७६॥

अन्वयः—*प्रभासितम्, वा, समयज्ञम्, उज्ज्वलम्, कलहंसशिक्षितम्, अमुम्, विभावये, यः, पदे पदे, अमृणालशोषाहिभुवा, प्रयोगकर्त्रा, विधुना, अन्वयायि ॥७६॥*

वृत्तिः—प्रभासितम्-प्रभा बुद्धिः प्रकाशो वा तया सितः शुक्लः प्रभासितस्तन्तथा । वा-समुच्चये । समयज्ञम्-समः समग्रः यज्ञः पूजाविधिर्यस्मात् स समयज्ञः तन्तथा । समयं कालं भूतभविष्यद्वर्तमानादिकं जानातीति समयज्ञस्तन्तथा वा । उज्ज्वलम्-दीप्तम्, विशदमिति यावत् । कलहंसशिक्षितम्-कलहंसाः कदम्बाः शिक्षिता निपुणा यत्र स कलहंसशिक्षितः । कलोऽव्यक्तमधुर-

ध्वनिर्हंसैः शिक्षितोऽभ्यस्तो यत्र वा स कलहंसशिक्षितस्तत्तथा । अमुम्–विप्रकृष्टतया निर्दिश्यमानम् । सरोवरमिति शेषः । विभावये–चिन्तयामि । यः–यादृशस्तडागः । पदे पदे–स्थाने स्थाने । अमृणालशेषाहिभुवा–मृणा हिंसा च आलं मिथ्या च मृणाले न मृणाले यस्य सोऽमृणालः, शेषाहिः शेषनागो भूः स्थानं यस्य स शेषाहिभूः, अमृणालश्चासौ शेषाहिभूरमृणालशेषाहिभूस्तेन तथा । प्रयोगकर्त्रा–सूत्रकारकेण । विधुना–चन्द्रनाम्ना । अन्वयायि–अनुगतः ॥७६॥

( पाठान्तरम् )

इति स्वचित्ते स विभाव्य भव्यधीः, प्रभुर्मुमुक्षुर्भवतो ययौ वनम् ।
जनेन चक्रेण च भूतलस्पृशाऽ–मृणालशेषाहिभुवाऽन्वयायि यः ॥७६॥

अन्वयः—*भव्यधीः, मुमुक्षुः, सः, प्रभुः, इति, स्वचित्ते, विभाव्य, भवतः, वनम्, ययौ, यः, जनेन, भूतलस्पृशा, अमृणालशेषाहिभुवा, चक्रेण, अन्वयायि ॥७६॥*

वृत्तिः—भव्यधीः–भवति सम्पद्यते मोक्षायेति भव्या तादृशी धीर्बुद्धिर्ज्ञानमिति यावद्यस्य स तथा । मुमुक्षुः–मोक्षगमनेच्छुः । सः–प्रसिद्धः । प्रभुः–विभुः, ईश्वर इति यावत् । शान्तिनाथ इति यावत् । इति–अन्ते, समाप्ताविति यावत् । स्वचित्ते–स्वीयान्तःकरणे । विभाव्य–विचिन्त्य भावयित्वेति यावत् । भवतः–संसारात्, भवं संसारं परित्यज्येति वा भवात्=क्षेमादिति वा । "गम्ययपः कर्माऽऽधारे" २ । २ । ७४ ॥ इति सूत्रेण कर्मवाचिनः पञ्चमी । 'भवः क्षेमेशसंसारे' इति मेदिनी । वनम्–तपस्यासाधनं काननम् । ययौ–गतवान् । यः–भगवान् शान्तिनाथः । जनेन–प्रजालोकेन । च–पुनः । भूतलस्पृशा–भूतलं स्पृशति इति भूतलस्पृक् तेन तथा । अमृणालशेषाहिभुवा–अमृणालो महाजनः शेषः क्षत्रियादिः अहिभूः–विप्राधिकारी यत्र तेन तथा । चक्रेण–चक्रमस्त्रविशेषोऽस्त्यस्येति चक्रः । "अभ्रादिभ्यः" ७ । २ । ४६॥ इत्यनेन मत्वर्थे 'अः' प्रत्ययः । विष्णुनेति यावत् । अन्वयायि–अनुगतः, अनुसृत इति यावत् ॥७६॥

गच्छाधीश्वरहीरहीरविजयाम्नाये निकाये धियां,
भृत्यः श्रीविजयप्रभाख्य–सुगुरोः श्रीमत्तपाख्ये गणे ।
शिष्यः प्राज्ञमणेः कृपादिविजयस्याशास्यमानाग्रणी–
श्चक्रे वाचकनाममेघविजयः शस्यां समस्यामिमाम् ॥७७॥

[ व्याख्यातपूर्वोऽयं श्लोकः ]

तस्मिन् विस्मयकृत्काव्ये, तुर्य्यः सर्गोऽभवत्तराम् ।
प्राप्नोतु शिष्टाचरणात् , प्रतिष्ठामप्यनुत्तराम् ॥७८॥

*अन्वयः*––*तस्मिन्, विस्मयकृत्काव्ये, तुर्य्यः, सर्गः, अभवत्तराम्, शिष्टाचरणात्, अनुत्तराम्, प्रतिष्ठाम्, अपि, प्राप्नोतु ॥७८॥*

**वृत्तिः**––**तस्मिन्**–शान्तिनाथचरितात्मके । **विस्मयकृत्काव्ये**–कवेः कवितानिर्माणचारुचातुरीकस्य भावः कर्म वा काव्यम् । विस्मयमाश्चर्य्यं करोतीति विस्मयकृत् काव्यम् तस्मिँस्तथा । **तुर्य्यः**–चतुर्थः । **सर्गः**–अध्यायः । **अभवत्तराम्**–समपद्यततरामित्यर्थः । "किंत्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्" ७ । ३ । ८ ॥ इत्यनेन तरपोऽन्तस्याऽऽम् । **शिष्टाचरणात्**–शिष्टैः सज्जनैः सदसद्विवेकशालिभिरिति यावत्, आचरणम् विधानम् शिष्टाचरणम्, तस्मात्तथा । **अनुत्तराम्**–लोकोत्तराम् । **प्रतिष्ठाम्**–आस्पदम् । स्थितिं वा । **अपि**–सम्भावनायाम् । **प्राप्नोतु**–अधिगच्छतु ॥७८॥

इति वाचकप्रवरश्रीमेघविजयजिद्गणिराजविरचिते श्रीनैषधीयमहाकाव्यप्रथमसर्गपादपूर्तिस्वरूपे **श्रीशान्तिनाथचरित्रे** शासनसम्राट-सूरिचक्रचक्रवर्ति–तपागच्छाधिपति-भट्टारकाचार्य-महाराजाधिराज**श्रीविजयनेमिसूरीश्वर**–महाराजपट्टालङ्कार शास्त्रविशारद कविरत्न पीयूषपाणि पूज्यपादाचार्यमहाराज **श्रीविजयामृतसूरीश्वर**–विरचित–विद्वद्विनोदिनीनामवृत्तिविभूषिते––

॥ चतुर्थः सर्गः समाप्तः ॥

## * अथ पञ्चमः सर्गः *

तरङ्गिणीरङ्कजुषः स्ववल्लभा, रसा रसानामवशा वशास्त्यजन् ।
अचीकरच्चक्रधरः प्रदेशनं, यथेष्टमाहूय स तुष्टपूर्जनम् ॥ १ ॥

अन्वयः—*अङ्कजुषः, स्ववल्लभाः, तरङ्गिणीः, रसानाम्, अवशाः, वशाः, रसाः, त्यजन्, सः, चक्रधरः, तुष्टपूर्जनम्, आहूय, यथेष्टम्, प्रदेशनम्, अचीकरत् ॥१॥*

वृत्तिः—अङ्कजुषः–अङ्कं मध्यस्थानम्, उत्सङ्गञ्च जुषन्ते-सेवन्ते, इत्यङ्कजुषस्तास्तथा । स्ववल्लभाः–निजप्रियाः इवेति शेषः, तथाच—लुप्तोपमालङ्कारः । तरङ्गिणीः–शैवलिनीः, नदीरिति यावत् । (च–पुनः ।) रसानाम्–शृङ्गारादीनां जलानाञ्च । अवशाः–अनायत्ताः, तेषामेव तदायत्त-त्वात् । वशाः–वनिताः । इवेति शेषः । (लुप्तोपमालङ्कारः) । रसाः–भुवः । पृथिवीरिति शेषः । त्यजन्–विजहत्, मुञ्चन्निति यावत् । सः–प्रसिद्धः । चक्रधरः–चक्री, भगवाञ्छान्तिनाथ इति यावत् । तुष्टपूर्जनम्–पुरो नगरस्य जनः पूर्जनः तुष्टः सन्तुष्टश्चासौ पूर्जनस्तुष्टपूर्जनो नागरिकलोक-स्तन्तथा । आहूय–आकार्य । यथेष्टम्–निकामम्, पर्याप्तमिति यावत् । प्रदेशनम्–उपदेशम् मोक्षौपयिकदेशनमिति यावत् । अचीकरत्–अकार्षीत् । चौरादिकस्य णिचः स्वार्थिकस्य प्रयोगः । "दशवर्षसहस्राणि रामो राज्यमचीकरत्" इति महाकविवाल्मीकिप्रयोगात् ।

प्रवर्धमानाः समितिक्रियाम्बुधौ, तरङ्गलेखा बिभरां बभूव यः ।
स मार्गणानां समभीयुषां गणं, प्रपद्य सद्योऽभिमुखीभवेन्न किम् ? ॥२॥

अन्वयः—*यः, समितिक्रियाम्बुधौ, प्रवर्धमानाः, तरङ्गलेखाः, बिभराम्बभूव, सः, समभीयुषाम्, मार्गणानाम्, गणम्, प्रपद्य, सद्यः, न, अभिमुखीभवेत्, किम् ? ॥२॥*

वृत्तिः—यः–यादृशो भगवाञ्छान्तिनाथः । समितिक्रियाम्बुधौ–समितिर्युद्धम्, यतिचर्या च, तस्याः क्रिया-आचरणम्, समितिक्रिया सैव अम्बुधि समुद्रः समितिक्रियाम्बुधिस्तस्मिँस्तथा । "मयूरव्यंसकेत्यादयः" ३ । १ । ११६ ॥ इत्यनेन रूपकसमासः । प्रवर्धमानाः–प्रकर्षेणोपचयमादधानाः । तरङ्गलेखाः–तरङ्गमालाः । बिभराम्बभूव–धारयामास । सः–तादृशो भगवाँश्चक्रो

समभीयुषाम्–सामीप्यमुपगतानाम् । मार्गणानाम्–बाणानाम् याचकानाञ्च । गणम्–समूहम् । प्रपद्य–सम्प्राप्य । सद्यः–सपदि, तत्क्षण इति यावत् । न–नहि । अभिमुखीभवेत्–अनभिमुखोऽभिमुखो भवेत् सम्पद्येत अभिमुखीभवेम् । किम्–प्रश्नार्थकमव्ययम् । अपि त्वभिमुखीभवेदेवेति भावः ॥२॥

**दिनाः क्षपा वेप्सितदानतः प्रपा, नृपाज्ञया दित्सुकरैश्चरैर्बभुः ।**
**दरोद्गतैः कोकनदौघकोरकैः, सरित्प्रदेशा इव सङ्गतद्विजाः ॥३॥**

अन्वयः—*दरोद्गतैः, कोकनदौघकोरकैः, सङ्गतद्विजा, सरित्प्रदेशाः, इव, नृपाज्ञया, ईप्सितदानतः, चरैः, दित्सुकरैः, प्रपाः, दिनाः, वा, क्षपाः, बभुः ॥३॥*

वृत्तिः—दरोद्गतैः–ईषदुद्भूतैः । कोकनदौघकोरकैः–कोकनदानां–रक्तोत्पलानामौघाः समूहाः, कोकनदौघास्तेषां कोरका मुकुलानि कलिका वा कोकनदौघकोरकास्तैस्तथा । सङ्गतद्विजाः–सङ्गताः सम्मिलिता द्विजाः पक्षिणो येषु ते तथा । सरित्प्रदेशाः–सरितो नद्याः प्रदेशाः प्रान्तभूमयः सरित्प्रदेशाः । इव–यथा । नृपाज्ञया–नृपस्य भगवतः शान्तिनाथस्य, राज्ञः, आज्ञा आदेशो, नृपाज्ञा तया तथा । ईप्सितदानतः–ईप्सितानामभिलषितानां, दानं–वितरणम्, ईप्सितदानम् तस्मात्तथा । चरैः–चञ्चलैः । दित्सुकरैः–दातुमिच्छन्तीति, दित्सन्ति दित्सन्तीति दित्सवस्तेषां कराः पाणयो दित्सुकरास्तैस्तथा । प्रपाः–पानीयशालारूपाः व्यस्तरूपकमलङ्कारः । दिनाः–दिवसाः । वा–समुच्चये । क्षपाः–रात्रयः । बभुः–शुशुभिरे । रूपकोपमयोः संसृष्टिः । "सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः" इति काव्यप्रकाशकारो मम्मटः ॥३॥

**स दानदेशः स्थिरचक्रभृद्रसः, सदा नदेशः स्थिरचक्रभृद्रसः ।**
**धृतप्रवालाङ्कुरसंचयश्च यद्, धृतप्रवालाङ्कुरसंचयश्चयः ॥४॥**

अन्वयः—*स्थिरचक्रभृद्रसः, सः, दानदेशः, सदा, स्थिरचक्रभृद्रसः, नदेशः, च, धृतप्रवालाङ्कुरसंचयः, यत्, चयः, धृतप्रवालाङ्कुरसंचयः ॥४॥*

वृत्तिः—स्थिरचक्रभृद्रसः–स्थिरो दृढश्चक्रभृतश्चक्रिणः शान्तिनाथस्य, रसोऽनुरागो यस्मिन् स तथा । सः–प्रसिद्धः । दानदेशः–दानस्य वितरणस्य देशः स्थानविशेषस्तथा । दानभूमिरिति यावत् । सदा–सर्वदा । स्थिरचक्रभृद्रसः–स्थिराः–सुनिश्चलाश्चक्राः–कोकात्मजीवविशेषाः, स्थिर-

चक्रास्तैर्भृता पूर्णा रसा भूर्यत्र स तथा । नदेशः-नदानां बृहन्नदीनामीशः पतिः स्वामीति यावत्, तथा "श्रीमान्नदनदीपतिः" इति रामायणम् । इवेति शेषः । (लुप्तोपमालङ्कारः) । च-पुनः । धृतप्रवालाङ्कुरसंचयः-धृताः प्रवालानां विद्रुमाणाम् अङ्कुराणाम् अभिनवोद्गमानां कश्मीरजन्मादीनां सञ्चयाः समूहा यस्मिन् दानदेशे स तथा । यत्-यतः । चयः-राशिः । धृतप्रवालाङ्कुरसञ्चयः-धृताः प्रवालानां पल्लवानाम् अङ्कुराणां जलानां सञ्चया यत्र स तथा । यदनेकार्थः-'प्रवालो विद्रुमे वीणा-दण्डेऽभिनवपल्लवे' इति 'अङ्कुरो रोम्णि सलिले रुधिरेऽभिनवोद्गमे' इति च । (यमकम्) । अयं भावः यथा नदेशः स्थिरचक्रभृद्रसः सदा तथा स दानदेशोऽपि स्थिरचक्रभृद्रसः सदा । पुनश्च यथा नदेशः धृतप्रवालाङ्कुरसञ्चयस्तथैव स चयात्मकः दानदेशः धृतप्रवालाङ्कुरसञ्चयः । अर्थस्तूपरोक्तदिशानु-सन्धेय इति ॥४॥

महीयसः पङ्कजमण्डलस्य य-श्छलेन लोकाशनयानजन्मनः ।
समं सिचा संचयनैश्च राजतैः, सुपर्वणां सङ्गममादिशद् भृशम् ॥५॥

*अन्वयः---यः, लोकाशनयानजन्मनः, महीयसः, पङ्कजमण्डलस्य, छलेन, सिचा, च, राजतैः, संचयनैः, भृशम्, सुपर्वणाम्, सङ्गमम्, आदिशत् ॥५॥*

वृत्तिः—यः-तडागः । लोकाशनयानजन्मनः-अशनं-भोजनञ्च, यानम्-गमनञ्च, अशन-याने, लोकानां-जनानामशनयाने, लोकाशनयाने, ताभ्यां जन्मोत्पत्तिर्यस्य तल्लोकाशनयानजन्म तस्य तथा । महीयसः-बृहत्तरस्य । पङ्कजमण्डलस्य-पङ्कात् कर्दमात्, जातमुत्पन्नम्, पङ्कजम् तच्च तन्म-ण्डलम्-वृन्दम्, पङ्कजमण्डलम्, तस्य तथा । छलेन-व्याजेन । सिचा-सेकेन वाससा । च-पुनः । राजतैः-रजतमयैः । रूप्यप्रचुरैरिति यावत् । संचयनैः-समूहैः । भृशम्-अतिशयं यथा स्यात्तथा । सुपर्व-णाम्-सुष्ठु शोभनानि च तानि पर्वाणि महा उत्सवा इति यावत्, सुपर्वाणि तेषां तथा, महोत्स-वानाम्, सुष्ठु पर्वोत्सवो येषान्ते सुपर्वाणो देवास्तेषान्तथा । सङ्गमम्-सम्मेलनम् । आदिशत्-न्यदर्शयत् ॥५॥

व्रजस्य चेन्दोर्मृगनाभिजन्मन-श्छलेन गौरस्य च मेचकस्य च ।
अमानि देवासुरमन्त्रभासुरं, मनस्विनाऽन्योन्यसुहृत्क्रियातुरम् ॥६॥

*अन्वयः—गौरस्य, इन्दोः, व्रजस्य, च, मेचकस्य, मृगनाभिजन्मनः, च, (व्रजस्य) छलेन, मनस्विना, अन्योन्यसुहृत्क्रियातुरम्, देवासुरमन्त्रभासुरम्, अमानि ॥६॥*

वृत्तिः—गौरस्य-धवलस्य, शुक्लवर्णस्येति यावत् । इन्दोः-चन्द्रपर्य्यायत्वात् कर्पूरस्य । व्रजस्य-समूहस्य । च-पुनः । मेचकस्य-श्यामलस्य, कृष्णस्येति यावत् । नाभिजन्मनः-मृगनाभेर्हरिणतुन्दकूपिकाया जन्मोत्पत्तिर्यस्य तस्य तथा । च-पुनः । (व्रजस्य-समूहस्य) छलेन-व्याजेन । मनस्विना-प्रशस्तं मनश्चित्तमस्त्यस्येति मनस्वी मनीषी विद्वानिति यावत्, तेन तथा । अन्योन्यसुहृत्क्रियातुरम्-परस्परमित्रक्रियातुरम् । देवासुरमन्त्रभासुरम्-देवासुराणाममरदानवानां मन्त्रा मननत्राणजनकवाक्यविशेषा देवासुरमन्त्रास्तद्वद् भासुरम् देदीप्यमानम् । अत्र श्लोके देवासुरमन्त्रभास्वरत्वात्मकविधेयस्योद्देश्यकवाचकपदाभावात् । पूर्वतिपदं विभिन्नवचनमप्युनुवर्तनीयम्, तथा । पूर्वेतिशेषः । अमानि-ज्ञातम् ॥६॥

**ग्रहीतुरुद्ग्राहयितुः करस्थितं, कुशोदकं तत् सुहिताय चोभयोः ।**
**नलेन मेने सलिलेऽनिलीनयोः, स्वपावनं जीवनभावनं पुनः ॥७॥**

अन्वयः—*ग्रहीतुः, च, उद्ग्राहयितुः, करस्थितम्, (यत्) कुशोदकम्, तत्, उभयोः, सुहिताय, नलेन, पुनः, सलिले, निलीनयोः, जीवनभावनम्, स्वपावनम्, मेने ॥७॥*

वृत्तिः—ग्रहीतुः-दातुः, सकाशाद्धनमुपादातुः । च-पुनः । उद्ग्राहयितुः-प्रतिपादयितुः, दानशीलस्येति यावत् । करस्थितम्-करयोर्हस्तयोः स्थितम् करस्थितम् । (यत्) कुशोदकम्-कुशा दर्भाश्च उदकानि जलानि चैतेषां समाहारः, कुशोदकम् । तत्-दानशीलकरस्थितकुशोदकम् । उभयोः-ग्रहीतृप्रतिपादयित्रोः । सुहिताय-सुष्ठु हितं कल्याणं सुहितम् तस्मै तथा । नलेन-रलयोरभेदान्नरेण, जनेनेत्यर्थः । पुनः-च । सलिले-जले । निलीनयोः-मग्नयोः, संपृक्तयोरिति यावत् । ग्रहीतृप्रतिपादयित्रोरिति यावत् । जीवनभावनम्-भाव्यते इति भावनं फलम्, जीवनस्य भावनम् जीवनभावनम् तत्तथा । स्वपावनम्-स्वेन धनेन पावनं पवित्रम् स्वपावनं, तत्तथा । मेने-अवबुधे ॥ ७ ॥

**नवं सरश्चोदभवन्महोत्सवे, यथेष्टसृष्टाञ्जलिमृष्टवारिभिः ।**
**पराजितोऽभूल्लवणाब्धिरप्यत-स्त्विषं विमुञ्चन् विधुकालकूटयोः ॥८॥**

अन्वयः—*महोत्सवे, यथेष्टसृष्टाञ्जलिमृष्टवारिभिः, नवम्, सरः, उद्भवत्, अतः, विधुकालकूटयोः, त्विषम्, विमुञ्चन्, लवणाब्धिः, अपि, पराजितः, अभूत् ॥८॥*

वृत्तिः—महोत्सवे–महान् विशालश्चासावुत्सवो महः महोत्सवस्तस्मिँस्तथा । यथेष्टसृष्टाञ्जलिमृष्टवारिभिः–यथेष्टं पर्य्याप्तं यथा स्यात्तथा सृष्टानि–त्यक्तानि यथेष्टसृष्टानि तानि च तान्यञ्जलिमृष्टवारीणि–सम्पुटितकरयुगलमृष्टजलानि, यथेष्टसृष्टाञ्जलिमृष्टवारीणि तैस्तथा । नवम्–नवीनम् । अभिनवमिति यावत् । सरः–कासारः । उदभवत्–समुदपद्यत । सञ्जातमिति यावत् । अतः–अभिनवसरःप्रादुर्भावाद्धेतोः । विधुकालकूटयोः–विधुश्चन्द्रश्च कालकूटो विषश्च विधुकालकूटौ तयोस्तथा । सम्बन्धित्वं षष्ठ्यर्थः । चन्द्रविषसम्बन्धिनीमिति यावत् । त्विषम्–छविम्, कान्तिमिति यावत् । विमुञ्चन्–परित्यजन् । लवणाब्धिः–लवणसमुद्रः । अपि–सम्भावनायाम् । पराजितः–पराभूतः । अधरीभूत इति यावत् । अभूत्–अभवत् ॥८॥

**चलीकृता यत्र तरङ्गरिङ्गणै-र्जिनेन्द्रदीक्षासमयोत्सवाम्बुधौ ।**
**हया दधुः स्वाप्लवनैर्महोर्मितां, व्रजा गजानामपि संघचारिताम् ॥९॥**

अन्वयः—यत्र, जिनेन्द्रदीक्षासमयोत्सवाम्बुधौ, तरङ्गरिङ्गणैः, चलीकृताः, हयाः, स्वाप्लवनैः, महोर्मिताम्, अपि, गजानां, व्रजाः, संघचारिताम्, दधुः ॥९॥

वृत्तिः—यत्र–यस्मिन् । जिनेन्द्रदीक्षासमयोत्सवाम्बुधौ–जिनेन्द्रस्य जिनेश्वरस्य भगवतोऽर्हतः शान्तिनाथस्य दीक्षासमयो भागवतदीक्षाग्रहणकालो जिनेन्द्रदीक्षासमयस्तत्र उत्सव उद्धर्ष एवाम्बुधिः समुद्रः जिनेन्द्रदीक्षासमयोत्सवाम्बुधिस्तस्मिन् तथा । "मयूरव्यंसकेत्यादयः" ३ । १ । ११६ ॥ इत्यनेन रूपकसमासः । तरङ्गरिङ्गणैः–तरङ्गस्खलनैः । चलीकृताः–चञ्चलीकृताः । हयाः–अश्वाः । स्वाप्लवनैः–स्वस्य आत्मन आप्लवनानि सर्वतोभावेन प्लुतानि कूर्दनानि इति यावत् स्वाप्लवनानि तैस्तथा । महोर्मिताम्–महान्तश्च त ऊर्मयस्तरङ्गाः महोर्मयस्तेषां तासां वा भावो महोर्मिता तान्तथा । अपि–समुच्चये । गजानाम्–हस्तिनाम् । व्रजाः–समूहाः, वृन्दानीति यावत् । संघचारिताम्–सङ्घेन समूहेन चरन्तीति सङ्घचारिणो मत्स्यास्तेषां भावः सङ्घचारिता तान्तथा । सङ्घेन चरन्तीति मत्स्यजातिः । दधुः–धारयामासुः ॥९॥

**मिथो रथानामपि सादिनां ध्वजै-रबालशैवाललतापरम्पराः ।**
**मलीमसै रेणुगणैः सखीकृताः पयोनिधेर्धर्मनिधेर्व्रतोत्सवे ॥१०॥**

अन्वयः—धर्मनिधेः, रथानाम्, अपि, सादिनाम्, मिथः, ध्वजैः, मलीमसैः, रेणुगणैः, पयोनिधेः, अबालशैवाललतापरम्पराः, सखीकृताः ॥१०॥

वृत्तिः—धर्मनिधेः—धर्माः—सुकृतानि निधीयन्तेऽत्रेति धर्मनिधिर्भगवान् शान्तिनाथः, तस्य तथा । "व्याप्यादाधारे" ५।३।८८ । इत्यनेन आधारे 'किः प्रत्ययः । रथानाम्—स्यन्दनानाम् । अपि—समुच्चये । सादिनाम्—हस्त्यश्वाद्यारोहिणाम् । मिथः—परस्परम् । ध्वजैः—केतनैः । पताकाभिरिति यावत् । मलीमसैः—मलिनैः । रेणुगणैः—धूलिकदम्बकैः । पयोनिधेः—पयांसि जलानि निधीयन्तेऽस्मिन्निति पयोनिधिः समुद्रस्तस्य तथा । अबालशैवाललतापरम्पराः—अबाला महत्यश्च ताः शैवाललता जलनीलीवल्ल्योऽबालशैवाललतास्तासां परम्पराः समूहाः अबालशैवाललतापरम्परास्तास्तथा । सखीकृताः—असख्यः सख्यः कृताः सम्पादिताः सखीकृताः, सदृशीकृताः इति भावः ॥ १० ॥

**बले बलद्वेषिपुरस्सरे चले, हया ध्वजाः शोणरुचः प्रसृत्वराः ।**
**ध्रुवं दधुर्वाडवहव्यवाडव–स्थितिं त्रिलोकीजनसङ्गमार्णवे ॥११॥**

अन्वयः—*बलद्वेषिपुरस्सरे, चले, बले, हयाः, शोणरुचः, प्रसृत्वराः, ध्वजाः, त्रिलोकीजनसङ्गमार्णवे, ध्रुवम्, वाडवहव्यवाडवस्थितिम्, दधुः ॥११॥*

वृत्तिः—बलद्वेषिपुरस्सरे—बलं तदाख्यमसुरविशेषं द्वेष्टि तच्छीलो बलद्वेषी—इन्द्रः स पुरस्सरोऽग्रगामी यस्मिँस्तत् बलद्वेषिपुरस्सरम् तस्मिँस्तथा । चले—चञ्चले । बले—सैन्ये । हयाः—अश्वाः । शोणरुचः—शोणाऽरुणा रुक् द्युतिर्येषान्ते शोणरुचः । प्रसृत्वराः—प्रसरणशीलाः । ध्वजाः—पताकाः । त्रिलोकीजनसङ्गमार्णवे—त्रयाणां लोकानां भुवनानां समाहारस्त्रिलोकी, भुवनत्रयम्, तस्या जना लोकास्त्रिलोकीजनास्तेषां सङ्गमः—सम्मिलनस्थानमेव अर्णवः समुद्रः, त्रिलोकीजनसङ्गमार्णवस्तस्मिँस्तथा । ध्रुवम्—निश्चितं यथा स्यात्तथा । वाडवहव्यवाडवस्थितिम्—वाडवहव्यवाट् वाडवाग्निस्तस्य अवस्थितिरवस्थानम्, वाडवहव्यवाडवस्थितिस्तास्तथा । दधुः—धारयामासुः ॥११॥

**व्रती बभूव प्रभुराप्य शुक्रजां, चतुर्दशीं तां बहुलां च लोचकृत् ।**
**कचेषु मत्वेव कषायपावक–स्थितिप्ररोहत्तमभूमधूमताम् ॥ १२ ॥**

अन्वयः—*प्रभुः, शुक्रजाम्, चतुर्दशीम्, आप्य, व्रती, च, बहुलाम्, ताम्, (आप्य) कचेषु, कषायपावकस्थितिप्ररोहत्तमभूमधूमताम्, मत्वा, इव, लोचकृत्, बभूव ॥१२॥*

वृत्तिः—प्रभुः—प्रकर्षेण भवतीति प्रभुः स्वामी, ईशितेति यावत् । "शंसंस्वयंविप्राद् भुवो डुः"

५ । २ । ६४ ॥ इत्यनेन भुवो 'डुः' प्रत्ययः । शुक्रजाम्–शोचन्ति पान्था अत्रेति शुक्रो ज्येष्ठमासस्तत्र जाता समुत्पन्ना शुक्रजा तान्तथा । चतुर्दशीम्–तदाख्यातिपावनतिथिविशेषम् । आप्य–समधिगत्य। व्रती–व्रतं नियमः संयम इति यावदस्त्यस्येति व्रती । च–पुनः । बहुलाम्–कृष्णपक्षीयाम् । ताम्–चतुर्दशीम् । ( आप्य ) कचेषु–केशेषु । कषायपावकस्थितिप्ररोहत्तमभूमधूमताम्–कषाया क्रोध-मानमायालोभा एव पावको वह्निः कषायपावकस्तस्य स्थितिरवस्थानम्, कषायपावकस्थितिस्तया प्ररो-हत्तमोऽतिशयेन प्रादुर्भूतो भूमा बाहुल्यं यस्य स कषायपावकस्थितिप्ररोहत्तमभूमः स चासौ धूमो वायुवाहः, कषायपावकस्थितिप्ररोहत्तमभूमधूमस्तस्य भावः तत्ता तान्तथा । मत्वा–अवबुध्य । इव–यथा । लोचकृत्–लोचं लुञ्चनम् मूलचूलमुत्पाटनमिति यावत्, करोतीति लोचकृत् । बभूव–अभूत् ॥ १२ ॥

## प्रकाममादित्यमवाप्य कण्टकै–स्तपस्यतोऽभूत् तनुरर्हतः कटुः ।
## पटुः समाधौ विमना मनाग् न सा, रसालसा वा नियमाद् यमादपि ॥१३॥

अन्वयः—*प्रकामम्, आदित्यम्, अवाप्य, कण्टकैः, तपस्यतः, अर्हतः, तनुः, कटुः, अभूत्, समाधौ, पटुः, विमनाः, नियमात्, वा यमात्, सा, अपि, मनाक्, रसालसा, न ॥१३॥*

वृत्तिः—प्रकामम्–पर्य्याप्तं यथा स्यात्तथा । आदित्यम्–अदितेरपत्यम् पुमान् आदित्यः सूर्य्यस्तन्तथा । अवाप्य–अधिगत्य समाश्रित्येति यावत् । कण्टकैः–द्रुमाङ्गैः, तीक्ष्णाग्रवृक्षाङ्गैरिति यावत् । उपलक्षितायां भूमाविति शेषश्च । तपस्यतः–तपस्यामाचरतः । अर्हतः–जिनेश्वरस्य, षोडश-तीर्थंकृतः शान्तिनाथस्येति यावत् । तनुः–शरीरः । कटुः–तिक्तः । अभूत्–अभवत् । समाधौ–अर्थ-मात्राभासनरूपकध्याने । पटुः–चतुरः निष्णात इति यावत् । विमनाः–वि विशिष्टं मनोऽन्तःकरणं यस्य स तथा । यद्वा–समाधौ पटुः, विषयेषु विमनाः–वैमनस्यवान् विराग इत्यर्थः, अर्हन्निति शेषः । निमयात्–व्रतात् । वा–समुच्चये । यमात्–संयमात्, ब्रह्मचर्यसंरक्षणप्रमुखादिति भावः । सा–तनुः । अपि–सम्भावनायाम् । मनाक्–ईषत्, किञ्चिदपीति शेषः । रसालसा–रसैर्मधुरादिभिरलसा-ऽऽलस्यवती तथा । न–नहि ॥१३॥

## सुरार्चने चन्दनचन्द्रलेपनैः, करम्बितामोदभरं विभ्रुण्वती ।
## तनुर्ननु प्रौढिसमाधिसाधने–र्जिनस्य विश्वम्भरतामिवाऽन्वशात् ॥१४॥

अन्वयः–*चन्दनचन्द्रलेपनैः, सुरार्चने, (सति) करम्बितामोदभरम्, बिभ्रुण्वती, जिनस्य, तनुः,*

*ननु, प्रौढिसमाधिसाधनैः, विश्वम्भरताम् , इव, अन्वशात् ॥१४॥*

**वृत्तिः**—**चन्दनचन्द्रलेपनैः**-चन्दनं मलयजश्च चन्द्रः कर्पूरश्च चन्दनचन्द्रौ, तयोर्लेपनानि चन्दनचन्द्रलेपनानि तैस्तथा। **सुरार्चने**-सुरैर्देवैरर्चनं पूजनं सुरार्चनम्, तस्मिँस्तथा। सतीति शेष। **करम्बितामोदभरम्**-करम्बितो व्याप्तश्चासावामोदः सम्मदः, करम्बितामोदस्तस्य भरोऽतिशयः, करम्बितामोदभरस्तन्तथा। **विवृण्वती**-प्रकटयन्ती। **जिनस्य**-पारगतस्य, अर्हत इति शेषः। **तनुः**-शरीरम्। **ननु**-निश्चयेन। **प्रौढिसमाधिसाधनैः**-प्रौढ्या प्रौढतया समाधिरर्थमात्रावभासनरूपक-ध्यानम् प्रौढिसमाधिस्तस्य साधनानि सम्पादनानि प्रौढिसमाधिसाधनानि तैस्तथा। **विश्वम्भरताम्**-विश्वं जगद् विभर्ति पोषयति इति विश्वम्भरस्तस्य भावो विश्वंभरता, तान्तथा। **अन्वशात्**-प्राप्नोत्। **इव**-यथा ॥१४॥

## क्वचित् तनूत्सर्जनमुद्रया विभो-रनर्तिमूर्तिर्वरिवर्ति सा स्म या।
## धृतस्फुटश्रीगृहविग्रहा दिवा-निशं मृणालाभभुजावलम्बिनी ॥१५॥

*अन्वयः—विभोः, सा, अनर्तिमूर्तिः, क्वचित्, तनूत्सर्जनमुद्रया, वरिवर्ति स्म, या, धृतस्फुटश्री-गृहविग्रहा, दिवानिशम्, मृणालाभभुजावलम्बिनी ॥१५॥*

**वृत्तिः**—**विभोः**-स्वामिनः, भगवतः शान्तिनाथस्येति यावत्। **सा**-प्रसिद्धा। **अनर्तिमूर्तिः**-अविद्यमानाऽर्तिः पीडा यस्यां साऽनर्तिः सा चासौ मूर्तिः शरीरम्, तथा। **क्वचित्**-कुत्रापि। **तनूत्सर्जनमुद्रया**-कायोत्सर्गप्रणालिकया। **वरिवर्ति स्म**-पुनःपुनरतिशयेन वाऽवर्तत। **या**-यादृशी तनुः। **धृतस्फुटश्रीगृहविग्रहा**-धृताः स्फुटानि विकसितानि श्रीगृहाणि कमलान्येव विग्रहः शरीरं यया स तथा। **दिवानिशम्**-अहोरात्रम्, रात्रिन्दिवमिति यावत्। **मृणालाभभुजावलम्बिनी**-मृणालयोर्विसयो-राभा कान्तिरिवाऽऽभा कान्तिर्ययोस्तौ मृणालाभौ तौ च तौ भुजौ तावचलम्बते समाश्रयति तच्छीला तथा अस्तीति शेषः ॥१५॥

## यथान्तिकस्थामरभक्तिवृष्टिभि-र्जिने धृतध्यानधने त्वऽधर्मणे।
## नवं सरस्तत्क्षणमप्यभूच्छ्रिया, सरोजिनी यत्प्रभवाऽप्सरायिता ॥१६॥

*अन्वयः—अधर्मणे, जिने, धृतध्यानधने, तु, यथान्तिकस्थामरभक्तिवृष्टिभिः, तत्क्षणम्, नवं, सरः, अभूत्, यत्प्रभवा, सरोजिनी, अपि, श्रिया, अप्सरायिता ॥१६॥*

**वृत्तिः**—**अधर्मणे**-नास्ति धर्मो यत्रासौ अधर्मा मोक्षस्तस्मै तथा, तदर्थमिति यावत्। **जिने**-

भगवति शान्तिनाथेऽर्हति । धृतध्यानधने–धृतं सम्पादितं ध्यानं शुक्लध्यानमेव धनं येन तस्मिँस्तथा सतीति शेषः । तु–पुनः । यथान्तिकस्थामरभक्तिवृष्टिभिः–अन्तिकं सान्निध्यमनतिक्रम्येति यथान्तिकस्था येऽमराः सुराः तैः भक्त्या प्रह्वीभावेन कृता वृष्टयो वर्षाणि ताभिस्तथा । तत्क्षणम्–सद्यः । नवम्–नूतनम् । सरः–सरोवरः । अभूत्–अजनि । यत्प्रभवा–यदुत्पन्ना । सरोजिनी–कमलिनी, पद्मिनीति यावत् । अपि–साऽपि । श्रिया–लक्ष्म्या, शोभयेतियावत् । 'शोभासम्पत्तिपद्मासु, लक्ष्मीः श्रीरिव कथ्यते' इति यादवः । अप्सरायिता–अप्सरोवदाचरिता । 'ओजोऽप्सरसः । ३ । ४ । २८ ।। इति क्यङ् सलोपश्च । अत्रार्थेऽभियुक्तोक्तिरपि' 'ओजोऽप्सरसो नित्यमितरेषां विभषये' ति । (उपमाऽर्थापत्तिश्चालङ्कारौ) ।। १६ ।।

**यदम्बुपूरप्रतिबिम्बितायति-र्गणो ग्रहाणां पुरतोऽर्हतः प्रभोः ।**
**तरंस्तरङ्गेषु भवार्णवान्तरं, स्वमाह तीर्णं नटनेऽतिपाटवात् ॥१७॥**

अन्वयः—*यदम्बुपूरप्रतिबिम्बितायतिः, ग्रहाणाम् , गणः, प्रभोः, अर्हतः, पुरतः, भवार्णवान्तरम् , तरङ्गेषु, तरन् , नटने, अतिपाटवात् , स्वम् , तीर्णम् , आह ॥१७॥*

वृत्तिः—यदम्बुपूरप्रतिबिम्बितायतिः–यस्य–तडागस्य, अम्बुनो–जलस्य, पूरे–प्रवाहे, प्रतिबिम्बिता–प्रतिफलिता, आयतिर्दैर्घ्यं यस्य स तथा । ग्रहाणाम्–सूर्याचन्द्रमःप्रमुखाणाम् । गणः–समूहः । प्रभोः–स्वामिनः । अर्हतः–जिनेश्वरस्य । पुरतः–अग्रतः । भवार्णवान्तरम्–संसारसागरमध्यम् । तरङ्गेषु–भङ्गेषु । तरन्–प्लवन् । नटने–नर्तने । अतिलाघवात्–अत्यन्तचातुर्य्याद् । स्वम्–आत्मानम् । तीर्णम्–पारितभवसागरम् । आह–ब्रवीति, कथयतीति यावत् ॥१७॥

**वने स्थितावस्य च चामरक्रियां, मरुत्तरङ्गैस्तरलस्तटद्रुमः ।**
**सदातपत्रायितपल्लवोच्चय–श्चकार सत्कारपदं दिवौकसाम् ॥१८॥**

अन्वयः—च, *अस्य, वने, स्थितौ, चामरक्रियाम् , मरुत्तरङ्गैः, तरलः, सदातपत्रायितपल्लवोच्चयः, तटद्रुमः दिवौकसाम् , सत्कारपदम् , चकार ॥१८॥*

वृत्तिः—च–पुनः । अस्य–भगवतः शान्तिनाथस्य । वने–तपस्यासाधननिदानकानने । स्थितौ–अवस्थाने । सत्यामितिशेषः । चामरक्रियाम्–चामरनिर्वर्त्यकार्य्यम् । मरुत्तरङ्गैः–पवनसम्बन्धिभङ्गैः । तरलः–चञ्चलः । चलाचल इति यावत् । सदातपत्रायितपल्लवोच्चयः–सदा सर्वदा, आतपत्रायितः आतपत्रं–छत्रम् , तद्वदाचरितः, पल्लवोच्चयः–किसलयप्रकरो यस्मिन् स तथा । तटद्रुमः–

कृतवान् । दिवौकसाम्–देवानाम् । सत्कारपदम्–आदरातिशयस्थानम् । चकार–कृतवान् ॥१८॥

**न धीरता तादृगिह क्षमाधरे, दधौ जिनो यामुदधौ गभीरता ।**
**निमज्ज्य मैनाकमहीभृतः सतः, परीक्षणाद् वाम्बुनिधेश्चलत्तया ॥१९॥**

अन्वयः—*जिनः, याम्, (धीरतां गभीरतां वा) दधौ, इह, क्षमाधरे, तादृक्, धीरता, वा, निमज्ज्य, सतः, मैनाकमहीभृतः, परीक्षणात्, अम्बुनिधेः, चलत्तया, उदधौ (तादृक्) गभीरता, न ॥१९॥*

वृत्तिः—जिनः–भगवानर्हन् शान्तिनाथः । याम्–यादृशीम्, धीरतां गम्भीरतां वा । दधौ–धृतवान् । इह–अस्मिन् । क्षमाधरे–क्षमायाः पृथिव्या धरो धारक क्षमाधरः पर्वतस्तस्मिँस्तथा, पर्वतविशेषनामानभिधानेऽपि प्रकरणबलात् प्रशस्तत्वाच्च सुराचले, मेराविति यावत् । तादृक्–तादृशी । धीरता–धैर्य्यम् । वा–समुच्चये । निमज्ज्य–अन्तर्निमग्नीभूय । सतः–विद्यमानस्य । मैनाकमहीभृतः–इन्द्रकुलिशकरणकनिजपक्षच्छेदभीतस्य, सवेगपवनपातितस्य मैनाकाख्यपर्वतस्य । परीक्षणात्–पर्य्यवेक्षणात्, सम्पर्कादिति यावत् । अम्बुनिधेः–अम्बूनि सलिलानि निधीयन्तेऽत्रेत्यम्बुनिधिः समुद्रस्तस्य तथा । चलत्तया–चञ्चलतया । उदधौ–समुद्रे । (तादृक् तीर्थकृच्छान्तिनाथगभीरतातुल्या) गभीरता–गम्भीरता । न–नहि ॥१९॥

**विपक्षतां यो गत एव योगतः, किमस्य शम्भोर्ननु पक्षताऽक्षता ।**
**पुरापि पारापतपक्षिणो भये, ततान पक्षान् धुवतः सपक्षताम् ॥२०॥**

अन्वयः—*यः, योगतः, एव, विपक्षताम्, गतः, किम्, अस्य, शम्भोः, नु, पक्षता, अक्षता, न, पुरा, अपि, पक्षान्, धुवतः, पारापतपक्षिणः, भये, सपक्षताम्, ततान ॥२०॥*

वृत्तिः—यः–सकलैश्वर्य्यसम्पन्नो भगवान् शान्तिनाथ । योगतः–योगश्चित्तवृत्तिनिरोधस्तस्मात्तथा । एव–अवधारणार्थमव्ययम् । विपक्षताम्–पक्षः–परिवारः, सखा सहाय इति यावत्, तेन विरहितो विपक्षस्तस्य भावो विपक्षता तान्तथा । गतः–प्राप्तः । किम्–क्षेपेऽव्ययम् । अस्य–सन्निकृष्टतया वर्तमानायितस्य । शम्भोः–कल्याणभावकस्य, मङ्गलप्रदस्येति यावत्, भगवतः शान्तिनाथस्येति भावः । नु–वितर्के । पक्षता–साहाय्यम् । आनुकूल्यमिति यावद् । अक्षता–परिपूर्णा । न–नहि, अपितु अक्षतैवेत्यर्थः । तथाहि–पुरा–पूर्वम् । अपि–सम्भावनायाम् । पक्षान्–पत्राणि । धुवतः–कम्पयतः । पारापतपक्षिणः–कपोताख्यविहगविशेषस्य । भये–साध्वसे, आतङ्के इति यावत् । सपक्षताम्–पक्षेण

आनुकूल्येन सहायतयेति यावत्, सहितः सपक्षस्तस्य भावः सपक्षता, प्रकृतिजन्यबोधे प्रकारीभूतस्यैव भावप्रत्ययार्थत्वनिर्णयात्। आश्रयविशेष्यकपक्ष-(सहायता) प्रकारकबोधे प्रकारीभूतस्य पक्षस्यैव बोधनात् सहायतामित्यर्थः। ततान-विस्तारयामास ॥२०॥

पयोधिलक्ष्मीमुषि केलिपल्वले, जिनेऽप्यनैकान्तिकता कृता जनैः।
तटेऽपि साधारणया धिया श्रिते, क्वचिन्न लेभे व्यभिचारचारिता ॥२१॥

*अन्वयः—पयोधिलक्ष्मीमुषि, केलिपल्वले, जिने, अपि, जनैः, अनैकान्तिकता, कृता, साधारणया, धिया, श्रिते, क्वचित्, तटे, अपि, व्यभिचारचारिता, न, लेभे ॥२१॥*

वृत्तिः—पयोधिलक्ष्मीमुषि-पयांसि जलानि धीयन्तेऽस्मिन्निति पयोधिः समुद्रस्तस्य लक्ष्मीः शोभा, पयोधिलक्ष्मीस्तां मुष्णाति चोरयतीति पयोधिलक्ष्मीमुट् तस्मिँस्तथा। पयोधिशोभावधिकाधिक-शोभाशालिनीत्यर्थः। केलिपल्वले-क्रीडाल्पसरसि। जिने-अर्हति, भगवति शान्तिनाथे इत्यर्थः। अपि-समुच्चये। जनैः-लोकैः। अनैकान्तिकता-अनैकान्तिकत्वबुद्धिः। कृता-विहिता। केलिपल्वले सामान्यतः पयोधिशोभानाधायकत्वस्य जिनेश्वरसन्निधानात्, तदाधायकत्वस्य च सत्त्वात् जिनेऽपि च स्याद्वादात् अनैकान्तिकत्वं स्पष्टमवसेयम्। साधारणया-सामान्यया। बुद्ध्या-ज्ञानेन। श्रिते-सेविते, आलिङ्गिते विषयीकृते इति यावत्। क्वचित्-कुत्रापि। तटे-तीरे। अपि-सम्भावनायाम्। व्यभिचारचारिता-शोभया अव्याप्यवृत्तित्वम्, असार्वदिकशोभाधायकत्वमिति यावत्। न-नहि। लेभे-आपि। केलिपल्वले जिने तीरे च व्यभिचरितशोभातिशयशालित्वमन्वमन्यतेति भावः ॥२१॥

कदापि देवोऽकृत हंसमंशतो, रिरंसुहंसीकलनादसादरम्।
सुवर्णवर्णं जिनवर्णने कृते, विडौजसा क्षोभयितुं मनोऽर्हतः ॥२२॥

*अन्वयः—विडौजसा, कदापि, जिनवर्णने, कृते, देवः, अर्हतः, मनः, क्षोभयितुम्, अंशतः, सुवर्णवर्णम्, रिरंसुहंसीकलनादसादरम्, हंसम्, अकृत।*

वृत्तिः—विडौजसा-इन्द्रेण, 'इन्द्रो हरिश्च्यवनोऽच्युताग्रजो, वज्री विडौजा मघवान् पुरन्दरः' २-८५-इत्यभिधानचिन्तामणिः। कदापि-कस्मिँश्चिदपि समये। जिनवर्णने-श्री शान्तिनाथभगवत्त-पश्चरणादिप्रशंसने। कृते-विहिते, सति। देवः-सुरः, सुरेन्द्रवचनमश्रद्दधानः कश्चिद् स्वबलावलेपो-द्धतोऽमर इति यावत्। अर्हतः-भगवतः श्रीशान्तिनाथस्य। मनः-चित्तम्। क्षोभयितुम्-चालयितुम्, अङ्गीकृतमार्गतोऽपसारयितुमिति यावत्। अंशतः-स्वावयवेन, परिमितात्मीयात्मप्रदेशान् सङ्काल्येति

यावत्। सुवर्णवर्णम्—कनकरूपम्। रिरंसुहंसीकलनादसादरम्—रिरंसो रन्तुमिच्छोः हंस्याः मराल्याः कलनादेऽव्यक्तमधुरध्वनौ सादरः साभिलाषः तं तथा। हंसम्—मरालम्। अकृत—विचक्रे। हंसस्य विकुर्वणामकरोदिति यावत् ॥२२॥

**पुरः किरन्तं विकरं वसूत्करं, समौक्तिकं मौक्तिकयुक्तमैक्षत।**
**स तत्र चित्रं विचरन्तमन्तिके, मनागपि क्षुब्धमना हि नाभवत् ॥२३॥**

अन्वयः—*सः, तत्र, पुरः, विकरम्, वसूत्करम्, किरन्तम्, समौक्तिकम्, मौक्तिकयुक्तम्, अन्तिके, विचरन्तम्, चित्रम्, ऐक्षत, हि, मनागपि, क्षुब्धमनाः, न, अभवत् ॥२३॥*

वृत्तिः—सः—श्रीशान्तिनाथोऽर्हन्। तत्र—तपोवनभूमौ। पुरः—अग्रे। विकरम्—विकारकारकम्। वसूत्करम्—रत्नप्रकरम्। किरन्तम्—क्षिपन्तम्। समौक्तिकम्—समम् अनुकूलम् औक्तिकम् उक्तिर्यस्य स तं तथा। मौक्तिकयुक्तम्—मुक्ताफलसमन्वितम्। अन्तिके—समीपे। विचरन्तम्—मन्दं मन्दं सञ्चरन्तम्। चित्रम्—विस्मयापादकम्, कनकरूपत्वादिति। ऐक्षत—अपश्यत्, लोचनगोचरं चक्रे। अथ च, हि—निश्चयेन। मनागपि—ईषदपि। क्षुब्धमनाः—चञ्चलचित्तः। न—नैव। अभवत्—समजायत ॥२३॥

**तपस्यतस्तस्य विवन्दिषामिषात्, स्वरागतः स्निग्धमनास्त्वरागतः।**
**स देवदेवस्य निषेवणापरं, हिरण्मयं हंसमबोधि नैषधः ॥२४॥**

अन्वयः—*विवन्दिषामिषात्, तु, अरागतः, तपस्यतः, तस्य, देवदेवस्य, निषेवणापरम्, हिरण्मयम्, हंसम्, स्वरागतः, स्निग्धमनाः, सः, नैषधः, अबोधि ॥२४॥*

वृत्तिः—विवन्दिषामिषात्—वन्दितुमिच्छा विवन्दिषा तस्या मिषं व्याजो विवन्दिषामिषम् तस्मात्तथा। तु—किन्तु। अरागतः—रागाभावतः। मात्सर्यानुरागविरहिततयेत्यर्थः यद्वा। त्वरागतइत्येव त्वरितमागत इत्यर्थमवसेयम्। तपस्यतः—तपस्यामादधतः। तस्य—प्रसिद्धस्य, वीतरागत्वादिनेति शेषः। देवदेवस्य—तीर्थकृतो जिनेश्वरस्य श्रीशान्तिनाथस्य। निषेवणापरम्—शुश्रूषणासक्तम्। हिरण्मयम्—काञ्चनविकारम्। हंसम्—राजहंसम्। स्वरागतः—स्वीयानुरागात्, स्वर्गतः समागतो वा। स्निग्धमनाः—स्निग्धं—सस्नेहं मनोऽन्तःकरणं यस्य स तथा, सप्रणयान्तःकरण इत्यर्थः। सः—प्रसिद्धः। नैषधः—चक्रिचमूपतिः। अबोधि—अध्यगमत्, अवबुद्धवान् ॥२४॥

**प्रियासु बालासु रतक्षमासु च, ललन्तमेतं चरणानुरागिणम् ।**
**विसिष्मये वीक्ष्य नृपो विरुद्धता, निवारिता द्वन्द्वबलेऽर्हतेत्यसौ ॥२५॥**

अन्वयः—*बालासु, च, रतक्षमासु, प्रियासु, ललन्तम्, चरणानुरागिणम्, एतम्, वीक्ष्य, अर्हता, द्वन्द्वबले, विरुद्धता, निवारिता, इति, असौ, नृपः, विसिष्मिये ॥२५॥*

**वृत्तिः**—**बालासु**—अप्राप्तयौवनासु, सुरतकर्मोक्षमास्विति यावत् । **च**—पुनः । **रतक्षमासु**—सुरतसमर्थासु । **प्रियासु**—बल्लभासु, प्रियतमास्विति यावत् । **ललन्तम्**—अनुरागवन्तम् । **चरणानुरागिणम्**—जिनेश्वरचरणानुरागवन्तम् । यद्वा—चरणेष्वनुरागो लौहित्यं चरणानुरागः सोऽस्त्यस्येति चरणानुरागी, "अतोऽनेकस्वरात्" ७।२॥६॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः । **एतम्**—समीपतरवर्तिनम् । "समीतरवर्ति चैतदोरूपम्" इत्यभियुक्तोक्तेः । हंसमित्यर्थः । **वीक्ष्य**—अवलोक्य । **अर्हता**—जिनेश्वरेण । **द्वन्द्वबले**—युद्धे । **विरुद्धता**—विरोधः, परस्परेर्ष्याभाव इति यावत् । **निवारिता**—दूरीकृता । **इति**—एवं, निधायेत्यर्थः । **असौ**—अयम् । **नृपः**—राजा, नैषधाभिधान इति यावत् । **विसिष्मिये**—विस्मयमवाप्तवान् ॥२५॥

**सितच्छदं तं चरणानुरागिणं, द्विपत्त्रितं पल्लवितं च बिभ्रतम् ।**
**विभोर्मनोऽन्तः स्मरमेव भावितुं, सुरेण चक्रे बहुधाऽऽयुधादरः ॥२६॥**

अन्वयः—*द्विपत्त्रितम्, च, पल्लवितम्, बिभ्रतम्, सितच्छदम्, चरणानुरागिणम्, तम्, (वीक्ष्य), विभोः, मनोऽन्तः, स्मरम्, भावितुम्, सुरेण, बहुधा, आयुधादरः, चक्रे, एव ॥२६॥*

**वृत्तिः**—**द्विपत्त्रितम्**—द्विपत्रं सञ्जातमस्मिन्निति द्विपत्त्रितम्, द्विपत्रयुक्तमित्यर्थः । **च**-पुनः । **पल्लवितम्**—पल्लवयुक्तम् । **सितच्छदम्**—श्वेतपक्षम् । **बिभ्रतम्**—धारयन्तम् । **चरणानुरागिणम्**-चरणयोः पादयोरनुरागो लौहित्यं चरणानुरागः सोऽस्त्यस्येति चरणानुरागी तन्तथा । अथच—चरणयोः—प्रभुचरणकमलयोरनुरागः स्नेहश्चरणानुरागः सोऽस्त्यस्येति चरणानुरागी तन्तथा । **तम्**—हंसम् । **वीक्ष्य** स्थितस्येति शेषः । **विभोः**-प्रभोः शान्तिनाथस्य । **मनोऽन्तः**—हृदयाभ्यन्तरे । **स्मरम्**—कन्दर्पम् । **भावितुम्**—बोधयितुम् समुत्तेजयितुमिति यावत् । **सुरेण**—प्राग्दर्शितदेवेन । **बहुधा**—अनेकशः । **आयुधादरः**—अस्त्रग्रहणाभिलाषः । **चक्रे**-विदधे । **एव**—अवधारणार्थकमव्ययम् ॥२६॥

**कृताभियोगः स तु योगसङ्गमे, प्रयोगदक्षेण तपोद्विपेन यत् ।**
**स्मरार्जितं रागमहीरुहाङ्कुरं, बभञ्ज मूलादनुकूलया धिया ॥२७॥**

अन्वयः—*तु, योगसङ्गमे, कृताभियोगः, सः, यत्, अनुकूलया, धिया, प्रयोगदक्षेण, तपोद्विपेन, स्मरार्जितम्, रागमहीरुहाङ्कुरम्, मूलात्, बभञ्ज ॥२७॥*

वृत्तिः—**तु**-पादपूरणे, अवधारणे, प्रशंसायाम् वा । **योगसङ्गमे**-योगेन, अपूर्वार्थसम्प्राप्त-सङ्गमः सम्मिलनं योगसङ्गमस्तस्मिन् तथा । यद्वा-योगस्य चित्तवृत्तिनिरोधस्य सङ्गमः सङ्गतिर्योगस-ङ्गमस्तस्मिंस्तथा । **कृताभियोगः**-कृतो विहितोऽभियोग उत्साहः अध्यवसायो वा येन स तथा । उत्साहः प्रगल्भता, अभियोगोद्यमौ' इति अभि० चिन्ता० । ३ । २१४ ॥ **सः**-भगवान् शान्तिनाथः । **यत्**-यतः । यस्माद्धेतोरिति यावत् । **अनुकूलया**-सपक्षया, सिद्धिसम्पादिकयेति यावत् । **धिया**-बुद्ध्या । **प्रयोगदक्षेण**-विधानसमर्थेन । **तपोद्विपेन**-तप उपवासादिनियमो द्विपो हस्तीव तपोद्विपः, "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३ । १ । १०२ ॥ इत्यनेनोपमितसमासः । **स्मरार्जितम्**-स्मरेण कन्द-र्पेण अर्जितः समुत्पादितः स्मरार्जितस्तन्तथा । **रागमहीरुहाङ्कुरम्**-रागोऽनुराग एव महीरुहो वृक्षो रागमहीरुहस्तस्य अङ्कुरोऽङ्कुरः प्ररोह इति यावत्, रागमहीरुहाङ्कुरस्तन्तथा । **मूलात्**-समूलम् सनि-दानमिति यावत् । **बभञ्ज**-उदमूलयत्, व्यनाशयदिति यावत् ॥२७॥

**विमोहलीलां मिथुनालिपालितां, प्रदर्शयन् हंसमहामना मनः ।**
**शशाक नोच्चालयितुं विरागवान्, मिषेण चञ्चोश्चरणद्वयस्य च ॥२८॥**

अन्वयः—*मिथुनालिपालिताम्, विमोहलीलाम्, प्रदर्शयन्, विरागवान्, हंसमहामनाः, चञ्चोः, च, चरणद्वयस्य, मिषेण, मनः, उच्चालयितुम्, न, शशाक ॥२८॥*

वृत्तिः—**मिथुनालिपालिताम्**-मिथुनानां हंसदम्पतीनामालिः श्रेणी मिथुनालिस्तया पालिता सम्पादिता मिथुनालिपालिता तान्तथा । **विमोहलीला**-विशेषेण मुह्यन्तीन्द्रियाण्यत्रेति विमोहो-मोह-नम्, सुरतमिति यावत्; तस्य लीला चेष्टा विमोहलीला सुरतचेष्टाविशेषस्तान्तथा । **प्रदर्शयन्**-समवलोकयन् । **विरागवान्**-विगतो रागो विरागः वैराग्यम् सोऽस्त्यस्येति विरागवान् । **हंसमहा-मनाः**-हंसो महामना महात्मेव तथा । "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३ । १ । १०२ ॥ इत्यनेनोप-मितसमासः । **चञ्चोः**-त्रोट्या, सृपाटिकाया इति यावत् । **च**-पुनः । **चरणद्वयस्य**-पादयुगलस्य । **मिषेण**-व्याजेन । **मनः**-अन्तःकरणम् । **उच्चालयितुम्**-अव्यवस्थापयितुम् । **न**-नहि । **शशाक**-समर्थोऽभवत् ॥२८॥

महीमहेन्द्रस्तमवेक्ष्य स क्षणं, सुरं प्रशान्तं बहुधोपसर्गतः ।
जगाम पुर्य्यां प्रभुचर्य्यया मुदं, तदा दधानः स्मृतिसावधानधीः ॥२९॥

अन्वयः—*महीमहेन्द्रः, सः, बहुधा, उपसर्गतः, प्रशान्तम्, तम्, सुरम्, क्षणम्, अवेक्ष्य, प्रभुचर्य्यया, मुदम्, दधानः, स्मृतिसावधानधीः, तदा, पुर्य्याम्, जगाम ॥२९॥*

**वृत्तिः—महीमहेन्द्रः**–महाँश्चासाविन्द्रो महेन्द्रः, मह्याः पृथिव्या महेन्द्रो महीमहेन्द्रः, राजा। **सः**–यो वन्दनार्थमागतः स नैषधः। **बहुधा**–अनेकधा। **उपसर्गतः**–उपद्रवात्। **प्रशान्तम्**–शान्तिमधिगतम्। **तम्**–सजीवप्रवेशनिर्गतं हंसात्मकम्। **सुरम्**–देवम्। **क्षणम्**–तदाख्यातिसूक्ष्मकालविशेषं यावत्। **अवेक्ष्य**–समवलोक्य। **प्रभुचर्य्यया**–विभुव्यवहारेण। **मुदम्**–हर्षम्। **दधानः**–अवलम्बमानः, धारयन्निति यावत्। **स्मृतिसावधानधीः**–स्मृत्या जात्यादिस्मरणेन सावधाना निश्चयात्मिका–धीर्बुद्धिर्यस्य स तथा। **तदा**–तस्मिन् समये। **पुर्य्याम्**–नगर्य्याम्, अत्र पुरीमित्यनेन द्वितीयान्तेन हि भवितव्यम्। तथापि छन्दोभङ्गभिया, कवीनां निरङ्कुशत्वबोधनाया च कर्मत्वविवक्षामकृत्वाऽधिकरणत्वविवक्षाकरणेन कथञ्चित् समाधेयम्। **जगाम**–गतवान्, प्रविवेशेति भावः ॥२९॥

अवर्णयत् तच्चरितं विचिन्तयन्, शकुन्तमेकान्तमनोविनोदनम् ।
स नैषधश्चानुदिनं सुधीरतः, सुधीरतां वीक्ष्य विभोश्चमत्कृतः ॥३०॥

अन्वयः—*विभोः, सुधीरताम्, वीक्ष्य, चमत्कृतः, च, अनुदिनम्, सुधीरतः, सः, नैषधः, तच्चरितम्, विचिन्तयन्, एकान्तमनोविनोदनम्, शकुन्तम्, अवर्णयत् ॥३०॥*

**वृत्तिः—विभोः**–विशेषेण भवतीति विभुः प्रभुरित्यर्थस्तस्य तथा श्रीशान्तिनाथस्य भगवत इति यावत्। **सुधीरताम्**–सुष्ठु समीचीना चासौ धीरता–धैर्य्यम् सुधीरता तान्तथा। **वीक्ष्य**–अवलोक्य। **चमत्कृतः**–प्राप्तचमत्कारः। **च**–पुनः। **अनुदिनम्**–प्रतिदिनम्, उत्तरोत्तरमिति भावः। **सुधीरतः**–विद्वदनुरक्तः। **सः**–प्रसिद्धः। **नैषधः**–निषधाधिपतिः यश्चक्रिचमूपतित्वेन पूर्वं वर्णितः सः। **तच्चरितम्**–तस्य प्रभोश्चरितं चरित्रम् तच्चरितम्, तत्तथा। **विचिन्तयन्**–मीमांसमानः। **एकान्तमनोविनोदनम्**–एकान्तेन नियमेन सर्वदाऽभीक्ष्णं वा मनो विनोदयति रञ्जयतीति एकन्तमनोविनोदनस्तन्तथा। वस्तुतस्तु–एकान्तमनोविनोदिनमित्येव पाठः साधीयान् प्रतिभाति। मुद्रितनैषधीयचरितेऽपि च तथैव पाठस्य समुपलम्भात्। अत्र च पक्षे एकान्तेन नियमेन मनोऽन्तःकरणं विनोदयति रञ्जयत्येवंशीलः एकान्तमनोविनोदी तन्तथा। **शकुन्तम्**–पक्षिणम्–प्रकृतत्वात् हंसमित्यर्थः। **अवर्णयत्**–वर्णयाञ्चकार, प्राशंसदिति यावत् ॥३०॥

**प्रभोस्तपःसन्तपनाद् वशीभव-ञ्जहौ न पार्श्वं द्युसदां जनः सदा।**
**प्रियावियोगाद्विधुरोऽपि निर्भरं, स्वमापुपूषुः परिचर्य्ययाऽऽर्यया ॥३१॥**

अन्वयः—*प्रभोः, तपः सन्तपनात्, वशीभवन्, द्युसदाम्, जनः, पार्श्वम्, न, जहौ, प्रिया-वियोगात्, निर्भरम्, विधुरः, अपि, आर्य्यया, परिचर्य्यया, स्वम्, आपुपूषुः ॥३१॥*

वृत्तिः—**प्रभोः**-विभोः शान्तिनाथस्य। **तपः सन्तपनात्**-तपस्याराधनात्। **वशीभवन्**-तदधीनीभवन्, तदायत्तः सन्निति यावत्। **द्युसदाम्**-दिवि स्वर्गे सीदन्तीति द्युसदो देवास्तेषान्तथा। **जनः**-लोकः। **पार्श्वम्**-सामीप्यम्। **न**-नहि। **जहौ**-त्यक्तवान्। **प्रियावियोगात्**-प्रियाया-दयितया-ताया, वियोगो विच्छेदः, प्रियावियोगस्तस्मात्तथा। **निर्भरम्**-अत्यन्तम्। **विधुरः**-विकलः। **अपि**-सम्भावनायाम्। **आर्य्यया**-श्रेष्ठया। **परिचर्य्यया**-शुश्रूषया। **स्वम्**-आत्मानम्। **आपुपूषुः**-बिभराम्बभूवुः ॥३१॥

**प्रकृष्टषष्ठाष्टमपाक्षिकादिभि-र्वने सयोगासनधर्मसेवनैः।**
**निरीक्ष्य देवं ध्रुवमेव देवता, कुतूहलाकान्तमना मनागभूत् ॥३२॥**

अन्वयः—*वने, देवता, प्रकृष्टषष्ठाष्टमपाक्षिकादिभिः, सयोगासनधर्मसेवनैः, (उपलक्षितम्) देवम्, निरीक्ष्य, ध्रुवम्, एव, मनाक्, कुतूहलाक्रान्तमनाः, अभूत् ॥३२॥*

वृत्तिः—**वने**-अरण्ये, तपस्याकानने इति यावत्। **देवता**-अधिष्ठात्री देवी। **प्रकृष्टषष्ठाष्टमपाक्षिकादिभिः**-षष्ठञ्च अष्टमञ्च पाक्षिकादि च षष्ठाष्टमपाक्षिकादीनि, प्रकृष्टानि उत्तमानि समीचीनानि वा तानि, प्रकृष्टषष्ठाष्टमपाक्षिकादीनि तैस्तथा। दिनद्वयदिनत्रयपक्षोपवासप्रभृतितपांसि इति यावत्। **सयोगासनधर्मसेवनैः**-सयोगासनं-योगासनेन सहितं यथास्यात्तथा धर्मसेवनानि आतपाश्रयणानि सयोगासनधर्मसेवनानि तैस्तथा। उपलक्षितमिति शेषः। **देवम्**-प्रभुम् भगवन्तम् श्रीशान्तिनाथमिति यावत्। **निरीक्ष्य**-अवलोक्य। **ध्रुवम्**-निश्चितं यथास्यात्तथा। **एव**-अवधारणार्थकमव्ययम्। **मनाक्**-ईषत्। **कुतूहलाक्रान्तमनाः**-कुतूहलेन कौतुकेन आक्रान्तमाकृष्टं मनोऽन्तःकरणं यस्य स तथा। **अभूत्**-अभवत् ॥३२॥

**अवश्यभव्येष्वनवग्रहग्रहा, नृणां मतिः क्राम्यति यत्क्रमानुगा।**
**समूलमुन्मूलयितुं तदान्तरं, प्रचक्रमे चक्रमयं द्विषां क्रमात् ॥३३॥**

अन्वयः—*अवश्यभव्येषु, अनवग्रहग्रहा, यत्क्रमानुगा, नृणाम्, मतिः, क्रामति, तत्, आन्तरम्, द्विषाम्, चक्रम्, अयम्, क्रमात्, समूलम्, उन्मूलयितुम्, प्रचक्रमे ॥३३॥*

**वृत्तिः**—**अवश्यभव्येषु**–अवश्यं नियमेन भव्याः भवितव्याः शुभाशुभादयोऽवश्यभव्याः तेषु तथा, विषये इति यावत्। **अनवग्रहग्रहा**–अनवग्रहोऽनाबध्यमानो निरर्गलोऽभिनिवेशः प्रसरो यस्याः सा तथा। **यत्क्रमानुगा**–यस्य आन्तरद्विट्चक्रस्य क्रमानुगा पद्धत्यनुसारिणी तथा। **नृणाम्**–जनानाम्। **मतिः**–बुद्धिः। **क्रामति**–चलति। **तत्**–तादृशम्। **आन्तरम्**–हृदयान्तर्वर्ति। **द्विषाम्**–शत्रूणाम्, कामक्रोधादीनामिति यावत्। **चक्रम्**–समूहम्, कदम्बकम् इति यावत्। **अयम्**–असौ, भगवान् शान्तिनाथ इति यावत्। **क्रमात्**–क्रमशः। **समूलम्**–सादिकारणम्। **उन्मूलयितुम्**–विनाशयितुम्। **प्रचक्रमे**–प्रववृते ॥३३॥

**पटुः पुरस्कृत्य पुराकृताकृतिं, यया दिशा धावति वेधसः स्पृहा।**
**भवस्य वश्यस्तदवश्यपश्यधीः, प्रवर्ततेऽनर्तितया तयाऽऽतुरः ॥३४॥**

अन्वयः—*कृतिम्, पुरस्कृत्य, पुराकृता, पटुः, वेधसः, स्पृहा, यया, दिशा, धावति, तदवश्यपश्यधीः, (अपि) तया, आतुरः, भवस्य, वश्यः, अनर्तितया, प्रवर्तते ॥३४॥*

**वृत्तिः**—**कृतिम्**–यत्नम्, कार्य्यम् वा। **पुरस्कृत्य**–समुद्दिश्य, समादृत्य वा। **पुराकृता**–पुरा पूर्वं, कृता–विहिता, पुराकृता। **पटुः**–साध्वी। **वेधसः**–कर्मकर्तुः परमेन्द्रस्य–आत्मनः। **स्पृहा**–वाञ्छा। **यया दिशा**–येन मार्गेण। **धावति**–गच्छति। **तदवश्यपश्यधीः**–तदवश्या–तदनधीना, पश्या–सर्वद्रष्ट्री धी–बुद्धिर्यस्य स तथा। (अपि) **भवस्य**–संसारस्य, ईशस्य। **वश्यः**–वशवर्ती। अत एव। **आतुरः**–व्यग्रः। जन इति शेषः। **अनर्तितया**–न–अर्तिः पीडा यस्य सोऽनर्तिः, तस्य भावोऽनर्तिता तया तथा। अनायासेनेति यावत्। **तया**–वेधः स्पृहाभिक्षितमार्गेण। **प्रवर्तते**–प्रचलति। प्रवृत्तो भवतीति यावत् ॥३४॥

**तपोविधौ मन्दरसुन्दराशयः, स्थिरः प्रभुः स्यान्न कदापि चञ्चलः।**
**तृणेन वात्येव तयाऽनुगम्यते, भियेतरेणैव तु कातरक्रिया ॥३५॥**

अन्वयः—*मन्दरसुन्दराशयः, स्थिरः, प्रभुः, तपोविधौ, कदापि, चञ्चलः, न, स्यात्, (यत्) तृणेन, वात्या, इव, तया, (सः) अनुगम्यते, तु, इतरेण, एव, भिया, कातरक्रिया, (अनुगम्यते)।*

वृत्तिः—मन्दरसुन्दराशयः-मेरुवन्मनोहराभिप्रायः सुराचलसदृशनिष्कम्पमना इति यावत् । स्थिरः-स्थिरतोपेतः । प्रभुः-भगवान् शान्तिनाथः । तपोविधौ-संयमाराधने । कदापि-कस्मिँश्चित् समयेऽपि । चञ्चलः-भयविद्रुतः । न-नहि, स्यात्-भवेत् । (यत्-यतः) तृणेन-स्वनामख्यातेन । वात्या-वातसमूहः । 'पाशादेश्च ल्यः' । ६ । २ । २५ ॥ इति ल्यः । इव-यथा । तया-वेधसः स्पृहया । (सः-जिनः) अनुगम्यते-अनुस्रियते, सा स्पृहाऽर्हतः पश्चाद् धावति न पुनर्जिनस्तामनु इति । तु-पुनः । इतरेण-अन्येन साधरणजनेनेति यावत् । एव-नूनम् । भिया-भयेन । कातरक्रिया-कापुरुषप्रवृत्तिः, दीनतेति यावत् । अनुगम्यते इति शेषः ॥३५॥

**वृते समाधेर्विधिनाऽऽत्मबोधने, धनेऽपरस्मिन् न मुनेर्मनोरुचिः ।**
**अनात्मलीनस्य मलीनताऽऽदृता, जनस्य चित्तेन भृशाऽवशात्मना ॥३६॥**

अन्वयः—*समाधे, विधिना, आत्मबोधने, वृते, अपरस्मिन्, धने, मुनेः, मनोरुचिः, न, अनात्मलीनस्य, जनस्य, भृशावशात्मना, चित्तेन, मलीनता, आदृता ॥३६॥*

वृत्तिः—समाधेः-सम्यगाधीयते समाधिः, ध्यानमेवार्थमात्राभासनरूपं ध्येयाकारनिर्भासात्मकं ध्येयस्वभावावेशात्, तस्य तथा । विधिना-विधानेन । आत्मबोधने-आत्मतत्त्वज्ञाने । वृते-स्वीकृते । अपरस्मिन्-अन्यस्मिन् । धने-विभवे, वित्त इति यावत् । मुनेः-श्रमणस्य । मनोरुचिः-मनसश्चेतसो रुचिरभिलाषो मनोरुचिः । न-नहि । भवतीतिशेषः । अनात्मलीनस्य-न आत्मा अनात्मा, आत्मभिन्नः, अनात्मनि लीनो-अनात्मलीनस्तस्य तथा । जनस्य-लोकस्य । भृशावशात्मना-भृशमत्यर्थमवशः स्वतन्त्रः आत्मा स्वरूपं यस्य तत् भृशावशात्म तेन तथा । चित्तेन-अन्तःकरणेन । मलीनता-मालिन्यम्, मलीमसतेति यावत् । आदृता-आश्रिता, स्वीकृतेति यावत् ॥३६॥

**अथावलम्ब्य क्षणमेकपादिकां, धरँल्लयं धीरतयैकतालयम् ।**
**तिथौ नवम्यां शुचिपोषपक्षजे, स शिश्रिये केवलबोधमुज्ज्वलम् ॥३७॥**

अन्वयः—*अथ, क्षणम्, एकपादिकाम्, अवलम्ब्य, एकतालयम्, धीरतया, लयम्, धरन्, सः, शुचिपोषपक्षजे, नवम्याम्, तिथौ, उज्ज्वलम्, केवलबोधम्, शिश्रिये ॥३७॥*

वृत्तिः—अथ-अनन्तरम् । क्षणम्-तदाख्यसूक्ष्मकालविशेषं यावत् । एकपादिकाम्-एकश्चासौ पाद एकपादः, सोऽस्यां स्थितावस्तीति एकपादिका तान्तथा । स्थितिमिति यावत् । अवलम्ब्य-

आश्रित्य । एकतालयम्–एकताया एकाग्रचित्ताया आलयो निवासः आधार इति यावत्, एकताल-यस्तन्तथा । लयम्–लीयत आत्माऽत्रेति लयः, समाधिस्तन्तथा । धीरतया–धैर्य्येण । धरन्–अवलम्बमानः । सः–भगवान् शान्तिनाथ इति यावत् । शुचिपौषपक्षजे–पौषस्य तदाख्यमासस्य पक्षः पञ्चदशदिनात्मकः पक्षः पौषपक्षः, शुचिः–शुक्लश्चासौ पौषपक्षः शुचिपौषपक्षस्तस्माज्जातः शुचिपौषपक्ष-जस्तस्मिँस्तथा । अत्र तिथौ नवम्यामिति दर्शनात् तिथिशब्दस्य स्त्रीलिङ्गतया तदर्थविशेषणतया शुचि-पौषपक्षज इत्यत्रापि स्त्रीलिङ्गत्वमेवोचितम्, एवञ्चच्छन्दोभङ्ग इति चेत्–सत्यम् । 'तिथिः पुनः कर्मवाटी' २-६१-इत्यभि० चि० स्वोपज्ञटीकायां तन्यते । तिथिः पुंस्त्रीलिङ्ग–"तनेर्डित्" उणा० ६७४ इति इथिः इति दर्शनेन तिथिशब्दस्य पुंल्लिङ्गत्वस्यापि बोधनादिति । नवम्याम्–नवानां पुरणी नवमी तस्या-न्तथा । तिथौ–कर्मवाट्याम् नवमीदिन इति यावत् । उज्ज्वलम्–दीप्तम्, विशदम्, विकाशि वा । केवलबोधम्–आत्मनः केवलित्वसम्पादकं तदाख्यज्ञानम् । शिश्रिये–प्राप, अवललम्बे इति यावत् ॥३७॥

तदुत्सवे कोऽपि जनः सुरो नवा, तदा निदद्रावुपपल्वलं खगः ।
सुगन्धिवृष्टेरनु दिव्यनाटक–प्रवर्तनेऽत्राप्सरसाप्तनर्तने ॥३८॥

अन्वयः—*तदा, तदुत्सवे, सुगन्धिवृष्टेः, अनु, अत्र, अप्सरसाप्तनर्तने, दिव्यनाटकप्रवर्तने, कः, अपि, जनः, सुरः, उपपल्वलम्, खगः, वा, न, निदद्रौ ॥३८॥*

वृत्तिः—तदा–तस्मिन् समये । तदुत्सवे–केवलबोधप्राप्तिनिमित्तकमहसि । सुगन्धिवृष्टेः–सुन्दरगन्धवत्पदार्थकर्मकवर्षणात् । अनु–पश्चात् । सुगन्धिवर्षणोत्तरकाले इति भावः । अप्सरसाप्त-नर्तने–अप्सरोभिः स्वर्वेश्याभिराप्तं व्याप्तमप्सरसाप्तम्, तच्च तन्नर्तनम्, अप्सरसाप्तनर्तनम्, तस्मिँस्तथा । दिव्यनाटकप्रवर्तने–दिव्यमलौकिकञ्च तन्नाटकं रूपकादि, दिव्यनाटकम् तस्य प्रवर्तनम् दिव्यनाटकप्रव-र्तनम् तस्मिँस्तथा । कः–कश्चित् । अपि–सम्भावनायाम् । जनः–लोकः । सुरः–देवः । उपपल्वलम्–पल्वलस्य क्रीडाल्पसरसः–समीपम् उपपल्वलम् । खगः–पक्षी, हंस इति यावत् । वा–अथवा । न–नहि । निदद्रौ–निद्रितवान् ॥३८॥

ममं तदोच्चैर्नमने समं पुनः, प्रपञ्चने संवरणे तथाऽऽसने ।
स तिर्यगावर्जितकन्धरः शिरः, प्रणामकृद् देवगणो नटन् बभौ ॥३९॥

अन्वयः—*तिर्य्यगावर्जितकन्धरः, शिरःप्रणामकृत्, सः, देवगणः, तदा, उच्चैर्नमने, समम्, पुनः, प्रपञ्चने, संवरणे, तथा, आसने, समम्, नटन्, बभौ ॥३९॥*

**वृत्तिः**—**तिर्य्यगावर्जितकन्धरः**–तिर्य्यगावर्जिता नम्रीकृता कंधरा ग्रीवा येन स तथा । **शिरःप्रणामकृत्**–शिरसा मस्तकेन प्रणामः प्रकृष्टनमस्कारः शिरःप्रणामः, तं करोतीति तथा । **सः**–प्रभुसन्निधिवर्तितयाऽतिप्रसिद्धः । **देवगणः**–सुरसमुदायः । **तदा**–तस्मिन् समये । **उच्चैः**–अतिशयेन । **नमने**–नम्रीभावे । **समम्**–तुल्यं यथास्यात्तथा । **पुनः**–किञ्च । **प्रपञ्चने**–अङ्गविस्तारणे । **संवरणे**–अङ्गसङ्कोचने । **तथा**–पुनः । **आसने**–उपवेशने । **समम्**–तुल्यं यथास्यात्तथा । **नटन्**–नृत्यन् । नृत्यं विदधदिति यावत् । **बभौ**–शुशुभे ॥३९॥

**स हंसदेवोऽपि विभोर्गुणावली–निबद्धबुद्धिः समुपेत्य नृत्यकृत् ।**
**विशिष्टभक्तीर्बहुधा स्थितोऽन्तरे, विधाय पक्षेण रतक्लमालसः ॥४०॥**

**अन्वयः**—*विभोः, गुणावलीनिबद्धबुद्धिः, समुपेत्य, नृत्यकृत्, रतक्लमालसः, सः, हंसदेवः, अपि, बहुधा, पक्षेण, विशिष्टभक्तीः, विधाय, अन्तरे, स्थितः ॥४०॥*

**वृत्तिः**—**विभोः**–प्रभोः, भगवतः शान्तिनाथस्येति यावत् । **गुणावलीनिबद्धबुद्धिः**–गुणावल्या शौर्य्यवीर्य्यगाम्भीर्य्यौदार्य्यकेवलित्वादिगुणश्रेण्यां, निबद्धा समाकृष्टा बुद्धिर्ज्ञानं मतिर्वा यस्य स तथा । **समुपेत्य**–समुपलभ्य । तत्स्थानमिति शेषः । **नृत्यकृत्**–नृत्यं नर्तनं, कृतवानिति तथा । विहितनृत्य इति यावत् । **रतक्लमालसः**–रतं नाटकरमणम्, तस्य क्लमः क्लान्तिः खेद इति यावत् । रतक्लमस्तेन अलस आलस्यवान्, कायिकचेष्टाविहीनप्राय इति यावत् तथा । **सः**–प्रसिद्धः । **हंसदेवः**–देवस्य जीव-प्रदेशनिर्गतो हंसो हंसदेवः "राजदन्तादित्वात् पूर्वनिपाताईस्य देवशब्दस्य परनिपातः" "मयूरव्यंस-कादित्वात् शाकपार्थिवादेराकृतगणत्वात् मध्यमपदलोपी समासश्चेति द्रष्टव्यम् । **अपि**–सम्भावनायाम् । **बहुधा**–अनेकशः । **पक्षेण**–पतत्त्रेण । **विशिष्टभक्तीः**–विशिष्टा विलक्षणाश्च ता भक्तयः शुश्रूषा विशि-ष्टभक्तयस्तास्तथा । **विधाय**–सम्पाद्य, कृत्वेति यावत् । **अन्तरे**–मध्ये । **स्थितः**–अतिष्ठत्, स्थित-वानिति यावत् ॥४०॥

**सनालमात्माननिर्जितप्रभं, प्रयुज्यमानं त्रिदशैः सरोरुहम् ।**
**धृतातपत्त्रत्रयरूपमाबभौ, प्रभुप्रभावाद् बहुकाञ्चनाञ्चितम् ॥४१॥**

**अन्वयः**—*सनालम्, आत्माननिर्जितप्रभम्, त्रिदशैः, प्रयुज्यमानम्, प्रभुप्रभावात्, बहुका-ञ्चनाञ्चितम्, धृतातपत्त्रत्रयरूपम्, सरोरुहम्, आबभौ ॥४१॥*

**वृत्तिः**—**सनालम्**–नालसहितम् । **आत्माननिर्जितप्रभम्**–आत्मनः–स्वस्य, आननेन—वद-

नेन, निर्जिता निःशेषेण जिता पराभूतेति यावत्, प्रभा कान्तिर्यस्य तत्तथा। त्रिदशैः—देवैः। प्रयुज्यमानम्—प्रेर्यमाणम्। प्रभुप्रभावात्—प्रभोः शान्तिनाथस्य प्रभावोऽनुभावः, प्रभुप्रभावस्तस्मात्तथा। बहुकाञ्चनाञ्चितम्—बहूनि च तानि काञ्चनानि, किञ्जल्का बहुकाञ्चनानि, तैरञ्चितम् विशिष्टम्, बहुकाञ्चनाञ्चितम्। धृतातपत्त्रत्रयम्—धृतञ्च तत् आतपत्त्रत्रयम् धृतातपत्त्रत्रयम्, तस्य रूपम् स्वरूपमिव रूपं यस्य तत्तथा। "उष्ट्रमुखादयः" ३।१।२३॥ इत्यनेनोपमानसमानस्य रूपशब्दस्य लोपो, बहुव्रीहिसमासश्च निपात्यते। सरोरुहम्—कमलम्। आबभौ—शुशुभे ॥४१॥

**उपात्तलक्ष्मि प्रभुवक्त्रपाणिना, ह्रियाऽऽनतं काञ्चनमम्बुजन्म किम्।**
**तमुच्छ्रितच्छत्रमिषेण दण्डभृद् निषेवते स्माहृतमुक्तसम्पदा ॥४२॥**

अन्वयः—*प्रभुवक्त्रपाणिना, उपात्तलक्ष्मि, ह्रिया, आनतम्, काञ्चनम्, अम्बुजन्म, उच्छ्रितच्छत्रमिषेण, दण्डभृत्, (सत्) आहृतम्, उक्तसम्पदा, तम्, निषेवते, स्म, किम् ॥४२॥*

वृत्तिः—प्रभुवक्त्रपाणिना—वक्त्र-मुखञ्च, पाणी-हस्तौ च वक्त्रपाणि, 'प्राण्यङ्गत्वादेकवद्भावः' प्रभोः-शान्तिनाथस्य वक्त्रपाणि प्रभुवक्त्रपाणि तेन तथा। उपात्तलक्ष्मि—उपात्ता-प्राप्ता, लक्ष्मीः-शोभा येन तत्तथा। ह्रिया—लज्जया। आनतम्—सर्वतोभावेन नम्रम्। काञ्चनम्—सौवर्णम्। अम्बुजन्म—अम्बुनो जलात् जन्मोत्पत्तिर्यस्य तत्तथा। कमलमित्यर्थः। उच्छ्रितच्छत्रमिषेण—उच्छ्रितं विशालञ्च तच्छत्रमातपत्रम् उच्छ्रितच्छत्रम् तस्य मिषं व्याजः उच्छ्रितच्छत्रमिषन्तेन तथा। दण्डभृत्—दण्डं छत्रदण्डं बिभर्ति धारयतीति दण्डभृत्, दण्डधारकं सत्। आहृतम्—सत्कृतम्। उक्तसम्पदा—उक्ता-कथिता, चासौ सम्पत्-सम्पत्तिरुक्तसम्पत्, तया तथा। तम्—भगवन्तं शान्तिनाथमित्यर्थः। निषेवते स्म—न्यसेवत, शुश्रुषते स्मेति यावत्। किम्—उत्प्रेक्षायाम् ॥४२॥

**अहर्निशं सेवनया विभोर्द्विधा, सचामरं चामरमानसे प्रियम्।**
**अबुद्ध तं विद्रुमदण्डमण्डितं, पवित्रहस्तं शुचिमेव पण्डितः ॥४३॥**

अन्वयः—*अहर्निशम्, विभोः, सेवनया, द्विधा, सचामरम्, च, अमरमानसे, प्रियम्, विद्रुमदण्डमण्डितम्, तम्, पवित्रहस्तम्, पण्डितः, शुचिम्, एव, अबुद्ध ॥४३॥*

वृत्तिः—अहर्निशम्—रात्रिन्दिवम्। विभोः—प्रभोः श्रीशान्तिनाथस्य। सेवनया—शुश्रूषया, परिचर्ययेति यावत्। द्विधा—द्वाभ्यां प्रकाराभ्यां द्विधा, प्रकारद्वयेनेत्यर्थः। सचामरम्—चामरेण व्य-

जनापरपर्य्यायेण सहितः सचामरस्तन्तथा । च–पुनः । अमरमानसे-अमराणां देवानां मानसमन्तः–करणममरमानसम् तस्मिँस्तथा । प्रियम्–हृद्यम् । विद्रुमदण्डमण्डितम्–विद्रुमस्य प्रवालस्य दण्डो यष्टिर्विद्रुमदण्डस्तेन मण्डितो –भूषितो विद्रुमदण्डमण्डितस्तन्तथा । तम्–प्रभुसेवासाधकत्वेन प्रसिद्ध-मित्यर्थः । पवित्रहस्तम्–पविना वज्रेण त्रायते रक्षति देवान् आत्मानं वा, पवित्रो वज्रपाणिरिन्द्र इति यावत् । यद्वा—पविर्वज्रं त्रायते इति पवित्र इन्द्रस्तस्य हस्तः करः पवित्रहस्तस्तन्तथा । पण्डितः–सदसद्विवेकवती बुद्धिः पंडा साऽस्त्यस्येति पण्डितः, "तदस्य सञ्जातं तारकादिभ्य इतः" ७।१।१३८॥ इत्यनेन 'इतः' प्रत्ययः । शुचिम्–पवित्रम् । शुद्धमिति यावत् । एव–अवधारणार्थकमव्ययम् । अबुद्ध–व्यजानात्, अवागमदिति यावत् ॥४३॥

चकार कश्चिद् वरणत्रयीँ न किं, सुरश्च सिंहासनमर्हतः पुरः ।
परो महेन्द्रध्वजमाप्तभक्तये सपीतमम्भःप्रभुचामरञ्च किम् ॥४४॥

*अन्वयः—कश्चित्, सुरः, अर्हतः, पुरः, सिंहासनम्, च, वरणत्रयीम्, किम्, न, चकार, परः, आप्तभक्तये, सपीतम्, अम्भःप्रभुचामरम्, इव, महेन्द्रध्वजम्, च, किम्, न, (चकार)* ॥४४॥

वृत्तिः—कश्चित्–अनिर्दिष्टनामधेयः कोऽपि । सुरः–देवविशेषः । अर्हतः–जिनेश्वरस्य, भगवतः–शान्तिनाथस्येति यावत् । पुरः–पुरस्तात् अग्रे इति यावत् । सिंहासनम्–सिंहोपलक्षित-मासनं सिंहासनम्, स्वर्णमयभद्रासनमिति यावत् । च–पुनः । वरणत्रयीम्–प्राकारत्रयम् । किम्–प्रश्नार्थकमव्ययम् । न–नहि । चकार–कृतवान् । अपि तु कृतवानेवेति भावः । परः–अन्यः । सुर इति शेषः । आप्तभक्तये–आप्तस्य यथार्थवक्तुर्भगवतः शान्तिनाथस्येति यावत् । भक्तिः सेवा, शुश्रूषेति यावत् आप्तभक्तिस्तस्यै तथा । सपीतम्–पीतवर्णसहितम् । अम्भःप्रभुचामरम्–अम्भसां जलानां प्रभु-रम्भःप्रभुर्वरुणस्तस्य चामरः व्यजनम्, अम्भःप्रभुचामरस्तन्तथा । (इव–यथा) महेन्द्रध्वजम्–महेन्द्रस्य देवेन्द्रस्य ध्वजः पताका महेन्द्रध्वजस्तन्तथा । च–पुनः । किम्–प्रश्नार्थकमव्ययम् । न–नहि । चकार–कृतवान् । अपि तु कृतवानेवेति भावः ॥४४॥

कृतावरोहस्य हयादुपानहौ, विनेयुषस्तत्र बलद्विषस्तदा ।
नियोगतस्ताः सुमनःपरम्पराः, परागपूर्णा ववृषुर्विकस्वराः ॥४५॥

*अन्वयः—तत्र, तदा, हयात्, कृतावरोहस्य, उपानहौ, विनेयुषः, बलद्विषः, नियोगतः, सुमनः-परम्पराः, विकस्वराः, परागपूर्णाः, ताः, ववृषुः ।*

वृत्तिः—तत्र—देशनाभूमौ । तदा—तस्मिन् समये । हयात्—अश्वात्, उच्चैःश्रवस इति यावत् । कृतावरोहस्य—अवतीर्णस्य । उपानहौ—पादत्राणे । विनेयुषः—अपनीतवतः । बलद्विषः—इन्द्रस्य । नियोगतः—आदेशात् । सुमनःपरम्पराः—देवश्रेणयः । 'देवाः सुपर्वसुरनिर्जरदेवतर्भु-बर्हिर्मुखाऽनिमिषदैवतनाकिलेखाः । वृन्दारकाः सुमनसस्त्रिदशा अमर्त्याः स्वाहास्वधाक्रतुसुधाभुज आदितेयाः' २ । २ । इत्यभि० चिन्ता० । विकस्वराः—विकसनशीलाः प्रफुल्ला इति यावत् । परागपूर्णाः—परागैः-पुष्परजोभिः पूर्णा व्याप्तास्तास्तथा । ताः—सुमनःपरम्पराः, पुष्पश्रेणीः । 'पुष्पं सूनं सुमनसः, प्रसवश्च मणीवकम्' ४-३६१ । इत्यभि० चिन्ता० । ववृषुः—अवर्षन् ॥४५॥

सुवर्णपद्मोदरचारचारुतां, ततः पदे रेजतुरस्य बिभ्रती ।
निवेशकल्याणपदं सुसंपदं, सुवर्णसेवामिव धर्तुमुत्सुके ॥४६॥

अन्वयः—*ततः, सुवर्णपद्मोदरचारचारुताम्, बिभ्रती, अस्य, पदे, निवेशकल्याणपदम्, सुवर्णसेवाम्, सुसम्पदम्, धर्तुम्, उत्सुके, इव, रेजतुः ॥४६॥*

वृत्तिः—ततः—तदनन्तरम् सुमनःकलिकविकस्वरपुष्पवर्षणानन्तरमिति यावत् । सुवर्णपद्मोदरचारचारुताम्—सुवर्णस्य काञ्चनस्य पद्मानि कमलानि नवसङ्ख्याकानीति शेषः सुवर्णपद्मानि, तेषां उदरे मध्ये चारो विचरणम्, सुवर्णपद्मोदरचारस्तेन चारुणी सुन्दरे सुवर्णपद्मोदरचारचारुणी, तयोर्भावः, सुवर्णपद्मोदरचारचारुता, तान्तथा । बिभ्रती—धारयन्ती दधतीति यावत् । अस्य—भगवतः शान्तिनाथस्य । पदे—चरणौ 'पदं शब्दे च वाक्ये च, व्यवसायप्रदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनो' रिति मेदिनी । निवेशकल्याणपदम्—निवेशो भोगश्च कल्याणं मङ्गलञ्च निवेशकल्याणे' 'द्वन्द्वतत्पुरुषयोः परवल्लिङ्गत्वनियमात्, तयोः पदमास्पदम् निवेशकल्याणपदम्, तत्तथा । सुवर्णसेवाम्—सुवर्णेन काञ्चनेन सेवा शुश्रूषा सुवर्णसेवा तान्तथा, यद्वा-सुष्ठु शोभनश्चासौ वर्णो यशो गुणकथादिः सुवर्णः तेन सेवा भक्तिः सुवर्णसेवा तान्तथा । सुसम्पदम्—सुष्ठु शोभना सम्पत् सम्पत्तिः सुसम्पत्, तान्तथा । धर्तुम्—आदातुम् । उत्सुके—उत्कण्ठिते । इव—यथा । रेजतुः—शुशुभाते ॥४६॥

महोत्सवेऽस्मिन्नसुरैः सुरैः समं, तथैव मैत्री जनसन्निधेरभूत् ।
तयोः प्रवालैर्वनयोस्तथाम्बुजे-रवापि मोदः सुमनस्तया यथा ॥४७॥

अन्वयः—*अस्मिन्, महोत्सवे, असुरैः, सुरैः, समम्, जनसन्निधेः, मैत्री, तथा, एव, अभूत्,*

*यथा, तयोः, वनयोः, प्रवालैः, तथा, अम्बुजैः, सुमनस्तया, मोदः, अवापि ॥४७॥*

वृत्तिः—अस्मिन्–केवलबोधसम्बन्धिनि। महोत्सवे–महानतिशयितश्चासावुत्सवो महोत्सवस्तस्मिँस्तथा। असुरैः–दानवैः। सुरैः–देवैः। समम्–सह। मैत्री–मित्रता, सख्यमिति यावत्। जनसन्निधेः–लोकसमुदयस्य। तथैव–तेन प्रकारेण खलु। अभूत्–अभवत्। यथा–येन प्रकारेण। तयोः–प्रसिद्धयोः। वनयोः–उद्यान-पानीययोः। उद्यानस्य च काननविशेषानतिरेकः। कोशे काननपदमुद्यानपरमुक्तं वा। प्रवालैः–पल्लवैः, किसलयैरिति यावत्। तथा–पुनः। अम्बुजैः–कमलैः। सुमनस्तया–पुष्पभावेन कुसुमत्वेनेति यावत्। मोदः–हर्षः। अवापि–समधिगतः ॥४७॥

**रुजा विरोधेतिकलिक्रिया मृते-र्भियाऽभवद् निर्विषयाऽर्हतः श्रिया।**
**रसेन सेने अपि सख्यमीयतु-र्नियोद्धुकामे किमु बद्धवर्मणि ॥४८॥**

*अन्वयः—अर्हतः, श्रिया, मृतेः, भिया, रुजा, विरोधेतिकलिक्रिया, निर्विषया, अभवत्, नियोद्धुकामे, बद्धवर्मणी, सेने, अपि, रसेन, सख्यम्, ईयतुः, किम् ॥४८॥*

वृत्तिः—अर्हतः–जिनेश्वरस्य, भगवतः शान्तिनाथस्येति यावत्। श्रिया–लक्ष्म्या, शोभया वा। मृतेः–मरणस्य। भिया–भयेन। रुजा विरोधेतिकलिक्रिया–रुजा–रोगश्च, विरोधो वैरञ्च ईतिश्चोपद्रवः 'अतिवृष्टिरनावृष्टिः, शलभा मूषिकाः शुकाः। अत्यासन्नाश्च राजानः, षडेता ईतयः स्मृताः' इत्युक्तः षट्प्रकारः कलिः क्लेशश्च रुजाविरोधेतिकलयस्तेषां क्रिया प्रवृत्तिस्तया। निर्विषया–निर्गतो विषयः प्रचारो यस्याः सा तथा। "प्रात्यवपरिनिरादयः" ३।१।३७॥ इत्यनेन समासः। अभवत्–अभूत्, अजायतेति यावत्। नियोद्धुकामे–नियोद्धुं कामोऽभिलाषो ययोस्ते तथा। "तुमश्च मनःकामे" ३।२।१४०॥ इत्यनेन कामशब्द उत्तरपदे तुमो मकारस्य लोपः। बद्धवर्मणी–बद्धं सन्दानितं वर्म–कवचं सन्नाहो वा ययोस्ते तथा परिहिते कवचे इति यावत्। सेने–सैन्ये, वाहिन्याविति यावत्। अपि–सम्भावनायामव्ययम्। रसेन–आनन्देन, रागेण वा, अनुरागेणेति यावत्। सख्यम्–मित्रताम्, मैत्रीमिति यावत्। ईयतुः–अधिजग्मतुः, प्रापतुरिति यावत्। किमु–सम्भावनायाम् इति ॥ ४८ ॥

**विधाय मूर्तिं कपटेन वामनीं, शनैस्त्वरन् यां त्रिपदीमदीधरत्।**
**प्रसूत्वरां तां पुरुषोत्तमः परा-मनेकपेऽधत्त गणेशपेशले ॥४९॥**

*अन्वयः*—*कपटेन, वामनीम्, मूर्तिम्, विधाय, शनैः, चरन्, याम्, त्रिपदीम्, अदीधरत्, पुरुषोत्तमः, प्रसृत्वराम्, पराम्, ताम्, गणेशपेशले, अनेकपे, अधत्त ॥४९॥*

**वृत्तिः**—**कपटेन**–छलेन । **वामनीम्**–वामनस्य, खर्वस्येयं वामनी ताम् तथा वामनावतारकृप्रामितियावत् । **मूर्तिम्**–शरीरम् । **विधाय**–कृत्वा । वामनाकारमाधायेत्यर्थः । **शनैः**–मन्दं यथा स्यात्तथा । **चरन्**–गच्छन् । **याम्**–यादृशीम् । **त्रिपदीम्**–त्रयाणां पदानां चरणानां समाहारस्त्रिपदी तान्तथा । **अदीधरत्**–धृतवान् । पुरुषोत्तमः–विष्णुरितिशेषः । 'विष्णुर्जिष्णु जनार्दनौ हरिहृषीकेशाच्युताः केशवो, दाशार्हः पुरुषोत्तमोऽब्धिशयनोपेन्द्रावजेन्द्रानुजौ' २-१२८ इत्यभि० चिन्ता० । **पुरुषोत्तमः**–पुरुषेषु उत्तमः स तथा जिनः, पुरिसुत्तमाणं इति सूत्रेऽपि श्रीशान्तिनाथ इति यावत् । **प्रसृत्वराम्**–प्रसरणशीलाम् । **पराम्**–उत्कृष्टाम् । **ताम्**–त्रिपदीम् 'उपन्ने ई वा, विगमे ई वा, धुवे ई वा' इति पदत्रयात्मिकाम् । **गणेशपेशले**–गणस्यैकवाचनिकमुनिसमुदायस्य ईशः स्वामी गणेशो पेशलः कोमलो मनोज्ञो वा गणेशः गणधरः स चासौ पेशलस्तस्मिँस्तथा चक्रायुधाभिधाने इति यावत् । **अनेकपे**–अनेकान् भव्यान् पाति रक्षतीति अनेकपस्तस्मिँस्तथा । **अधत्त**–धृतवान् । अयं भावः–यथा पुरुषोत्तमो विष्णुर्वामनीं त्रिपदीं गणेशपेशले विनायकं प्रति कोमले भक्तिप्रह्वेऽनेकपो हस्ती स इव बली तस्मिँस्तथा बलिनामकेऽसुरे अदीधरत्तथा पुरुषोत्तमो भगवान् श्रीशान्तिनाथो गणधरे त्रिपदीमदीधरदिति अर्थस्तूक्त एव । व्यतिरेकानुप्राणितः श्लेषालङ्कारः ॥४९॥

**त्रिविक्रमोऽरिष्टबलं पिनष्टि यः, स्वयं बलिध्वंसिविडम्बिनीमयम् ।**
**तनूं न धर्ता किमनूनतेजसा, सचक्रपाणिश्च कृपाणिनां प्रभुः ॥५०॥**

*अन्वयः*—*यः, स्वयम्, त्रिविक्रमः, अरिष्टबलम्, पिनष्टि, (सः) कृपाणिनाम्, प्रभुः, च, सचक्रपाणिः, अयम्, अनूनतेजसा, बलिध्वंसिविडम्बिनीम्, तनूम्, किम्, न धर्ता ॥५०॥*

**वृत्तिः**—**यः**–यादृशः । **स्वयम्**–आत्मना । **त्रिविक्रमः**–ज्ञानदर्शनचरित्रेषु विक्रमो बलं यस्य स तथा, ज्ञानदर्शनचारित्रवत्वात्त्रिविक्रमः सन् । **अरिष्टबलम्**–अरिष्टस्य–अशुभस्य बलं-सैन्यम्,अरिष्टबलम्, अशुभकदम्बकम् तत्तथा । **पिनष्टि**–चूर्णयति, अवध्वंसयतीति यावत् । (**सः**–तादृशः प्रसिद्धो वा) **कृपाणिनाम्**–कृपात्मकोऽणः शब्दोऽस्त्येषां कृपाणिनः यद्वा कृपामणयते जीवयतीति कृपाणम् अहिंसादिमहाव्रतं तदस्त्येषां ते कृपाणिनस्तेषां तथा, मुनीनामिति यावत् । **प्रभुः**–स्वामी, नायक इति यावत् । **च**–पुनः । **सचक्रपाणिः**–चक्रेण चिह्नविशेषेण सहितः सचक्रः,सचक्रः पाणिः करो यस्य स सचक्रपाणिः । **अयम्**-असौ । भगवान् शान्तिनाथ इति यावत् । **अनूनतेजसा**–अनल्पप्रतापेन । **बलिध्वंसिविडम्बिनीम्**–बलिध्वं-

सिनं गृहीतवामनावतारं विष्णुं विडम्बयति, अनुकरोति जयतीति वा तच्छीला बलिध्वंसिविडम्बिनी तान्तथा । कृष्णजित्वरीमिति भावः । तनूम्–शरीरम् । किम्–वितर्के, प्रश्ने वा । न–नहि । धर्ता–धारकः । अपि तु धर्तैवेति भावः । अयं भावः, यथा यः त्रिविक्रमो विष्णुररिष्टबलं पिनष्टि सकृपाणिनां खड्गधारिणां प्रभुः चक्रपाणिः बलिध्वंसिविडम्बिनीं तनूं बलिध्वंसकारिणीं मनोहारिणीं तनूं धर्ता तथा भगवान् शान्तिनाथोऽपीति, अर्थस्तूरीत्याऽनुसन्धेय इति ॥५०॥

**पुरा व्रते तीव्रतयैव केवलात्, तपःकलाश्रान्तनितान्तशान्तधीः ।**
**उपेतपार्श्वश्चरणेन मौनिना, मृषा चकारैष तृषां वृषार्चितः ॥५१॥**

अन्वयः—केवलात्, पुरा, व्रते, तीव्रतया, एव, तपःकलाऽऽश्रान्तनितान्तशान्तधीः, मौनिना, चरणेन, उपेतपार्श्वः, वृषार्चितः, एषः, तृषाम्, मृषा, चकार ॥५१॥

वृत्तिः—केवलात्–केवलज्ञानात् । (पुरा–पूर्वम्) व्रते–तपःसंयमादिनियमे । तीव्रतया–तीव्रस्य तीक्ष्णस्य भावस्तीव्रता तया तथा । एव–अवधारणार्थकमव्ययम् । तपःकलाऽऽश्रान्तनितान्तशान्तधीः–तपःकलया तपस्याकौशलेन, आश्रान्तं–सततं, नितान्तमतिशयितं यथा स्यात्तथा शान्ता शान्तिमापन्ना धीर्बुद्धिर्यस्य स तथा । मौनिना–निःशब्देन । चरणेन–पादेन, गमनेन वा । उपेतपार्श्वः–उपेतः प्राप्तः पार्श्वः प्रभुसामीप्यं येन स तथा । वृषार्चितः–वृषेण धर्मेण अर्चितो विशिष्टः पूजितो वा वृषार्चित इन्द्रः । एषः–अयम् । तृषाम्–तृष्णाम् । मृषा–मिथ्या । चकार–कृतवान् ॥५१॥

**यतोऽतिदूरादपि ताप्यते वपु–र्दृशोर्भृशोल्लासिदशापि नाप्यते ।**
**तमर्हतः सन्निधिनाप्तसौहृदं, नृपः पतङ्गं समधत्त पाणिना ॥५२॥**

अन्वयः—अतिदूरात्, अपि, यतः, वपुः, ताप्यते, अपि, दृशोः, भृशोल्लासिदशा, न, आप्यते, अर्हतः, सन्निधिना, आप्तसौहृदम्, तम्, पतङ्गम्, नृपः, पाणिना, समधत्त ॥५२॥

वृत्तिः—अतिदूरात्–अत्यन्तविप्रकृष्टतः । अपि–सम्भावनायाम् । यतः–यस्मात् । वपुः–शरीरम् । ताप्यते–सन्ताप्यते, सन्दह्यते इति यावत् । अपि–समुच्चये । दृशोः–नेत्रयोः । भृशोल्लासिदशा–भृशमत्यर्थमुल्लसितु सुशोभितुं शीलमस्या इति भृशोल्लासिनी, भृशोल्लासिनी चासौ दशाऽवस्था भृशोल्लासिदशा । न–नहि । आप्यते–प्राप्यते । यदीयकिरणाधिकसंसर्गतो नेत्रे अपि प्रभाहीने भवत इति भावः । अर्हतः–जिनेश्वरस्य । सन्निधिना–सान्निध्येन । आप्तसौहृदम्–अधिगतसख्यम् । तम्–प्रसिद्धम् । पतङ्गम्–सूर्यम् । नृपः–भूचरो राजापि । पाणिना–करेण । समधत्त–धृतवान् ॥५२॥

**तदात्तमात्मानमवेत्य संभ्रमाद्, मदादिनाऽनर्थकृताऽऽप्तवाक्यतः।**
**जराजनुर्मृत्युमुमुक्षणा नृणां, गणेन दीक्षा जगृहेऽगृहेप्सुना ॥५३॥**

अन्वयः—*तदा, मदादिना, आत्तम्, आत्मानम्, अवेत्य, आप्तवाक्यतः, संभ्रमात्, अनर्थकृता, जराजनुर्मृत्युमुमुक्षणा, अगृहेप्सुना, नृणाम्, गणेन, दीक्षा, जगृहे ॥५३॥*

वृत्तिः—**तदा**–तस्मिन् समये। **मदादिना**–गर्वादिना। **आत्तम्**–गृहीतम् व्याप्तमिति यावत्। **आत्मानम्**–मनः। **अवेत्य**–विज्ञाय। **आप्तवाक्यतः**–आप्तस्य निरुपाधिपरदुःखप्रहाणेच्छस्य, यद्वा-अनुभवेन वस्तुतत्त्वस्य कात्स्न्येन निश्चयवान् रागादिवशादपि नान्यथा वादी यः स आप्तस्तस्य तथा, वाक्यम्, वाक्यमुपदेशात्मकपदकदम्बकम् आप्तवाक्यम् तस्मात्तथा। **संभ्रमात्**–वेगेन। **अनर्थकृता**–अनर्थच्छेदकेन, पापनाशतत्परेणेति यावत्। **जराजनुर्मृत्युमुमुक्षुणा**–जरा वार्द्धक्यं च जनुर्जन्म च मृत्युर्मरणञ्च जराजनुर्मृत्यवस्तेभ्यो मुमुक्षुर्मोक्तुमिच्छुर्जराजनुर्मृत्युमुमुक्षुस्तेन तथा। **अगृहेप्सुना**–गृहसम्बन्धिलिप्साशून्येन। **नृणाम्**–जनानाम्। **गणेन**–समूहेन। **दीक्षा**–भागवती दीक्षेत्यर्थः। **जगृहे**–अग्राहि, गृहीतेति यावत् ॥५३॥

**पतङ्गवत् कश्चन सद्मपञ्जरात्, पुनः पुनः प्रायसदुत्प्लवाय सः।**
**स्वकर्मसंलीनतया मलीनधी–गृहे व्रतान्येव बभार भारमुक् ॥५४॥**

अन्वयः—*कश्चन, पतङ्गवत्, सद्मपञ्जरात्, उत्प्लवाय, पुनः पुनः, प्रायसत्, स्वकर्मसंलीनतया, मलीनधीः, सः, भारमुक्, (सन्) गृहे, व्रतानि, एव, बभार ॥५४॥*

वृत्तिः—**कश्चन**–अनिर्दिष्टनामधेयः कोऽपि। **पतङ्गवत्**–सूर्यवत्, पक्षिवद्वा। **सद्मपञ्जरात्**–सद्म–सदनं, पञ्जरं पञ्जरिकेव, सद्मपञ्जरम्, "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ।" ३।१।१०२॥ इत्यनेनोपमितसमासः तस्मात्तथा। **उत्प्लवाय**–उद्गन्तुम्। **पुनःपुनः**–मुहुर्मुहुः, अनेकश इति यावत्। **प्रायसत्**–प्रायतत, प्रयत्नमकरोदिति यावत्। **स्वकर्मसंलीनतया**–स्वस्य आत्मनः, कर्माणि शुभाशुभदृष्टविशेषाः स्वकर्माणि तेषु संलीनता संसर्गाधिक्यम्, स्वकर्मसंलीनता तया तथा। **मलीनधीः**–मलीना मलिना धीर्बुद्धिर्यस्य स तथा। संकुचिद्बुद्धिरिति भावः। **सः**–प्रसिद्धः। कश्चिदिति शेषः। **भारमुक्**–भारं कुटुम्बभारं मुञ्चति त्यजतीति भारमुक्। त्यक्तनिजकुटुम्बभारः सन्निति यावत्। **गृहे**–सदने। **व्रतानि**–नियमान्, संयमान्, वा। **एव**–अवधारणार्थकमव्ययम्। **बभार**–पुपोष ॥५४॥

**प्रभोर्गिरान्तःप्रतिबुद्धमानसः, खगो मृगो वाऽप्यगजो मतङ्गजः।**
**गतौ विरुत्योर्वने निराशतां, प्रपद्य सद्यः प्रणमन् ययौ वनम् ॥५५॥**

*अन्वयः—प्रभोः, गिरा, अन्तःप्रतिबुद्धमानसः, खगः, विरुत्य, उड्डयने, वा, मृगः, अगजः, मतङ्गजः, अपि, गतौ, निराशताम्, प्रपद्य, प्रणमन्, सद्यः, वनम्, ययौ ॥५५॥*

**वृत्तिः—प्रभोः**–भगवतः शान्तिनाथस्य । **गिरा**–उपदेशात्मकवचनेन । **अन्तःप्रतिबुद्धमानसः**–अन्तः-अभ्यन्तरे प्रतिबुद्धं-समुद्बुद्धं, मानसं-हृदयं यस्य स तथा । **खगः**–खे आकाशे गच्छतीति खगः पक्षी । **विरुत्य**–शब्दं विधाय । **उड्डयने**–उत्प्लवने । **वा**–अथवा । **मृगः**–हरिणः । **अगजः**–गजातिरिक्त पशुमात्रं वा, अग्रे अगजमतङ्गजस्य निर्देशात् । **अगजः**–न गच्छन्तीति अगाः पर्वतास्तेषु जातोऽगजः पर्वतीयः । **मतङ्गजः**–मतङ्गात्-तन्नामकमुनेर्जातो मतङ्गजो हस्ती । **अपि**–समुच्चये । **गतौ**–गमने । **निराशताम्**–निर्लोभताम्, आशाराहित्यमिति यावत् । यद्वा अशनमाशः निर्गत आशात् निराशस्तस्य भावस्तां तथा उपवासमिति यावत् । **प्रपद्य**–स्वीकृत्य । **प्रणमन्**–प्रणामं कुर्वन् । **सद्यः**–तत्क्षणे । **वनम्**–काननम् । **ययौ**–गतवान् ।

**वयोगणः सुव्रतभाग् निशाशनं, निरस्य जीवान्तकबन्धनेऽप्यहो ।**
**न तत्प्रदत्तं फलमादिताऽऽनने, करौ निरोद्धुर्दशति स्म केवलम् ॥५६॥**

*अन्वयः—अहो !, सुव्रतभाक्, वयोगणः, जीवान्तकबन्धने, अपि, निशाशनम्, निरस्य, तत्प्रदत्तम्, फलम्, न, दशति, केवलम्, आदितानने, निरोद्धुः, करौ, दशति स्म ॥५६॥*

**वृत्तिः—अहो !**–वितर्के आश्चर्ये, वा, अव्ययम् । **सुव्रतभाक्**–सु-सुष्ठु समीचीनं, व्रतं-नियमः, सुव्रतम्, तद् भजतीति सुव्रतभाक् । **वयोगणः**–वयसां-पक्षिणां गणः समूहो वयोगणः, विहगकदम्बकमिति भावः । **जीवान्तकबन्धने**–जीवान्तकानां-व्याधानां बन्धनं-पक्षिबन्धनयन्त्रविशेषो जीवान्तकबन्धनम्, तस्मिँस्तथा । **अपि**–सम्भावनायाम् । **निशाशनम्**–रात्रिभोजनम् । **निरस्य**–दूरीकृत्य, सन्त्यज्येति यावत् । **तत्प्रदत्तम्**–तैर्व्याधैः प्रदत्तं-वितरीतम्, तत्प्रदत्तम् । **फलम्**–प्रसवम् । **न**–नहि । **दशति**–खण्डयति । **केवलम्**–परम् । **आदितानने**–आदितं-व्यादितं च तदाननं मुखम्, आदिताऽऽननम् तस्मिँस्तथा । **निरोद्धुः**–अवरोधकस्य, बन्धनयन्त्राच्छिद्रावरोधकस्येति यावत् । **करौ**–हस्तौ । **दशति स्म**–अखण्डयत् । इयं पक्षिजातिः एवञ्च स्वभावोक्तिरलङ्कारः ॥५६॥

**ससम्भ्रमोत्पातिपतत्कुलाकुलं, विमोचितात्मा कथमप्यतः स्वतः ।**
**कुलायमास्थाय जिनोपदेशतः, स्मरन् व्रतं प्रासुकभुक्तिभागभूत् ॥५७॥**

*अन्वयः*—*स्वतः, कथमपि, अतः, विमोचितात्मा, ससम्भ्रमोत्पातिपतत्कुलाकुलम्, कुलायम्, आस्थाय, जिनोपदेशतः, व्रतम्, स्मरन्, प्रासुकभुक्तिभाक्, अभूत् ॥५७॥*

**वृत्तिः**—**स्वतः**–आत्मना, स्वयमेवेत्यर्थः। **कथमपि**–केनापि प्रकारेण। **अतः**–अस्मात्, महदादिभूतसर्गादिति यावत्। **विमोचितात्मा**–विमोचितः पृथक्कृतः आत्मा आत्मतत्त्वं येन स तथा। **ससम्भ्रमोत्पातिपतत्कुलाकुलम्**–संभ्रमेण भयेन सहितं यथा स्यात्तथा उत्पातिनामुत्पतनशीलानां पततां पक्षिणां कुलेन समूहेन आकुलो व्याप्तः ससंभ्रमोत्पातिपतत्कुलाकुलस्तन्तथा। **कुलायम्**–कोल-न्त्यत्रेति कुलायो–नीडस्तन्तथा। **आस्थाय**–निवासस्थलत्वेनाङ्गीकृत्येत्यर्थः। **जिनोपदेशतः**–जिनस्य भगवतो जिनेश्वरस्य उपदेशो देशना जिनोपदेशस्तस्मात्तथा। **व्रतम्**–नियमम्। **स्मरन्**–स्मृतिपथमा-नयन्। **प्रासुकभुक्तिभाक्**–प्रासुकभुक्तिं भजते सेवते इति प्रासुकभुक्तिभाक् अचित्तभोजीति यावत्। **अभूत्**–अभवत् जिनवरप्रवचनमाकार्य पक्षिभिरपि व्रतमङ्गीकृतमिति ॥५७॥

## मृगः शृगालादिररण्यजः परः, सरः प्रपद्योत्कतयाऽनुकम्पताम्। विचारयन् निर्भरमप्यपादऽपा-मचित्तमाहावगतं स्वतन्त्रधीः ॥५८॥

*अन्वयः*—*परः, अरण्यजः, शृगालादिः, मृगः, सरः, प्रपद्य, उत्कतया, अनुकम्पताम्, विचा-रयन्, स्वतन्त्रधीः, निर्भरम्, अपाम्, आहावगतम्, अचित्तम्, अपात् ॥५८॥*

**वृत्तिः**—**परः**–अन्यः। **अरण्यजः**–अरण्ये कानने जातोऽरण्यजः। **शृगालादिः**–शृगालो-जम्बुक आदिः प्रधानं यस्मिन् स शृगालादिः। **मृगः**–पशुः। **सरः**–कासारम्, पद्माकरम् इति यावत्। **प्रपद्य**–सम्प्राप्य। **उत्कतया**–उन्मनस्तया, उत्कण्ठितत्वेनेति यावत्। **अनुकम्पताम्**–अनुकम्पाम्। **विचारयन्**–विमृशन्। **स्वतन्त्रधीः**–परिणतबुद्धिः, दृढबुद्धिरिति यावत्। **निर्भरम्**–अत्यन्तम्। **अपाम्**–जलानाम्। **आहावगतम्**–आहूयन्ते पशवः पानाय अस्मिन्नित्याहावः निपानम्, तं गतं प्राप्तम् आहावगतम् तत्तथा 'आहावस्तु निपानं स्यादुपकूपे' ४। १५८। इत्यभि० चि०। **अचित्तम्**–चैतन्य-शक्तिविरहितम्, तथाविधशस्त्राद्याघाततो निर्धारितकालानन्तरचेतनाशक्तिनाशस्याङ्गीकृतत्वात्। **अपात्**–अपिबत् ॥५८॥

## पुरे वने वा समवासृते प्रभौ, सरस्सुरैर्निर्मितमम्बुभिर्भृतम्। तमूर्मिलोलैः पतगाग्रहाद् नृपं, स्वशब्दितैर्वान्यमिवाभ्यमन्त्रयत् ॥५९॥

*अन्वयः*—*प्रभौ, पुरे, वा, वने, समवासृते, (सति)–सुरैः, निर्मितम्, अम्बुभिः, भृतम्, सरः,*

पतगाग्रहात्, स्वशब्दितैः, वा, ऊर्मिलोलैः, अन्यम्, इव, तम्, नृपम्, अभ्यमन्त्रयत् ॥५९॥

वृत्तिः—प्रभौ-भगवति विभौ। पुरे-नगरे। वा-अथवा। वने-कानने। समवासृते-अधिगतसमवसरणे। सतीति शेषः। सुरैः-देवैः। निर्मितम्-विरचितम्। अम्बुभिः-सलिलैः। भृतम्-पूर्णम्। सरः-कासारः, पद्माकर इति यावत्। पतगाग्रहात्-पतगानां पक्षिणाम्, अग्रहः-ग्रहणाभावः, पतगाग्रहस्तस्माद्धेतोः। यद्वा—पतगानां पक्षिणामाग्रहः पतगाग्रहस्तस्मादिव। स्वशब्दितैः-स्वीयशब्दैः। वा-इव। ऊर्मिलोलैः-ऊर्मयस्तरङ्गा लोलाश्चञ्चला इव ऊर्मिलोलास्तैस्तथा। अन्यम्-परम्। इव-यथा। तम्-प्रसिद्धम्। नृपम्-राजानम्। अभ्यमन्त्रयत्-स्वसमीपमागन्तुमामन्त्रयत् ॥५९॥

**जलं हि साङ्गं किल गाङ्गमङ्गिना-मपुण्ययोगाद् नहि पुण्यमिष्यते।**
**सरस्तदम्भोग्रहदम्भसम्भवं, न्यवारयद् वारिरुहैः करैरिव ॥६०॥**

अन्वयः—हि, अङ्गिनाम्, अपुण्ययोगात्, साङ्गम्, किल, गाङ्गम्, जलम्, पुण्यम्, नहि, इष्यते, (अतः) सरः, वारिरुहैः, इव, करैः, तदम्भोग्रहदम्भसम्भवम्, न्यवारयत् ॥६०॥

वृत्तिः—हि-निश्चयेन। अङ्गिनाम्-अङ्गं तदाख्यदेशो निवासत्वेनास्त्येषामिति अङ्गिनोऽङ्गदेशवास्तव्यास्तेषान्तथा, "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः। अपुण्ययोगात्-न पुण्यं धर्मोऽपुण्यम् पुण्याभावस्तेन योगः सम्बन्धोऽपुण्ययोगस्तस्मात्तथा। साङ्गम्-अङ्गैरवयवैः सहितं साङ्गम्। यद्वा-अङ्गेन तदाख्यदेशेन सहितं साङ्गम्। तथा चाभियुक्ताः-"अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमागधेषु च। तीर्थयात्रां विना गच्छन् पुनः संस्कारमर्हति" इति। एतावतैव चाङ्गदेशवासिनामपुण्ययोगः प्रतिभाति। किल-किलेति सम्भावनायामव्ययम्। गाङ्गम्-गङ्गाया भागीरथ्या इदं गाङ्गम्, गङ्गासम्बन्धीति यावत्। जलम्-सलिलम्। पुण्यम्-पवित्रम्। नहि-नैव। इष्यते-इच्छाविषयीक्रियते। (अतः) सरः-देवनिर्मितः कासारः। वारिरुहैः-वारिणि-जले, रोहन्त्युत्पद्यन्ते इति वारिरुहाणि कमलानि तैस्तथा। इव-यथा। करैः-हस्तैः। तदम्भोग्रहदम्भसम्भवम्-तस्या गङ्गाया, अम्भो जलम् तदम्भः, तस्य ग्रहो ग्रहणम् तदम्भोग्रहः, स पुण्यमित्येवं दम्भो-व्याजः, कपट इति यावत्, तदम्भोग्रहदम्भस्तस्य सम्भवः सम्भावना तन्तथा। अपीति शेषः। न्यवारयत्-दूरीकृतवान् ॥६०॥

**पतत्त्रिणा तद् रुचिरेण वञ्चितं, न राजहंसेन पदानुरागिणा।**
**न लक्षणैः श्रीकमलाकरैः परैः, सरोऽरुचच्चारु विभोः पदश्रिया ॥६१॥**

अन्वयः—तत्, सरः, रुचिरेण, पदानुरागिणा, राजहंसेन, पतत्त्रिणा, वञ्चितम्, श्रीकमलाकरैः, परैः, लक्षणैः, न (वञ्चितम्) (अथ च) विभोः, पदश्रिया, चारु, अरुचत् ॥६१॥

वृत्तिः—तत्-तस्मात् । सरः-पद्माकरः । रुचिरेण-बन्धुरेण, मनोहारिणेति यावत् । पदानुरागिणा-पदयोश्चरणयोरनुरागो लौहित्यम् पदानुरागः, सोऽस्त्यस्येति पदानुरागी, "अतोऽनेक-स्वरात्" ७।२।६॥ इत्यनेन मत्वर्थे "इन्" प्रत्ययः, तेन तथा । राजहंसेन-अतिलोहितचञ्चुचरण-हंसाभिधानेनेत्यर्थः । पतत्त्रिणा-पक्षिणा । वञ्चितम्-प्रतारितम्, विरहितमिति भावः । न-नहि । श्रीकमलाकरैः-कमलाकरस्य श्रियः शोभाः लक्ष्म्यः सम्पत्तयो वा श्रीकमलाकरास्तैस्तथा, पद्माकरशो-भाभिरित्यर्थः । राजदन्तादित्वात् पूर्वनिपाताईस्य परनिपातः । परैः-अन्यैः उत्कृष्टैर्वा । लक्षणैः-सौभाग्यसूचकचिन्हैः । न-नहि । वञ्चितमिति शेषः । अथ च—विभोः-प्रभोः शान्तिनाथस्य । पदश्रिया-पादलक्ष्म्या । चरणशोभयेति यावत् । चारु-मनोज्ञं यथा स्यात्तथा । अरुचत्-अदीप्यत, अद्योततेति यावत् ॥६१॥

**कृते विहारे विभुना ततः समं, श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।**
**अधायि चक्रेण तु हंसकप्रभा-नभःसरस्या घनपुष्करोदयः ॥६२॥**

अन्वयः—ततः, विहारे, कृते, विभुना, समम्, पल्वलम्, प्रविहाय, प्रयान्त्याः, श्रियः, चक्रेण, तु, हंसकप्रभानभःसरस्याः, घनपुष्करोदयः, अधायि ॥६२॥

वृत्तिः—ततः-तदनन्तरम्, तस्मात् स्थानाद् वा । विहारे-विहरणे विचरणे इति यावत् । कृते-विहिते । सतीति शेषः । विभुना-प्रभुणा, भगवता शान्तिनाथेनेति यावत् । समम्-सहैवेत्यर्थः । पल्वलम्-अल्पकासारम् । प्रविहाय-सन्त्यज्य । प्रयान्त्याः-पलायमानायाः । श्रियः-लक्ष्म्याः, शोभाया वा । चक्रेण-रथाङ्गेन । तु-पादपूरणे । हंसकप्रभानभःसरस्याः-नभः आकाशमेव सरसी पद्माकरो, नभःसरसी, "मयूरव्यंसकादित्वात् समासः हंस एव हंसकः स्वार्थे 'कः' प्रत्ययः, तस्य प्रभा कान्तिः हंसकप्रभा, हंससम्बन्धिनी कान्तिरित्यर्थः, तया संवलिता सा चासौ नभःसरसी, हंस-कप्रभानभःसरसी तस्यास्तथा, शाकपार्थिवादेराकृतिगणत्वात्' 'मयूरव्यंसकादित्वात् मध्यमपदलोपी समासः । घनपुष्करोदयः-पुष्कराणां कमलानामुदयः समुत्पत्तिः पुष्करोदयः, घनः सान्द्रश्च पुष्करो-दयः, घनपुष्करोदयः । अधायि-धृतः ॥६२॥

**सुरैः कृताऽऽजानुपदं मणीवकैः, सुगन्धिभिर्वृष्टिरिहालिमालया ।**
**चलत्पदाम्भोरुहनूपुरोपमा, समादधे स्मेरदृशां विशां पथि ॥६३॥**

अन्वयः—*सुरैः, सुगन्धिभिः, मणीवकैः, आजानुपदम्, वृष्टिः, कृता, इह, अलिमालया, पथि, विशाम्, स्मेरदृशाम्, चलत्पदाम्भोरुहनूपुरोपमा, समादधे* ॥६३॥

वृत्तिः—सुरैः-देवैः । सुगन्धिभिः-सुष्ठु शोभनो गन्धः सौरभविशेषो येषां तानि सुगन्धीनि बहुव्रीहिसमासोत्तरं समासान्त 'इन्' प्रत्ययः, तैस्तथा। मणीवकैः-मणन्ति भ्रमणैर्मणीवकानि प्रसूनानि कुसुमानीति यावत् तैस्तथा। 'प्रसूनं कुसुमं सुमम्। पुष्पं सूनं सुमनसः प्रसवश्च मणीवकम्' ४। १९१। इत्यभि० चि०। आजानुपदम्-जानुनी ! ऊरुपर्वणी 'नलकीलाविति यावत्, च पदे चरणौ च जानुपदम्, प्राण्यङ्गत्वादेकवद्भावः, जानुपदात् आ आजानुपदम्, आङोऽभिविध्यर्थकत्वात् जानुपदमभिव्याप्येत्यर्थः। वृष्टिः-वर्षणम् पातो वा। कृता-विहिता। इह-अत्रस्थले। अलिमालया-भ्रमरश्रेण्या, मधुकरकदम्बकेनेति यावत्। पथि-मार्गे। विशाम्-मनुजानाम् 'मर्त्यः पञ्चजनो भूस्पृक्, पुरुषः पूरुषो नरः। मानवो मानुषो ना विट् मनुजो मानवः पुमान्' ३। १ इत्यभि०चि०। स्मेरदृशाम्-स्मेरे ईषद्विकसिते दृशौ नयने यासां ताः स्मेरदृशस्तासां तथा समुल्लसितलोचनानामिति यावत्। रमणीनामिति शेषः। चलत्पदाम्भोरुहनूपुरोपमा-चलन्ती च ते पदाम्भोरुहे चरणकमले, चलत्पदाम्भोरुहे तयोर्वर्तमानौ नूपुरौ तयोरुपमा साम्यम् तथा। समादधे-धृता। श्रितेति यावत् ॥६३॥

**सरित्प्रचारेऽपि सितच्छदांस्तदा, स्वभावनालीकरुचो व्रतिव्रजे।**
**निरीक्ष्य सारूप्यधिया शनैश्चरा, चुकूज कूले कलहंसमण्डली ॥६४॥**

अन्वयः—*तदा, स्वभावनालीकरुचः, सितच्छदान्, निरीक्ष्य, सरित्प्रचारे, व्रतिव्रजे, अपि, सारूप्यधिया, शनैश्चरा, कलहंसमण्डली, कूले, चुकूज* ॥६४॥

वृत्तिः-तदा-तस्मिन् समये। स्वभावनालीकरुचः-न अलीकरुचो नालीकरुचः, स्वभावेन नालीकरुचः स्वभावनालीकरुचो मुनयस्तांस्तथा। पक्षे-नालीकस्य कमलस्य रुक् कान्तिः नालीकरुक् नालीकरुगिव रुक् येषां ते नालीकरुचः स्वभावेन नालीकरुचः स्वभावनालीकरुचस्तांस्तथा। सितच्छदान्-सितौ शुक्लौ छदौ वस्त्रे पूर्वोत्तरीये येषान्ते सितच्छदास्तांस्तथा। हंसपक्षे च सिताः शुक्लाः छदाः पक्षा येषान्ते सितच्छदाः श्वेतपक्षा हंसास्तांस्तथा। निरीक्ष्य-समवलोक्य। सरित्प्रचारे-सरिति सरित्प्रान्ते, प्रचारो विचरणं यस्य स सरित्प्रचारस्तस्मिँस्तथा। व्रतिव्रजे-व्रतिनां व्रतं नियमोऽस्त्येषामिति व्रतिनः श्रमणास्तेषां व्रज समुदयो व्रतिव्रजम् तस्मिँस्तथा। अपि-सम्भावनायाम्। सारूप्यधिया-समानं तुल्यं रूपं स्वरूपमाकृतिरिति यावद्येषान्ते सरूपास्तेषां भावः सारूप्यम्, तस्य धीर्बुद्धिः सारूप्यधीस्तया तथा। शनैश्चरा-मन्दगमनशीला। कलहंसमण्डली-राजहंसश्रेणी। कूले-

तीरे, नद्याः पद्माकरस्येति वा इति शेषः । चुकूज–कूजितवती ॥६४॥

( पाठान्तरम् )

**जिनानुरागाद् द्युसदाऽनुयायिना, स्वहंसरूपावलिभिः समं पथि ।**
**क्वचित्तटिन्या निजजातिदर्शना–चुकूज कूले कलहंसमण्डली ॥६४॥**

अन्वयः—*पथि, क्वचित्, तटिन्याः, कूले, जिनानुरागात्, स्वहंसरूपावलिभिः, समम्, अनुयायिना, द्युसदा, निजजातिदर्शनात्, कलहंसमण्डली, चुकूज ॥६४॥*

वृत्तिः—पथि–मार्गे । क्वचित्–कुत्रचित् । तटिन्याः–तरङ्गिण्याः । नद्या इति यावत् । कूले–तीरे । जिनानुरागात्–जिनेऽर्हति भगवति शान्तिनाथे, अनुरागः प्रेम जिनानुरागस्तस्मात्तथा । स्वहंसरूपावलिभिः–प्रशस्ता हंसाः हंसरूपास्तेषामावलयः पङ्क्तयोः हंसरूपावलयः, स्वीयाश्च ता हंसरूपावलयः स्वहंसरूपावलयस्ताभिस्तथा । समम्–सह । अनुयायिना–अनुयातुमनुगन्तुं शीलमस्येत्यनुयायी तेन तथा । द्युसदा–दिवि स्वर्गे सीदतीति द्युसत् देवस्तेन तथा । जातावेकवचनम्, देवैरित्यर्थः । कृत्वेति शेषः । निजजातिदर्शनात्–स्वसजातीयावलोकनात् । कलहंसमण्डली–कलध्वनयो मधुराऽव्यक्तशब्दवन्तो हंसाः कलहंसाः कादम्बाः अतिधूसरपक्षोपलक्षिता हंसविशेषा इति यावत्, तेषां मण्डली कदम्बकम् तथा । चुकूज–कूजितवती ॥६४॥

**प्रभोः प्रभावादविरोधबोधनात्, सहैव सिंहेन मृगी वनेऽचरत् ।**
**बिडालबालेन समं रिरंसया, चुकूज कूले कलहंसमण्डली ॥६४॥**

अन्वयः—*प्रभोः, प्रभावात्, अविरोधबोधनात्, मृगी, सिंहेन, सह, एव, वने, अचरत्, (अथ च) रिरंसया, बिडालबालेन, समम्, कलहंसमण्डली, कूले, चुकूज; ॥६४॥*

वृत्तिः—प्रभोः–विभोः, शान्तिनाथस्य । प्रभावात्–अनुभावात्, प्रतापादिति यावत् । अविरोधबोधनात्–न विरोधो विद्वेषोऽविरोधस्तस्य बोधनं ज्ञानमविरोधबोधनम् तस्मात्तथा । मृगी–हरिणी । सिंहेन–द्विपेन्द्रेण कण्ठीरवेणेति यावत् । सह–सार्द्धम् । एव–अवधारणार्थकमव्ययम् । वने–कानने । अचरत्–अभ्रमत्, विचरणसुखमनुभूतवतीति यावत् । (अथ च) रिरंसया–रन्तुं क्रीडितुमिच्छा रिरंसा तया तथा । रन्तुमिच्छयेत्यर्थः । बिडालबालेन–बिडालस्य–मार्जारस्य बालः शिशुर्बिडालबालस्तेन तथा । समम्–सह । कलहंसमण्डली–कादम्बकदम्बकम् । कूले–नदीतीरे । चुकूज–कूजितवती ॥६४॥

**नवा सयोग्या वसुधेयमीदृशः, प्रभोर्विहारे त्रिदशैरपि स्तुता ।**
**रसान् न कांस्कान् समसूत नूतनान्, स्वतः स्वमापूर्य्य च तूर्य्यनिःस्वनैः ॥६५**

*अन्वयः*—प्रभोः, विहारे, नवा, सयोग्या, इयम्, वसुधा, त्रिदशैः, अपि, स्तुता, (अथ) च, स्वतः, तूर्य्यनिःस्वनैः, स्वम्, अपूर्य्य, नूतनान्, कान्, कान्, रसान्, न, समसूत ॥६५॥

**वृत्तिः**—प्रभोः-भगवतः शान्तिनाथस्य । विहारे-विचरणे । सतीति शेषः । नवा-नूतना । सयोग्या-योग्यैः योग्यपुरुषैः सहिता सयोग्या । इयम्-एषा । वसुधा-भूमिः । त्रिदशैः-देवैः । अपि-सम्भावनायाम् । स्तुता-प्रशंसिता । अथेति शेषः । च-पुनः । स्वतः-स्वयंजातैः । तूर्य्यनिः-स्वनैः-वाद्यनिनादैः । स्वम्-आत्मानम् । आपूर्य्य-सर्वतोभावेन पूरयित्वा । नूतनान्-नवीनान् । कान् कान्-कीदृशानित्यर्थः । विप्सायां द्विर्भावः । रसान्-गन्धान्, शृङ्गारादीन्; तिक्तादीन्; अनुरागान्, धातुभेदान्, अस्वादादीनित्यर्थः । "रसो गन्धे रसे जले" 'शृङ्गारादौ विषे वीर्य्ये, तिक्तादौ-द्रवरागयोः देहधातुप्रभेदे च, पारदस्वादयोः पुमान्' इति मेदिनी । न-नहि । समसूत-समुत्पादयत्, अपि तु निखिलानेवेति भावः ॥६५॥

**दिगाऽऽह पूर्वाप्यपरामधो भव, त्वमङ्ग यस्याः ! पतिरुज्झितस्थितिः ।**
**जडेषु नाथः कृतवारुणीरुचि-र्ममेशितेन्द्रस्तु शतक्रतुर्जिने ॥६६॥**

*अन्वयः*—अङ्ग !, जडेषु, नाथः, कृतवारुणीरुचिः, यस्याः, (ते) पतिः, उज्झितस्थितिः, (वर्तते) (सा) त्वम्, अधोभव, (इति) अपराम्, (प्रति) पूर्वा, दिक्, आह, अपि, मम, ईशिता, इन्द्रः, तु, जिने, शतक्रतुः ॥६६॥

**वृत्तिः**—अङ्ग !-अङ्गेतीत्यङ्ग, सम्बोधनार्थकमव्ययम् । जडेषु-अज्ञेषु, । डलयोरभेदात्, जलेष्विति भावः । नाथः-स्वामी । कृतवारुणीरुचिः-कृता विहिता वारुण्यां मदिरायां पश्चिमायाञ्च रुचिरभिलाषो येन स तथा । यस्याः-यादृश्याः । (ते-तव) पतिः-स्वामी । उज्झितस्थितिः-उज्झिता-त्यक्ता, स्थितिर्मर्यादा येन स तथा । वर्तते इति शेषः । (सा-तादृशी) त्वम्-भवती पश्चिमा दिक् । अधोभव-नीचैर्वर्तस्व । नीचवद्व्यवहारमालम्बस्वेत्यर्थः । इति-एवम् । अपराम्-पश्चिमाम् । (प्रति-लक्ष्यीकृत्य) पूर्वा-ऐन्द्री । दिशा-दिक् । आह-ब्रवीति । अपि-सम्भावनायाम् । मम-पूर्वस्याः दिशो मे । ईशिता-स्वामी । इन्द्रः-पाकशासनः । पुरन्दर इति यावत् । तु-किन्तु । जिने-

अर्हति भगवति शान्तिनाथे इति यावत् । शतक्रतुः—शतं क्रतवः प्रीतिमाविशेषाः, जिनेश्वरतोषकत्वेन यस्य स तथा । अस्तीति शेषः ॥६६॥

**शून्यं नभस्तद्वसनेन शून्यधी-र्न किं हि नः कौशिक एव यत्पतिः ।**
**इति प्रहाय क्षितिमाश्रिता नभः, प्रभौ समस्ता विबुधा जयत्यभुः ॥६७॥**

अन्वयः—यत्, नभः, शून्यम्, तद्वसनेन, शून्यधीः, कौशिकः, एव, हि, किम्, नः, पतिः, न, इति, प्रभौ, जयति, समस्ताः, विबुधाः, नभः, प्रहाय, क्षितिम्, आश्रिताः, अभुः ॥६७॥

वृत्तिः—यत्—यस्माद्धेतोः । नभः—आकाशम् । शून्यम्—रिक्तम् । अस्तीतिशेषः । तद्वसनेन—तदधिष्ठानेन, तादृशनिवासस्थलकत्वेनेति यावत् । शून्यधीः—शून्या तुच्छा धीर्बुद्धिर्यस्य स तथा । कौशिकः—इन्द्रः । एव—अवधारणार्थकमव्ययम् । हि—निश्चयेन । किम्—वितर्केऽव्ययम् । नः—अस्माकम् । पतिः—स्वामी । न—नहि । इति—एवं विचार्य । प्रभौ—भगवति शान्तिनाथे । जयति—विजयमादधति, विजयशीले इति यावत् । समस्ता—निखिलाः । विबुधाः—देवाः, विद्वांसो वा । नभः—आकाशम् । प्रहाय—संत्यज्य । क्षितिम्—पृथिवीम् । आश्रिताः—समाश्रिताः सन्तः । अभुः—भान्ति स्म, रेजुरिति यावत् ॥६७॥

**अजन्यभावेऽजनि नाति-भक्तिभाग्, जगत्त्रये शान्तिकरे जितेऽपि यः ।**
**नरः सुरो वोषसि तद्दिनादिव, खगास्तमाचुक्रुशुरारवैः खलु ॥६७॥**

अन्वयः—अजन्यभावे, (सति) जगत्त्रये, शान्तिकरे, जिने, अपि, यः, नरः, वा, सुरः, अतिभक्तिभाक्, न, अजनि, खलु, तद्दिनात्, उषसि, खगाः, आरवैः, तम्, आचुक्रुशुः, इव ॥६८॥

वृत्तिः—अजन्यभावे—उत्पाते, उपद्रवे इति यावत् । सतीति शेषः 'उपलिङ्गं त्वरिष्टं स्यादुपसर्ग उपद्रवः । अजन्यमीतिरुत्पातः' २-४० । इत्यभि० चि० । जगत्त्रये—त्रयोऽवयवा अस्येति त्रयम् जगतां भुवनानां त्रयम्, जगत्त्रयम् तस्मिँस्तथा, त्रिभुवने इति यावत्। शांतिकरे—शान्ति साम करोति सम्पादयतीति शान्तिकरस्तस्मिँस्तथा, 'हेत्वर्थे' 'टः' प्रत्ययः । शान्तिहेताविति भावः । अपि—सम्भावनायाम् । जिने—अर्हति, भगवति शान्तिनाथे इति यावत् । यः—यादृशः । नरः—मानवः । वा—अथवा । सुरः—देवः । अतिभक्तिभाक्—अतिभक्तिमत्यन्तसेवां भजत इति तथा, अत्यन्तसेवाभिलाषुक इति यावत् । न—नहि । अजनि—जातः । खलु—निश्चयेन । तद्दिनात्—तद्दिवसमारभ्य । उषसि—

प्रभाते । खगाः-पक्षिणः । आरवैः-शब्दैः । तम्-तादृशं नरं सुरं वा । आचुक्रुशुः-आक्रोशयन्, निन्दितवन्त इति यावत् । इव-यथा ॥६८॥

भवेऽस्मदीयेऽजनि यत्र न प्रभुः, प्रभा स्वभावेन जिनेन्द्रसेवने ।
प्रतिप्रभातं द्विजरूपमागताः, खगास्तमाचुक्रुशुरारवैः खलु ॥६९॥

अन्वयः—यत्र, अस्मदीये, भवे, स्वभावेन, जिनेन्द्रसेवने, प्रभा, न, प्रभुः, अजनि, प्रतिप्रभातम्, द्विजरूपम्, आगताः, खगाः, खलु, आरवैः, तम्, आचुक्रुशुः ॥६९॥

वृत्तिः—यत्र-यस्मिन् । अस्मदीये-अस्माकमयमस्मदीयस्तस्मिँस्तथा । भवे-जन्मनि । स्वभावेन-निसर्गतः । जिनेन्द्रसेवने-जिनेन्द्रस्य जिनेश्वरस्य, सेवनं शुश्रूषणं भक्तिरिति यावत्, जिनेन्द्रसेवनम् तस्मिँस्तथा । प्रभा-वुद्धिः । न-नहि । अजनि-जाता । प्रतिप्रभातम्-प्रभातं प्रभातं प्रति प्रतिप्रभातम्, वीप्सायामव्ययीभावसमासः । द्विजरूपकम्-पक्षिस्वरूपम् विहगाऽऽकारमिति यावत् । आगताः-प्राप्ताः । पक्षिरूपेण समागता इति भावः । खगाः-खे-आकाशे, गच्छन्ति-विचरन्तीति खगा देवा विद्याधरा वा । खलु-निश्चयेन । आरवैः-कूजनात्मकशब्दैः । तम्-तादृशम्, निजभवमित्यर्थः । आचुक्रुशुः-आक्रोशयन्, निन्दितवन्त इति यावत् ॥६९॥

गच्छाधीश्वरहीरहीरविजया-म्नाये निकाये धियां,
प्रेष्यः श्रीविजयप्रभाख्यसुगुरोः, श्रीमत्तपाख्ये गणे ।
शिष्यः प्राज्ञमणेः कृपादिविजय-स्याशास्यमानाग्रणी-
श्चक्रे वाचकनाममेघविजयः, शस्यां समस्यामिमाम् ॥७०॥

( व्याख्यातपूर्वः श्लोकोऽयम् )

तस्मिन् विस्मयकृत्काव्ये, पञ्चमः पञ्चमाञ्चितः ।
सर्गः सज्जनसंसर्गात्, श्रेयोऽध्ययनतत्परैः ॥७१॥

अन्वयः—तस्मिन्, विस्मयकृत्काव्ये, सज्जनसंसर्गात्, श्रेयोऽध्ययनतत्परैः, ( अस्माभिः रचितः) पञ्चमाञ्चितः, ( अयम् ) पञ्चमः, सर्गः ॥७१॥

वृत्तिः—तस्मिन्-तादृशे नैषधात्मके इति भावः । विस्मयकृत्काव्ये-विस्मयमाश्चर्यं करोतीति विस्मयकृत्, तच्च तत्काव्यं सहृदयहृदयाह्लादिशब्दार्थमयम् "तददोषौ शब्दार्थौ सगुणावन-

लङ्कृती पुनः कापि" इति काव्यप्रकाशकारमम्मटोपाध्यायलक्षितम्। "वाक्यं रसात्मकं काव्यम्" इति विश्वनाथेनाभिहितम्। "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति पण्डितराजजगन्नाथलक्षितम् वा, विस्मयकृत्काव्यम् तस्मिँस्तथा। **सज्जनसंसर्गात्**—सन्तः समीचीनाश्च ते जना मानवाः सज्जनास्तैः संसर्गः सम्पर्कः सज्जनसंसर्गस्तस्मात्तथा। **श्रेयोऽध्ययनतत्परैः**—श्रेयोऽतिप्रशस्तं च तदध्ययनं श्रेयोऽध्ययनम् तत्र तत्परा आसक्ताः श्रेयोऽध्ययनतत्परास्तैस्तथा 'तत्परे प्रसितासक्ता' वित्यमरः। अस्माभी रचित इति शेषः। यद्वा—श्रेयोऽतिप्रशस्तमध्ययनं श्रेयोऽध्ययनम्, तत्र तत्परा आसक्ता ये ते श्रेयोऽध्ययनतत्परास्तैस्तथा। श्लोकैरिति यावत्। सुशोभित इति शेषः। **पञ्चमाञ्चितः**—पञ्चमैश्चतुरैरञ्चितः प्रशस्तः पञ्चमाञ्चितः 'पञ्चमो रुचिरे दक्षे' इत्यनकार्थः। अयमिति शेषः। **पञ्चमः**—पञ्चानां पूरणः पञ्चमः, नान्तत्वान्मट् प्रत्ययस्तद्धितः। **सर्गः**—अध्यायः। यद्वा—तस्मिन् विस्मयकृत्, पञ्चमाञ्चितः पञ्चमः सर्ग इत्येवमन्वेयम्। अन्यत्र समानमिति बोध्यम् ॥७१॥

इति-वाचकप्रवरश्रीमेघविजयजिद्गणीश्वरविरचिते श्रीनैषधीयमहाकाव्यप्रथमसर्गपादपूर्तिस्वरूपे श्रीशान्तिनाथचरित्रे शासनसम्राट्-सूरिचक्रचक्रवर्ति-तपागच्छाधिपति-भट्टारकाचार्य-महाराजाधिराजश्रीविजयनेमिसूरीश्वर-महाराजपट्टालङ्कारशास्त्रविशारदकविरत्न-पीयूषपाणि-पूज्यपादाचार्यमहाराज श्रीविजयामृतसूरीश्वर-विरचित-विद्वद्विनोदिनीनामवृत्तिविभूषिते—

## ॥ पञ्चमः सर्गः समाप्तः ॥

## ॥ अथ षष्ठः सर्गः ॥

**न जातरूपच्छदजातरूपता, न कङ्कणाद्याभरणैरलङ्कृतिः ।**
**मुमुक्षुणा क्वापि विधीयतां धिया, स्वजातरूपैकसिचा भवद्रुचा ॥१॥**

अन्वयः—*स्वजातरूपैकसिचा, भवद्रुचा, मुमुक्षुणा, धिया, क्व, अपि, कङ्कणाद्याभरणैः, अलङ्कृतिः, न, जातरूपच्छदजातरूपता, न, (इति) विधीयताम् ॥१॥*

वृत्तिः—**स्वजातरूपैकसिचा**–स्वस्मिन्–आत्मनि, जातमुत्पन्नं रूपं सौन्दर्यमेव एकमद्वितीयं सिक्–वस्त्रं यस्य स स्वजातरूपैकसिक्, तेन तथा । अत एव, **भवद्रुचा**–भवन्ती–जायमाना रुक् कान्तिर्यस्य स भवद्रुक् तेन तथा । **मुमुक्षुणा**–मोक्षविषयकाभिलाषवता । **धिया**–बुद्ध्या । **क्व**–कुत्र । अपि–सम्भावनायाम् । **कङ्कणाद्याभरणैः**–कङ्कणं वलयम् आदिर्येषान्तानि कङ्कणादीनि, तानि च तान्याभरणानि भूषणानि अलङ्कारा इति यावत्, कङ्कणाद्याभरणानि तैस्तथा । **अलङ्कृतिः**–अलङ्कारः, शोभेति यावत् । न–नहि । **जातरूपच्छदजातरूपता**–जातं रूपमस्य, जातरूपम् कनकरूपं सुद्रीदेशजम्, सुवर्णमिति यावत्, तद्वच्छदाः वस्त्राणि वस्त्रे वा, जातरूपच्छदाः जातरूपच्छदौ वा तैस्ताभ्यां वा जातमुत्पन्नं रूपं सौन्दर्यं यस्य स जातरूपच्छदजातरूपस्तस्य भावो, जातरूपच्छदजातरूपता । (इति) **विधीयताम्**–क्रियताम् । मुमुक्षुणां ज्ञानदर्शनादिकमेव समीचीनमंशुकमलङ्करणं न तु लौकिकमंशुकमाभरणं वा तेषां भूषणमिति सूचितम् ॥१॥

**वदन् स्वरागादपि वैभवस्थिति—द्विजस्य दृष्टेयमिति स्तुवन् मुहुः ।**
**विनिश्चिकायैष हि वै भवस्थितिं, निजां जराजन्मकृताधिसंस्थिताम् ॥२॥**

अन्वयः—*द्विजस्य, इयं, वैभवस्थितिः, दृष्टा, इति, स्वरागात्, मुहुः, वदन्, स्तुवन्, अपि, एषः, निजाम्, भवस्थितिम्, जराजन्मकृताधिसंस्थिताम्, हि, वै, विनिश्चिकाय ॥२॥*

वृत्तिः—**द्विजस्य**–मुनेः, द्विजातित्वात्तस्येति । **इयम्**–एषा, पूर्वोक्ता । **वैभवस्थितिः**–विगतभवतयावस्थानम्, संसारत्यागजनितपूर्वैश्वर्यप्राप्तिरिति यावत् । **दृष्टा**–दृष्टिपथमानीता । अनुभवविषयतामापादितेति यावत् । **इति**–इत्येवम् । **स्वरागात्**–स्वरसतः । **मुहुः**–भूयोभूयः । **वदन्**–

ब्रुवन् । स्तुवन्–प्रशंसन् । अपि–समुच्चये । एषः–मुमुक्षुरयम् । निजाम्–आत्मीयाम् । भवस्थितिम्–संसारावासनिवासम् । जराजन्मकृताधिसंस्थिताम्–जरा वार्धक्यम्, जन्म जननम्, ताभ्यां कृते विहिते ये आधि संस्थे मनस्तापमरणे ते सञ्जाते अस्याः सा तां तथा । 'संस्था स्पशे स्थितौ मृत्या' वित्यनेकार्थः । हि है–नूनम् । विनिश्चिकाय–निर्णीतवान् ॥२॥

**मुखेऽपि नालीकरुचिर्महात्मनां, न संशयो वा न पराशनाशयः ।**
**अवादि तेनाथ समानसौकसा–मुपाश्रयत्संसदि चार्हतेत्यहो ॥३॥**

अन्वयः—*अथ, महात्मनाम्, मुखे, अपि, नालीकरुचिः, संशयः, न, वा, पराशनाशयः, न, इति, तेन, अर्हता, समानसौकसाम्, उपाश्रयत्संसदि, अवादि, अहो, च ॥३॥*

वृत्तिः—अथ–अनन्तरम् । महात्मनाम्–महान्त आत्मानो महात्मानः, महान् विशाल आत्मा येषां ते वा महात्मानः, अथवा–महान् आत्मा मनीषा बुद्धिर्धृतिर्वा येषां ते महात्मानस्तेषां तथा । मुखे–आनने । अपि–सम्भावनायामव्ययम् । नालीकरुचिः–अलीका मिथ्या रुचिरभिलाषोऽलीकरुचिः, न अलीकरुचिः नालीकरुचिः, नालीकस्य कमलस्य रुचिर्दीप्तिर्नालीकरुचिर्वा । संशयः–एकधार्मिकविरुद्धकोटिद्वयावगाहिज्ञानम् । न–नहि । तेषां ज्ञानेन याथार्थ्यप्रतीतेः, अल्पज्ञस्य वह्निस्तदभावो वेति संशयादनुमित्यादिना वस्तुतत्त्वावगमात्, महात्मनान्तु अनुमितिकारणस्य संशयस्यैवाभावात् कारणाभावप्रयोज्यकार्य्याभावोऽवसेयः । वा–समुच्चये । पराशनाशयः–परेषामन्येषामशनं भक्षणं पराशनम्, हिंसा तत्र आशयोऽभिप्रायो पराशनाशयः । न–नहि । इति–एवं प्रकारेण । तेन–प्रसिद्धेन । अर्हता–जिनेश्वरेण । समानसौकसाम्–मानेन–सहिताः समानाः, सज्ञानाः, तुल्या वा, ते च ते सौकसः सागारिणः, सभवना इति यावत्, समानसौकसस्तेषां तथा । उपाश्रयत्संसदि–उपाश्रयन्ती चासौ संसत् सभा, उपाश्रयत्संसत् तस्यां तथा । पूर्वपदार्थस्योपाश्रयस्य अन्यपदार्थसाकाङ्क्षतयाऽसामर्थ्येन समासोऽसङ्गत, इति नो शङ्क्यः देवदत्तस्य गुरुकुलम्, "चैत्रस्य दासभार्य्या" इत्यादिप्रमाणिकानां प्रयोगदर्शनात् । नित्यसाकाङ्क्षातिरिक्तस्थल एव तथादोषस्य स्वीकारात् । अवादि–उक्तम् । अहो–आश्चर्य्ये । च–पादपूरणे ॥३॥

**तदस्ति नाभ्यस्तमिह द्युसद्बलं, छलं जयन्मन्त्रकलञ्च चञ्चलम् ।**
**तनूभृता येन यमोऽपि जीयते, जनाधिनाथः करपञ्जरस्पृशा ॥४॥**

अन्वयः—*इह, तत्, जयन्मन्त्रकलम्, च, चञ्चलम्, द्युसद्बलम्, छलम्, न, अभ्यस्तम्, अस्ति, येन, करपञ्जरस्पृशा, तनूभृता, जनाधिनाथः, यमः, अपि, जीयते ॥४॥*

वृत्तिः—इह–अर्हत्साम्राज्ये। तत्–प्रसिद्धम्, तादृशं वा। जयन्मन्त्रकलम्–जयन्ती विजयशीला मन्त्रकला, तन्त्रमन्त्रकौशलम् यस्मिन् तत्तथा। (अत एव) चञ्चलम्–चपलम्, अशाश्वतमिति यावत्। द्युसद्बलम्–दिवि स्वर्गे सीदन्तीति द्युसदो देवास्तेषां बलम् सामर्थ्यं शक्तिरिति यावत्। छलम्–कैतवम्, कपटमिति यावत्। अभ्यस्तम्–व्यवसायविषयीभूतम्। न–नहि। अस्ति–वर्तते। येन–यादृशेन, छलेनेति यावत्। करपञ्जरस्पृशा–करपञ्जरं हस्तलक्षणं बन्धनयन्त्रम् स्पृशतीति करपञ्जरस्पृक् तेन तथा। यमस्येति शेषः। यमराजकरपञ्जरवर्तिनेति यावत्। तनूभृता–तनूं शरीरं, बिभर्ति धारयतीति तनूभृत् प्राणी तेन तथा। जनाधिनाथः–जनानां-लोकानामाधिर्मनोव्यथा जनाधिस्तस्य नाथः स्वामी सम्पादक इति यावत् जनाधिनाथः। यमः–कृतान्तः। अपि–सम्भावनायाम्। जीयते–विजयकर्मीक्रियते ॥४॥

धिगस्तु तृष्णातरलं भवन्मनः, समुच्छलद्वाजिबलं विलोक्य यत्।
परं परार्थाच्च परम्परार्थतः, समुन्मिषद् भूरिमिषेषु हे जनाः ॥५॥

*अन्वयः—हे जनाः !, परार्थात्, परम्, च, परम्परार्थतः, भूरिमिषेषु, समुन्मिषत्, समुच्छलद्वाजिबलम्, विलोक्य, यत्, भवन्मनः, तृष्णातरलम्, (तत्) धिक्, अस्तु ॥५॥*

वृत्तिः—हे जनाः !–हे लोकाः ! परार्थात्–परः–उत्कृष्टो, यो अर्थः प्रयोजनं मोक्षसाधनादिपरार्थस्तस्मात् तथा। परम्–दूरम्। दूरस्थितिमिति भावः। परम्परार्थतः–परम्परया–क्रमेण, अर्थो–धनम्, परम्परार्थस्तस्मात्तथा। भूरिमिषेषु–भूरीणि–प्रचुराणि मिषाणि–कपटानि, भूरिमिषाणि तेषु तथा। समुन्मिषत्–प्रस्फुटत्, दीप्यमानम्, जागरुकमिति यावत्। समुच्छलद्वाजिबलम्–वाजिनोऽश्वाश्च बलानि–सैन्यानि, च वाजिबलम्, 'सेनाङ्गत्वादेकवद्भावः, समुच्छलद्दीप्यमानं च तद् वाजिबलम्, समुच्छलद्वाजिबलम् तत्तथा। विलोक्य–अवलोक्य। यत्–यादृशम्। भवन्मनः–युष्मदन्तःकरणम्। तृष्णातरलम्–तृष्णया–लोभेन, लालसया वा तरलम्–चञ्चलमाकुलमिति यावत्, तृष्णातरलम्। तत्–तादृशं मनः। धिक्–अस्तु, तादृशमनसो धिक्कारोऽस्त्वित्यर्थः ॥५॥

करोषि किं दुर्जनतां धनान्वितान्, समीक्ष्य पक्षान्मम हेमजन्मनः।
भृशं सखायो विवदन्त इत्यतः, परिग्रहे नाग्रहयालुता हिता ॥६॥

*अन्वयः—हेमजन्मनः, धनान्वितान्, मम, पक्षान्, समीक्ष्य, दुर्जनताम्, किम्, करोषि,*

*इति, सखायः, भृशम्, विवदन्ते, अतः, परिग्रहे, आग्रहयालुता, न, हिता ॥६॥*

**वृत्तिः**—**हेमजन्मनः**–हेम्नः सुवर्णस्य, जन्म–उत्पत्तिरागमो लाभ इति यावत्, हेमजन्म, तस्मात्तथा । हेमसमुत्पतित इत्यर्थः । **धनान्वितान्**–धनैर्विभवैरैश्वर्य्यैरिति यावत्, अन्विता–विशिष्टा धनान्वितास्ताँस्तथा । विभूतिविभूषितानिति यावत् । **मम**–मल्लक्षणस्य जनस्य । **पक्षान्**–पार्ष्णिग्रहान्, सहायान् वा । **समीक्ष्य**–विचार्य्य, आकलय्य, विलोक्य वा । **दुर्जनताम्**–दुष्टो–जनो, लोको दुर्जनस्तस्य भावो दुर्जनता, तां तथा । **किम्**–कथम् । **करोषि**–आदधासि, आचरसीति यावत् । **इति**–इत्थम् । **सखायः**–मित्राणि । परस्परमिति शेषः । **भृशम्**–अत्यन्तम् । **विवदन्ते**–विवादं कुर्वन्ति । **अतः**–अस्माद्धेतोः । **परिग्रहे**–परिजने, पत्न्याम्, द्रव्याद्युपाधौ वा । **आग्रहयालुता**–आगृह्यते, आग्रहाणि, आग्रहं करोति इति यावत्, आग्रहयालुस्तस्य भाव आग्रहयालुता, तान्तथा । **न**–नहि । **हिता**–कल्याणप्रदा, परिग्रहविषये आवेशो ( यत्नः ) न विधेय इति भावः ॥ ६ ॥

**मितायुषा तृड् जनिता जनाऽञ्जनै–र्न वाधिका स्यान्नभसो नवाधिका ।**
**तवार्णवस्येव तुषारशीकरैः, प्रवृद्धवेलेव तुषाररोचिषा ॥७॥**

*अन्वयः—(हे) जन !, तव, मितायुषा, अञ्जनैः, जनिता, नवा, नभसः, अधिका, तृट्, तुषाररोचिषा, तुषारशीकरैः, प्रवृद्धवेला, इव, अर्णवस्य, इव, नवा, अधिका, स्यात् ॥७॥*

**वृत्तिः**—**हे जन !**–हे लोकसमुदय ! **तव**–त्वल्लक्षणस्य जनस्य । **मितायुषा**–मितं परिमितमायुर्जीवनकालो, मितायुस्तेन तथा । अल्पजीवनकालेनेत्यर्थः, कर्तृभूतेनेति शेषः । **अञ्जनैः**–पापैः । करणभूतैरिति शेषः । **जनिता**–उत्पादिता । **नवा**–नवीना । **नभसः**–आकाशात् । अपीति शेषः । **अधिका**–व्यापिका । **तृट्**–तृष्णा । **तुषाररोचिषा**–तुषारं शीतलं, रोचिः किरणं यस्य स तुषाररोचिश्चन्द्रस्तेन तथा । **तुषारशीकरैः**–तुषाराः शीतलाश्च ते शीकरा–जलकणाः, तुषारशीकरास्तैस्तथा । करणभूतैरिति बोध्यम् । **प्रवृद्धवेला**–प्रवृद्धा वृद्धिमतिशयितामुपगता चासौ वेला जलवृद्धिः प्रवृद्धवेला । **इव**–यथा । **अर्णवस्य**–समुद्रस्य । **इव**–यथा । **नवा**–नैव । **अधिका**–अतिरिक्ता । **स्यात्**–भवेत् । चन्द्रवृद्धिजनिता प्रवृद्धवेला समुद्रमर्य्यादा यथाऽर्णवस्याधिका न भवति तथा अल्पजीवनकालकर्तृकपापकर्मकरणिका तृष्णा तवापि नाधिकाऽवभासेतेति । तथा च तामपनेतुमवश्यं यतनीयमिति ॥७॥

सदाऽऽदिनाथार्चनिकादिनादिना-गमे समेता स धनं जनोऽर्जनैः ।
मृषा कषायानपि मा कृथा वृथा, भवेदमीभिः कमलोदयः कियान् ॥८॥

*अन्वयः—सदा, आदिनाथार्चनिकादिना, दिनागमे, अर्जनैः, धनम्, समेता, सः, (त्वम्) जनः, मृषा, कषायान्, अपि, वृथा, मा, कृथाः, अमीभिः, कमलोदयः, कियान्, भवेत् ॥८॥*

वृत्तिः—सदा-सर्वदा। **आदिनाथार्चनिकादिना**-आदिनाथस्य युगादिदेवस्य। ऋषभस्वामिनः प्रथमतीर्थंकृतः अर्चनिका-पूजनिका, पूजेति यावत्—आदिनाथार्चनिका, सा आदि प्रधानं यस्य तत्, आदिनाथार्चनिकादि तेन तथा, श्रीमदादीश्वरपूजनादिनेति भावः। **दिनागमे**-दिनस्य दिवसस्य आगम आगमनम्, दिनागमस्तस्मिँस्तथा। शुभदिने—समागमने ते सतीति भावः। **अर्जनैः**-उपार्जनैः। कृत्वेति शेषः। **धनम्**-ऐश्वर्य्यम् सम्पत्तिमिति यावत्। **समेता**-प्राप्ता। **सः**-प्रसिद्धः। (त्वम्-त्वल्लक्षणः) **जनः**-लोकः। **मृषा**-मिथ्याभूतान्। **कषायान्**-क्रोधलोभादीन्। अपि-सम्भावनायाम्। **वृथा**-व्यर्थम्, निष्फलमिति यावत्। **मा कृथाः**-नैव कुरु। यत इति शेषः। **अमीभिः**-कषायैः। **कमलोदयः**-कमलाया लक्ष्म्या उदयः प्राप्तिः कमलोदयः। **कियान्**-किं परिमाणमस्येति कियान्, कियत्परिमाणक इति यावत्। यथोदकवृद्ध्यर्थं समुद्रेण हिमकणा नाद्रियन्ते तथा लक्ष्मीवृद्ध्यर्थं कषाया नादरणीया इति भावः ॥८॥

न केवलं प्राणिवधो वधो मम—प्रसक्तिभाजैकवपुष्मतीहितः ।
तदाश्रयान्याङ्गिजिघांसयाशयः, कृतः क्षयायैव स नारकाश्रये ॥९॥

*अन्वयः—नारकाश्रये, एकवपुष्मति, वधः, केवलम्, प्राणिवधः, न, तदाश्रयान्याङ्गिजिघांसया, मम-प्रसक्तिभाजा, ईहितः, (अत एव) कृतः, सः, आशयः, क्षयाय, एव, (भवेत्) ॥९॥*

वृत्तिः—**नारकाश्रये**-नारको नरक आश्रयः आधारो यस्य स नारकाश्रयस्तस्मिँस्तथा। **एकवपुष्मति**-एकञ्च तद् वपुः शरीरम् एकवपुस्तदाश्रयत्वेनास्त्यस्येत्येकवपुस्मान् तस्मिँस्तथा, एकजीवे इत्यर्थः। **वधः**-हननम् हिंसेति यावत्। **केवलम्**-मात्रम्। **प्राणिवधः**-जीवहिंसा। **न**-नहि। **तदाश्रयान्याङ्गिजिघांसया**-अन्ये-अपरे च ते अङ्गिनो जीवा अन्याङ्गिनः,तदाश्रया नारकाश्रयाश्च तेऽन्याङ्गिनस्तदाश्रयान्याङ्गिनस्तेषां जिघांसा हननेच्छा तदाश्रयान्याङ्गिजिघांसा तया तथा। **ममप्रसक्तिभाजा**-ममो ममत्वम्, ममतेति यावत्,ममशब्दोऽदन्तः,अममनिर्ममादिवत्, तत्र प्रसक्तिः प्राप्तिरासक्तिरिति यावत्। ममप्रसक्तिस्तां भजते इति ममप्रसक्तिभाक् तेन तथा। **रागिणा**-जनेनेत्यर्थः। **ईहितः**-चेष्टितः, अत एव। **कृतः**-

विहितः । सः–हननविषयकः । आशयः–अभिप्रायः । क्षयाय–विनाशाय । एव–अवधारणार्थकमव्ययम् । भवेदिति शेषः ॥९॥

इमां नु शिक्षां कथयन्तमीश्वरं, त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
करोतु रक्षां पततो भवाम्बुधा–वितीह चक्रायुधभूपतिर्जगौ ॥१०॥

*अन्वयः*––नु, इमाम्, शिक्षाम्, कथयन्तम्, ईश्वरम्, (प्रति) इह, चक्रायुधभूपतिः, इति, जगौ, (इतीति किम्) भवाम्बुधौ, पततः, (सतः) त्वदीक्षणात्, विश्वसितान्तरात्मनः, रक्षाम्, करोतु ॥१०॥

वृत्तिः––नु–वितर्के । इमाम्–अनुपदवर्ण्यमानाम् । शिक्षाम्–उपदेशम् । कथयन्तम्–निगदन्तम् । ईश्वरम्–परमात्मानम्, श्री शान्तिनाथमिति यावत् । (प्रति–लक्ष्यीकृत्य) इह–अत्र । चक्रायुधभूपतिः–तन्नामा नरपतिः श्रीशान्तिनाथात्मज इति यावत् । इति–वक्ष्यमानप्रकारेण । जगौ–गीतवान्, अकथयदिति यावत् । इतीतिकिमित्याह–भवाम्बुधौ–भवः संसार एव अम्बुधिः समुद्रो भवाम्बुधिस्तस्मिँस्तथा । पततः–निमज्जतः । सत इति शेषः । त्वदीक्षणात्–तव भवत ईक्षणमवलोकनम्, त्वदीक्षणम्, तस्मात्तथा । विश्वसितान्तरात्मनः–विश्वसितो विश्वासमधिगतोऽन्तरात्मा येषान्ते विश्वसितान्तरात्मानस्ताँस्तथा । जनानिति शेषः । रक्षाम्–रक्षणम्, सम्पादयतु इति यावत् । ये तत्रभवति भवति विश्वासमादधानस्तेऽवश्यं श्रीमद्भी रक्षणीया, इति भावः ॥१०॥

ततः प्रपन्नव्रतमेनमेनसा, वियुक्तमायुक्त गणेशितुः पदे ।
विगर्हितं धर्मधनैर्निवर्हणं, वदन्तमेवं सकलेभ्यसंसदि ॥११॥

*अन्वयः*––ततः, प्रपन्नव्रतम्, धर्मधनैः, निवर्हणम्, विगर्हितम्, एवम्, वदन्तम्, एनसा, वियुक्तम्, एनम्, सकलेभ्यसंसदि, गणेशितुः, पदे, आयुक्त ॥११॥

वृत्तिः––ततः–तदनन्तरम् । प्रपन्नव्रतम्–प्रपन्नं स्वीकृतं व्रतं महाव्रतं, चारित्रमिति यावत्, येन स प्रपन्नव्रतस्तन्तथा । धर्मधनैः–धर्मः सुकृतमेव धनं येषान्ते धर्मधनास्तैस्तथा । निवर्हणम्–हिंसनम् । विगर्हितम्–विशेषेण निन्दितम्, अस्तीति शेषः । एवम्–अनेन प्रकारेण इति यावत् । वदन्तम्–निगदन्तम् । एनसा–पापेन । वियुक्तम्–विरहितम् । एनम्–चक्रायुधम् । सकलेभ्यसंसदि–सकला निखिलाश्च ते इभ्या धनाढ्याः सकलेभ्यास्तेषां संसत् सभा परिषदिति यावत्, सकलेभ्य–

संसत्, तस्यान्तथा । गणेशितुः–गणस्य संघस्य वा ईशिता पतिः स्वामीति यावत्, गणेशिता तस्य तथा । पदे–स्थाने, आस्पदे इति यावत् । आयुंक्त–आयोजयति स्म, न्ययोजयदिति वा, भगवान्निति शेषः ॥११॥

परेऽपि चाक्षत्रिमिता गणेश्वरा, बभूवुराप्ताः सदृशं दृशं भृशम् ।
गणेऽनुगानमविगानधीबलाद्, विशिष्य विश्वासजुषां द्विषामपि ॥१२॥

*अन्वयः—अविगानधीबलात्, विश्वासजुषाम्, अनुगानाम्, विशिष्य, द्विषाम्, अपि, गणे, भृशम्, सदृशम्, दृशम्, आप्ताः, अक्षत्रिमिताः, परे, अपि, गणधराः, बभूवुः, च ॥१२॥*

वृत्तिः—अविगानधीबलात्–अविगाना विशुद्धा चासौ धीर्बुद्धिरविगानधीस्तस्या बलम् सामर्थ्यम्, सैव बलं-शक्तिर्वा अविगानधीबलम् तस्मात्तथा । विश्वासजुषाम्–विश्वासं जुषन्ते सेवन्ते इति विश्वासजुषस्तेषान्तथा । विश्वासपात्राणामिति यावत् । अनुगानाम्–अनु पश्चाद् गच्छन्ति व्रजन्तीति अनुगाअनुचरास्तेषां तथा । विशिष्य–विशेषरूपेण । द्विषाम्–शत्रूणाम् । अपि–समुच्चये । गणे–समूहे । भृशम्–अतिशयेन । सदृशम्–समानाम् । दृशम्–दृष्टिम् । आप्ताः–प्राप्ताः । अक्षत्रिमिताः–षट्त्रिंशत्परिमिताः ३६, अङ्कानां वामतो गतिः, अक्षशब्दस्य षट्सङ्ख्याबोधकत्वं चेति । परे–अन्ये । अपि–सम्भावनायाम् । गणेश्वरा–गणाध्यक्षाः गणधरा, इति यावत् । बभूवुः–अभवन् । च–समुच्चये ॥१२॥

पदे पदे सन्ति भटा रणोद्भटाः, प्रशामयन्ते शमिनः स्म तानपि ।
द्वियुक्तषष्ट्या हि सहस्रसंख्यया, द्विधापि शान्तिक्रमलीनचेतसः ॥१३॥

*अन्वयः—रणोद्भटाः, भटाः, पदे पदे, सन्ति, हि, तान्, अपि, द्वियुक्तषष्ट्या, सहस्रसंख्यया, द्विधा, अपि, शान्तिक्रमलीनचेतसः, शमिनः, प्रशामयन्ते ॥१३॥*

वृत्तिः—रणोद्भटाः–रणेषु युद्धेषु उद्भटाः दुर्मदास्तथा, संग्रामदुर्मदा इत्यर्थः । भटाः–शूराः । पदे पदे–स्थाने स्थाने वीप्सायां द्विर्भावः । प्रत्येकस्मिन् स्थाने इति भावः । सन्ति–विद्यन्ते । हि–निश्चयेन । तान्–संग्रामदुर्मदान् । अपि–सम्भावनायाम् । द्वियुक्तषष्ट्या–द्वाषष्ट्या । सहस्रसंख्यया–सहस्रात्मकसंख्यया । उपलक्षिता इति यावत् । द्वाषष्टिसहस्रसंख्याका इति यावत् । (६२०००) द्विधा–प्रकारद्वयेन बाह्याभ्यन्तररूपेणेति यावत् । अपि–सम्भावनायाम् । शान्तिक्रमली-

नचेतसः–शान्तेः-प्रशमस्य, क्रमः-परिपाटी, शान्तिक्रमस्तत्र लीनं-मग्नं चेतो अन्तःकरणं येषान्ते तथा । पक्षे-नामैकदेशे नामग्रहणात् शान्तिनाथस्य क्रमौ चरणौ शान्तिक्रमौ तत्र लीनं चेतो येषान्ते तथा । **शमिनः** शान्तचेतसः । साधव इति यावत् । **प्रशामयन्ते**–सान्त्वयन्ति । आसीच्च भगवतोऽर्हतः श्रीशान्तिनाथस्य द्वाषष्टिसहस्रपरिमितो मुनीनां परिवारः इति ॥१३॥

**सदा तदार्य्यापटलेषु शूकता–ऽऽनतेषु हिंसारस एष पूर्य्यते ।**
**क्वचित् क्षमायां न मनाक् तदुन्मनाः,स नारकानेव निषेवतां न किम् ?॥१४॥**

अन्वयः—*सदा, शूकताऽऽनतेषु, तदार्य्यापटलेषु, क्षमायाम्, क्वचित्, मनाक्, (अपि) एषः, हिंसारसः, न, पूर्य्यते, तदुन्मनाः, सः, नारकान्, एव, किम्, न, निषेवताम् ॥१४॥*

**वृत्तिः—सदा**–सर्वदा । **शूकताऽऽनतेषु**–शवन्ति गच्छन्ति परदुःखप्रहाणेच्छामनेनेति शूकः स एव शूकता स्वार्थे कथञ्चि 'तल्प्रत्ययः' दयेत्यर्थः । तत्र आनतास्तत्परास्तदर्थपरा इत्यर्थः, शूकतानतास्तेषु तथा । अथ दया शूकः, कारुण्यं करुणा घृणा' ३ । ३३ । इत्यभि० चि० । **तदार्य्यापटलेषु**–श्रीशान्तिनाथजिनवरसाध्वीसमुदयेषु । **क्षमायाम्**–पृथिव्याम् दयायां सत्यां वा । **क्वचित्**–कुत्रचित् । **मनाक्**–ईषद् । (अपि) **एषः**–अयम् । **हिंसारसः**–हिंसायां प्राणातिपातप्रवृत्तौ रसो रागः तथा । **न**–नहि । **पूर्य्यते**–परिपूर्णो भवति । **तदुन्मनाः**–तस्यां हिंसायामुन्मना उत्सुकस्तदुन्मनाः । **सः**–हिंसारसः । **नारकान्**–नरकान् । नरकस्य इमे नारकाः, नरकसम्बन्धिनो जीवास्तान् वा । **एव**–अवधारणार्थकमव्ययम् । **किम्**–कथम् । **न**–नहि । **निषेवताम्**–निःशेषेण सेवतां स तानेव गच्छत्विति भावः ॥१४॥

**प्रमाणमार्य्यास्वपि भूरसैर्मितै–रभूत् सहस्रैर्यदुदीर्णया गिरा ।**
**धिगीदृशं ते नृपते ! कुविक्रमं, प्रजेशमूचे मृगयाऽशुचिं शुचिः ॥१५॥**

अन्वयः—*भूरसैः, मितैः, सहस्रैः, (उपलक्षितासु) आर्य्यासु, अपि, प्रमाणम्, अभूत्, (अथ च) यदुदीर्णया, गिरा, शुचिः, प्रजा, (हे) नृपते !, ईदृशम्, मृगयाऽशुचिम्, ते, कुविक्रमम्, धिक् ! (इत्यवग् ) ईशम्, ऊचे ॥१५॥*

**वृत्तिः—भूरसैः**–एकषष्ट्या । **मितैः**–परिमितैः । **सहस्रैः**–सहस्रसंख्याभिः । (उपलक्षितासु) **आर्य्यासु**–श्रेष्ठासु, साध्वीष्वित्यर्थः । **अपि**–सम्भावनायाम् । **प्रमाणम्**–प्रकृष्टं मानं प्रमाणम् । **अभूत्**–अभवत् । सम्पन्नमिति यावत् । भगवतः शान्तिनाथस्य परिवारे साध्व्य एकषष्टिसहस्रमिता–

अभूवन्निति । यद्यपि षट्शताधिका यकषष्टि सहस्रमिताः साध्व्यः सन्ति तथापि अत्र षट् शतानि न परिगणितानि संक्षेपकरणादिति यदुक्तं श्रीशान्तिनाथचरित्रे एकषष्टिसहस्राणि षट्शतैरधिकानि च, प्रभुणा दीक्षितास्तेन, श्रमण्यः, शीलशोभिताः' ६-१५२४ । इति । यदुदीर्णया-यदुदितया, यत्कथितया, यदुपदिष्टयेति यावत्, साध्वीनां मधुरया गिरेति भावः । गिरा-वाण्या । शुचिः-पवित्रात्मा । प्रजा-जनः । हे नृपते !-हे राजन् ! ईदृशम्-एवंविधम् । मृगयाऽशुचिम्-मृग्यन्तेऽन्विष्यन्ते प्राणिनोऽस्यामिति मृगया आखेटः तया अशुचिरपवित्रो मृगयाऽशुचिस्तन्तथा । ते-तव । कुविक्रमम्-कुत्सितः प्राणिवधसम्पादनान्निन्दितो विक्रमः-पराक्रमः, कुविक्रमस्तन्तथा । धिक्-तस्य धिक्कारोऽस्त्विति भावः । (इत्येवम्) ईशम्-राजानम् । प्रतीतिशेषः । ऊचे-अवादीत् ॥१५॥

**अविक्रियं वैक्रियलब्धिशालिनां, प्रभुर्यतोऽप्यङ्गसहस्रमालिनाम् ।**
**दयां दिदेश स्थलनीरचारिणि, कृपाश्रये यः कृपणे पतत्रिणि ॥१६॥**

*अन्वयः—यतः, यः, वैक्रियलब्धिशालिनाम्, अङ्गसहस्रमालिनाम्, अपि, अविक्रियम्, प्रभुः, (अत एव सः) स्थलनीरचारिणि, कृपाश्रये, कृपणे, पतत्रिणि, दयाम्, दिदेश ॥१६॥*

वृत्तिः—यतः-यस्मात् । यः-यादृशो भगवान् । वैक्रियलब्धिशालिनाम्-विक्रियाया इयं वैक्रिया सा चासौ लब्धिर्वैक्रियालब्धिस्तया शालन्ते शोभन्ते तच्छीला वैक्रियलब्धिशालिनस्तेषां तथा । अङ्गसहस्रमालिनाम्-अङ्गानि षट्संख्याकानि सहस्राणि तेषां माला साऽस्त्येषां ते तेषां तथा । अपि-समुच्चये । प्रभुः-स्वामी । ईशितेति यावत् । (अत एव सः-प्रभुः) स्थलनीरचारिणि-स्थलं भूमिश्च जलं-नीरञ्च स्थलनीरे, तयोश्चरति गच्छतीति स्थलनीरचारी, तस्मिँस्तथा । कृपाश्रये-कृपाया दयाया आश्रय आधारः कृपाश्रयः तस्मिँस्तथा । कृपणे-दीने, मन्दे इति यावत् । पतत्रिणि-पक्षिणि अपीति शेषः । दयाम्-कृपाम् । दिदेश-उपदिष्टवान् । प्रभोः शान्तिनाथस्य परीवारे वैक्रियलब्धिधारिणो मुनयः षट्सहस्रमिता आसन् । ते हि यथेच्छं गगनाङ्गणगामि रूपं विकर्तुमीशास्ततश्च खगविराधनासम्भवोऽतस्तेभ्यो विशेषेण खगदयां दयालुरर्हन्नुपदिशति स्मेति भावः ॥१६॥

**फलेन मूलेन च वारिभूरुहा, तथा परेषामनुकम्पयाऽन्विताः ।**
**चतुःशताढ्यत्रिसहस्रवादिन-श्चतुःसहस्रा मनसोऽवबोधिनः ॥१७॥**

*अन्वयः—तथा, वारिभूरुहा, फलेन, च, मूलेन, (जीवताम्) परेषाम्, (उपरि) अनुकम्पया, अन्विताः, चतुःशताढ्यत्रिसहस्रवादिनः, चतुःसहस्राः, मनसः, अवबोधिनः, (मुनयः आसन्) ॥१७॥*

वृत्तिः—तथा-समुच्चये । वारिभूरुहा–वारि जलमेव भूरुत्पत्तिस्थानम्, वारिभूस्तत्र रोहत्युत्पद्यते तेन तथा, जलोत्पन्नेनेति यावत् । फलेन–प्रसवेन । च–पुनः । मूलेन–कन्देन । (जीवताम्–जीवनं धारयताम्) परेषाम्–अन्येषाम्, विहगादीनाम् । (उपरीति शेषः) अनुकम्पया–दयया । अन्विताः–विशिष्टाः । चतुःशताढ्यत्रिसहस्रवादिनः–चतुःशताधिकत्रिसहस्रं सङ्ख्यका वादकरणशीलाः मुनयः । अत्र 'चतुःशताढ्यद्विसहस्रवादिनः' इति पाठेन भाव्यम् । यतो हि शान्तिनाथस्यार्हतो वादिनां मुनीनां सङ्ख्या शतानां चतुर्विंशतिरभूत् । यदुक्तं शान्तिनाथचरित्रे 'चतुःशताधिके' द्वे तु सहस्रे वादिनां तथा' ६–१५२६ इति । चतुःसहस्राः-चत्वारि सहस्राणि संख्या ते तथा । मनसः–अन्तःकरणस्य । अवबोधिनः–ज्ञातारः । मनःपर्यवज्ञानशालिनः । मुनय आसन्निति शेषः ॥१७॥

**शतत्रयीयुक्तचतुःसहस्रिका, मुनेरिवेत्थं ममयस्य-वृत्तयः ।**
**अभुः प्रभोः केवलबोधशालिनो, दिशां प्रकाशादहिमांशुमालिनः ॥१८॥**

*अन्वयः—दिशाम्, प्रकाशात्, अहिमांशुमालिनः, इव, केवलबोधशालिनः, ममयस्य, प्रभोः, मुनेः, इत्थम्, शतत्रयीयुक्तचतुःसहस्रिकाः, वृत्तयः, अभुः ॥१८॥*

वृत्तिः—दिशाम्–आशानाम् । प्रकाशात्–प्रकाशनात् । अहिमांशुमालिनः–हिमाः-शीतलाश्च ते-अंशवः किरणाानि हिमांशवः न हिमांशवोऽहिमांशवः, तेषां माला-पङ्क्तिरहिमांशुमाला साऽस्त्यस्येति-अहिमांशुमाली-सूर्यस्तस्य तथा । सूर्यरूपस्येत्यर्थः । यथा सूर्यस्य दिक्प्रकाशकत्वं तथा केवलिनः दिङ्मितधर्माकाशकालपुद्गलजीवरूपकद्रव्यप्रकाशकत्वमिति । इव–यथा । केवलबोधशालिनः–केवलबोधेन-केवलज्ञानेन शालते शोभते तच्छीलः केवलबोधशाली, तस्य तथा । ममयस्य–मः शम्भुस्तीर्थंकरः स प्रधानं यस्मिन् स ममयस्तस्य तथा, जिनमयस्येति यावत् । 'मः पुनः शम्भा' वित्यनेकार्थः । प्रभोः–श्रीशान्तिनाथस्यार्हतः । मुनेः–श्रमणस्य जातावेकवचनम् । इत्थम्–अनेन प्रकारेण । शतत्रयीयुक्तचतुःसहस्रिकाः–शतत्रयाधिकचतुःसहस्र "४३०००" परिमिताः । वृत्तयः–स्थितयः, सङ्ख्या इति यावत् । अभुः–अदीप्यन्त । यद्वा ममयस्यवृत्तय 'इत्येकमेव समस्तं पदमवसेयम् । मम–ममत्वं यस्यन्ति क्षिपन्तीति ममयस्यास्ताश्च ता वृत्तयो ममयस्यवृत्तयः इत्येवंश्यप्रत्ययान्तममयस्यापदवृत्तिपदयोः कर्मधारयसमासाश्रयणेन पुंवद्भावादभीष्टसिद्धिसम्भवादिति ॥१८॥

**जगत्त्रयं दण्डितमात्मसात्कृतं, विमोहराजा रजता रजोबले ।**
**त्वयाद्य तस्मिन्नपि दण्डधारिणा, कृता त्रिलोकीप्रभुताद्भुता करे ॥१९॥**

*अन्वयः—रजोबले, रजता, विमोहराजा, जगत्त्रयं, दण्डितम्, आत्मसात्कृतम्, अद्य, तस्मिन्,*

*अपि, दण्डधारिणा, त्वया, अद्भुता, त्रिलोकीप्रभुता, करे, कृता ॥१९॥*

वृत्तिः—रजोबले–रजोगुण एव बलं सैन्यम्, रजोबलम्, तत्र तथा। रज्जता–अनुरज्यता। विमोहराजा–विशिष्टो मोहोऽज्ञानम्, विमोहः स एव राजते इति राट् विमोहराट् तेन तथा। विमोहरूपेण नृपेणेत्यर्थः। जगत्रयम्–भुवनत्रयम्, त्रिभुवनमिति यावत्। दण्डितम्–शिक्षितम्। (अथ च) आत्मसात्कृतम्–आत्माधीनं सम्पद्यते तत्कृतम्, आत्मसात्कृतम्। अद्य–लक्षणया अद्यत्वे अधुनेति यावत्। तस्मिन्–विमोहराजि। अपि–सम्भावनायाम्। दण्डधारिणा–दण्डं शिक्षां धरति तच्छीलो दण्डधारी तेन तथा। त्वया–भवता, भगवता शान्तिनाथेन। अद्भुता–आश्चर्यकारिणी। त्रिलोकीप्रभुता–त्रयाणां लोकानां समाहारस्त्रिलोकी तत्र प्रभुता स्वामित्वमीशित्वमिति यावत् तथा। करे–हस्ते। कृता–विहिता। त्रिभुवनविजयशालिनमपि विमोहराजमजीजयदिति भावः ॥१९॥

प्रणूयमानस्त्रिसहस्रयोगिनां, गणोऽवधिज्ञानवतां सुरैरिति।
विभूषिताऽद्यापि च येन संस्मर–त्कथं न पत्या धरणी हृणीयते ॥२०॥

*अन्वयः—च, अवधिज्ञानवताम्, त्रिसहस्रयोगिनाम्, गणः, सुरैः, प्रणूयमानः, (अभूत्) इति, येन, पत्या, विभूषिता, धरणी, अद्यापि, संस्मरत्कथम्, न, हृणीयते ॥२०॥*

वृत्तिः—च–पुनः। अवधिज्ञानवताम्–अवधिज्ञानमस्त्येषामिति, अवधिज्ञानवन्तस्तेषां तथा। त्रिसहस्रयोगिनाम्–त्रिसहस्रं सहस्रत्रयं योगिनो मुनयस्त्रिसहस्रयोगिनस्तेषां तथा। गणः–समुदयः। सुरैः–देवैः। प्रणूयमानः–प्रकर्षेण स्तूयमानः। अभूदिति शेषः। इति–हेतोः। येन–यादृशेन गणेन। पत्या–स्वामिना। विभूषिता–समलङ्कृता। धरणी–पृथिवी। अद्यापि–अद्यत्वेऽपि, अधुनापीति वा। संस्मकरत्कथम्–सं सम्यक्प्रकारेण स्मरन्ती स्मरणविषयीभूता कथा चरित्रम् यस्मिन्, तद्यथा स्या–त्तथा। न–नहि। हृणीयते–लज्जते। श्रीशान्तिनाथस्य गवतस्त्रिसहस्रमिता अवधिज्ञानिन आसन्निति भावः ॥२०॥

इतीदृशैस्तं विरचय्य वाङ्मयै–र्गणेश्वरैः पूर्वगणं पटूकृतः।
मुमुक्षुवर्गोऽष्टशतीमितः स्थित–स्तपोभरे यः स्वयमर्हतेरितः ॥२१॥

*अन्वयः—गणेश्वरैः, इति, ईदृशैः, वाङ्मयैः, तम्, पूर्वगणम्, विरचय्य, अष्टशतीमितः, मुमुक्षुवर्गः, पटूकृतः, स्थितः, यः, स्वयम्, अर्हता, तपोभरे, ईरितः ॥२१॥*

वृत्तिः—गणेश्वरैः-गणाधीशैःषट्त्रिंशद्गणधरैरिति यावत् । इति-अनेन प्रकारेण । ईदृशैः-इमानीव दृश्यन्ते इतीदृशानि तैस्तथा । वाङ्मयैः-वाच एव वाङ्मयानि तैस्तथा, वचनकदम्ब-कैरिति यावत् । द्वादशाङ्गीरूपवाग्वैभवैरिति । तम्-प्रसिद्धम् । पूर्वगणम्-चतुर्दशपूर्वसमुदयम् । विरचय्य-विशेषेण रचयित्वा, निर्मायेत्यर्थः । अष्टशतीमितः-अष्टशत्या मितः परिच्छिन्नस्तथा । मुमुक्षुवर्गः-मोक्षमिच्छतीति मुमुक्षति, मुमुक्षतीति मुमुक्षुस्तस्य वर्गः समूहस्तथा मुनिपरिकर इति यावत् । पटूकृतः-अपटुरविद्वान् विद्वान् सम्पद्यते तथा कृतः पटूकृतः, पण्डितीकृत इत्यर्थः । स्थितः-अतिष्ठत् । यः-यादृशो गणः । स्वयम्-आत्मना । अर्हता-जिनेश्वरेण । तपोभरे-तपस्याऽऽधिक्ये । ईरितः-प्रेरितः । भगवतः श्रीशान्तिनाथस्य चतुर्दशपूर्विणां मुनीनामष्टशती व्यलसदिति ॥२१॥

**द्विलक्षयुक्ता नवतिः सहस्रकाः, सचित्रवैलक्ष्यकृपं नृपं खगः ।**
**क्षमां गतो वाऽणुयतिः प्रतिष्ठित-श्चकार वाचा परमार्हतं बहुम् ॥२२॥**

*अन्वयः—द्विलक्षयुक्ताः, नवतिः, सहस्रकाः, (श्रावकाः) अणुयतिः, प्रतिष्ठितः, क्षमांगतः, खगः, वा, बहुम्, परमार्हतम्, नृपम्, वाचा, सचित्रवैलक्ष्यकृपम्, चकार ॥२२॥*

वृत्तिः—द्विलक्षयुक्ताः-लक्षद्वयविशिष्टाः । नवतिः सहस्रकाः-नवतिसहस्राणि । अत्र सहस्राण्येव सहस्रकाः स्वार्थे कः । 'प्रकृतेलिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित्' इति (लिङ्गा—१३५) वचनात्, 'क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति भाष्योक्तेश्चात्र पुँस्त्वमनुसन्धेयमिति । (श्रावकाः-देशव्रतधारिणः । भगवतः शान्तिनाथस्य नवतिसहस्राधिकद्विलक्षमिता ये आसँस्ते । अत्र यथास्थितमुद्रितपाठस्त्रिलक्षयुक्ता इति वर्तते परं सोऽपपाठः, यत् शान्तिनाथ चरित्रे 'श्रीशान्तिजिननाथेन बोधितानामगारिणाम्, नवतिसहस्रायुक्ता जाता लक्षद्वयीवरा' १५३० । इति । ) अणुयतिः-अणुव्रतधारकः । प्रतिष्ठितः-लब्धप्रतिष्ठः । क्षमांगतः-भूतलमागतः । खगः-खेचरः, विद्याधर इति यावत् । वा-समुच्चये । बहुम्-सातिशयम् । परमार्हतम्-प्रवरजैनम् । नृपम्-राजानम् । वाचा-वाग्विलासेन । सचित्रवैलक्ष्यकृपम्-चित्रमाश्चर्यं च वैलक्ष्यं लज्जा च कृपा कारुण्यं च ताभिः सह वर्त्तते तं तथा, विस्मयवलक्ष्यदयान्वितमिति यावत् । चकार-कृतवान् ॥२२॥

**उपासिकानां निवहस्त्रिलक्षभृत्, पुनः सहस्रत्रिनवत्यधिष्ठितः ।**
**दयासमुद्रे स तदाशये ऽतिथी-र्बभूव रत्नाकर एव केवलः ॥२३॥**

अन्वयः—*त्रिलक्षभृत्, पुनः, सहस्रत्रिनवत्यधिष्ठितः, केवलः, सः, उपासिकानाम्, निवहः, दयासमुद्रे, रत्नाकरे, एव, तदाशये, अतिथीबभूव ॥२३॥*

वृत्तिः—**त्रिलक्षभृत्**—त्रिलक्षं लक्षत्रयसङ्ख्याम, बिभर्ति धारयतीति त्रिलक्षभृत्। **पुनः**—किञ्च। **सहस्रत्रिनवत्यधिष्ठितः**—सहस्राणां त्रिनवतिः सहस्रत्रिनवतिस्तया अधिष्ठितो युक्तस्तथा। त्रिनवति सहस्राञ्चितः। **केवलः**—अद्वितीयः। **सः**—प्रसिद्धः। **उपासिकानाम्**—श्राविकाणाम्। **निवहः**—समूहः। **दयासमुद्रे**—करुणावरुणालये, कृपासागरे इति यावत्। **रत्नाकरे**—रत्नानां ज्ञानदर्शनचारित्रेति रत्नत्र-याणाम आकरः खनिरिव रत्नाकरस्तस्मिँस्तथा। **एव**—अवधारणार्थकमव्ययम्। **तदाशये**—तस्य भगवत आशयोऽन्तःकरणं चित्तमिति यावत्, तदाशयस्तस्मिँस्तथा। **अतिथीबभूव**—अनतिथिरप्राघु-णिकोऽतिथिः सम्पद्यते तथा बभूव तथा, प्राघुणिकीबभूवेत्यर्थः ॥२३॥

**प्रभुर्विजह्रे भुवि यत्र केवली, बलीयसो मोहगिरीन् विभेदयन्।**
**रसैः प्रसन्ने जनमानसे सखी-चकार कारुण्यरसापगा गिरः ॥२४॥**

अन्वयः—*बलीयसः, मोहगिरीन्, विभेदयन्, केवली, प्रभुः, यत्र, भुवि, विजह्रे, (तत्र) रसैः, प्रसन्ने, जनमानसे, कारुण्यरसापगाः, गिरः, सखीचकार ॥२४॥*

वृत्तिः—**बलीयसः**—अतिशयेन बलवन्तो बलीयांसस्ताँस्तथा, "गुणाङ्गाद्वेष्ठेयसू" ७।३।९॥ इत्यनेनेयसुः प्रत्ययः, "विन्मतोर्णीष्ठेयसौ लुप्" ७।४।३२॥ इत्यनेन मतो लुप्। **मोहगिरीन्**—मोहा अज्ञानानि, गिरयः पर्वता इव मोहगिरयस्ताँस्तथा, पर्वतवद्गुरुतममोहानित्यर्थः। **विभेदयन्**—प्रविदारयन्। **केवली**—केवलं तदाख्यज्ञानविशेषोऽस्त्यस्येति केवली, "अतोऽनेकस्वरात्" ७।२।६॥ इत्यनेन 'इन्' प्रत्ययः। केवलज्ञानवानित्यर्थः। **प्रभुः**—स्वामी, भगवान् शान्तिनाथ इति यावत्। **यत्र**—यस्याम्। **भुवि**—पृथिव्याम्। यस्मिन् स्थाने इति यावत्। **विजह्रे**—विहृतवान्, विहारं कृतवा-निति यावत्। (तत्र) **रसैः**—अनुरागैः। **प्रसन्ने**—हृष्टे। **जनमानसे**—लोकान्तःकरणे। **कारुण्यरसापगाः**—करुण एव कारुण्यम् तल्लक्षणो रसः कारुण्यरसस्तस्य आपगा नद्यः, कारुण्यरसापगास्तास्तथा। **गिरः**—वाचः। **सखीचकार**—असख्यः सख्यः सम्पद्यन्ते तथा चकार तथा, मित्रीचकार ॥२४॥

**मदेकपुत्रा जननी जरातुरा, पिता सनत्पूर्व कुमारताविषम्।**
**पुरो गतौ स्वस्य निर्नसयाऽऽगतौ,विमोच्य मोहात् स हि तावबूबुधत् ॥२५॥**

अन्वयः—मदेकपुत्रा, जरातुरा, जननी, पिता (च) पुरः, सनत्पूर्वकुमारताविषम्, गतौ, (पुनः) स्वस्य, निर्नंसया, आगतौ, तौ, सः, हि, मोहात्, विमोच्य, अबूबुधत् ॥२५॥

वृत्तिः—मदेकपुत्रा–अहमेकोऽद्वितीयः पुत्रस्तनयो यस्याः सा तथा । जरातुरा–वृद्धा । जननी–माता । पिता–जनकः । (च–समुच्चये) पुरः–अचिराविश्वसेनौ पूर्वम् । सनत्पूर्वकुमारताविषम्–"सनत्" इति पूर्वं पूर्वपदं यस्य स सनत्पूर्वः स चासौ कुमारः सनत्पूर्वकुमारः स चासौ ताविषः स्वर्गः सनत्पूर्वकुमारताविषस्तन्तथा । "स्वर्गस्त्रिविष्टपं द्योदिवौ भुस्तविषताविषौ नाकः" २ । १ ॥ इत्यभिधानचिन्तामणिः । गतौ–प्राप्तौ । (पुनः) स्वस्य–आत्मीयस्य ममेति यावत् । निर्नंसया–नन्तुमिच्छया । आगतौ–समायातौ । तौ–मातापितरौ । सः–श्रीशान्तिनाथोऽर्हन् । हि–निश्चयेन । मोहात्–अज्ञानतः । विमोच्य–मोचयित्वा । अबूबुधत्–प्राबोधयदिति ॥२५॥

प्रवर्तिनी बाल्यत एव सुव्रता, नवप्रसूतिर्वरटा तपस्विनी ।
स्थिरा सुदृग्मानसनीरजालये, शुचिः सपक्षा चरणानुरागिणी ॥२६॥

अन्वयः—बाल्यतः, एव, प्रवर्तिनी, सुव्रता, नवप्रसूतिः, वरटा, तपस्विनी, शुचिः, सपक्षा, चरणानुरागिणी, सुदृक्, स्थिरा, (आसीत्) ॥२६॥

वृत्तिः—बाल्यतः–शैशवतः, शैशवमारभ्येति यावत् । एव–अवधारणार्थकमव्ययम् । अवधारणञ्चान्ययोगव्यवच्छेदरूपं पूर्वप्रदर्शितपथेनावसेयम् । प्रवर्तिनी–प्रवर्तयति प्रेरयति धर्मकार्य्ये जनानिति प्रवर्तिनी । सततधर्मकार्य्यप्रवर्तनशीलेति यावत् । सुव्रता–सुष्ठु समीचीनं व्रतं तपःसंयमादिनियमो यस्याः सा तथा । नवप्रसूतिः–नवनं-नवः, स्तुतिरित्यर्थः जिनस्तव इति यावत्, तस्य प्रसूतिरुत्पत्तिर्यस्याः सा तथा । यद्वा–अनवप्रसूतिरितिच्छेदः, न विद्यते नवा नूतना प्रसूतिः प्रसवो यस्याः सा तथा ब्रह्मचारित्वादिति । वरटा–वरमटतीति वरटा, पृषोदरादित्वात्साधु । वरटेव हंसयोषिदिव वरटा, सितच्छदत्वात् अत्र पक्षे छदशब्दो वस्त्रवाचकः । "वरटा हंसयोषिति गन्धोल्या" मित्यनेकार्थः । तपस्विनी–प्रशस्तं तपोऽस्त्यस्या इति तथा, प्रशस्ततपःसंयमवतीत्यर्थः । शुचिः–पवित्रात्मा । सपक्षा–पक्षेण बलेन सहायेन वा सहिता सपक्षा । चरणानुरागिणी–चरणयोर्भगवत्पादयोश्चरणे आचरणे धर्मानुष्ठाने इति यावद्वानुरागः स्नेहश्चरणानुरागः धर्मानुरागः सोऽस्यास्तीति चरणानुरागिणी "अतोऽनेकस्वरात्" ७ । २ । ६ ॥ इत्यनेन मत्वर्थे 'इन्' प्रत्ययः । सुदृक्–सुष्ठु शोभना दृक् दर्शनं यस्याः स सुदृक्, सद्दर्शनेति यावत् । स्थिरा–निश्चला । धर्मे इति शेषः । आसीदिति–शेषः ॥२६॥

**मुनेर्गृहस्थस्य च वाऽर्हदागमः, फलानि दत्ते त्रिदिवं शिवं ध्रुवम् ।**
**गतिस्तयोरेष जनस्तमर्दयन्, रसेन हीनो भविता घनातपात् ॥२७॥**

अन्वयः—*अर्हदागमः, मुनेः, च, गृहस्थस्य, वा, ध्रुवम्, त्रिदिवम्, शिवम्, फलानि, दत्ते, तयोः, गतिः, एषः, तम्, अर्दयन्, जनः, घनातपात्, रसेन, हीनः, भविता ॥२७॥*

वृत्तिः—**अर्हदागमः**—अर्हतो जिनेश्वरस्य आगमः आगमनम्, सिद्धान्तः शास्त्रं वा तथा । **मुनेः**—श्रमणस्य । **च**—पुनः । **गृहस्थस्य**—संसारिणो जनस्य । **वा**—अथवा । यद्वा—वाशब्दोऽत्रोपमार्थकः, तथा च मुनेरिव गृहस्थस्यापीत्यर्थः । **ध्रुवम्**—निश्चितं यथास्यात्तथा । **त्रिदिवम्**—स्वर्गम् । **शिवम्**—मोक्षम् । विनापि चकारेण समुच्चयार्थप्रतीतिनियमात् स्वर्गं मोक्षञ्चेत्यर्थः प्रतीयते । **फलानि**—प्रयोजनानि, लाभान् वा । **दत्ते**—प्रतिपादयति । **तयोः**—मुनिगृहस्थयोः । **गतिः**—अभ्युपायः । **एषः**—अर्हदागमः । विज्ञेय इति शेषः । **तम्**—अर्हदागमम् । **अर्दयन्**—त्रोटयन् । भिन्दन्निति यावत् । **जनः**—लोकः । **घनातपात्**—घनः सान्द्रश्चासावातपः । सन्तापो घनातपस्तस्मात्तथा । **रसेन**—अनुरागेण । वीर्येण वा । **हीनः**—रहितः । **भविता**—भविष्यति निर्वीर्यो भावीति यावत् ॥२७॥

**अहर्निशं सान्तपनक्रियाविधौ, प्रवृत्तिभाग् जैनरुचिं विना जनः ।**
**अधः पतेद् दुःखममुष्य बिभ्रत—महो विधे ! त्वां करुणा रुणद्धि न ॥२८॥**

अन्वयः—*जैनरुचिम्, विना, जनः, अहर्निशम्, सान्तपनक्रियाविधौ, प्रवृत्तिभाक्, (अपि) अधः, पतेत्, विधे !, अमुष्य, दुःखम्, बिभ्रतम्, त्वाम्, करुणा, न, रुणद्धि, अहो ! ॥२८॥*

वृत्तिः—**जैनरुचिम्**—जिनस्यार्हतोऽयं जैनः, जिनधर्म इत्यर्थः, तत्र रुचिरभिलाषो जैनरुचिस्तान्तथा । सम्यग्दर्शनमिति यावत् । **विना**—अन्तरेण । **जनः**—लोकः । **अहर्निशम्**—रात्रिन्दिवम् । **सान्तपनक्रियाविधौ**—सान्तपनमत्यन्तकायक्लेशानशनादिकमेव क्रिया व्यापारः, सान्तपनक्रिया तस्या विधिर्विधानम्, सम्पादनमिति यावत्, सान्तपनक्रियाविधिस्तस्मिँस्तथा । **प्रवृत्तिभाक्**—प्रवृत्तिमभ्यासातिशयं भजते प्राप्नोतीति तथा । **(अपि) अधःपतेत्**—पातालं गच्छेत्, नरकं व्रजेदिति यावत् । **(हे) विधे !**—विधातः ! क्रियाविधे वा । **अमुष्य**—तादृक्क्रियातत्परस्यैतस्य जनस्येत्यर्थः । **दुःखम्**—पीडाम् । **बिभ्रतम्**—धारयन्तम् ददतमिति यावत् । **त्वाम्**—भवन्तम् । **करुणा**—कृपा । **न**—नहि । **रुणद्धि**—प्रतिबध्नाति । किमिति शेषः । कथन्न रुणद्धीति यावत् । **अहो**—आश्चर्ये ॥२८॥

**मुहूर्तमात्रं भवनिन्दया दया-दरेण संसाध्य धियाऽऽर्हतं मतम् ।**
**शुभं लभन्ते भविनो विनोदतः, क्षणेन मुक्त्यम्बुजलोचनायुजः ॥२९॥**

अन्वयः—*दयादरेण, मुहूर्तमात्रम्, भवनिन्दया, धिया, आर्हतम्, मतम्, संसाध्य, क्षणेन, मुक्त्यम्बुजलोचनायुजः, भविनः, विनोदतः, शुभम्, लभन्ते ॥२९॥*

**वृत्तिः**—**दयादरेण**—दयायां निरुपाधिपरदुःखापहरणेच्छायामादर आवेशो दयादरस्तेन तथा । **मुहूर्तमात्रम्**—घटिकाद्वयात्मककालमात्रम् । **भवनिन्दया**—भवस्य संसारस्य जन्मनो वा निन्दा भवनिन्दा, तया तथा । **धिया**—बुद्ध्या । **आर्हतम्**—अर्हतो जिनेश्वरस्येदम् आर्हतम्, जिनेश्वरप्ररूपितमित्यर्थः । **मतम्**—सिद्धान्तम् । **संसाध्य**—सम्यक् साधयित्वा । **क्षणेन**—पञ्चदशलेशात्मककालविशेषेण स्वल्पेनैव कालेनेति यावत् । **भविनः**—भव्यात्मानः । **मुक्त्यम्बुजलोचनायुजः**—अम्बुजे-कमले इव लोचने नयने यस्याः साऽम्बुजलोचना, मुक्तिर्निर्वृतिरम्बुजलोचनेवेति मुक्त्यम्बुजलोचना तया युञ्जन्ति संयुज्यन्ते इति तथा । **विनोदतः**—आनन्दतः । **शुभम्**—कल्याणम् । **लभन्ते**—प्राप्नुवन्ति ॥२९॥

**स्त्रियः श्रियो वा विरहासहा महा-सखाः सखायः स्रवदश्रवो मम ।**
**इति प्रियालीनमलीनमानसा, न सातभाजोऽत्र परत्र देहिनः ॥३०॥**

अन्वयः—*स्त्रियः, वा, श्रियः, विरहासहाः, महासखायः, मम, सखायः, स्रवदश्रवः, इति, प्रियालीनमलीनमानसाः, देहिनः, अत्र, परत्र, न, सातभाजः ॥३०॥*

**वृत्तिः**—**स्त्रियः**—स्त्रियाः, नार्य्या इत्यर्थः, नितम्बिन्या इति यावत् । **वा**—समुच्चये । **श्रियः**—लक्ष्म्याः । **विरहासहाः**—वियोगं सोढुमसमर्था इत्यर्थः । **महासखायः**—महान्तः सखायो मित्राणि येषान्ते तथा, सखिशब्दान्ततत्पुरुषादट्प्रत्ययः समासान्तः अपीति शेषः । **मम**—ममेति ममत्वमित्राणि, ममताभाज इति यावत् । जना इति शेषः । **स्रवदश्रवः**—स्रवन्ति निर्गलन्त्यश्रूणि नेत्रजलानि येषान्ते तथा । **इति**—अनेन प्रकारेण अस्माद्धेतोर्वा । **प्रियालीनमलीनमानसाः**—प्रियायां रमण्यां लीनमासक्तम् (अत एव) मलीनं-मलीमसं मानसमन्तःकरणं येषान्ते तथा । **देहिनः**—देहः शरीरमस्त्येषामिति देहिनः प्राणिनः, जीवा इत्यर्थः । **अत्र**—इह लोके । मर्त्यलोकेऽस्मिन्नित्यर्थः । **परत्र**—परलोके । अपीति शेषः । **न**—नहि । **सातभाजः**—सातं सौख्यं भजन्ते, सेवन्ते इति सातभाजः, सुखभागिन इति यावत् । भवन्तीति शेषः ॥३०॥

**कुशासनेनापि कुशासनेन ये, नयेऽनुरक्ता बहुविप्रयोगतः ।**
**निवृतिमेष्यन्ति परं दुरुत्तर-स्तरस्विभिर्मोहमहोदधिस्तु तैः ॥३१॥**

अन्वयः—*कुशासनेन, ये, कुशासनेन, अपि, नये, अनुरक्ताः, बहुविप्रयोगतः, निवृत्तिम्, एष्यन्ति, तु, परम्, मोहमहोदधिः, तरस्विभिः, तैः, दुरुत्तरः ॥३१॥*

वृत्तिः—**कुशासनेन**-कुशानां दर्भाणामासनं विष्टरः कुशासनम्, दर्भमयविष्टर इत्यर्थः, तेन तथा उपलक्षिता इति शेषः । कुशासनशालिन इति यावत् । **ये**-यादृशा जनाः । **कुशासनेन**-कुत्सितं शासनम् प्रवचनम् कुशासनम् तेन तथा । **अपि**-सम्भावनायामव्ययम् । **नये**-नयमार्गे । शास्त्रे, नीतौ वा । **अनुरक्ताः**-अनुरागिणः । कदाचित् इति शेषः । **बहुविप्रयोगतः**-अतिवियोगतः । बहूनां विप्राणां योगतो वा । **निवृत्तिम्**-वैराग्यम् । **ऐष्यन्ति**-लप्स्यन्ते । **तु**-किन्तु । **परम्**-केवलम् । **मोहमहोदधिः**-महान् विशालश्चासावुदधिः समुद्रः, महोदधिः, मोहोऽज्ञानं महोदधिरिवेति मोहमहोदधिः उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" ३।१।१०२। इत्यनेनोपमितसमासः । **तरस्विभिः**-वेगवद्भिः । **तैः**-तादृशैः जनैरिति शेषः । **दुरुत्तरः**-दुःखेनोत्तरितुं पारयितुं योग्यो दुरुत्तरः अस्तीति शेषः ॥३१॥

**जिनस्य वप्रत्रितयाग्रनिष्ठया, जनोऽत्र निर्वाणिकया हृतेऽशिवे ।**
**इति स्तुते स्मातिमुदैष शोषित--स्त्वयैव मातः सुतशोकसागरः ॥३२॥**

अन्वयः—*अत्र, जिनस्य, वप्रत्रितयाग्रनिष्ठया, निर्वाणिकया, अशिवे, हृते, एषः, जनः, (हे) मातः, त्वया, एव, सुतशोकसागरः, शोषितः, इति, मुदा, स्तुते, स्म ॥३२॥*

वृत्तिः—**अत्र**-अस्मिँल्लोके । **जिनस्य** प्रभोः श्रीशान्थिनाथस्य । **वप्रत्रितयाग्रनिष्ठया**-वप्राणां प्राकारपीठभुवाम्, त्रयम्, वप्रत्रयम् तस्य अग्रे निष्ठा स्थितिर्यस्याः सा वप्रत्रितयाग्रनिष्ठा तया तथा । 'वप्रोऽस्य पीठभूः' ४-४६ । इत्यभि० चि० । **निर्वाणिकया**-देव्या । तन्नाम्न्या श्रीशान्तिनाथशासनधिष्ठात्र्या । **अशिवे**-अमङ्गले । **हृते**-अपनीते, विनाशिते इति यावत् । **एषः**-समीपतरवर्त्तितया दृश्यमान इत्यर्थः । 'समीपतरवर्ति चैतदो रूपम्" इत्यभियुक्तोक्तेः । **जनः**-लोकः । **'हे' मातः!**-हे जननि ! **त्वया**-भवत्या । **एव**-अवधारणार्थकमव्ययम् । **सुतशोकसागरः**-शोकः खेदः, सागरः-समुद्र इवेति शोकसागरः, सुतस्य पुत्रस्य शोकसागरः सुतशोकसागरः ।

शोषितः—शोषणकर्मीकृतः । दूरीकृत इति यावत् । इति—एवं प्रकारेण । मुदा—हर्षेण । स्तुते स्म—अस्तुवीत ॥३२॥

मदर्थसन्देशमृणालमन्थरः, कदाऽभ्युपेता पथिकोऽथ बान्धवः ।
इतीह पृष्टो गरुडोऽपि यक्षराट्, तदाऽऽचचक्षेऽस्य हितंससाक्षिकः ॥३३॥

अन्वयः—अथ, मदर्थसन्देशमृणालमन्थरः, पथिकः, बान्धवः, कदा, अभ्युपेता, इति, इह, पृष्टः, यक्षराट्, गरुडः, अपि, तदा, ससाक्षिकः, (सन्), अस्य, हितम्, आचचक्षे ॥३३॥

वृत्तिः—अथ—अनन्तरम् । मदर्थसन्देशमृणालमन्थरः—अहम् अर्थः कारणं यस्यासौ मदर्थः, "त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्" २ । १ । ११ ॥ इत्यनेन मादेशः । स चासौ सन्देशो-वाचिको, मदर्थसन्देशस्तस्मात्, मृणा—हिंसाचाऽऽलमसत्यञ्च मृणाले मदर्थसन्देशमृणाले, तत्र मन्थरोऽलसस्तथा, हिंसातोऽसत्यतश्च निवृत्त इत्यर्थः । पथिकः—पान्थः, प्रवासीत्यर्थः । बान्धवः—स्वजनः । कदा—कस्मिन् समये । अभ्युपेता—अभ्युपेष्यति, अभ्यागमिष्यति इति यावत् । इति—एवंप्रकारेण । इह—अत्र । पृष्टः—अनुयुक्तः । यक्षराट्—यक्षाधिपः । गरुडः—तन्नामविश्रुतः श्रीशान्तिनाथशासनाधिष्ठायकः । अपि—सम्भावनायामव्ययम् । तदा—तस्मिन् समये । ससाक्षिकः—साक्षी-साक्षाद्द्रष्टा एव साक्षिकस्तेन सहितस्तथा । (सन्निति शेषः) । अस्य—प्रष्टुर्जनस्येत्यर्थः । हितम्—शुभम । आचचक्षे—कथयामास ॥३३॥

मयाऽनुपृष्टो भगवद्विवन्दिषुः, प्रियः कियद्दूर इति त्वयोदिते ।
विलम्बतेऽसाविति सा पराङ्मुखी, सखी सखीं तां निजगाद नाऽऽदरात् ॥३४॥

अन्वयः—भगवद्विवन्दिषुः, प्रियः, कियद्दूरे, इति, मया, अनुपृष्टः, त्वया, असौ, विलम्बते, इति, उदिते, पराङ्मुखी, सा, सखी, ताम्, सखीम्, नादरात्, निजगाद ॥३४॥

वृत्तिः—भगवद्विवन्दिषुः—अर्हन्तं श्रीशान्तिनाथं निनंसुः । प्रियः—वल्लभः । कियद्दूरे—कियद्विप्रकृष्टे । कियान् विलम्बः इति यावत् । इति—एवं प्रकारेण । मया—लक्ष्मीस्वरूपया कयाचिन्नायिकया । अनुपृष्टः—अनुयुक्तः । त्वया—अन्यया । त्वशब्दोऽन्यार्थकः । असौ—स तव वल्लभः । विलम्बते—विलम्बं करोति, कालमतिवाहयति इत्यर्थः । इति—अनेन प्रकारेण । उदिते—कथिते सतीति शेषः । पराङ्मुखी—विमुखी । सा—लक्ष्मीस्वरूपा । सखी—वयस्या । ताम्—पूर्वोक्ताम् । सखीम्—आलीम् । नादरात्—अनादरात् । निजगाद—आचचक्षे, कथितवतीति यावत् ॥३४॥

**क्वचित् प्रभातप्रभया भयादृते, प्रमाद्यतो नीलमणित्विषा निशि ।**
**विलोकयन्त्या रुदतोऽथ पक्षिणः, स्त्रियाः क्षणोऽभूद्धृतलक्षलक्षणः ॥३५॥**

अन्वयः—*अथ, क्वचित्, भयात्, ऋते, नीलमणित्विषा, प्रभातप्रभया, प्रमाद्यतः, निशि, रुदतः, पक्षिणः, विलोकयन्त्याः, स्त्रियाः, क्षणः, हृतलक्षलक्षणः, अभूत् ॥३५॥*

वृत्तिः—अथ—अनन्तरम् । क्वचित्—कुत्रापि । भयात्—भीतेः । ऋते—विना । नीलमणित्विषा—नीलवर्णो मणिः रत्नम्, नीलमणिः इन्द्रनीलस्तस्य त्विट् कान्तिरिव त्विट् कान्तिर्यस्याः सा नीलमणित्विट्, तया तया। "उष्ट्रमुखादित्वात्" बहुव्रीहिः समास उपमानसरूपस्य पूर्वपदस्य लोपश्च । प्रभातप्रभया—प्रातःकालकान्त्या । प्रमाद्यतः—अनवदधतः, अनवधानं कुर्वत इत्यर्थः । रात्रिविषयकभ्रमवतः । निशि—रात्रौ । रुदतः—कूजतः, क्रन्दनमादधत इति यावत् । पक्षिणः—विहगान् । चक्रवाकानित्यर्थः । विलोकयन्त्याः—अवलोकयन्त्याः । स्त्रियाः—नार्याः । क्षणः—समयः । हृतलक्षलक्षणः—हृतानि विनष्टानि, दूरीकृतानि वा लक्षं लक्षणानि यस्मिन् स तथा । अनेकावश्यकविधेयविधानासामञ्जस्यापादकत्वेनातीवाल्पीयान् इति यावत् । अभूत्—अभवत् ॥३५॥

**न यावता भागवती लसन्नया, श्रुतास्ति गौस्तावदभीष्टता परे ।**
**चलाशु तस्याः श्रवणे विचक्षणः, प्रिये स कीदृग् भविता तव क्षणः ॥३६॥**

अन्वयः—*हे प्रिये!, यावता, लसन्नया, भागवती, गौः, न श्रुता, अस्ति, तावत्, परे, अभीष्टता, आशु, चल, तस्याः, श्रवणे, विचक्षणः, सः, क्षणः, तव, कीदृक्, भविता ॥३६॥*

वृत्तिः—हे प्रिये !—अयि वल्लभे ! यावता—यावत्परिमितकालेन, यावत्कालपर्यन्तमित्यर्थः । लसन्नया—लसन् शोभमानो नयो नीतिः शास्त्रीयसदुपदेशात्मकविषयो यत्र सा तथा । नयरमणीयेति यावत् । भागवती—भगवत्सम्बन्धिनी । गौः—देशनात्मकवाणी । न—नहि । श्रुता—कर्णगोचरीकृता । अस्ति—वर्तते । तावत्—तदवधि । परे—परपदार्थे । अभीष्टता—रुचिः । चकास्तीति शेषः । आशु—शीघ्रम् । चल—एहि । तस्याः—भगवत्सम्बन्धि देशनात्मकभारत्याः । श्रवणे—आकर्णने । विचक्षणः—समीचीनः । सः—तादृशः, दर्शनसम्पादक इति यावत् । क्षणः—पूर्वप्रदर्शितकालः । कीदृक्—कीदृशः, किंविध इति यावत् । भविता—भविष्यति, अनिर्वचनीयस्तव समयस्तत्र भवितेति यावत् ॥३६॥

**कथं विधातर्मयि पाणिपङ्कजाद्, विधेर्जिनस्याशनपुण्यमुद्भवेत् ।**
**इतीव सौराष्ट्रिकभव्यचिन्तनैः, स्थितः प्रभुः श्रीविमलाचलोपरि ॥३७॥**

अन्वयः—*विधातः !, पाणिपङ्कजात्, विधेः, जिनस्य, अशनपुण्यम्, मयि, कथम्, उद्भवेत्, इति, सौराष्ट्रिकभव्यचिन्तनैः, इव, प्रभुः, श्रीविमलाचलोपरि, स्थितः ॥३७॥*

वृत्तिः— **विधातः**–परमेष्ठिन् ! **पाणिपङ्कजात्**–पाणिर्हस्तः, पङ्कजं–कमलमिवेति, पाणिपङ्कजम्, तस्मात्तथा । **विधेः**–विधानात् शुद्धक्रियात इति यावत् । **जिनस्य**–अर्हतः, तीर्थङ्करस्येति यावत् । **अशनपुण्यम्**–अशनं भोजनम्, तस्य पुण्यं सुकृतं शुद्धाहारवितरणजनितं शुभमिति यावत् । **मयि**–मल्लक्षणे जने इत्यर्थः । **कथम्**–केन प्रकारेण । **उद्भवेत्**–समुत्पद्येत । **इति**–इत्थम्भूतैः । **सौराष्ट्रिकभव्यचिन्तनैः**–सौराष्ट्रे तदाख्यदेशे भवाः सौराष्ट्रिकास्तेषां भव्यचिन्तनानि रमणीयभावनाः, मनोरमविचारा इति यावत्, सौराष्ट्रिकभव्यचिन्तनानि तैस्तथा । **इव**–उत्प्रेक्षायाम् । **प्रभुः**–स्वामी । भगवान् शान्तिनाथ इति यावत् । **श्रीविमलाचलोपरि**–विमलश्चासावचलः पर्वतो विमलाचलस्तस्य उपरि ऊर्ध्वभागे, तथा । श्रीसिद्धाचलोपरीति यावत् । **स्थितः**–अवस्थितः । न्यवसदिति यावत् ॥३७॥

**स्थितिक्रिया मासचतुष्टये प्रभो !, तव प्रिया शैत्यमृदुत्वशिल्पिनः ।**
**ऋतोर्जनस्यैव सुरैः समं भव–त्विति प्रचक्रे सफलामसौ गिरम् ॥३८॥**

अन्वयः—*प्रभो !, शैत्यमृदुत्वशिल्पिनः, तव, ऋतोः, इव, मासचतुष्टये, सुरैः, समम्, प्रिया, स्थितिक्रिया, भवतु, इति, जनस्य, गिरम्, असौ, सफलाम्, प्रचक्रे ॥३८॥*

वृत्तिः—**प्रभो !**–स्वामिन् ! **शैत्यमृदुत्वशिल्पिनः**–शैत्यं–शीतलता च मृदुत्वं कोमलता च शैत्यमृदुत्वे तयोः शिल्पी सम्पादकः शैत्यमृदुत्वशिल्पी तस्य तथा अर्हतः कामक्रोधोपशामकत्वाच्छैत्यसम्पादकत्वं मानोपशामकत्वाच्च मृदुत्वसम्पादकत्वमवसेयम् । **तव**–श्रीमतो, भवतो भगवतः शान्तिनाथस्य । **ऋतोः**–वर्षाकालस्य । **इव**–यथा । **मासचतुष्टये**–चत्वारोऽवयवा अस्येति चतुष्टयम्, मासानां चतुष्टयम् मासचतुष्टयम् तस्मिँस्तथा । **सुरैः**–देवैः । **समम्**–साधम् । **प्रिया**–अभीष्टा । **स्थितिक्रिया**–स्थितेरवस्थानस्य क्रिया–व्यापारः, स्थितिक्रिया अवस्थितिरिति यावत् । **भवतु**–जायताम् । **इति**–उक्तप्रकाराम् । **जनस्य**–लोकस्य, प्रजाया इति यावत् । **गिरम्**–वाणीम् । **असौ**–जिनः । **सफलाम्**–सार्थिकाम्, फलितामिति यावत् । **प्रचक्रे**–विदधे ॥३८॥

**तवाश्रयादेव च शान्तिरप्यभूद्, भियां प्रदेशे जिन ! तत्तवालिके ।**
**वियोक्ष्यसेऽवल्लभयेति निर्गता-ऽक्षरालिरीत्याऽत्र कदाप्यटाट्यते ॥३९॥**

अन्वयः—*जिन !, तव, आश्रयात्, एव, च, प्रदेशे, भियाम्, अपि, शान्तिः, अभूत्, तत्, अत्र, तव, अलिके, अवल्लभया, ईत्या, वियोक्ष्यसे, इति, निर्गताक्षरालिः, कदापि, अटाट्यते ?* ॥३९॥

वृत्तिः—जिन !—अर्हन् परमेश्वर ! तव—भवतः । आश्रयात्—आश्रयणात् स्थितेरिति यावत् । एव—अवधारणार्थकमव्ययम् । भवदाश्रयेणैवेत्यर्थः । च—पुनः । प्रदेशे—भवदाश्रितप्रान्तभागे । सपादशतयोजनमितभूभाग इति यावत् । भियाम्—आतङ्कानाम् । भयानामिति यावत् । अपि—खलु । शान्तिः—शमनम्, व्यपगम इति यावत् । अभूत्—अभवत् । तत्—तस्माद्धेतोः । अत्र—अस्मिन् । तव—भवतः । अलिके—भाले, ललाटे इति यावत् । अवल्लभया—अप्रियया । ईत्या—अतिवृष्ट्याद्युपद्रवैः । वियोक्ष्यसे—वियुक्तो भविष्यसि । इति—उक्तप्रकारा । निर्गताक्षरालिः—दुर्गताक्षरपंक्तिः । कदापि—कस्मिंश्चिदपि काले इत्यर्थः । अटाट्यते !—पुनःपुनरतिशयेन वाऽटति ! नैवेति भावः । यत्प्रभावात् क्षितौ भीतीनामपि क्षितिर्भवति तद्भाले ईत्यात्वं वियोक्ष्यसे इत्यक्षरपंक्तिरपार्थिकैवेति भावः ॥३९॥

**गुरुत्वभावात् शुचिशास्त्रसम्भवात्, सुरार्चितत्वादतिपुण्यभूभवात् ।**
**अदीदिपत् तीर्थकृदित्यसौ विभो-र्लिपिर्ललाटन्तपनिष्ठुराक्षरा ॥४०॥**

अन्वयः—*गुरुत्वभावाद्, शुचिशास्त्रसम्भवात्, सुरार्चितत्वात्, अतिपुण्यभूभवात्, असौ, तीर्थकृत्, इति, विभोः, ललाटन्तपनिष्ठुराक्षरा, लिपिः, अदीदिपत्* ॥४०॥

वृत्तिः—गुरुत्वभावात्—गुरोर्महतो भावो गुरुत्वम् गरिमेति यावत्, स एव भावो गुरुत्वभावस्तस्मात्तथा । शुचिशास्त्रसम्भवात्—शुचि पवित्रं शास्त्रमागमादि तस्य सम्भव उत्पत्तिः शुचिशास्त्रसम्भवस्तस्मात्तथा । सुरार्चित्वात्—सुरैर्देवैरर्चितः पूजितः सुरार्चितस्तस्य भावः सुरार्चित्वम् तस्मात्तथा । अतिपुण्यभूभवात्—अतिपुण्या—अत्यन्तपवित्रा चासौ भूः पृथिवी स्थानं वा अतिपुण्यभूस्तत्र भवो जन्माऽतिपुण्यभूभवस्तस्मात्तथा । असौ—अयम् । तीर्थकृत्—तीर्थङ्करः । इति—इतिहेतोः । विभोः—प्रभोः सकाशात् । ललाटन्तपनिष्ठुराक्षरा ललाटं—भालं तापयति सन्तापयतीति ललाटन्तपा (अतएव) निष्ठुराक्षरा कठिनवर्णा श्रवणावच्छेदेन दुःखोत्पादजनिकेति यावत्, ललाटन्तपनिष्ठुराक्षरा, कर्मधारयसमासः । पुंवद्भावश्च । लिपिः—वर्णसन्निवेशः । अदीदिपत्—चकास्ति स्म । जिनस्थितौ

समेषां जनानां सुखभागित्वाल्ललाटन्तपनिष्ठुराक्षरापि लिपिर्व्यर्थीभूय शोभना सती दिदीप इति भावः ॥ ४० ॥

**अयि स्वयूथ्यैरशनिक्षतोपमं, समं विषेहेऽप्युपसर्गकारणम्।**
**सुरैर्नरैर्वा पशुभिः सहासुरैः, कृतं त्वमीषां विकृतं न मानसम् ॥४१॥**

अन्वयः—*अयि !, स्वयूथ्यैः, समम्, असुरैः, सह, सुरैः, नरैः, पशुभिः, वा, कृतम्, अशनिक्षतोपमम्, अपि, उपसर्गकारणम्, विषेहे, तु, अमीषाम्, मानसम्, न, विकृतम् ॥४१॥*

वृत्तिः—अयि !–कोमलामन्त्रणे ! स्वयूथ्यैः–यूथभवैः। समम्–साकम्। असुरैः–भवनपत्यादिनिर्जरैः। सह–सार्धम्। सुरैः–वैमानिकदेवैः। नरैः–मनुजैः। पशुभिः–तिर्यग्भिः। वा–समुच्चये। कृतम्–जनितम्। अशनिक्षतोपमम्–वज्राघाततुल्यम्। अपि–खलु। उपसर्गकारणम्–उपद्रवहेतुम्। उपसर्गानिति यावत्। विषेहे–असहत। तु–किन्तु। अमीषाम्–भगवताम् श्रीशान्तिनाथजिनेश्वराणाम्। 'गुरावेकश्च' २-२-१२४। इति गौरवातिशयमभिव्यञ्जयितुं बहुत्वम्। मानसम्–अन्तःकरणम्। हृदयमिति यावत्। न–नैव। विकृतम्–विकारसंवलितम्। चलितमिति यावत् ॥ ४१ ॥

**भुवं पुनानस्य तवेति निर्गल–न्ममाद्य वृत्तान्तमिमं बतोदिता।**
**तनोति संसद् दिवि गायनैः प्रभो !, पुरन्दरस्यापि पुरो महोदयम् ॥४२॥**

अन्वयः—*निर्गलन्मम !, प्रभो !, भुवम्, पुनानस्य, तव, इति, इमम्, वृत्तान्तम्, दिवि, पुरन्दरस्य, पुरः, गायनैः उदिता, संसत्, अद्य, अपि, महोदयम्, तनोति, बत, ॥४२॥*

वृत्तिः—निर्गलन्मम !–निर्गलत्-दूरं व्यपगच्छत् मम-ममत्वं यस्मात्तदामन्त्रणे तथा। प्रभो–स्वामिन् !, भगवच्छान्तिनाथेति यावत्। भुवम्–पृथिवीम्, भूलोकमिति यावत्। पुनानस्य–पवित्रयतः, पवित्रीकुर्वत इति यावत्। तव–भवतः, शान्तिनाथस्य। इति–पूर्वोदीरितिप्रकारेण। इमम्–एतम्। वृत्तान्तम्–वार्ताम्। दिवि–स्वर्गे। पुरन्दरस्य–इन्द्रस्य। पुरः–पुरतः। गायनैः–गायकैः, हाहा-हूहूप्रमुखैर्गन्धर्वैरिति यावत्। उदिता–निवेदिता गीतेति यावत्। संसत्–सभा। अद्य अपि–अद्यावधि। महोदयम्–महानतिशयितश्चासावुदयोऽभ्युदयो महोदयस्तन्तथा। तनोति–विस्तारयति। बत–हर्षे ॥४२॥

**प्रभोर्विहारे मगधेऽपि मागधैः, प्रवर्ण्यमाने विविधैर्महोत्सवैः ।**
**मुखानि लोलाक्षि ! दिशामसंशयं, प्रियोऽवदत् पश्य विभूषणैरितः ॥४३॥**

अन्वयः—*लोलाक्षि !, मगधे, अपि, विविधैः, महोत्सवैः, मागधैः, प्रवर्ण्यमाने, प्रभोः, विहारे, दिशाम्, विभूषणैः, ( उपलक्षितानि ) मुखानि, इतः, पश्य, ( इति ) प्रियः, असंशयम्, अवदत् ॥४३॥*

वृत्तिः—**लोलाक्षि !**—लोले-चञ्चले अक्षिणी नयने यस्याः सा लोलाक्षी, चपलनयना तदामन्त्रणे तथा । **मगधे**—गङ्गादक्षिणवर्तितदाख्यदेशे । **अपि**—सम्भावनायाम् । **विविधैः**—अनेकैः, बहुभिरिति यावत् । **महोत्सवैः**—महान्तोऽतिशयिताश्च ते उत्सवा उद्धर्षा महोत्सवाः, "सन्महत्परमोत्तमोत्कृष्टं पूजायाम्" २ । १ । १०७ ॥ इत्यनेन कर्मधारयः पूर्वनिपातनियमार्थः समासः, तैस्तथा । **मागधैः**-बन्दिभिः । **प्रवर्ण्यमाने**—प्रकर्षेण स्तूयमाने । **प्रभोः**—भगवतः शान्तिनाथस्य । **विहारे**—ग्रामाद्ग्रामान्तरमुपदेशार्थं विचरणे । **दिशाम्**—आशानाम् । **विभूषणैः**—अलङ्कारैः उपलक्षितानीतिशेषः । **मुखानि**—वदनानि तदग्रभागाँश्च । **इतः**—अत्र । **पश्य**—अवलोकय । वाक्यार्थः कर्म । ( **इति**—अनेन प्रकारेण ) **प्रियः**—वल्लभः । तस्याः स्वामीति यावत् । **असंशयम्**—निश्चितम् यथास्यात्तथा । **अवदत्**—अकथयत् ॥४३॥

**खसिन्धुचापप्रमयोन्नतामित-स्तनुं प्रिये ! पश्य महोज्ज्वलां दिशाम् ।**
**मुखान्यमुष्याः किरणैश्च तामसाद्,दशापि शून्यानि विलोकयिष्यसि ॥४४॥**

अन्वयः—*प्रिये !, इतः, खसिन्धुचापप्रमया, उन्नताम्, महोज्ज्वलाम्, तनूम्, पश्य, च, अमुष्याः, किरणैः, तामसात्, शून्यानि, दिशाम्, दश, अपि, मुखानि, विलोकयिष्यसि ॥४४॥*

वृत्तिः—**प्रिये !**—दयिते ! **इतः**—अस्मात् स्थानात् । **खसिन्धुचापप्रमया**—अङ्कानां वामतो गतिः, इत्यभियुक्तोक्त्या-खसिन्धुपदेन चत्वारिंशतो ग्रहणम् । खसिन्धुसंख्याकाश्चापा धनूंषि खसिन्धुचापास्तेषां प्रमा मानम् खसिन्धुचापप्रमा, तया तथा । **उन्नताम्**—प्राप्ताभ्युदयाम् । उच्चामिति यावत् । **महोज्ज्वलाम्**—महती विशाला चासावुज्ज्वला विकाशिनी महोज्ज्वला, तान्तथा । विशेषणयोरपि यथा कथञ्चिद् गुणप्रधानभावमनुसन्धाय "शीतोष्णं जलम्" इति वत् समासः, प्रभाभासुरामिति यावत् । **तनूम्**—शरीरम् । **पश्य**—अवलोकय । **च**—पुनः । **अमुष्याः**—विप्रकृष्टतया-

दृश्यमानायास्तन्वाः। किरणैः–अंशुभिः । कृत्वेति विशेषः। तामसात्–तमोऽन्धकारमेव तामसम्, वायसराक्षसादिवत्, तस्मात्तथा। शून्यानि–विरहितानि । दिशाम्–ककुभाम् । दश–दशत्वसङ्ख्याविशिष्टानि। अपि–नूनम्। मुखानि–वदनानि। विलोकयिष्यसि–द्रक्ष्यसि ॥४४॥

**ममैव शोकेन विदीर्णवक्षसा, मनः किमाकस्मिकमद्य नोद्यतम्।**
**निवेदितुं सर्वविदे तदास्पदे, विडौजसाऽगामि भुवस्तलेऽञ्जसा ॥४५॥**

*अन्वयः—अद्य, विदीर्णवक्षसा, शोकेन, एव, मम, मनः, किम्, न, उद्यतम्, (इति) आकस्मिकम्, सर्वविदे, निवेदितुम्, विडौजसा, अञ्जसा, भुवस्तले, तदास्पदे, अगामि ॥४५॥*

वृत्तिः—अद्य–अस्मिन्नहनि, साम्प्रतिमिति भावः । विदीर्णवक्षसा–विदीर्णं–स्फुटितं, वक्षः उरः–हृदयमिति यावत्, येन स विदीर्णवक्षस्तेन तथा। शोकेन–खेदेन। एव–अप्यर्थकमव्ययमत्र। तादृशशोकेनापीत्यर्थः। मम–मल्लक्षणस्य। मनः–अन्तःकरणम्। किम्–कथम्। न–नहि। उद्यतम्–सोद्यमं जातम्। विदीर्णवक्षः शोकेनापि मम मनः कथन्न तत्प्रतिकाराय समुद्यतमिति भावः (इति)। आकस्मिकम्–अकस्माज्जातं विषयमित्यर्थः। सर्वविदे–सर्वमखिलं वेत्ति जानाति इति सर्ववित् तस्मै तथा। सर्वज्ञाय भवपारगामिने भगवते शान्तिनाथायेति यावत्। निवेदितुम्–विज्ञापयितुम्। अत्रान्तर्भावितणिगर्थताऽवसेया । विडौजसा–देवेन्द्रेण । अञ्जसा–झटिति । भुवस्तले–भूमण्डले, मर्त्यलोके इति यावत्। तदास्पदे–तस्य–तीर्थकृत आस्पदं स्थानं तदास्पदम्, तस्मिँस्तथा। अगामि–अव्राजि, गतमिति यावत् ॥४५॥

**मयाऽद्य मुक्तिः प्रतिपत्स्यते श्रिया, त्वया विचित्राङ्गि ! विपत्स्यते यदि।**
**निषेवणाद् मे न कदापि मामतः, समेतशैलं चलितुं तु मा भज ॥४६॥**

*अन्वयः—विचित्राङ्गि !, यदि, मया, अद्य, मुक्तिः, प्रतिपत्स्यते, मे, निषेवणात्, त्वया, श्रिया, न, कदापि, विपत्स्यते, अतः, समेतशैलम्, चलितुम्, ( उद्यतम् ) ( चलितम् ) माम्, तु, मा, भज ॥४६॥*

वृत्तिः—विचित्राङ्गि !–विचित्रं विलक्षणमङ्गं स्वरूपं यस्यास्तदामन्त्रणे तथा। यदि–चेत्। मया–मल्लक्षणेन। अद्य–अधुना। मुक्तिः–निर्वृतिः। प्रतिपत्स्यते–प्राप्स्यते। तदेति स्वतो

लभ्यते यदीत्यस्योत्तरवाक्यगतत्वात् । **मे**–मम । **निषेवणात्**–शुश्रूषणात्, समाराधनादिति यावत् । **त्वया**–भवत्या । **श्रिया**–शोभया । 'शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव कथ्यते' इति यादवः । यद्वा–त्वया अन्यया । त्वशब्दस्यान्यार्थकत्वादिति भावः । श्रियेत्यन्वेयम् । **न**–नहि । **कदापि**–कस्मिँश्चित् कालेऽपि । **विपत्स्यते**–वियोक्ष्यते । **अतः**–अस्माद्धेतोः । **समेतशैलम्**–समेतशिखराख्यतीर्थविशेषम् । **चलितुम्**–गन्तुम् । तम्प्रति गन्तुमिति यावत् । अथवा **चलितुम्**–इत्येव पाठः स्वीकरणीयः । तथा च "समेतशैलं प्रति चलितम्" इत्येवमन्वेयम् । पूर्वपक्षे "उद्यतम्" इत्यध्याहार्यम् । **माम्**–मल्लक्षणं तीर्थकृतम् । **तु**–पुनः । **मा**–नहि । **भज**–सेवस्व । मयि समेतशिखरं गतेऽपि मदीयसेवामाहात्म्यान्न त्वया कदापि शोभया वियोक्ष्यत इति भावः ॥४६॥

**विहाय सर्वामथ तीर्थकृच्छ्रियं, विभुर्ययौ तद्गिरिशृङ्गमुन्नतम् ।**
**तदाऽस्मि दैवेन हतोऽपि हा हतः, सुरेशितेति प्रलपन्नुपागमत् ॥४७॥**

अन्वयः—*अथ, तीर्थकृत्, विभुः, सर्वाम्, श्रियम्, विहाय, उन्नतम्, तद्गिरिशृङ्गम्, ययौ, तदा, सुरेशिता, हा, दैवेन, हतः, अपि, हतः, अस्मि, इति, प्रलपन्, उपागमत् ॥४७॥*

वृत्तिः—**अथ**–अनन्तरम् । **तीर्थकृत्**–जिनेश्वरः । **विभुः**–प्रभुः श्रीशान्तिनाथ इति यावत् । **सर्वाम्**–निखिलाम् । **श्रियम्**–लक्ष्मीम् । **विहाय**–सन्त्यज्य । **उन्नतम्**–अत्यन्तमूर्ध्वम् । **तद्गिरिशृङ्गम्**–स प्रसिद्धश्चासौ गिरिः पर्वतः समेतशैल इत्यर्थस्तद्गिरिः, तस्य शृङ्गं शिखरम्, तद्गिरिशृङ्गम् तत्तथा । **ययौ**–गतवान् । **तदा**–तस्मिन् काले । **सुरेशिता**–सुराणां देवानामीशिता प्रभुः सुरेशिता, देवेन्द्रः । **हा**–खेदार्थकमव्ययम् । **दैवेन**–विधिना । **हतः**–मारितः । **अपि**–समुच्चये । **हतः**–मारितः । **अस्मि**–भवामि । **इति**–अनेन प्रकारेण । **प्रलपन्**–प्रलापं कुर्वन् । **उपागमत्**–समीपमागच्छत् ॥ ४७ ॥

**त्रयोदशाहे किल शुक्रजेऽसिते, जिनः प्रपन्नानशनः शिवं ययौ ।**
**अगुर्विनेया नवशत्यनुप्रभु, स्फुटं यतस्तेऽशिशवः परासवः ॥४८॥**

अन्वयः—*जिनः, शुक्रजे, असिते, त्रयोदशाहे, प्रपन्नानशनः, ( सन् ) शिवम्, ययौ, नवशती, विनेयाः, अनुप्रभु, अगुः, यतः, ते, स्फुटम्, अशिशवः, परासवः ॥४८॥*

वृत्तिः—**जिनः**–जिनेश्वरो, भगवाञ्छान्तिनाथः । **शुक्रजे**–शुक्रे ज्येष्ठे मासे जातः शुक्रज–

स्तस्मिँस्तथा । असिते–न सितः शुक्लोऽसितः कृष्णपक्षस्तस्मिँस्तथा । त्रयोदशाहे–त्रयोदशश्च तदह्नो दिनम्, त्रयोदशाहस्तस्मिँस्तथा । अह्नन्शब्दान्तद्वन्द्वतत्पुरुषयोः पुँल्लिङ्गत्वविधानात् ज्येष्ठकृष्णत्रयोदश्यामिति यावत् । प्रपन्नानशनः–प्रपन्नं प्राप्तमनशनमभक्षणं येन स तथा । सन्निति शेषः । शिवम्–मोक्षम् । ययौ–प्राप्तवान् । ( तदनन्तरम् ) नवशती–नवानां शतानां समाहारो नवशती । विनेयाः–शिष्याः । अनुप्रभु–प्रभोर्भगवतः शान्तिनाथस्य अनु पश्चात्, अनुप्रभु, "विभक्ति" ३ । १ । ३९ ॥ इत्यनेनाऽव्ययीभावसमासः । अगुः–गतवन्तः । मोक्षमितिशेषः । यतः–यस्माद्धेतोः । ते–विनेयाः । स्फुटम्–प्रकटं यथास्यात्तथा । अशिशवः–न शिशवो बाला अशिशवस्तरुणा वृद्धा वा, अत एव । परासवः–परे सिद्धा ज्ञानरूपा वा असवः प्राणा येषान्ते तथा केवलिन इति आसन्निति शेषः ॥४८॥

तवापि हा हा विरहात् क्षुधाकुलाः, कुलाश्रया अन्यतपस्विनोऽधुना ।
त्वयीश ! भुक्ते त्वनु भुञ्जतामिति,गणीन्द्रमाशास्त हरिः प्रशस्तधीः ॥४९॥

*अन्वयः—हा हा, तव, कुलाश्रयाः, अन्यतपस्विनः, अपि, अधुना, विरहात्, क्षुधाकुलाः, ईश ! तु, त्वयि, भुक्ते, अनु, भुञ्जताम्, इति, प्रशस्तधीः, हरिः, गणीन्द्रम्, आशास्त ॥ ४९ ॥*

वृत्तिः—हा हा–इति खेदातिशयसूचकमव्ययद्वयम् । तव–भवतः गणीन्द्रस्येति यावत् । कुलाश्रयाः–कुलं सजातीयगण आश्रयोऽवलम्बो येषान्ते तथा । अन्यतपस्विनः–प्रशस्तं तपस्तपस्याऽस्त्येषामिति तपस्विनः, अन्ये भवदितरे च ते तपस्विनोऽन्यतपस्विनः । अपि–सम्भावनायाम् । अधुना–साम्प्रतम् । विरहात्–जिनवरवियोगतः । क्षुधाकुलाः–बुभुक्षाक्षामकुक्षयः । सन्तीति शेषः । ईश !–गणाधीश ! तु–पुनः । त्वयि–भवति । भुक्ते–कृतभोजने, सतीति शेषः । अनु भुञ्जताम्–पश्चाद् भक्षयन्तु । इति–एवम् । प्रशस्तधीः–प्रशस्ता-प्रशंसनीया धीर्बुद्धिर्यस्य स तथा । विलक्षणबुद्धिशालीत्यर्थः । हरिः–इन्द्रः । गणीन्द्रम्–गणाधीशम्, श्रमणसमुदायाध्यक्षमिति यावत् । आशास्त–समाश्वासयत् ॥४९॥

विधाय कल्याणककर्म सोत्सवं, कुलायकूलेषु विलुठ्य तेषु ते ।
खगा इव स्तूपतटेषु च क्रमाद्, दिवं ययुस्त्यक्तशुचः सुरेश्वराः ॥५०॥

*अन्वय—ते, सुरेश्वराः, सोत्सवम्, कल्याणककर्म, विधाय, कुलायकूलेषु, खगा, इव, तेषु,*

स्तूपतटेषु, विलुठ्य, क्रमात्, च, त्यक्तशुचः, दिवम्, ययुः ॥५०॥

वृत्तिः—ते–प्रसिद्धाः । सुरेश्वराः–चतुःषष्टिरिन्द्राः । सोत्सवम्–उत्सवेन सहितं तथा । समहमिति यावत् । कल्याणककर्म–निर्वाणकल्याणकक्रियाकलापम् । विधाय–कृत्वा । कुलायकूलेषु–नीडतटेषु । 'कुलायो नीडे' ४-३८५ । इत्यभि० चि० । खगाः–पक्षिणः । इव–यथा । तेषु–भगवदादिदेहाग्निसंस्कारभूभागविहितेषु । स्तूपतटेषु–स्तूपप्रान्तभागेषु । विलुठ्य–लुठित्वा । क्रमात्–क्रमशः । च–समुच्चये । त्यक्तशुचः–त्यक्ता शुक्-शोचनं खेद इति यावद् यैस्ते तथा । सन्त इति शेषः । दिवम्–स्वर्गम् । ययुः–जग्मुः । अगच्छन्निति यावत् ॥५०॥

**ततो विजहुर्गणिनः ससंयता, उपासकैर्भूपतिभिः कृतार्चनाः ।**
**चिरेण लब्धा बहुभिर्मनोरथै–रुपादिशन्तः प्रभुशान्तिशासनम् ॥५१॥**

अन्वयः—*ततः, बहुभिः, मनोरथैः, चिरेण, लब्धाः, उपासकैः, भूपतिभिः, कृतार्चनाः, ससंयताः, गणिनः, प्रभुशान्तिशासनम्, उपादिशन्तः, (सन्तः) विजहुः ॥५१॥*

वृत्तिः—ततः–तदनन्तरम् । बहुभिः–अतिशयितैः । मनोरथैः–अभिलाषैः । चिरेण–बहुकालेन । लब्धाः–प्राप्ताः । उपासकैः–श्रमणोपासकैः, श्रावकैरिति यावत् । भूपतिभिः–राजभिः । कृतार्चनाः–कृतं विहितमर्चनं पूजनम् येषान्ते तथा । ससंयताः–ससाधवः । मुनिवरपरिवारैः परिव्रता इति यावत् । गणिनः–गणाधीशाः । प्रभुशान्तिशासनम्–प्रभुः स्वामी चासौ शान्तिः शान्तिनाथः प्रभुशान्तिस्तदीयं शासनम् प्रभुशान्तिशासनम्, तत्तथा । उपादिशन्तः–उपदेशयन्तः । सन्त इति शेषः । विजहुः–विहृतवन्तः ॥५१॥

**प्रभोर्विमुक्तेः पदमाश्रिताः सुरा, अपूपुरन्नीप्सितमंह्रिसेविनाम् ।**
**कदापि साक्षाद् भवनात् कदाचन, गताः क्षणेनाऽस्फुटितेक्षणा ममम्॥५२॥**

अन्वयः—*प्रभोः, विमुक्तेः, पदम्, आश्रिताः, सुराः, कदापि, साक्षाद्भवनात्, कदाचन, क्षणेन, अस्फुटितेक्षणाः, ममम्, गताः, (सन्तः) अंह्रिसेविनाम्, ईप्सितम्, अपूपुरन् ॥५२॥*

वृत्तिः—प्रभोः–भगवतः शान्तिनाथस्य । विमुक्तेः–विमोक्षस्य, कैवल्यस्येति यावत् । पदम्–स्थानम् । यत्स्थानावच्छेदेन भगवता मुक्तिरधिगता तत्स्थानमित्यर्थः । आश्रिताः–अवलम्बिताः ।

तत्स्थानरक्षका इति यावत् । सुराः–देवाः । कदापि–कस्मिँश्चित्काले । साक्षात्भवनात्–साक्षात् कारेण । कदाचन–कस्मिँश्चित् काले च । क्षणेन–उत्सवेन । अस्फुटितेक्षणाः–अस्फुटितमप्रकटमीक्षणं दर्शनं येषान्ते तथा । अप्रत्यक्षा इति यावत् । ममम्–ममत्वम् । गताः–प्राप्ताः । सन्तः इति शेषः । अंह्रिसेविनाम्–चरणोपासकानाम् भगवद्भक्तानामिति यावत् । ईप्सितम्–अभिलषितम् । अपूपुरन्–पर्यपूरयन्, परिपूरितवन्त इति यावत् ॥५२॥

**सुताः कमाहूय चिराय चुङ्कृते–रिवाण्डजाः पक्षबलं तथागमम् ।**
**इहाश्रयन्तामितिशिक्षया क्रमाद् ययुर्विनेया गणिनां गणेशताम् ॥५३॥**

अन्वयः—*सुताः, चिराय, चुङ्कृतैः, अण्डजाः, इव, कम्, आहूय, इह, पक्षबलम्, तथा, आगमम्, आश्रयन्ताम्, इति, शिक्षया, क्रमात्, गणिनाम्, विनेया, गणेशताम्, ययुः ॥ ५३ ॥*

वृत्तिः—सुताः !–भोः शिष्याः ! चिराय–बहुकालम् । चुङ्कृतैः–शिशुपक्षिसूक्ष्मशब्दविशेषैः । अण्डजाः–पक्षिणः । इव–यथा । कम्–आत्मानाम् ब्रह्मेति यावत् पक्षिपक्षे सुखम् । 'को ब्रह्मण्यात्मनि' कं शीर्षेऽम्बु सुखे'इत्यनेकार्थः । आहूय–आकार्य, प्रसाद्य । इह–अत्र लोके । पक्षबलम्–स्ववर्गबलम्, पक्षे पतत्त्रबलम् । तथा–समुच्चयेऽव्ययम् । आगमम्–अङ्गाद्यागमम्, पक्षेऽगमम् वृक्षमिति । आश्रयन्ताम्–अवलम्बन्ताम् । इति–एवं प्रकारेण । शिक्षया–उपदेशेन । क्रमात्–क्रमशः । गणिनाम्–गणधराणाम् । विनेयाः–शिष्याः 'शिष्यो विनेयोऽन्तेवासी' १–७९ । इत्यभि० चि० । गणेशताम्–गणाध्यक्षताम् । ययुः–अगमन्, प्राप्तवन्त इति यावत् ॥५३॥

**विधौ विधेया मतयो विधेयका, विधाय कम्प्राणि मुखानि कं प्रति ।**
**वृथा निरीक्षध्वमितस्ततः किमु, ऋते न बोधात् सविधेः शिवाश्रयः ॥५४॥**

अन्वयः—*विधौ, विधेयकाः, मतयः, विधेयाः, कम्, प्रति, कम्प्राणि, मुखानि, विधाय, निरीक्षध्वम्, इतस्ततः, वृथा, किमु, सविधेः, बोधात्, ऋते, शिवाश्रयः, न ॥५४॥*

वृत्तिः—विधौ–परमेष्ठिनि 'विधिर्ना नियतौ काले,विधाने परमेष्ठिनि'इति मेदिनी । विधेयकाः–विधेया अनुष्ठेयाः,करणीया इति यावदेव विधेयकाः स्वार्थे कः प्रत्ययः । मतयः–बुद्धय । विधेयाः–करणीयाः ।

कम्–आत्मानम्, जीवमात्रमिति यावत्। प्रति–लक्ष्यीकृत्य। कम्प्राणि–सकम्पानि दयावन्ति। मुखानि–वदनानि। विधाय–कृत्वा। निरीक्षध्वम्–पश्यत। इतस्ततः–यत्र तत्र। वृथा–निरर्थकम्। किमु–किम्। व्यर्थं यत्तत्करणेनालमिति भावः। सविधेः–विधिर्विधानमनुष्ठानमिति यावत्, तेन सहितः सविधिस्तस्मात्तथा। बोधात्–ज्ञानात्। ऋते–विना। शिवाश्रयः–आश्रयणमाश्रयः प्राप्तिरित्यर्थः। न–नैव। भवेदिति शेषः। ज्ञानक्रियाभ्यां मोक्ष इति वचनादिति ॥५४॥

**गुरोर्निषेवाः श्रुतदानपूजना, जनाः! कुरुध्वं स्वगुरूदिताध्वना।**
**कथासु शिष्यध्वमिति प्रमील्य स-त्परम्परामार्गमचालयद् गणी ॥५५॥**

अन्वयः—*जनाः!, स्वगुरुदिताध्वना, गुरोः, निषेवाः, श्रुतदानपूजनाः, कुरुध्वम्, कथासु, शिष्यध्वम्, इति, प्रमील्य, गणी, सत्परम्परामार्गम्, अचालयत् ॥५५॥*

वृत्तिः—जनाः!–लोकाः! भो भो भव्या इति यावत्। स्वगुरुदिताध्वना–निजधर्माचार्योपदिष्टमार्गेण। गुरोः–आचार्य्यस्य, स्वधर्मोपदेशकस्येति यावत्। निषेवाः–सेवाः शुश्रूषा इति यावत्। श्रुतदानपूजनाः–श्रुतं-श्रुतज्ञानम्, दानं सत्पात्रवितरणम्, पूजना-पूजा च श्रुतदानपूजनाः, तास्तथा। कुरुध्वम्–सम्पादयत। एवञ्च–कथासु–धर्मवार्तासु। शिष्यध्वम्–विशिष्यध्वम्, कर्मकर्तरिप्रयोगः। इति–इत्येवंप्रकारेण। प्रमील्य–उपसर्गवशतः प्रबोध्येत्यर्थः। गणी–गणाध्यक्षः। सत्परम्परामार्गम्–समीचीनसम्प्रदायस्थितिम्। अचालयत्–प्रावर्तयत् ॥५५॥

**फलेग्रहिः शान्तिजिनोदितागमः, क्रमेण शाखाबहुलः स्फुरत्पदः।**
**प्रमोदजन्यात् श्रवणेन विश्रुतः, सुतस्य सेकाद् बुबुधे नृपाश्रुणः ॥५६॥**

अन्वयः—*श्रवणेन, विश्रुतः, क्रमेण, शाखाबहुलः, स्फुरत्पदः, फलेग्रहिः, शान्तिजिनोदितागमः, प्रमोदजन्यात्, सुतस्य, नृपाश्रुणः, सेकात्, बुबुधे ॥५६॥*

वृत्तिः—श्रवणेन–श्रुत्या, मुनिना कृत्वेति वा। 'श्रवणोऽपि नन्द्यादित्वादनः' इत्यभिधानस्वोपज्ञटीकायां श्रमणपर्यायतया श्रवणशब्दस्यापि दर्शनात्। विश्रुतः–विशेषेण श्रुत आकर्णितः। प्रख्यातो वा। क्रमेण–क्रमशः। शाखाबहुलः–शाखाभिः कल्पोपकल्पात्मकप्रभेदैर्बहुलो विशालः शाखाबहुलः विटपबहुलो वा। स्फुरत्पदः–स्फुरत्-विलसत् पदं शब्दो वाक्यं वा यस्मिन् स तथा आम्रन्मूलो

वा। **फलेग्रहिः**–फलं लाभं प्रयोजनं प्रसवं वा गृह्णातीति, फलेग्रहिः। **शान्तिजिनोदितागमः**–शान्तिः शान्तिनाथश्चासौ जिनो–जिनेश्वरः शान्तिजिनस्तेन उदित उपदिष्टः प्रतिपादित इति यावत्, आगमः द्वादशाङ्गीरूपस्तथा। **प्रमोदजन्यात्**–प्रमोदास्सम्मदाज्जन्यं जनितं प्रमोदजन्यं तस्मात्तथा, षष्ठ्यर्थे पञ्चमी, तथा च प्रमादजन्यस्येत्यर्थः। **स्नुतस्य**–प्राप्तस्रवणस्य, द्रुतस्येति यावत्। **नृपाश्रुणः**–नॄन् जनान् पान्ति–रक्षन्तीति, नृपाः प्रवरनरास्तेषामश्रु नेत्रजलम्, नृपाश्रु तस्य तथा। **सेकात्**–सेचनतः। **बुबुधे**–प्रबुद्धः, विकस्वरोऽभूदिति यावत्॥५६॥

दानमदादमदाद्दमदान्ते–र्दीनदयालुतयाऽवनिपालः।
शस्यतमे परिसंस्मृतशान्ते–र्नाम्नि च विस्फुरिते श्रुतियोग्ये॥५७॥

*अन्वयः—श्रुतियोग्ये, परिसंस्मृतशान्तेः, विस्फुरिते, च, शस्यतमे, नाम्नि, (श्रुते सति) अवनिपालः, दीनदयालुतया, दमदान्तेः, अमदात्, दानम्, अदात्॥५७॥*

वृत्तिः—**श्रुतियोग्ये**–श्रवणमनोहरे, श्रवणावच्छेदेन आत्मन्यानन्दसमुत्पादनशालिनीति यावत। **परिसंस्मृतशान्तेः**–परिसर्वतोभावेन संस्मृतं श्लाघितं प्रशंसितम् इति यावत्, परिसंस्मृतं स चासौ शान्तिः। शान्तिनाथस्य तथा। **विस्फुरिते**–विस्फुरणशीले। **च**–पुनः। **शस्यतमे**–प्रशंसनीये। **नाम्नि**–अभिधाने। **श्रुते**–सतीति शेषः। **जनैः**–शान्तिनाथस्य नामोच्चारणे विहिते राजादिभिश्च समाकर्णिते सतीतिभावः। **अवनिपालः**–पृथिवीपतिरिति यावत्। **दीनदयालुतया**–दीनेषु-दुर्विधेषुदरिद्रेष्विति यावत्, दयालुः कृपाशीलो दीनदयालुस्तस्य भावो दीनदयालुता, तया तथा। **दमदान्तेः**–दम इन्द्रियनिग्रह अदान्तिस्तपः क्लेशसहिष्णुता दमदान्तिस्तस्यास्तथा, 'जातावेकवचनम्' यद्वा—दमस्येन्द्रियनिग्रहादेर्दान्तिः सहिष्णुता दमदान्तिस्तस्यास्तथा। **अमदात्**–न मदो गर्वोऽमदो गर्वाभावस्तस्मात्तथा। **दानम्**–वितरणम्। **अदात्**–अकरोत्।

अथात्र–दानस्य दाधात्वर्थदाननिरूपितकर्मत्वाभावात् कथं दानमदात् "इति प्रयोग इति चेत्–अत्रोच्यते रसाः प्रतीयन्ते" "ओदनं पचतीतिवदौपचारिकत्वात्, रसस्य ज्ञानरूपत्वाद् तद्विषयकप्रतीतिर्न भवितुमर्हति इति प्रतीयन्ते इत्यस्य क्रियन्ते इत्यर्थस्तथा च—रसात्मकप्रतीतयः क्रियन्ते इति,यथा यथा वा तण्डुलानां पाकेनैव निष्पन्नस्य ओदनस्य पचधात्वर्थनिरूपितकर्मत्वाभावात्—पचतीत्यस्य निवर्तयतीत्यर्थस्तथात्रापि—अदादित्यस्य अकरोदित्यर्थकल्पने बाधाभावः॥५७॥

शैवपदस्य पदव्यवबुद्धा, दुर्णयवर्णितिरेव निषिद्धा।
रूपमदर्शि धृतोऽस्मि यदर्थं, चेतसि तत् त्वमिहासि स कर्ता॥५८॥

*अन्वयः—शैवपदस्य, पदवी, अवबुद्धा, दुर्णयवर्णितिः, निषिद्धा, एव, यदर्थम्, चेतसि, धृतः, असि, ( तत् ) रूपम्, अदर्शि, स त्वम् , इह, कर्ता, असि ॥५८॥*

वृत्तिः—शैवपदस्य—शिवस्य मोक्षस्येदं शैवपदम्, तस्य तथा । पदवी—पद्धतिः, मार्ग इति यावत् । अवबुद्धा—ज्ञाता भवतेति शेषः । दुर्णयवर्णितिः—नयाभासवर्णना । निषिद्धा—निवारिता । एव—अवधारणार्थकमव्ययम् । भवता गणधरेणेतिशेषः । यदर्थम्—यन्निमित्तमित्यर्थः । चेतसि—मनसि । अन्तःकरणे इति यावत् । धृतः—स्थापितः, तदवच्छेदेन निवासित इति यावत् । असि—त्वम् अहमर्थकमस्मिसदृशं त्वमर्थमसीति अव्ययमत्र । रूपम्—स्वरूपम् । अदर्शि—दर्शितम् । तत्—ततः कारणात् । स त्वम्—भवल्लक्षणो जनः । इह—लोकेऽस्मिन् । कर्ता—ज्ञाता कर्तृत्वं ज्ञप्तृत्वम्, तद्वान्, सर्वज्ञ इति यावत् । असि—भवसि, नान्य इति भावः ॥५८॥

**देवनृदेवगणः स्तुतिमेवं, तस्य चकार गणेशवरस्य ।**
**मानसतोऽपि च मा क्षणमात्रं, गच्छ यथेच्छमथेत्यभिधाय ॥५९॥**

*अन्वयः—अथ, देवनृदेवगणः, यथेच्छं, गच्छ, च, मानसतः, क्षणमात्रम्, अपि, मा, (गच्छ), इति अभिधाय, तस्य, गणेशवरस्य, एवम् , स्तुतिम् , चकार ॥५९॥*

वृत्तिः—अथ—अनन्तरम् । देवनृदेवगणः—देवा—अमराश्च, नृदेवा, नरदेवा भूपाला इति यावत् च देवनृदेवास्तेषां गणः कदम्बकम्, देवनृदेवगणः । यथेच्छम्—निकामम् । स्वेच्छानुसारमिति यावत् । यद्वा—इच्छाभिलाषमनतिक्रम्य यथेच्छम् इत्यव्ययीभावसमासः । गच्छ—व्रज, विहरेति यावत् । च—पुनः । मानसतः—हृदयतः । क्षणमात्रम्—क्षणात्मकसूक्ष्मकालमभिव्याप्य । अपि—सम्भावनायाम् । मा—नहि । गच्छेति शेषः । इति—एवं प्रकारेण । अभिधाय—कथयित्वा । तस्य—प्रसिद्धस्य । गणेशवरस्य—गणाध्यक्षस्य । एवम्—पूर्वकथितप्रकारेण । स्तुतिम्—प्रशंसाम्, वर्णनमिति यावत् । चकार—कृतवान् ॥५९॥

**इत्थममुं विलपन्तममुञ्चत्, सोऽपि गणेशवरः प्रणमन्तम् ।**
**विश्वजनं प्रतिबोधितुकामो, ज्ञानधनो विजहार विहारम् ॥६०॥**

*अन्वयः—ज्ञानधनः, विश्वजनम्, प्रतिबोधितुकामः, सः, गणेशवरः, इत्थम्, विलपन्तम्, प्रणमन्तम्, अमुम्, अमुञ्चत्, अपि, विहारम्, विजहार ॥६०॥*

वृत्तिः—ज्ञानधनः–ज्ञानमेव धनं यस्य स तथा। केवलज्ञानीति यावत्। विश्वजनम्–सकललोकम्। प्रतिबोधयितुकामः–प्रतिबोधयितुमभीप्सुः। यद्यपि केवलिनः सहजैवेतादृक् प्रवृत्तिस्तथापि कामत्वेन साऽत्रोत्प्रेक्षितेति। सः–पूर्वनिर्दिष्टः। गणेश्वरः–गणधरमुख्यः। इत्थम्–पूर्ववर्णितेन प्रकारेण। विलपन्तम्–परिदेवयन्तम्, गणधरविहारजन्यविप्रलम्भदुःखेनेति यावत्। प्रणमन्तम्–नमस्कुर्वन्तम्। अमुम्–देवनृदेवगणम्। अमुञ्चत्–अत्यजत्। अपि–समुच्चये। विहारम्–विहृतिम्, गमनमिति यावत्। विजहार–चकार। नृत्यन्ति नृत्यमितिवदत्राप्यनुसन्धेयमिति यावत् ॥६०॥

आनन्दजाश्रुभिरनुस्रियमाणमार्गान्, व्यक्तान् पदानि निदधद् बहुवर्णसङ्घैः।
चक्रे ह्यनेकपमुखः स गणे गणेशो–ऽप्यङ्गाश्रितत्रिपदिकागतभूरिलक्ष्म्यः ॥६१॥

*अन्वयः—अनेकपमुखः, सः, गणेशः, बहुवर्णसङ्घैः, अङ्गाश्रितत्रिपदिकागतभूरिलक्ष्म्याः, पदानि, निदधत्, हि, आनन्दजाश्रुभिः, अनुस्रियमाणमार्गान्, अपि, व्यक्तान्, चक्रे ॥६१॥*

वृत्तिः—अनेकपमुखः–अनेकानसंख्याताञ्जनान् प्राणिनो वा पाति रक्षति दयोपदेशादिति अनेकपम् तादृशं मुखं वदनं यस्य स तथा। सः–प्रसिद्धः। गणेशः–गणाधीशः। बहुवर्णसङ्घैः–बहवः अनेकाश्च ते वर्णा अक्षराणि द्विजादयो वा बहुवर्णास्तेषां सङ्घाः समुदयाः बहुवर्णसंघास्तैस्तथा। अङ्गाश्रितत्रिपदिकागतभूरिलक्ष्म्याः–अङ्गानि द्वादशाङ्गी तानि आश्रिता समवलम्बिता, अङ्गाश्रिता सा चासौ त्रिपदिका उत्पादव्ययध्रौव्यात्मिकरूपा अङ्गाश्रितात्रिपदिका तां गता प्राप्ता समाश्रिता वा भूरिलक्ष्मीः प्रचुरश्रीः अङ्गाश्रितत्रिपदिकागतभूरिलक्ष्मीस्तस्यास्तथा। पदानि–आगमपदानि। निदधत्–संस्थापयन्। हि–निश्चयेन। आनन्दजाश्रुभिः–प्रमोदजनितबाष्पैः। अनुस्रियमाणमार्गान्–अनुस्रियमाणः सेव्यमानो मार्गो जैनागमो यैस्तेऽनुस्रियमाणमार्गास्तांस्तथा। अपि–सम्भावनायाम्। व्यक्तान्–पण्डितान्। चक्रे–कृतवान् ॥६०॥

लोकाननेकवचनामृतलुप्तदुःख–प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान्।
कुर्वन स सर्वविदनूक्तिरसात् तदोर्व्यां, रेजे सितद्युतिरिवाप्तगणाधिराजः ॥६१॥

*अन्वयः—प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान्, लोकान्, अनु, अनेकवचनामृतलुप्तदुःखान्, कुर्वन्, आप्तगणाधिराजः, सः, सर्ववित्, तदा, उक्तिरसात्, उर्व्याम्, सितद्युतिः, इव, रेजे ॥६१॥*

वृत्तिः--प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान्--प्राक्-पूर्वं, शोकेन-अज्ञानादिजनितखेदेन निर्गमिता-निःसारिता नेत्रपयः-प्रवाहा, नयनजलधारा यैस्ते प्राक्शोकनिर्गमितनेत्रपयःप्रवाहास्ताँस्तथा। लोकान्--जनान्, भव्यजनानिति यावत्। अनु--पश्चात्। अनेकावचनामृतलुप्तदुःखान्--अनेकानि बहूनि च तानि वचनानि वाक्यानि-अनेकवचनानि तान्यमृतानि सुधा इव अनेकवचनामृतानि तैर्लुप्तमदर्शनतां गतम्, विच्छिन्नमिति यावद् दुःखं प्रतिकूलतयावेदनीयं पीडादि येषान्ते, अनेक-वचनामृतलुप्तदुःखास्ताँस्तथा। "प्रतिकूलवेदनीयं दुःख" मिति नैयायिकाः। कुर्वन्-विदधत्। आप्तगणाधिराजः-आप्तो यथार्थवक्ता चासौ गणाधिराजो-गणेश्वर आप्तगणाधिराजः। सः-प्रसिद्धः। सर्ववित्-सर्वज्ञः। तदा-तस्मिन् समये। उक्तिरसात्-वचनमुक्तिस्तस्यास्तस्यां वा रसोऽमृतम्, उक्तिरसस्तस्मात्तथा। उर्व्याम्-पृथिव्याम्। सितद्युतिः-सिता-शुभ्रा द्युतिः-कान्तिर्यस्य स तथा। चन्द्र इत्यर्थस्तदिव-तद्वत्। रेजे-शुशुभे ॥६१॥

**पूर्वं रथाङ्गभृति पञ्चमकेऽपि पश्चात्, रागेण वा भगवति स्मितपद्मिनीशे।**
**चक्रे स चक्रनिभचङ्क्रमणच्छलेन, स्वस्मिन् प्रभाकररुचिं शुचिमण्डलस्थः ॥६२॥**

अन्वयः—*शुचिमण्डलस्थः, सः, पूर्वम्, पञ्चमके, रथाङ्गभृति, पश्चात्, स्मितपद्मिनीशे, भगवति, अपि, रागेण, वा, स्वस्मिन्, चक्रनिभचङ्क्रमणच्छलेन, प्रभाकररुचिम्, चक्रे ॥६२॥*

वृत्तिः—शुचिमण्डलस्थः-शुचि पवित्रं यन्मण्डलम्-भ्रमणकदम्बकम्, शुचिमण्डलम्, तत्र तिष्ठतीति तथा। सः-गणेशः। पूर्वम्-प्रथमम्। पञ्चमके-पञ्चानां पूरणः पञ्चमः, स एव पञ्च-मकस्तस्मिन् पञ्चमे इत्यर्थः। रथाङ्गभृति-रथाङ्गं-चक्रं बिभर्त्ति धारयतीति रथाङ्गभृत् तस्मिँस्तथा। चक्रिणीत्यर्थः। पञ्चमचक्रवर्तिनि भगवति शान्तिनाथ इति यावत्। पश्चात्-अनन्तरम्। स्मितपद्मिनीशे-स्मितेनेषद्धासेन तन्मात्रेण पद्मिनीशः-सूर्यः स्मितपद्मिनीशस्तस्मिँस्तथा। भगवति-भगं श्रीज्ञानवैराग्यकीर्त्तिमाहात्म्यैश्वर्यादिकमस्त्यस्येति भगवान् तस्मिँस्तथा। केवलिनि भगवति शान्तिनाथे इति यावत्। अपि-सम्भावनायाम्। रागेण-अनुरागेण प्रीत्येति यावत्। वा-उपमार्थकम्। स्वस्मिन्-आत्मनि। चक्रनिभचङ्क्रमणच्छलेन-चक्रनिभं चक्रवाकतुल्यं यच्चंक्रमणं कुटिलगमनं चक्रनिभचङ्क्रमणच्छलन्तेन तथा। प्रभाकररुचिम्-प्रभाकरस्य-सूर्यस्य रुचिः-कान्तिः प्रभाकररुचिस्तान्तथा। चक्रे-कृतवान्।

**सर्वत्र सार्वगणशासनसार्वभौम-पट्टस्थितस्य गणिनोऽनुदिनार्चनासु।**
**सिद्धिर्भवेद् भविजनस्य पुरः स्थितस्य, नीराजनां जनयतां निजबान्धवानाम् ॥६३**

अन्वयः––*सार्वगणशासनसार्वभौमपट्टस्थितस्य, गणिनः, अनुदिनार्चनासु, नीराजनाम्, जनयताम्, निजबान्धवानाम्, पुरः स्थितस्य, भविजनस्य, सर्वत्र, सिद्धिः, भवेत्* ॥६३॥

**वृत्तिः**—**सार्वगणशासनसार्वभौमपट्टस्थितस्य**–सर्वेभ्यः प्राणिभ्यो हिताः सार्वाः सर्वज्ञा जिनेश्वरा इति यावत्, तेषां गणः समुदयः सार्वगणस्तस्य शासनं साम्राज्यम्, सार्वगणशासनम्, तत्र सार्वभौमश्चक्रवर्ती सार्वगणशासनसार्वभौमः शान्तिनाथस्तस्य पट्टस्थितः–पट्टालङ्कारः, सार्वगणशासनसार्वभौमपट्टस्थितस्तस्य तथा। **गणिनः**–गणाधीशस्य। **अनुदिनार्चनासु**–अनुदिनं प्रतिदिनं या अर्चनाः पूजास्ता अनुदिनार्चनास्तासु तथा। **नीराजनाम्**–आरार्तिकाम् आरात्रिकामितियावत्। **जनयताम्**–सम्पादयताम्, कुर्वताम् इति यावत्। **निजबान्धवानाम्**–निजा–आत्मीयाश्च बान्धवाः स्वजना, निजबान्धवास्तेषान्तथा। **पुरःस्थितस्य**–अग्रतो विद्यमानस्य। **भविजनस्य**–मोक्षगमनयोग्यलोकस्य। **सर्वत्र**–सर्वकालावच्छेदेन, सर्वदेशावच्छेदेन चेत्यर्थः। **सिद्धिः**–तुर्यपुरुषार्थाधिगमः। **भवेत्**–जायेत ॥६३॥

**श्रीहर्षः कविराजराजिमुकुटालङ्कारहीरः सुतं,**
**श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।**
**तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-**
**काव्ये चारुणि नैषधीयचरिते सर्गो यमादिर्गतः ॥६४॥**

अन्वयः—*कविराजराजिमुकुटालङ्कारहीरः, श्रीहर्षः, श्रीहीरः, च, मामल्लदेवी, जितेन्द्रियचयम्, यम्, सुतम्, सुषुवे, तच्चिन्तामणिमन्त्रचिन्तनफले, शृङ्गारभङ्ग्या, चारुणि, नैषधीयचरिते, महाकाव्ये, यमादिः, सर्गः, गतः* ॥६४॥

**वृत्तिः**—**कविराजराजिमुकुटालङ्कारहीरः**–कः–अग्निर्ब्रह्मा वा, वीनां पक्षिणां, राजा–प्रभुः, विराजो गरुडः, यक्षराजः, विशिष्टराजो वा, एषु–राजते, दीप्यते, शोभते, वा तच्छीलम्, कविराजराजि सुवर्णमित्यर्थः अग्निर्हिरण्यरेतस्त्वात्, ब्रह्मणो हिरण्यगर्भत्वात्, विराजस्य गरुडस्य सुवर्णकायत्वात्। यक्षराजस्य–कुबेरस्य स्वर्णाधिकारत्वात्। तत्प्रधानो मुकुटालङ्कारस्तत्र हीरः–इव यथा कनकमुकुटालङ्कारे हीरस्तथाऽयमिति भावः। **श्रीहर्षः**–पदैकदेशे पदसमुदायोपचारात् "दत्तो देवदत्तः" इति न्यायात् प्राक्तनहीरहर्षनाम्न एकदेशस्य तदर्थबोधकत्वात्–श्रीहर्षेतिपूर्वनामा। **श्रीहीरः**–श्रिया लक्ष्म्या विशिष्टो हीरो हीरविजयाख्यसूरिवर्य्यस्तथा। **च**–पुनः। **मामल्लदेवी**–मा–लक्ष्मीः पद्मा वा तद्रूपा मल्लदेवी समर्थसाधुदेवी–सौभाग्यदेवी। **यम्**–यादृशम्। **जितेन्द्रियचयम्**–जितानि

वशीकृतानि स्वाधीनीकृतानीति यावदिन्द्रियाणि मनःप्रधानानि यैस्ते जितेन्द्रिया मुनयस्तेषां चयो वृन्दम्, जितेन्द्रियचयस्तन्तथा, मुनिवर्गमित्यर्थः । सुतम्-पुत्रं शिष्यञ्च, शिष्ये पुत्रवदाचारात् । सुषुवे-जनयामास, समुत्पादयामासेति यावद् । शीलविजय-कमलविजय-चारित्रविजयाख्य-भ्रातृत्रय-रूपमुनिवर्गस्य समर्थसाधुपुत्रत्वात्, सौभाग्यदेवीकुक्षिरत्नत्वात् श्रीहीरविजयसूरिराजदीक्षितत्वाच्च । तच्चिन्तामणिमन्त्रचिन्तनफले-तदुक्तश्चिन्तामणिमन्त्रस्तच्चिन्तामणिमन्त्रः, तस्य चिन्तनमनुध्यानन्त-त्फलं फलरूपम् तच्चिन्तामणिमन्त्रचिन्तनफलम् तस्मिँस्तथा । शृङ्गारभङ्ग्या-शृङ्गेषु शिखरेषु आरो गतिः प्राप्तता यस्य स शृङ्गारो मेघस्तस्य शिखरेषु बहुवर्षित्वात्, नामसाम्यात् मेघविजयोपाध्याय-स्तस्य भङ्गीवचनरचना तया तथा । चारुणि-रमणीये । नैषधीयचरिते-निषधानां तदाख्यजनपदानां राजा नैषधो नलस्तस्येदम् नैषधीयम्, नलसम्बन्धीत्यर्थः । तस्येव चरितमाचारः समस्यारूपो यत्र तन्नैषधीयचरितम्, श्रीनैषधीयचरिताद्यसर्गसमस्यापूर्तिरूपं श्रीशान्तिनाथचरित्रमिति यावत्, तस्मिँस्तथा । महाकाव्ये-लोकोत्तरनिपुणताशालिकविकर्म काव्यम्, तच्च "तददोषौ शब्दार्थौ सगुणा-वनलङ्कृती पुनः क्वापि" इति मम्मटाचार्यमते तादृशविलक्षणशब्दार्थशरीरम् "वाक्यं रसात्मकं काव्यम्" इति विश्वनाथलक्षितं रसात्मकवाक्यरूपम् "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति पण्डितराजजगन्नाथलक्षित—रमणीयार्थप्रतिपादकशब्दरूपम् वा महद्विशालं प्रधानञ्च तत्काव्यम् महाकाव्यम्, तस्मिँस्तथा । यमादिः-यमा-अहिंसादीनि पञ्च महाव्रतानि, सैव संख्या आदिर्यस्य स यमादिः षष्ठ इत्यर्थः । सर्गः-अध्यायः । गतः-पूर्णः चरमवर्णध्वंसरूपां समाप्ति-मगादिति यावत् ॥६-६४॥

इति-वाचकप्रवरश्रीमेघविजयजिद्गणिराजविरचिते श्रीनैषधीयमहाकाव्यप्रथमसर्गपादपूर्तिस्वरूपे श्रीशान्तिनाथचरित्रे शासनसम्राट्-सूरिचक्रचक्रवर्ति-तपागच्छाधिपति-भट्टारकाचार्य-महाराजाधिराज-श्रीविजयनेमिसूरीश्वर-महाराजपट्टालङ्कारशास्त्रविशारदकविरत्न-पीयूषपाणि-पूज्यपादाचार्यमहाराज श्रीविजयामृतसूरीश्वर-विरचित-विद्वद्विनोदिनीनामवृत्तिविभूषिते—

## ॥ षष्ठः सर्गः समाप्तः ॥

# प्रशस्तिः

जयति जगति जाग्रज्ज्ञानयोगाद् युगादौ,
जिनवरनवरश्मिर्मारुदेवादिदेवः ।
तदनु दिनपकान्तिः शान्तिरर्हन् स चक्री,
जिनपतिरपि पार्श्वः शाश्वतश्रीर्विवस्वान् ॥ १ ॥

अन्वयः—*युगादौ, ज्ञानयोगात्, जगति, जाग्रत्, जिनवरनवरश्मिः, मारुदेवादिदेवः, जयति, तदनु, दिनपकान्तिः, चक्री, सः, शान्तिः, अर्हन्, (जयति) शाश्वतश्रीः, विवस्वान्, जिनपतिः, पार्श्वः, अपि, (जयति) ॥१॥*

वृत्तिः—**युगादौ**—युगस्य युगानां वा आदिः प्रथमावयवो युगादिस्तस्मिँस्तथा । युगप्रारम्भकालावच्छेदेनेत्यर्थः । **ज्ञानयोगात्**—केवलादिबोधसम्पर्कात् । **जगति**—लोके, जातावेकवचनम्, जगत्स्वित्यर्थः । भुवनत्रयेष्विति यावत् । **जाग्रत्**—विलसत्, समुद्बुद्ध इति यावत् । **जिनवरनवरश्मिः**—नवा नूतना रश्मयः किरणानि यस्य स नवरश्मिः सूर्य्यः, जिनवराणां जिनेश्वराणां मध्ये नवरश्मिः सूर्य्यो जिनवरनवरश्मिः । **मारुदेवादिदेवः**—मरुदेवाया अयं मारुदेवः स चासावादिदेवः प्रथमदेवो मारुदेवादिदेवः ऋषभस्वामीति यावत् । **जयति**—सर्वोत्कर्षेण विजयते । **तदनु**—तदनन्तरम्, तत्पश्चादित्यर्थः । **दिनपकान्तिः**—दिनं दिवसं पाति रक्षत्यात्मलाभदानेनेति दिनपः सूर्य्यस्तस्य कान्तिः प्रभेव कान्तिः प्रभा यस्य स तथा, सूर्य्यसमानतेजस्वीति यावत् । **चक्री**—पञ्चमचक्रवर्तीत्यर्थः । **सः**—प्रसिद्धः । **शान्तिः**—शान्तिनाथः । **अर्हन्**—जिनेश्वरः । (**जयति**—सर्वोत्कर्षेण वर्ततेतराम्) **शाश्वतश्रीः**—नित्यलक्ष्मीकः । **विवस्वान्**—सूर्य्यः असमस्तं रूपकमिदमवसेयम् । वस्तुतस्तु—शाश्वतश्रीविवस्वानिति समस्तः पाठः साधीयान्, शाश्वता या श्रीर्लक्ष्मीः पद्मा वा तस्या विवस्वान् सूर्य्यः प्रकाशकत्वादित्येवमर्थोऽपि तत्पक्षीयो बोध्यः । **जिनपतिः**—जिनाधिनाथः । **पार्श्वः**—पार्श्वनाथः । **अपि**—सम्भावनायाम् । (**जयति**—सर्वोत्कृष्टतया विजयते) ॥१॥

तदनु दनुजपूज्यस्तीर्थकृद्वीरनामा, निरुपममहिमाढ्यः सर्ववित्सार्वभौमः ।
तदनु गणधरालीपूर्वदिग्भानुमाली, विजयपदमपूर्वं हीरपूर्वं दधानः ॥२॥

अन्वयः—तदनु, दनुजपूज्यः, निरुपममहिमाढ्यः, सर्वविस्सार्वभौमः, वीरनामा, तीर्थकृत्, ( जयति ), तदनु, गणधरालीपूर्वदिग्भानुमाली, हीरपूर्वम्, अपूर्वम्, विजयपदम्, दधानः, ( जयति ) ॥२॥

वृत्तिः—तदनु-ततः-कियत्कालानन्तरम् तत्पश्चादिति यावत् । दनुजपूज्यः-दनोस्तन्नामकदेवयोनिविशेषाज्जाता दनुजास्तैः पूज्योऽर्चनीयः, सेवनीय इति यावत्, सुरासुरवृन्दवन्दनीय इति यावत् । निरूपममहिमाढ्यः-उपमायाः-सादृश्यान्निर्गतो निरुपमः स चासौ महिमा-माहात्म्यम्, निरूपममहिमा, तेन आढ्यः श्रेष्ठस्तथा । सर्वविस्सार्वभौमः-सर्वं-निखिलं, विदन्ति-जानन्ति सर्वविदः सर्वज्ञा, जिनेश्वरा इत्यर्थः, तेषु सार्वभौमश्चक्रवर्ती तथा, सर्वजिनेश्वरश्रेष्ठ इति भावः । वीरनामा-महावीराभिधानः । तीर्थकृत्-तीर्थङ्करः । (जयति-सर्वोत्कृष्टेन वर्तते) तदनु-तत्पश्चात् । गणधरालीपूर्वदिग्भानुमाली-गणधराणां-गणाधीशानामाली पङ्क्तिः, कदम्बकमित्यर्थः, सैव पूर्वदिक्-महेन्द्रकाष्ठा, गणधरालीपूर्वदिक् तत्र भानुमाली सूर्यः, तद्रूप इत्यर्थः । हीरपूर्वम्-हीरेत्यक्षरद्वयपूर्वम् । अपूर्वम्-लोकोत्तरम् । विजयपदम्-विजयेत्याकारकमास्पदवाचकं शब्दविशेषमित्यर्थः । दधानः-धारयन्, विजयहीरसूरिरित्यर्थः । (जयति-सर्वोत्कर्षेण वर्तते) ॥२॥

कनकविजयशर्माऽस्यान्तिषत्प्रौढधर्मा, शुचितरवरशीलः शीलनामा तदीयः ।
कमलविजयधीरः सिद्धिसंसिद्धिवीर-स्तदनुज इह रेजे वाचकश्रीशरीरः ॥३॥

चारित्रशब्दाद् विजयाभिधान-स्त्रयी सगर्भा धृतशीलधर्माः ।
एषां विनेयाः कवयः कृपाद्याः, पद्मास्वरूपाः समयाम्बुराशौ ॥४॥

अन्वयः—अस्य, प्रौढधर्मा कनकविजयशर्मा, अन्तिषत्, तदीयः, शुचितरवरशीलः, शीलनामा, ( तदीयः ), सिद्धिसंसिद्धिवीरः, कमलविजयधीरः, तदनुजः, वाचकश्रीशरीरः, चारित्रशब्दात्, विजयाभिधानः, इह, रेजे । धृतशीलधर्मा, त्रयी, सगर्भा, (आसीत्), एषाम्, समयाम्बुराशौ, पद्मास्वरूपाः, कृपाद्याः, कवयः, विनेयाः, (बभूवुः) ॥३-४॥

वृत्तिः—अस्य-महात्महीरसूरिवर्यस्य । प्रौढधर्मा-प्रौढः-प्रौढिमुपगतो धर्मो वृषः सुकृतमिति यावद्यस्य स तथा । अत्यन्तधर्मशील इत्यर्थः । कनकविजयशर्मा-कनकविजयाभिधानः । अन्तिषत्-अन्तेवासी शिष्य इति यावत् । तदीयः-तस्य कनकविजयशर्मणोऽयन्तदीयस्तत्सम्बन्धीति यावत् । शुचितरवरशीलः-शुचितरं-पवित्रतरं, वरं-समीचीनं, शीलं-चारित्रं यस्य स तथा ।

शीलनामा–शीलविजयाभिधानः । अभूत् इति शेषः । (तदीय:–तत्सम्बन्धी) सिद्धिसंसिद्धिवीरः-सिद्धेः कार्यनिष्पत्तेः, अणिमाद्यायाः, तन्नामिकाया देव्या वा संसिद्धिः–सम्यक् प्राप्तिः, साधना वा सिद्धिसंसिद्धिस्तत्र वीरः-शूरस्तथा । कमलविजयधीरः–अत्यन्तधैर्यशालिकमलविजयाभिधान इत्यर्थः । तदनुजः–तत्पश्चाद्दीक्षितः । धर्मलघुभ्रातेत्यर्थः । वाचकश्रीशरीरः–उपाध्यायपदविभूषितः । चारित्रशब्दात् विजयाभिधानः–चारित्रशब्दोत्तरविजयपदविशिष्टाभिधानः, चारित्रविजयनामेत्यर्थः। इह–अस्मिन् समुदाये, लोके वा । रेजे–शुशुभे । धृतशीलधर्मा–अङ्गीकृतसच्चारित्राचारा । त्रयी–त्रितयी, शीलविजय-कमलविजय-चारित्रविजयात्मिकेतियावत् । सगर्भा–सोदरा, आसीदिति शेषः । एषाम्–पूर्वकथिताभिधानानाम् । समयाम्बुराशौ–समय आचारः, सिद्धान्तो वा अम्बुनिधिः–समुद्र इवेति समयाम्बुनिधिस्तत्र तथा । "उपमेये व्याघ्राद्यैः साम्यानुक्तौ" ३ । १ । १०२ ॥ इत्यनेन समासः । पद्यास्वरूपाः–मार्गरूपाः । कृपाद्याः–कृपाविजयाः । विनेयाः–शिष्याः । बभूवुरिति शेषः ॥३-४॥

तत्पादाम्बुजभृङ्गमेघविजयः प्राप्तस्फुरद्वाचक-
ख्यातिः श्रीविजयप्रभाख्यभगवत्सूरेस्तपागच्छपात् ।
नुन्नोऽयं निजमेरुपूर्वविजय–प्राज्ञादिशिष्यैरिमां,
चक्रे निर्मलनैषधीयवचनैः श्रीशान्तिचक्रिस्तुतिम् ॥५॥

अन्वयः—*तपागच्छपात्, श्रीविजयप्रभाख्यभगवत्सूरेः, प्राप्तस्फुरद्वाचकख्यातिः, तत्पादाम्बुजभृङ्गमेघविजयः, अयम्, निजमेरुपूर्वविजयप्राज्ञादिशिष्यैः, नुन्नः, (सन्) इमाम्, श्रीशान्तिनाथचक्रिस्तुतिम्, निर्मलनैषधीयवचनैः, चक्रे ॥५॥*

वृत्तिः—तपागच्छपात्–तपागच्छाधिपतेः । श्रीविजयप्रभाख्यभगवत्सूरेः–आचार्यवर्य-श्रीविजयप्रभसूरिभगवत्सकाशात् । प्राप्तस्फुरद्वाचकख्यातिः–अधिगतविलसदुपाध्यायपदवीप्रसिद्धिः । तत्पादाम्बुजभृङ्गमेघविजयः–कृपाविजयचरणारविन्दमधुकरायमाणमेघविजयनामा । अयम्–मल्लक्षणोऽयं जनः । निजमेरुपूर्वविजयप्राज्ञादिशिष्यैः–स्वीयमेरुविजयप्रमुखविनेयैः । नुन्नः–प्रेरितः । सन्निति शेषः । इमाम्–निबद्धामिमाम् । श्रीशान्तिनाथचक्रिस्तुतिम्–पञ्चमचक्रवर्तिभगवच्छ्रीशान्तिनाथजिनवरस्तवनात्मिकाम् कृतिमित्यर्थः । निर्मलनैषधीयवचनैः–विशुद्धनैषधीयचरितवचनसमस्यापूर्तिप्रकारैः । चक्रे–कृतवान् ॥५॥

---

# टीकाकर्तुः प्रशस्तिः

योऽर्हन्नित्यमबूबुधत् त्रिभुवनं मोहप्रमीलाविलं,
सम्यक्तत्त्वमतत्त्वतत्वदहनं, विश्वेऽखिलेऽदीदिपत् ।
रागं रङ्कुसमानमुद्दलयितुं, सिंहं क्रमेऽदीधरत्,
स श्रीवीरजिनेश्वरो विजयते, तीर्थाधिराजः स्वयम् ॥१॥

तत्पट्टे सुरराजराजितदिशि, प्रांशुः सुधर्मा प्रभु,—
स्तत्पश्चात् क्रमशः परेऽजनिषतो-द्यत्कीर्तयः सूरयः ।
जातस्तेषु नतेषु कामितफलः, श्रीहीरसूरीश्वरो,
येनास्मिन् कलिकालकालसमये, धर्मार्थमभ्युद्यतम् ॥२॥

तस्यैवान्वयवार्धिवर्धनशशी, श्रीवृद्धिचन्द्रो गुरु—
स्तत्पादाम्बुजसेवनाप्तसुषमः, श्रीनेमिसूरीश्वरः ।
सम्भूतो वरतीर्थरक्षणविधौ, वैदुष्यपूर्णस्तपा—
गच्छाधीश्वरसर्वतन्त्रविदुरः, सद्दूरदर्शी वशी ॥३॥

यः सद्भूतयशस्सुधाधवलितं, चक्रे जगद् यं बुधाः,
सेवन्ते विजयो नयेन विधिवद् येनात्मनाऽधिष्ठितः ।
यस्मै क्रुध्यति रोषणः परुषितो, यस्माद्विभूतिः परा,
यस्य ब्रह्मबलं नितान्तविमलं, यस्मिन् महोच्चं महः ॥४॥

सूरेस्तस्य विनेयतां विनयतः सम्प्राप्य तत्सेवया,
न्यायव्याकरणागमादिषु लसत्-काव्येष्वधीती भृशम् ।
सूर्यन्तं क्रमशः पदं पुनरल-ङ्कुर्वन्नपूर्वामृतं,
पाणौ नाम्नि वचस्सु धारयति यो, लब्धप्रतिष्ठो भुवि ॥५॥

तेनेह तेने वरवाचकश्री-मेघाभिधानस्य कवीन्द्रकीर्तेः ।
साहित्यसौहित्यसुधाकरस्य, मेघादिपादैः कृतकाव्यपूर्तेः ॥ ६ ॥

श्रीनैषधीयादिमसर्गपूर्तौ, श्रीशान्तिनाथाभिधसच्चरित्रे ।
टीका नितान्तं विदुषां विनोदं, वितन्वती नन्दतु नव्यनन्दा ॥७॥

✱

टीकेयं वैक्रमीयेऽब्दे, नन्देन्दुखाक्षिसङ्ख्यके ।
आश्विने मासि पूर्णाऽभू-द्दोलतनगरे वरे ॥ ८ ॥



परिशिष्ट–१

# नैषधीय-चरितम्

## ( प्रथमः सर्गः )

निपीय यस्य क्षितिरक्षिणः कथास्तथाऽऽद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः, स राशिरासीन्महसां महोज्ज्वलः ॥१॥
रसैः कथा यस्य सुधावधीरिणी, नलः स भूजानिरभूद् गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रित — ज्वलत्प्रतापावलिकीर्तिमण्डलः ॥२॥
पवित्रमत्रातनुते जगद्युगे, स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि, स्वसेविनीमेव पवित्रयिष्यति ॥३॥
अधीतिबोधाचरणप्रचारणै – र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान्कुतः स्वयं, न वेद्मि विद्यासु चतुर्दश स्वयम् ॥४॥
अमुष्य विद्या रसनाग्रनर्तकी, त्रयीव नीताऽङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां जिगीषया, नवद्वयद्वीपपृथग्जयश्रियाम् ॥५॥
दिगीशवृन्दांशविभूतिरीशिता, दिशां स कामप्रसरावरोधिनीम् ।
बभार शास्त्राणि दृशं द्वयाधिकां, निजत्रिनेत्रावतरत्वबोधिकाम् ॥६॥
पदैश्चतुर्भिः सुकृते स्थिरीकृते, कृतेऽमुना के न तपः प्रपेदिरे ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्, दधावधर्मोऽपि कृशस्तपस्विताम् ॥७॥
यदस्य यात्रासु बलोद्धतं रजः, स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ, दधाति पङ्कीभवदङ्कतां विधौ ॥८॥
स्फुरद्धनुर्निस्वनतद्घनाशुग–प्रगल्भवृष्टिव्ययितस्य सङ्गरे ।
निजस्य तेजःशिखिनः परश्शता, वितेनुरिङ्गालमिवायशः परे ॥९॥
अनल्पदग्धारिपुरानलोज्ज्वलै—र्निजप्रतापैर्वलयज् ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया, रराज नीराजनया स राजघः ॥१०॥

निवारितास्तेन महीतलेऽखिले, निरीतिभावं गमितेऽतिवृष्टयः ।
न तत्यजुर्नुनमनन्यविश्रमाः, प्रतीपभूपालमृगीदृशां दृशः ॥११॥
सितांशुवर्णैर्वयति स्म तद्गुणै-र्महासिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनाङ्गावरणं रणाङ्गणे, यशःपटं तद्भटचातुरीतुरी ॥१२॥
प्रतीपभूपैरिव किं ततो भिया, विरुद्धधर्मैरपि भेत्तृतोज्झिता ।
अमित्रजिन्मित्रजिदोजसा स य-द्विचारदृक्चारदृगप्यवर्तत ॥१३॥
तदोजसस्तद्यशसः स्थिताविमौ, वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥१४॥
अयं दरिद्रो भवितेति वैधसीं, लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषा न चक्रेऽल्पितकल्पपादपः, प्रणीय दारिद्र्यदरिद्रतां नृपः ॥१५॥
विभज्य मेरुर्न यदर्थिसात्कृतो, न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं, द्विफालबद्धाश्चिकुराः शिरःस्थितम् ॥१६॥
अजस्रमभ्यासमुपेयुषा समं, मुदैव देवः कविना बुधेन च ।
दधौ पटीयान् समयं नयत्रयं, दिनेश्वरश्रीरुदयं दिने दिने ॥१७॥
अधोविधानात्कमलप्रवालयोः, शिरःसु दानादखिलक्षमाभुजाम् ।
पुरेदमूर्ध्वं भवतीति वेधसा, पदं किमस्याङ्कितमूर्ध्वरेखया ॥१८॥
जगज्जयं तेन च कोशमक्षयं, प्रणीतवाञ्शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं, वपुस्तथाऽऽलिङ्गदथास्य यौवनम् ॥१९॥
अधारि पद्मेषु तदङ्घ्रिणा घृणा, क्व तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोऽधिकारितां, न शारदः पार्विकशर्वरीश्वरः ॥२०॥
किमस्य लोम्नां कपटेन कोटिभि-र्विधिर्न लेखाभिरजीगणद्गुणान् ।
न रोमकूपौघमिषाज्जगत्कृता, कृताश्च किं दूषणशून्यबिन्दवः ॥२१॥
अमुष्य दोर्भ्यामरिदुर्गलुण्ठने, ध्रुवं गृहीतार्गलदीर्घपीनता ।
उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरः प्रसारिता ॥२२॥
स्वकेलिलेशस्मितनिन्दितेन्दुनो, निजांशदृक्तर्जितपद्मसम्पदः ।
अतद्वयीजित्वरसुन्दरान्तरे, न तन्मुखस्य प्रतिमा चराचरे ॥२३॥

सरोरुहं तस्य दृशैव निर्जितं, जिताः स्मितेनैव विधोरपि श्रियः ।
कुतः परं भव्यमहो महीयसी, तदाननस्योपमितौ दरिद्रता ॥२४॥
स्ववालभारस्य तदुत्तमाङ्गजैः, समं चमर्यैव तुलाभिलाषिणः ।
अनागसे शंसति बालचापलं, पुनः पुनः पुच्छविलोलनच्छलात् ॥२५॥
महीभृतस्तस्य च मन्मथश्रिया, निजस्य चित्तस्य च तं प्रतीच्छया ।
द्विधा नृपे तत्र जगत्त्रयीभुवां, नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥२६॥
निमीलनभ्रंशजुषा दृशा भृशं, निपीय तं यस्त्रिदशीभिरर्जितः ।
अमूस्तमभ्यासभरं विवृण्वते, निमेषनिःस्वैरधुनाऽपि लोचनैः ॥२७॥
अदस्तदाकर्णि फलाढ्यजीवितं, दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।
इति स्म चक्षुःश्रवसां प्रिया नले, स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥२८॥
विलोकयन्तीभिरजस्रभावना, बलादमुं नेत्रनिमीलनेष्वपि ।
अलम्भि मर्त्याभिरमुष्य दर्शने, न विघ्नलेशोऽपि निमेषनिर्मितः ॥२९॥
न का निशि स्वप्नगतं ददर्श तं, जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातधवा रते च का, चकार वा न स्वमनोभवोद्भवम् ॥३०॥
श्रियाऽस्य योग्याऽहमिति स्वमीक्षितुं, करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया, न दर्पणः श्वासमलीमसः कृतः ॥३१॥
यथोह्यमानः खलु भोगभोजिना, प्रसह्य वैरोचनिजस्य पत्तनम् ।
विदर्भजाया मदनस्तथा मनो(ऽ--)नलावरुद्धं वयसैव वेशितः ॥३२॥
नृपेऽनुरूपे निजरूपसम्पदां, दिदेश तस्मिन् बहुशः श्रुतिं गते ।
विशिष्य सा भीमनरेन्द्रनन्दना, मनोभवानैकवशंवदं मनः ॥३३॥
उपासनामेत्य पितुः स्म रज्यते, दिने दिने साऽवसरेषु बन्दिनाम् ।
पठत्सु तेषु प्रतिभूपतीनलं, विनिद्ररोमाऽजनि शृण्वती नलम् ॥३४॥
कथाप्रसङ्गेषु मिथः सखीमुखा-तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयान्यदभूयतानया, मुदा तदाकर्णनसज्जकर्णया ॥३५॥
स्मरात्परासोरनिमेषलोचना-द्बिभेमि -- तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे, निदर्शनं नैषधमभ्यषेचयत् ॥३६॥

नलस्य पृष्टा निषधागता गुणान्, मिषेण दूतद्विजबन्दिचारणाः ।
निपीय तत्कीर्तिकथामथानया, चिराय तस्थे(ऽ-)विमनायमानया ॥३७॥

प्रियं प्रियां च त्रिजगज्जयिश्रियौ, लिखाधिलीलागृहभित्ति कावपि ।
इति स्म सा कारुवरेण लेखितं, नलस्य च स्वस्य च सख्यमीक्षते ॥३८॥

मनोरथेन स्वपतीकृतं नलं, निशि क्व सा न स्वपती स्म पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात्, करोति सुप्तिर्जनदर्शनातिथिम् ॥३९॥

निमीलितादक्षियुगाच्च निद्रया(ऽ-)हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि सङ्गोप्य कदाप्यवीक्षितो, रहस्यमस्याः स महन्महीपतिः ॥४०॥

अहो अहोभिर्महिमा हिमागमे-ऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम् ।
तपर्तुपूर्ताविपि मेदसाम्भरा, विभावरीभिर्बिभरांबभूविरे ॥४१॥

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः, श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्यलोपिनं, नलोऽपि लोकादशृणोद् गुणोत्करम् ॥४२॥

तमेव लब्ध्वाऽवसरं ततः स्मरः, शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्तया, तया विनिर्जेतुमियेष नैषधम् ॥४३॥

अकारि तेन श्रवणातिथिर्गुणः, क्ष्माभुजा भीमनृपात्मजालयः ।
तदुच्चधैर्यव्ययसंहितेषुणा, स्मरेण च स्वात्मशरासनाश्रयः ॥४४॥

अमुष्य धीरस्य जयाय साहसी, तदा खलु ज्यां विशिखैः सनाथयन् ।
निमज्जयामास यशांसि संशये, स्मरस्त्रिलोकी विजयार्जितान्यपि ॥४५॥

अनेन भैमीं घटयिष्यतस्तथा, विधेरवन्ध्येच्छतया व्यलासि तत् ।
अभेदि तत्तादृगनङ्गमार्गणै-र्यदस्य पौष्पैरपि धैर्यकञ्चुकम् ॥४६॥

किमन्यदद्यापि यदस्त्रतापितः, पितामहो वारिजमाश्रयत्यहो ।
स्मरं तनुच्छायतया तदात्मनः, शशाक शङ्के स न लङ्घितुं नलः ॥४७॥

उरोभुवा कुम्भयुगेन जृम्भितं, नवोपहारेण वयस्कृतेन किम् ।
त्रपासरिद्दुर्गमपि प्रतीर्य सा, नलस्य तन्वी हृदयं विशेषयत् ॥४८॥

अपह्नवानस्य जनाय यन्निजा-मधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी, निशा च शय्या च शशाङ्ककोमला ॥४९॥

स्मरोपतप्तोऽपि भृशं न स, प्रभुर्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसूञ्शर्म च मानिनो वरं, त्यजन्ति न त्वेकमयाचितव्रतम् ॥५०॥

मृषाविषादाभिनयादयं क्वचिज्जुगोप निःश्वाससतिं वियोगजाम् ।
विलेपनस्याधिकचन्द्रभागता–विभावनाच्चापललाप पाण्डुताम् ॥५१॥

शशाक निह्नोतुमयेन तत्प्रिया–मयं बभाषे यदलीकवीक्षिताम् ।
समाज एवालपितासु वैणिकै–र्मुमूर्छ यत्पञ्चममूर्छनासु च ॥५२॥

अवाप सापत्रपतां स भूपति–र्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
असंवरे शंबरवैरिविक्रमे, क्रमेण तत्र स्फुटतामुपेयुषि ॥५३॥

अलं नलं रोद्धुममी किलाभवन्, गुणा विवेकप्रमुखा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत् सृजत्ययं सर्गनिसर्ग ईदृशः ॥५४॥

अनङ्गचिह्नं स विना शशाक नो, यदाऽऽसितुं संसदि यत्नवानपि ।
क्षणं तदाऽऽरामविहारकैतवान्निषेवितुं देशमियेष निर्जनम् ॥५५॥

अथ श्रिया भर्त्सितमत्स्यलाञ्छनः, समं वयस्यैः स्वरहस्यवेदिभिः ।
पुरोपकण्ठोपवनं किलेक्षिता, दिदेश यानाय निदेशकारिणः ॥५६॥

अमी ततस्तस्य विभूषितं सितं, जवेऽपि मानेऽपि च पौरुषाधिकं ।
उपाहरन्नश्वमजस्रचञ्चलैः, खुराञ्चलैः क्षोदितमन्दुरोदरम् ॥५७॥

अथान्तरेणावटुगामिमाऽध्वना, निशीथिनीनाथमहःसहोदरैः ।
निगालगाद्देवमणेरिवोत्थितै–र्विराजितं केसरकेशरश्मिभिः ॥५८॥

अजस्रभूमीतटकुट्टनोत्थितै–रुपास्यमानं चरणेषु रेणुभिः ।
रयप्रकर्षाध्ययनार्थमागतै–र्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥५९॥

चलाचलप्रोथतया महीभृते, स्ववेगदर्पानिव वक्तुमुत्सुकम् ।
अलं गिरा वेद किलायमाशयं, स्वयं हयस्येति च मौनमास्थितम् ॥६०॥

महारथस्याध्वनि चक्रवर्तिनः, परानपेक्षोद्वहनाद्यशः सितम् ।
रदावदातांशुमिषादनीदृशां, हसन्तमन्तर्बलमर्वतां रवेः ॥६१॥

सितत्विषचञ्चलतामुपेयुषो, मिषेण पुच्छस्य च केसरस्य च ।
स्फुटं चलच्चामरयुग्मचिह्नै–रनिह्नवानं निजवाजि राजताम् ॥६२॥

अपि द्विजिह्वाभ्यवहारपौरुषे, मुखानुषक्तायतवल्गुवल्गया ।
उपेयिवांसं प्रतिमल्लतां रय-स्मये जितस्य प्रसभं गरुत्मतः ॥६३॥
स सिन्धुदं शीतमहःसहोदरं, हरन्तमुच्चैःश्रवसः श्रियं हयम् ।
जिताखिलक्ष्माभृदनल्पलोचन -स्तमारुरोह क्षितिपाकशासनः ॥६४॥
निजा मयूखा इव तीक्ष्णदीधितिं, स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।
तमश्ववारा जवनाश्वयायिनं, प्रकाशरूपा मनुजेशमन्वयुः ॥६५॥
चलन्नलङ्कृत्य महारयं हयं, स्ववाहवाहोचितवेषपेशलः ।
प्रमोदनिःस्पन्दतराक्षिपक्ष्मभि-र्व्यलोकि लोकैर्नगरालयैर्नलः ॥६६॥
क्षणादथैष क्षणदापतिप्रभः, प्रभञ्जनाध्येयजवेन वाजिना ।
सहैव ताभिर्जनदृष्टिवृष्टिभि-र्बहिः पुरोऽभूत्पुरुहूतपौरुषः ॥६७॥
ततः प्रतीच्छ प्रहरेति भाषिणी परस्परोल्लासितशल्यपल्लवे ।
मृषा मृधं सादिबले कुतूहला-न्नलस्य नासीरगते वितेनतुः ॥६८॥
प्रयातुमस्माकमियं कियत्पदं, धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः, पयोधिरोधक्षममुद्धतं रजः ॥६९॥
हरेर्यदक्रामि पदैककेन खं, पदैश्चतुर्भिः क्रमणेऽपि तस्य नः ।
त्रपा हरीणामिति नम्रिताननै-र्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥७०॥
चमूचरास्तस्य नृपस्य सादिनो, जिनोक्तिषु श्राद्धतयेव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डली-मकारयन्भूरितुरङ्गमानपि ॥७१॥
द्विषद्भिरेवास्य विलङ्घिता दिशो, यशोभिरेवाब्धिरकारि गोष्पदम् ।
इतीव धारामवधीर्य मण्डली, क्रियाश्रियाऽमण्डि तुरङ्गमैः स्थली ॥७२॥
अचीकरच्चारु हयेन या भ्रमी-र्निजातपत्रस्य तलस्थले नलः ।
मरुत्किमद्यापि न तासु शिक्षते, वितत्य वात्यामयचक्रचङ्क्रमान् ॥७३॥
विवेश गत्वा स विलासकाननं, ततः क्षणात्क्षोणिपतिर्धृतीच्छया ।
प्रवालरागच्छुरितं सुषुप्सया, हरिर्घनच्छायमिवार्णसां निधिम् ॥७४॥
वनान्तपर्यन्तमुपेत्य सस्पृहं, क्रमेण तस्मिन्नवतीर्णदृक्पथे ।
न्यवर्ति दृष्टिप्रकरैः पुरौकसा-मनुव्रजद्बन्धुसमाजबन्धुभिः ॥७५॥

ततः प्रसूने च फले च मञ्जुले, स सम्मुखस्थाङ्गुलिना जनाधिपः ।
निवेद्यमानं वनपालपाणिना, व्यलोकयत्काननकामनीयकम् ॥७६॥
फलानि पुष्पाणि च पल्लवे करे, वयोऽतिपातोद्गतवातवेपिते ।
स्थितैः समादाय महर्षिवार्धका-द्वने तदातिथ्यमशिक्षि शाखिभिः ॥७७॥
विनिद्रपत्रालिगतालकैतवान्, मृगाङ्कचूडामणिवर्जनार्जितम् ।
दधानमाशासु चरिष्णु दुर्यशः, स कौतुकी तत्र ददर्श केतकम् ॥७८॥
वियोगभाजां हृदि कण्टकैः कटु-र्निधीयसे कर्णिशरः स्मरेण यत् ।
ततो दुराकर्षतया तदन्तकृ-द्विगीयसे मन्मथदेहगाहिना ॥७९॥
त्वदग्रसूच्या संचिवेन कामिनो-र्मनोभवः सीव्यति दुर्यशःपटौ ।
स्फुटं स पत्रैः करपत्रमूर्तिभि-र्वियोगहृद्दारुणि दारुणायते ॥८०॥
धनुर्मधुस्विन्नकरोऽपि भीमजा-परं परागैस्तव धूलिहस्तयन् ।
प्रसूनधन्वा शरसात्करोति मा-मिति क्रुधाऽऽक्रुश्यत तेन केतकम् ॥८१॥
विदर्भसुभ्रू स्तनतुङ्गताऽऽसये, घटानिवापश्यदलं तपस्यतः ।
फलानि धूमस्य धयानधोमुखान्, दाडिमे दोहदधूपिनि द्रुमे ॥८२॥
वियोगिनीमैक्षत दाडिमीमसौ, प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् ।
फलस्तनस्थानविदीर्णरागिहृ-द्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥८३॥
स्मरार्धचन्द्रेषुनिभे क्रशीयसां, स्फुटं पलाशेऽध्वजुषां पलाशनात् ।
स वृन्तमालोकत खण्डमन्वितं, वियोगिहृत्खण्डिनि कालखण्डजम् ॥८४॥
नवा (वा) लता गन्धवहेन चुम्बिता, करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला, दरादराभ्यां दरकम्पिनी पपे ॥८५॥
विचिन्वतीः पान्थपतङ्गहिंसनै-रपुण्यकर्माण्यलिकज्जलच्छलात् ।
व्यलोकयच्चम्पककोरकावलीः, स शम्बरारेर्बलिदीपिका इव ॥८६॥
अमन्यतासौ कुसुमेषु गर्भगं, परागगन्धङ्करणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये; तदङ्गभस्मेव शरेषु सङ्गतम् ॥८७॥
पिकाद्वने शृण्वति भृङ्गहुंकृतै-र्दशामुदञ्चत्करुणे वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं, ददर्श दूनः स्थलपद्मिनीं नलः ॥८८॥

रसालसालः समदृश्यतामुना, स्फुरद्द्विरेफारवरोषहुङ्कृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने, जनाय दित्सन्निव तर्जनाभियम् ॥८९॥

दिने दिने त्वं तनुरेधि रेऽधिकं, पुनःपुनर्मूर्छ च तापमृच्छ च ।
इतीव पान्थाञ्छपतः पिकान् द्विजान्, सखेदमैक्षिष्ट स लोहितेक्षणान् ॥९०॥

अलिस्रजा कुड्मलमुच्चशेखरं, निपीय चाम्पेयमधीरया धिया ।
स धूमकेतुं विपदे वियोगिना-मुदीतमातङ्कितवानशङ्कत ॥९१॥

गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलि नागकेसरम् ।
स मारनाराचनिघर्षणस्खल-ज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥९२॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद् गुणस्पृशः ।
स्वचापदुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः ॥९३॥

मरुल्ललत्पल्लवकण्टकैः क्षतं, समुच्छलच्चन्दनसारसौरभम् ।
स वारनारीकुचसञ्चितोपमं, ददर्श मालूरफलं पचेलिमम् ॥९४॥

युवद्वयीचित्तनिमज्जनोचित-प्रसूनशून्येतरगर्भगह्वरम् ।
स्मरेषु धीकृत्य धिया भयान्धया, स पाटलायाः स्तबकं प्रकम्पितः ॥९५॥

मुनिद्रुमः कोरकितः शितिद्युति-र्वनेऽमुनाऽमन्यत सिंहिकासुतः ।
तमिस्रपक्षत्रुटिकूटभक्षितं, कलाकलापं किल वैधवं वमन् ॥९६॥

पुरा हठाक्षिप्ततुषारपाण्डुर-च्छदा वृतेर्बाह्यधि बद्धविभ्रमाः ।
मिलिन्नमीलं समृजुर्विलोकिता, नभस्वतस्तं कुसुमेषुकेलयः ॥९७॥

गता यदुत्सङ्गतले विशालतां, द्रुमाः शिरोभिः फलगौरवेण ताम् ।
कथं न धात्रीमतिमात्रनामितैः, स वन्दमानानभिनन्दति स्म तान् ॥९८॥

नृपाय तस्मै हिमितं वनानिलैः, सुधीकृतं पुष्परसैरहर्महः ।
विनिर्मितं केतकरेणुभिः सितं, वियोगिनेऽदत्त न कौमुदीमुदः ॥९९॥

अयोगभाजोऽपि नृपस्य पश्यता, तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः, कुहूरुताहूयत चन्द्रवैरिणी ॥१००॥

अशोकमर्थान्वितनामताशया, गताञ्शरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः, प्रतीष्टकामज्ज्वलदस्त्रजालकम् ॥१०१॥

विलासवापीतटवीचिवादनात्, पिकालिगीतैः शिखिलास्यलाघवात् ।
वनेऽपि तौर्यत्रिकमारराध तं, क्व भोगमाप्नोति न भाग्यभाग्जनः ॥१०२॥

तदर्थमध्याप्य अनेन तद्वने, शुका विमुक्ताः पटवस्तमस्तुवन् ।
स्वरामृतेनोपजगुश्च सारिका-स्तथैव तत्पौरुषगायनीकृताः ॥१०३॥

इतीष्टगन्धाढ्यमटन्नसौ वनं, पिकोपगीतोऽपि शुकस्तुतोऽपि च ।
अविन्दतामोदभरं बहिश्चरं, विदर्भसुभ्रूविरहेण नान्तरम् ॥१०४॥

करेण मीनं निजकेतनं दधद्, द्रुमालवालाम्बुनिवेशशङ्कया ।
व्यतर्कि सर्वर्तुधने वने मधुं, स मित्रमत्रानुसरन्निव स्मरः ॥१०५॥

लताबलालास्यकलागुरुस्तरुः, प्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि, प्रणीतलीलाप्लवनो वनानिलः ॥१०६॥

अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात् ।
निलीय तस्मिन्निव सत्पांनिधिर्वने तडाको ददृशेऽवनीभुजा ॥१०७॥

पयोनिलीनाभ्रमुकामुकावली, रदाननन्तोरगपुच्छमुच्छवीन् ।
जलार्द्धरुद्धस्य तटान्तभूभिदो, मृणालजालस्य मिषाद् बभार यः ॥१०८॥

तटान्तविश्रान्ततुरङ्गमच्छटास्फुटानुबिम्बोदयचुम्बनेन यः ।
बभौ चलद्वीचिकशान्तशातनैः, सहस्रमुच्चैःश्रवसामिवाश्रयम् ॥१०९॥

सिताम्बुजानां निवहस्य यश्छलाब्दभावलिश्यामलितोदरश्रियाम् ।
तमःसमच्छायकलङ्कसङ्कुलं, कुलं सुधांशोर्बहलं वहन्बहु ॥ ११० ॥

रथाङ्गभाजा कमलानुषङ्गिणा, शिलीमुखस्तोमसखेन शार्ङ्गिणा ।
सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवाऽन्वयायि यः ॥१११॥

तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गरेखा बिभराम्बभूव यः ।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसञ्चयश्च यः ॥११२॥

महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयो-स्त्विषं विमुञ्चन्विधुकालकूटयोः ॥११३॥

चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः ।
ध्रुवं दधुर्बाडवहव्यवाडव-स्थितिप्ररोहत्तमधूमधूमताम् ॥११४॥

प्रकाममादित्यमवाप्य कण्टकैः, करम्बितामोदभरं विवृण्वती ।
धृतस्फुटश्रीगृहविग्रहा दिवा, सरोजिनी यत्प्रभवाप्सरायिता ॥११५॥
यदम्बुपूरप्रतिबिम्बितायति,-र्मरुत्तरङ्गैस्तरलस्तटद्रुमः ।
निमज्ज्य मैनाकमहभृतः सतस्ततान पक्षान्धुवतः सपक्षताम् ॥११६॥
पयोधिलक्ष्मीमुषि केलिपल्वले, रिरंसुहंसीकलनादसादरम् ।
स तत्र चित्रं विचरन्तमन्तिके,हिरण्मयं हंसमबोधि नैषधः ॥११७॥
प्रियासु बालासु रतक्षमासु च, द्विपत्रितं पल्लवितं च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं, मिषेण चञ्च्वोश्चरणद्वयस्य च ॥११८॥
महीमहेन्द्रस्तमवेक्ष्य स क्षणं, शकुन्तमेकान्तमनोविनोदिनम् ।
प्रियावियोगाद्विधुरोऽपि निर्भरं, कुतूहलाक्रान्तमना मनागभूत् ॥११९॥
अवश्यभव्येष्वनवग्रहग्रहा, यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयानुगम्यते, जनस्य चित्तेन भृशावशात्मना ॥१२०॥
अथावलम्ब्य क्षणमेकपादिकां, तदा निदद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकंधरः शिरः, पिधाय पक्षेण रतिक्लमालसः ॥१२१॥
सनालमात्माननिर्जितप्रभं, ह्रिया नतं काञ्चनमम्बुजन्म किम् ।
अबुद्ध तं विद्रुमदण्डमण्डितं, स पीतमम्भः प्रभुचामरं नु किम् ॥१२२॥
कृतावरोहस्य हयादुपानहौ, ततः पदे रेजतुरस्य बिभ्रति ।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ॥१२३॥
विधाय मूर्तिं कपटेन वामनीं, स्वयं बलिध्वंसिविडम्बिनीमयम् ।
उपेतपार्श्वश्चरणेन मौनिना, नृपः पतङ्गं समधत्त पाणिना ॥१२४॥
तदात्तमात्मानमवेत्य सम्भ्रमात्, पुनः पुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां, करौ निरोद्धुर्दशति स्म केवलम् ॥१२५॥
ससम्भ्रमोत्पातिपतत्कुलाकुलं, सरः प्रपद्योत्कतयाऽनुकम्पताम् ।
तमूर्मिलोलैः पतगग्रहान्नृपं, न्यवारयद्वारिरुहैः करैरिव ॥१२६॥
पतत्त्रिणा तद्रुचिरेण वञ्चितं, श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा, चुकूज कूले कलहंसमण्डली ॥१२७॥

न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ॥१२८॥

न जातरूपच्छदजातरूपता, द्विजस्य दृष्टेयमिति स्तुवन्मुहुः ।
अवादि ते नाथ स मानमौकसा, जनाधिनाथः करपञ्जरस्पृशा ॥१२९॥

धिगस्तु तृष्णातरलं भवन्मनः, समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारसीकरैर्भवेदमीभिः कमलोदयः कियान् ॥१३०॥

न केवलं प्राणिवधो वधो मम, त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्मधनैर्निबर्हणं, विशिष्य विश्वासजुषां द्विषामपि ॥१३१॥

पदे पदे सन्ति भटा रणोद्भटा, न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते कुविक्रमं, कृपाश्रये यः कृपणे पतत्त्रिणि ॥१३२॥

फलेन मूलेन च वारिभूरुहां, मुनेरिवेत्थं मम यस्य वृत्तयः ।
त्वयाद्य तस्मिन्नपि दण्डधारिणा, कथं न पत्या धरणी हृणीयते ॥१३३॥

इतीदृशैस्तं विरचय्य वाङ्मयैः, सचित्रवैलक्ष्यकृपं नृपं खगः ।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥१३४॥

मदेकपुत्रा जननी जरातुरा, नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि न ॥१३५॥

मुहूर्तमात्रं भवनिन्दया दयासखा सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः ॥१३६॥

मदर्थसंदेशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः, प्रिये स कीदृग्भविता तव क्षणः ॥१३७॥

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यते वल्लभयेति निर्गता, लिपिर्ललाटंतपनिष्ठुराक्षरा ॥१३८॥

अयि स्वयूथ्यैरशनिक्षतोपमं, ममाद्य वृत्तान्तमिमं बतोदिता ।
मुखानि लोलाक्षि दिशामसंशयं, दशापि शून्यानि विलोकयिष्यसि ॥१३९॥

ममैव शोकेन विदीर्णवक्षसा, त्वया विचित्राङ्गि विपद्यते यदि ।
तदास्मि दैवेन हतोऽपि हा हतः स्फुट

तत्रापि हाहा विरहात्क्षुधाकुलाः, कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटितेक्षणा मम ॥१४१॥

सुताः कमाहूय चिराय चुंकृतै,-र्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स, स्नुतस्य सेकाद्बुबुधे नृपाश्रुणः ॥१४२॥

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयावनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं, गच्छ यथेच्छमथेत्यभिधाय ॥१४३॥

आनन्दजाश्रुभिरनुस्रियमाणमार्गान्, प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान् ।
चक्रे सचक्रनिभचङ्क्रमणच्छलेन, नीराजनां जनयतां निजबान्धवानाम् ॥१४४॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं,
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्यामहा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥१४५॥

परिशिष्ट-२

## ॥ शान्तिनाथचरित्रम् ॥

### षष्ठः प्रस्तावः

इतश्चात्रैव भरते युगादिजिनसन्ततिः ।
कुरुरित्यभवत् पूर्वं कुरुदेशस्तदाख्यया ॥ १ ॥

हस्तीति तत्सुतस्तेन निर्ममे हस्तिनापुरम् ।
गृहाट्टरचनाहारि तुङ्गप्राकारगोपुरम् ॥ २ ॥

बहुधुरिकृतावासं शोभितं बहुमङ्गलैः ।
अपूर्वगगनाकारं तत्पुरं भूरिसुरवत् ॥ ३ ॥

विश्वसेनो नृपस्तत्र शौर्यौदार्यादिसद्गुणैः ।
विख्यातो जगतीपीठे विश्वसेन इवाभवत् ॥ ४ ॥
पुण्यलावण्यरुचिराऽचिरादेवीति तत्प्रिया ।
सर्वालङ्कारभव्याऽलङ्कृता च रतिप्रिया ॥ ५ ॥
इतो भाद्रपदे कृष्णसप्तम्यां भरणीगते ।
चन्द्रे सर्वग्रहेषूच्चस्थानस्थेषु निशान्तरे ॥ ६ ॥
च्युत्वा सर्वार्थतो मेघरथस्यात्मा शुभः शुभे ।
अवतीर्णोऽचिरादेव्याः कुक्षौ सरसि हंसवत् ॥ ७ ॥
तस्मिंश्च समये देवी सुखसुप्ता चतुर्दश ।
महास्वप्नान् ददर्शैतानीषज्जागरिता सती ॥ ८ ॥
मातङ्गवृषहर्यक्षः साभिषेकेन्दिरा तथा ।
पुष्पमालेन्दुसूर्यौ च ध्वजकुम्भौ सरोवरम् ॥ ९ ॥
सागरश्च विमानं च रत्नानां राशयस्तथा ।
निर्धूमो हुतभुक् चेति स्वप्ना आगमभाषिताः ॥१०॥
दृष्ट्वा स्वप्नानिमान् देवी जातनिद्राक्षया क्षणात् ।
गत्वा (त्वो) भसाजमानल्यौ प्रमोदभरनिर्भरा ॥११॥
प्रहृष्टमुखपद्मोऽथ जगाद जगतीपतिः ।
सर्वलक्षणसम्पूर्णो भावी देवि ! तवात्मजः ॥१२॥
प्रसन्नवदना धर्मचिन्तया रात्रिशेषकम् ।
अतिक्रमयति स्मैषा कुस्वप्नालोकशङ्किता ॥१३॥
सञ्जातेऽथ प्रगेऽष्टाङ्गनिमित्तज्ञानपण्डिताः ।
भूभुजाष्टावुपाध्यायाः आहूता निजपूरुषैः ॥१४॥
कृतमङ्गलोपचाराः सम्प्राप्तास्ते नृपौकसि ।
दत्तासनेषूपविष्टाश्चार्चिताः कुसुमादिभिः ॥१५॥
सुस्वप्नानां फलं राज्ञा पृष्टास्त्वेवं बभाषिरे ।
अस्मच्छास्त्रे द्विचत्वारिंशत् स्वप्ना जगतीपते ॥१६॥

महास्वप्ना अपि त्रिंशत् स्युः सर्वे ते द्विसप्ततिः ।
वीक्षिता येऽचिरादेव्या महास्वप्ना इमे स्फुटम् ॥१७॥
अर्हतां चक्रिणां चैतान् स्वप्नान् पश्यन्ति मातरः ।
सप्तार्धचक्रिणां चाम्बा चतुरः सीरिणां तथा ॥१८॥
प्रत्यर्धचक्रिणां त्रींश्चान्येषामुत्तमजन्मिनाम् ।
एकैकमम्बिकाः स्वप्नं पश्यन्त्येषां हि मध्यतः ॥१९॥
दृष्टा यदचिरादेव्या महास्वप्नाश्चतुर्दश ।
तद्भावी त्वसुतो राजन् ! षट्खण्डभरताधिपः ॥२०॥
अथवाऽपि जिनाधीशो विश्वत्रितयवन्दितः ।
तच्छ्रुत्वा मुदितो राजा मुमुदे तत्प्रियाऽपि सा ॥२१॥
राज्ञा विसृष्टास्ते स्वप्नपाठकाः प्रययुर्गृहम् ।
बभार गर्भं राज्ञी च रत्नगर्भेव सेवधिम् ॥२२॥
अतिस्निग्धातिमधुरं चातिक्षारातितिक्तकम् ।
वर्जयामास साऽऽहारं कषायकटुकं तथा ॥२३॥
महान्तमशिवं तस्मिन्नासीत् पूर्वं पुरे तदा ।
सञ्जातो मान्द्यदोषेण लोकस्य प्रलयो महान् ॥२४॥
गन्धद्विपस्य गन्धेनान्यदन्तिमदवत् क्षणात् ।
उपशान्तं तदशिवं प्रभावाद् गर्भगप्रभोः ॥२५॥
ततश्च चिन्तितं तातजननीभ्यामदो हृदि ।
प्रभावोऽयमनीदृक्षसूनोर्गर्भगतस्य नौ ॥२६॥
इदं हि घटते यस्माद् गर्भवासदिने मुदा ।
वन्दितोऽयं समागत्य महावाग्भ्यां सुरेश्वरैः ॥२७॥
गतेषु मासेषु नवस्वर्धाष्टदिवसेषु च ।
ज्येष्ठकृष्णत्रयोदश्यां भरणीस्थे निशाकरे ॥२८॥
सूर्यादिषु ग्रहेषूच्चपरमोच्चस्थितेषु च ।
शुभे लग्ने मुहूर्ते च प्रवाते चारुमारुते ॥२९॥

निशीथसमये स्वर्णवर्णं कान्तिसमन्वितम् ।
सा देवी सुषुवे पुत्रं विश्वत्रयसुखावहम् ॥३०॥
अत्रान्तरे षडधिकपञ्चाशद्दिक्कुमारिकाः ।
अवधिज्ञानतो ज्ञात्वा जिनजन्म समाययुः ॥३१॥
अष्टावेयुरधोलोकाद् गजदन्ताद्रिकन्दतः ।
अष्टौ च नन्दनवनकूटाद् मेरुनगस्थितात् ॥३२॥
प्रत्येकं रुचकद्वीपादष्टावष्टौ कुमारिकाः ।
एयुर्दिग्भ्यश्चतसृभ्यश्चतस्रश्च विदिग्गताः ॥३३॥
मध्यमाद् रुचकद्वीपाच्चतस्रश्च दिगङ्गनाः ।
एवं सम्मिलिताः सर्वाः षट्पञ्चाशद् भवन्ति ताः ॥३४॥
संवर्तवातजलदकृतिं दर्पणधारिताम् ।
भृङ्गारतालवृन्तानां चामराणां च धारणम् ॥३५॥
दीपिकाधारणं रक्षाविधानप्रभृतीनि च ।
चक्रिरे सूतिकर्माणि क्रमेणैवं जिनस्य ताः ॥३६॥
अत्रान्तरे सुरेन्द्रस्य चचालाचलमासनम् ।
सम्प्रयुक्तावधिज्ञानो जिनजन्म विवेद सः ॥३७॥
आज्ञाप्य त्रिदशं नैगमेषिणं हरिणाननम् ।
ज्ञापयामास तद्देवान् घण्टास्फालनपूर्वकम् ॥३८॥
सर्वे संनह्य देवास्ते हरेरन्तिकमाययुः ।
विमानं कारयामास प्रधानं पालकेन सः ॥३९॥
तत्राधिरुह्य सपरीवारोऽलङ्कारशोभितः ।
आगादनुपमश्रीको जिनजन्मगृहे हरिः ॥४०॥
तुभ्यं नमस्तीर्थनाथ ! सनाथीकृतविष्टप ! ।
कृपारससरिन्नाथ ! नाथ ! श्रीविश्वसेनज ! ॥४१॥
कुक्षौ रत्नधरे ! देवि ! जगद्दीपप्रदायिके ! ।
नमस्तुभ्यं जगन्मातस्त्वं धन्या पुण्यवत्यसि ॥४२॥

त्वमेवामोघजन्माऽसि त्वमेवोत्तमलक्षणा ! ।
पुत्रिणीषु त्वमेवाऽसि पवित्रा भुवनत्रये ॥४३॥
धर्मोद्धरणधौरेयश्छन्नमोक्षाऽध्वदीपकः ।
षोडशस्तीर्थनाथोऽयं भगवान् सुषुवे यया ॥४४॥
नत्वा स्तुत्वा जिनाधीशं तदम्बां च विशेषतः ।
दत्त्वावस्वापिनीं तस्याः प्रतिरूपं निवेश्य च ॥४५॥
पञ्चरूपो बभूवाऽसौ तत्रैको जिनमाददे ।
एकश्छत्रं पवि चैको द्वौ च चामरधारिणौ (युग्मम्) ॥४६॥
स ययौ मेरुशिखरं सुरेन्द्रा अपरेऽपि हि ।
तत्रैयुः स्वर्गभवनवासिनो व्यन्तरास्तथा ॥४७॥
तत्रातिपाण्डुकम्बलशिलायां शाश्वतासने ।
सौधर्मेन्द्रो निषसाद धृत्वाङ्के जिनपुङ्गवम् ॥४८॥
हेमरूप्यमणिदारुमृन्मयां कलशावलिम् ।
तीर्थगन्धोदकापूर्णामुत्क्षिप्य प्रमदाश्रिताः ॥४९॥
अच्युताद्याः सुराधीशाश्चक्रिरे जिनमज्जनम् ।
निःसीमसुकृतापास्तभवाम्भोधिनिमज्जनम् (युग्मम्) ॥५०॥
ततश्चाच्युतनाथस्योत्सङ्गे संस्थाप्य तीर्थपम् ।
सौधर्मेन्द्रो व्यधात् स्नात्रं पुण्यपात्रं जगद्गुरोः ॥५१॥
सुवाससा प्रमृज्याङ्गं चन्दनाद्यैर्विलिप्य च ।
पुष्पाद्यैरर्चयामास प्रीतचित्तः शचीपतिः ॥५२॥
विधाय चक्षुःशान्त्यर्थं लवणोत्तारणादिकम् ।
शक्रो नत्वा जिनं भक्त्या स्तोतुमेवं प्रचक्रमे ॥५३॥
जयत्वमचिराकुक्षिक्षितिकल्पद्रुसन्निभ ! ।
भव्याम्भोरुहसूर्याभ ! भद्रश्रेणिविधायक ! ॥५४॥
इत्याद्युदात्तवचनैः स्तुत्वा, नीत्वा पुनर्गृहे ।
च मातुरङ्कमास्य जिनमेवं जगाद च ॥५५॥

जिनस्य जिनमातुश्च यो दुष्टं चिन्तयिष्यति ।
एरण्डफलवद् ग्रीष्मे स्फुटिष्यत्यस्य मस्तकम् ॥५६॥
ततो नन्दीश्वरद्वीपे यात्रां कृत्वा सुरेश्वराः ।
सर्वे निजं निजं स्थानं जग्मुस्ताश्च कुमारिकाः ॥५७॥
तदा देवी जजागार तदङ्गप्रतिचारिकाः ।
दृष्ट्वा सनन्दनामेतां जातानन्दाः ससम्भ्रमाः ॥५८॥
प्रस्खलद्गतयो गाढनीवीबन्धशिरोरुहाः ।
पतत्प्रच्छादनाः पुत्रजन्म राज्ञे न्यवेदयन् ॥५९॥
इदं च कथयासासुः सूतिकर्माऽस्य देव ! यत् ।
चक्रे काष्ठाकुमारीभिर्दासीभिरिव साञ्जसम् ॥६०॥
कृतो जन्माभिषेकश्च सुरेन्द्रैर्मेरुमस्तके ।
इति देवमुखात् स्वामिन्नस्माभिः शुश्रुवे वचः ॥६१॥
ततोऽभिनवपाथोद—धाराहतकदम्बवत् ।
शुशुभे जातरोमाञ्चकञ्चुको जगतीपतिः ॥६२॥
निजाङ्गलग्नमखिलं भूषणं मुकुटं विना ।
आसप्तसन्ततिं ताभ्यो वृत्तिं च प्रददावसौ ॥६३॥
ततश्च दापयन् दानमनिवारितशात्रवम् ।
हृष्टः प्रवर्तयामास सुतजन्ममहोत्सवम् ॥६४॥
द्वादशेऽथ दिने राजा बन्धुवर्गमशेषकम् ।
भोजयित्वा गौरवेण तत्समक्षमदोऽवदत् ॥६५॥
बभूवाऽशिवशान्तिर्यदस्मिन् गर्भागते जिने ।
तदस्य सुतरत्नस्य शान्तिर्नामास्तु सुन्दरम् ॥६६॥
सर्वस्याऽपि जनस्यैतत् सञ्जातं नाम सम्मतम् ।
रम्यं सद्गुणनिष्पन्नं चेतसाग्रे विचिन्तितम् ॥६७॥
शक्रसंक्रमिताङ्गुष्ठाऽमृताहारस्ततः प्रभुः ।
विशिष्टरूपलावण्यसम्पन्नो ववृधे क्रमात् ॥६८॥

पाणिपादतले यस्यारक्ते लक्षणलक्षिते ।
स्निग्धताम्रपृथूत्तुङ्गा नखाश्च मुकुरोपमाः ॥६९॥
पादौ कूर्मोन्नतावेणी-जङ्घाकारे च जङ्घिके ।
ऊरू करिकरप्रख्यौ विस्तीर्णं च कटीतटम् ॥७०॥
गम्भीरदक्षिणावर्तो नाभिर्मध्यं च वज्रवत् ।
पुरद्वारकपाटाभं दृढं वृक्षःस्थलं तथा ॥७१॥
बाहू पुरार्गलातुल्यौ ग्रीवा कम्बुसमा वरा ।
बिम्बोपमौ चाधरोष्ठौ कुन्दकुड्मलवद् द्विजाः ॥७२॥
उत्तुङ्गः सरलो नाशावंशः सज्जनवृत्तवत् ।
पद्मपत्रोपमे नेत्रे अष्टमीन्दुसमालिकम् ॥७३॥
दोलाकारं श्रुतियुगं छत्राकारं च मस्तकम् ।
स्निग्धा अलिकुलश्यामाः कुन्तलाश्चातिकोमलाः ॥७४॥
पद्मगन्धसमः श्वासो वरहेमरुचिस्तनुः ।
इत्यङ्गलक्षणं यस्य कुरङ्गश्च तथाऽपरम् ॥७५॥
त्रिभिर्ज्ञानैः समायुक्तोऽशेषविज्ञानपारगः ।
जातः सर्वजनोत्कृष्टः प्रभुः सम्प्राप्तयौवनः ॥७६॥
वत्सराणां सहस्रेषु पञ्चविंशतिषु क्रमात् ।
गतेषु भगवान् राज्ये जनकेन निवेशितः ॥७७॥
परिणायितश्चानेकाः सुरूपाः कुलबालिकाः ।
सकलान्तःपुरीसारा जज्ञे तस्य यशोमती ॥७८॥
जीवो दृढरथस्याऽथ स सर्वार्थात्परिच्युतः ।
आगाद्यशोमतीकुक्षौ चक्रस्वप्नोपसूचितः ॥७९॥
समये च सुता जज्ञे तस्योत्सवपुरःसरम् ।
चक्रायुध इति नाम चक्रे स्वप्नानुसारतः ॥८०॥
कलाकलापसम्पूर्णः क्रमात्सम्प्राप्तयौवनः ।
सोऽपि पाणिग्रहं राजकन्यकानां हि कारितः ॥८१॥

अन्यदायुधशालायां रविबिम्बसमद्युति ।
तस्योत्पन्नं सहस्रारं चक्ररत्नमनुत्तमम् ॥८२॥
शस्त्रागाररक्षकेण तदुत्पत्तिर्निवेदिता ।
प्रभो सोऽथ समागत्य चक्रेऽस्याष्टाह्निकोत्सवम् ॥८३॥
तच्छालाया विनिर्गत्य चचालाम्बरवर्त्मना ।
तदनु प्राचलच्छान्तिनाथः सैन्यसमन्वितः ॥८४॥
चक्रं यक्षसहस्रणाधिष्ठितं तदथो गतम् ।
पूर्वस्यां मागधतीर्थासन्नवेलाकुले क्रमात् ॥८५॥
कृत्वा निवेशं सेनायास्तत्र चक्री शुभासने ।
निषसादाभिमुखोऽस्य ततस्तदनुभावनः ॥८६॥
अधोभागे जलस्यान्ते द्वादशयोजनस्थिते ।
मागधाख्यकुमारस्य चलति स्मासनं तदा ॥८७॥
ददर्शावधिना शान्तिं स जिनं चक्रवर्तिनम् ।
षट्खण्डभरतक्षेत्रसाधनोद्यतमागतम् ॥८८॥
दध्यौ चैवं मयाऽऽराध्योऽन्योऽपि चक्री जिनस्त्वयम् ।
विशेषेण यतो भक्तिमिन्द्रा अप्यस्य कुर्वते ॥८९॥
ततः सुवस्त्राण्यादाय सोऽनर्घ्याभरणानि च ।
आगत्य ढौकयामास प्रभोरेवं शशंस च ॥९०॥
तवाज्ञाकारकः स्वामिन् ! पूर्वदिक्पालकोऽस्म्यहम् ।
आदेष्टव्यं सदा कृत्यं स्वकिंकरसमस्य मे ॥९१॥
भगवानपि सन्मान्य दैवतं विससर्ज तम् ।
याम्यां प्रतिदिशं सोऽथ चलति स्म सुदर्शनः ॥९२॥
तीर्थस्य वरदामस्याभ्यर्णे गत्वा स्थितश्च सः ।
तस्याधिष्ठायकं शान्तिस्तथैवासाधयत् प्रभुः ॥९३॥
गत्वाऽथ वारुणीमाशां प्रभासस्याधिदैवतम् [illegible]
साधयित्वा [illegible]

तत्राऽपि पूर्वविधिना साधिता सिन्धुदेवता ।
आगत्याऽऽढौकयत् स्नानपीठं रत्नमयं विभोः ॥९५॥
शातकुम्भमयाः कुम्भा रौप्या मृन्मयकास्तथा ।
अन्यां च स्नानसामग्रीं सुवस्त्राभरणानि च ॥९६॥
ऊचे च सर्वदा स्वामिन्नाज्ञाकारिण्यहं तव ।
इत्युक्त्वा साऽपि स्वस्थानं विसृष्टा विभुना ययौ ॥९७॥
उत्तीर्य चर्मरत्नेन सिन्धुं सेनापतिस्ततः ।
विभूषान्ते साधयित्वा प्रतीचीखण्डमागतः ॥९८॥
कृतपूजं ततश्चक्रं वैताढ्यस्यागमच्चले ।
वैताढ्याद्रिकुमारश्च वशवर्त्यभवत् प्रभोः ॥९९॥
गुहाखण्डप्रपाताया द्वारमुद्घाटितं स्वयम् ।
कृतमालसुरश्चाज्ञां जगद्भर्तुः प्रपन्नवान् ॥१००॥
तत्रोन्मग्नाऽथ निर्मग्ना द्वे नद्यावतिदुस्तरे ।
चकार वर्धकिः सद्यः पद्यां तत्र मनोहराम् ॥१०१॥
गुहायां प्रविवेशाऽथ प्रभुः सैन्यसमन्वितः ।
काकिन्याऽथ तमो हर्तुं विदधे मण्डलानि च ॥१०२॥
पञ्चाशद्योजनान्येकोनपञ्चाशच्च मण्डली ।
एवं जज्ञे ससैन्योऽथ परतो निरगाद् बहिः ॥१०३॥
तत्रापातचिलाताख्यान् म्लेच्छान् भरतचक्रिवत् ।
वशे चकार तरसा महापुण्यप्रभावयुक् ॥१०४॥
सेनान्या साधयित्वाऽथ द्वितीयं सिन्धुनिष्कुटम् ।
हिमवत्पर्वतस्याधिदेवं साधयति स्म सः ॥१०५॥
गिरौ वृषभकूटाख्ये निजं नाम लिलेख च ।
गङ्गोत्तरं निष्कुटं चासाधयद् वाहिनीपतिः ॥१०६॥
तमिस्रायां नाट्यमालं [illegible] निरगाद् विभुः ।
[illegible] च साधयित्वाऽन्यां [illegible] [illegible] [illegible] ॥१०७॥

द्वादशयोजनायामा नवयोजनविस्तृताः ।
मञ्जूषाकृतयः प्रादुर्बभूवुर्निधयो नव ॥१०८॥ ( युग्मम् )
नैसर्पः पाण्डुकश्चैव पिङ्गलः सर्वरत्नकः ।
महापद्मः कालमहाकालौ माणवशङ्खकौ ॥१०९॥
स्कन्धावारपुरादीनां निवेशाः प्रथमे निधौ ।
सर्वेषां धान्यबीजानामुत्पत्तिश्च द्वितीयके ॥११०॥
नराणां महिलानां च हस्तिनां वाजिनां तथा ।
आभरणविधिः सर्वो निधौ पिङ्गलके भवेत् ॥१११॥
चतुर्दशाऽपि रत्नान्युत्पद्यन्ते सर्वरत्नके ।
महापद्मे च वस्त्राणां रङ्गादीनां च सम्भवः ॥११२॥
काले कालत्रयज्ञानं महाकाले च कीर्तितः ।
स्वर्णरूप्यलोहमणिप्रवालानां च सम्भवः ॥११३॥
युद्धनीतिः समग्राऽपि सर्वप्रहरणानि च ।
तनुत्राणादि योधानां योग्यं माणवके भवेत् ॥११४॥
तूर्याङ्गानि समस्तानि काव्यं चाऽपि चतुर्विधम् ।
निधौ सञ्जायते शङ्खे नाट्यनाटकयोर्विधिः ॥११५॥
तेषु पल्योपमायुष्का वसन्ति खलु देवताः ।
निधानसमनामानः समये परिकीर्तिताः ॥११६॥
तथैवात्मवशं चक्रे गङ्गायाः पूर्वनिष्कुटम् ।
एवं षट्खण्डभरतक्षेत्रं प्रभुरसाधयेत् ॥११७॥
कृतदिग्विजयः सोऽथ पुनरागाद्विनीतां पुरम् ।
प्रविश्य तत्र गेहे च जगामोत्सवपूर्वकम् ॥११८॥
द्वात्रिंशन्मुकुटबद्ध–महीपालसहस्रकैः ।
प्रारब्धश्चक्रवर्तित्वाऽभिषेको द्वादशाब्दिकः ॥११९॥
अभिषेकोत्सवं कृत्वा राजैकैको दिने दिने ।
स्वामिने मधुरं द्रव्यं ददौ द्वे द्वे च कन्यके ॥१२०॥

चतुःषष्टिसहस्राणि ततोऽभुवन् प्रिया विभोः ।
अत्यन्तरूपलावण्यविनिर्जितसुराङ्गनाः ॥१२१॥
सेनापतिप्रभृतीनि रत्नानि च चतुर्दश ।
तत्र यक्षसहस्रेणैकैकं हि समधिष्ठितम् ॥१२२॥
चतुरशीतिलक्षाणि करिणां वाजिनां तथा ।
ध्वजाङ्काः शस्त्रसम्पूर्णास्तत्प्रमाणा रथा अपि ॥१२३॥
द्विसप्ततिसहस्राणि पुराणामृद्धिशालिनाम् ।
ग्रामाणां च पदातीनां कोटयः षण्णवतिस्तथा ॥१२४॥
द्वात्रिंशतं सहस्राणि देशानां भूभुजां तथा ।
द्वात्रिंशद्बद्धतरुणीनाटकानां च रङ्गिणाम् ॥१२५॥
रत्नाकराद्याकराणां सहस्राणि च विंशतिः ।
पत्तनान्यष्टचत्वारिंशत्सहस्रमितानि च ॥१२६॥
एवं पालयतश्चक्रिपदवीमसमां प्रभोः ।
ययौ वर्षसहस्राणां विंशतिः पञ्चसंयुता ॥१२७॥
अत्रान्तरे ब्रह्मलोकेऽरिष्टप्रस्तरवासिनाम् ।
पीठं सारस्वतादीनां चलति स्मामृताशिनाम् ॥१२८॥
विज्ञायावधिना तेऽथ व्रतस्य समयं विभोः ।
तीर्थं प्रवर्तयेत्याचचक्षिरे सैन्यबन्दिवत् ॥१२९॥
विजानंस्तत् स्वयं स्वामी तैश्चैवं ज्ञापितस्ततः ।
ददौ सांवत्सरं दानं याचकेभ्यो यथारुचि ॥१३०॥
ततश्चक्रायुधं राज्ये निवेश्य तनयं निजम् ।
बभूव भगवान् दीक्षाग्रहणार्थं समुद्यतः ॥१३१॥
अत्रान्तरे सुराधीशाः सर्वेऽपि चलितासनाः ।
आययुः शान्तिनाथस्य कर्तुं निष्क्रमणोत्सवम् ॥१३२॥
सर्वार्थसंज्ञां शिबिकामारुरोहाऽथ तीर्थकृत् ।
चामराभ्यां वीज्यमानो धृतच्छत्रश्च मस्तके ॥१३३॥

उत्क्षिप्ता मानुषैः पूर्वं शिबिका सा जगद्गुरोः ।
सुरासुरेन्द्रगरुडनागेन्द्रैश्च ततस्ततः ॥१३४॥
अदूढा सा पुरो देवैर्दक्षिणाङ्गे तथाऽसुरैः ।
पश्चाद्भागे च गरुडैर्नागैरुत्तरतस्तथा ॥१३५॥
नृत्यं प्रकटयन्ति स्म पुरो भगवतो नटाः ।
पठन्ति स्मोच्चकैर्भट्टाः स्वामिन् ! जय जयेति च ॥१३६॥
सद्गुणान् वर्णयन्ति स्मैश्वर्यादीन् भुवनोत्तरान् ।
नानाछन्दैर्जगद्धर्तुर्नरा रासकदायकाः ॥१३७॥
ततो भम्भामृदङ्गादीन्यातोद्यानि गुरुस्वरम् ।
वादयन्ति स्म साटोपास्तत्पाठकुशला नराः ॥१३८॥
चक्रे च हाहाहूहूभ्यां सप्तस्वरसमन्वितम् ।
सम्मूर्च्छनाग्रामलयमात्राढ्यं गीतमुत्तमम् ॥१३९॥
रम्भा तिलोत्तमा चैवोर्वशी मेना सुकेशिका ।
हावभावविलासाढ्यं नृत्यं चक्रुः पुरः प्रभोः ॥१४०॥
स एवंविधसामग्र्या निर्गत्य नगराच्छनैः ।
उद्यानं प्रवरं प्राप सहस्राम्रवणाभिधम् ॥१४१॥
शिबिकायाः समुत्तीर्य विमुच्याभरणान्यथ ।
पञ्चभिर्मुष्टिभिः केशानुच्चखान जिनेश्वरः ॥१४२॥
वस्त्राञ्चले गृहीत्वा तान् क्षीराब्धौ मघवाऽक्षिपत् ।
मृदङ्गनादसंयुक्तं तुमुलं च न्यवारयत् ॥१४३॥
ज्येष्ठासितचतुर्दश्यां शशाङ्के भरणीगते ।
कृत्वा सिद्धनमस्कारं प्रभुश्चारित्रमाददे ॥१४४॥
कृतषष्ठतपाः सार्धं सहस्रेण महीभुजाम् ।
आत्तसामायिकः सोऽथ विजहार महीतले ॥१४५॥
कस्मिंश्चित् सन्निवेशेऽथ परमान्नेन कारितः ।
सुमित्राख्यगृहस्थेन पारणं परमेश्वरः ॥१४६॥

चतुर्ज्ञानधरः सोऽथ ग्रामाकरपुराकुलाम् ।
स्वामी विहरति स्मोर्वीं महासत्त्वशिरोमणिः ॥१४७॥
मासान् छद्मस्थकालेऽष्टौ विहृत्य पुनराययौ ।
स हस्तिनापुरे तत्र सहस्राम्रवणे वरे ॥१४८॥
तत्र पत्रप्रसूनादिनन्दिभून्नन्दिनामकः ।
सुविशालोऽभवद् वृक्षस्तस्थौ तस्य तले प्रभुः ॥१४९॥
प्रभोः प्रवर्तमानस्य शुक्लध्याने वरे तदा ।
कृतषष्ठस्य पौषस्य शुद्धायां नवमीतिथौ ॥१५०॥
भरणीस्थे निशानाथे क्षीणकर्मचतुष्टये ।
उत्पन्नमतुलं नित्यं केवलं ज्ञानमुज्ज्वलम् ॥१५१॥
चतुर्विधैस्ततो देवैः समेत्य चलितासनैः ।
अकारि रम्यं समवसरणं जिनहेतवे ॥१५२॥
ऊर्व्यां योजनमात्रायां वायुनाऽशुभपुद्गलाः ।
अपनीतास्ततो गन्धोदकेन शमितं रजः ॥१५३॥
आद्यो मणिमयो वप्रः कपिशीर्षसमन्वितः ।
द्वितीयश्च हेममयः सुरत्नकपिशीर्षकः ॥१५४॥
सुवर्णकपिशीर्षाङ्कस्तृतीयो रूप्यनिर्मितः ।
विमानज्योतिर्भवनवासिभिस्ते कृताः सुरैः ॥१५५॥
जज्ञे सतोरणा तेषु प्रत्येकं द्वारचतुष्टयी ।
स्वाम्यङ्गाद् द्वादशगुणस्तन्मध्येऽशोकपादपः ॥१५६॥
चत्वारि परितस्तस्य सिंहासनवराणि च ।
छत्रत्रयं चामराणि व्यन्तरैर्विहितं ध्वजः ॥१५७॥
प्रविश्य पूर्वद्वारेण कृततीर्थनमस्कृतिः ।
निषसाद प्रसन्नास्यः पूर्वसिंहासने प्रभुः ॥१५८॥
शेषेषु तत्प्रतिच्छन्दाः पृष्ठे भामण्डलं प्रभोः ।
पुरः कुसुमवृष्टिश्चाजानुमात्री सुरैः कृता ॥१५९॥

नदन्ति स्माम्बरतले देवदुन्दुभयस्तदा ।
अथो निषेदुर्नैऋते कोणे वायव्ये ते सुराः पुनः ॥१६०॥
ज्योतिष्कभवनपति–व्यन्तराणां च देवतः ।
निषेदुर्नैऋते कोणे वायव्ये ते सुराः पुनः ॥१६१॥
वैमानिकामराऽमर्त्यमनुष्याणां च योषितः ।
एते निषेदुरीशाने मुख्यप्राकारमध्यगाः ॥१६२॥
पूर्वोक्तदिग्विभागेषु तिर्यञ्चस्त्यक्तमत्सराः ।
सन्निषणा द्वितीयस्य प्राकारस्याऽन्तरेऽखिलाः ॥१६३॥
तस्थुस्तृतीयवप्रान्तवीहनान्यखिलानि च ।
एवं समवसरणस्थितिः किञ्चित्प्रकीर्तिता ॥१६४॥
कल्याणनामधेयेन पुंसागत्य निवेदिताः ।
स्वामिनः केवलोत्पत्तिश्चक्रायुधमहीपतेः ॥१६५॥
गत्वाऽसौ विधिना तत्र नत्वा स्तुत्वा जिनेश्वरम् ।
निषसाद यथास्थानं पुरो विरचिताञ्जलिः ॥१६६॥
अत्रान्तरे समुत्थाय चक्रायुध महीपतिः ।
नत्वा विज्ञपयामास प्रभुमेवं कृताञ्जलिः ॥१३२३॥
समस्तसंशयध्वान्तनिर्नाशनदिवाकर ! ।
त्रैलोक्यवन्दित ! श्रीमच्छान्तिनाथ ! नमोऽस्तु ते ॥१३२४॥
दुष्कर्मनिगडान् भङ्क्त्वा रागद्वेषौ तथाऽप्यरी ।
भवगुप्तिगृहात् त्वं मामरं निःसारय प्रभो ! ॥१३२५॥
शश्वजन्म जरामृत्यु वह्निदीप्ताद्भवौकसः ।
दीक्षाहस्तावलम्बेन निस्तारय जिनेश माम् ॥१३२६॥
पुत्रप्रदत्तराज्योऽसौ पञ्चत्रिंशन्नृपान्वितः ।
दीक्षितोऽथ जिनेन्द्रेण चक्रायुधधरापतिः ॥१३२७॥
ततः पृच्छां करोति स्म प्रभो किं तत्त्वमित्यसौ ।
उत्पत्तिरिति तत्त्वं तु समाचख्यौ जिनेश्वरः ॥१३२८॥
एवं विचिन्तयामास गत्वैकान्ते स बुद्धिमान् ।

उत्पद्यन्तेऽनुसमयं जीवा नारकिकादयः ॥१३२९॥
एवमुत्पद्यमानास्ते जन्तवो भुवनत्रये ।
कथं भवन्ति चेदन्या गतिः क्वापि भवेन्न हि ॥१३३०॥
पुनः पप्रच्छ भगवन् किं तत्त्वमिति राड् यतेः ।
विगमस्तत्त्वमित्याख्यत्तस्मै च त्रिजगद्गुरुः ॥१३३१॥
पुनः स दध्यौ च सर्वविगमे शून्यता भवेत् ।
किं तत्त्वमिति भूयोऽपि ततः पप्रच्छ तीर्थपम् ॥१३३२॥
स्थितिस्तत्त्वमिति पुनर्जिनेन कथिते सति ।
जीवस्वरूपमखिलं ततो विज्ञातवानसौ ॥१३३३॥
त्रिपद्या अनुसारेण द्वादशाङ्गानि स क्षणात् ।
विदधे गाढप्रज्ञावानेवमन्येऽपि तेऽखिलाः ॥१३३४॥
द्वादशाङ्गीं विधायागुस्ते सर्वे जिनसन्निधौ ।
तद्विज्ञायासनवरादुत्तस्थौ भगवानपि ॥१३३५॥
अत्रान्तरे सहस्राक्षः स्थालं सद्गन्धपूरितम् ।
समादाय पुरस्तस्थौ शान्तिनाथजिनेशितुः ॥१३३६॥
गन्धान् समस्तसङ्घस्यार्पयामास जिनेश्वरः ।
प्रदक्षिणात्रयं ते च ददिरे परितः प्रभुम् ॥१३३७॥
गन्धांस्तदुत्तमाङ्गेषु ससङ्घोऽपि जिनोऽक्षिपत् ।
तेषां गणधरपदस्थापनै विनिर्मिता ॥१३३८॥
दीक्षिता जिननाथेन बहवः पुरुषाः स्त्रियः ।
साधुसाध्वीपरीवारस्ततोऽस्य समजायत ॥१३३९॥
यतिधर्मासमर्था ये पुरुषा महिलास्तथा ।
श्रावका श्राविकाश्चापि जज्ञिरे ते जिनान्तिके ॥१३४०॥
एवं चतुर्विधः सङ्घः समुत्पन्नो जगद्गुरोः ।
आद्ये समवसरणे शरणे भव्यदेहिनाम् ॥१३४१॥
पौरुष्यन्ते समुत्थाय विशश्राम जिनेश्वरः ।
गत्वा द्वितीयप्राकारमध्यस्थे देवछन्दके ॥१३४२॥

पादपीठे जिनेन्द्रस्य निषण्णः प्रथमो गणी ।
चक्रे द्वितीयपौरुष्यां व्याख्यानं सदसः पुरः ॥१३४३॥
जैनधर्मस्थिरीकारकारिणीमघहारिणीम् ।
सङ्घस्य कथयामास सोऽन्तरङ्गकथामिमाम् ॥१३४४॥
कृता गणधरेणैवं प्रवरा धर्मदेशना ।
कथिता द्वादशाङ्गी च या स्वयं तेन निर्मिता ॥१५०६॥
साधूनां च दशविधा सामाचारी प्रकाशिता ।
तेषामशेषकृत्यं च श्रुतकेवलिनाऽमुना ॥१५०७॥
इति शान्तिजिनवरो विजहार महीतले ।
भव्याम्बुजवनं नित्यं सूरवत् प्रतिबोधयन् ॥१५०८॥
केचिद्भगवतः पार्श्वे प्रव्रज्यां जगृहुर्जनाः ।
गृहस्थधर्मं केचिच्च शुभभावात्प्रपेदिरे ॥१५०९॥
केचनाविरतसम्यग्दृष्टयो भद्रकाः परे ।
संजायन्ते स्म भगवच्छ्रीशान्तिप्रतिबोधिताः ॥१५१०॥
सर्वस्यापि तमो नष्टमुदिते जिनभास्करे ।
कौशिकानामिवान्धत्वमभव्यानामभूच्च तत् ॥१५११॥
वह्निनाऽपि न सिध्यन्ति यथा कंकटुकाः कणाः ।
तथा सिद्धिरभव्यानां जिनेनापि न जायते ॥१५१२॥
यथोषरचितौ धान्यं न स्याद् वृष्टेऽपि नीरदे ।
बोधो न स्यादभव्यानां जिनदेशनया तथा ॥१५१३॥
यत्र यत्र जनपदे श्रीशान्तिर्व्यहरत् प्रभुः ।
सर्वदुरितोपशान्तिस्तत्र तत्राभवज्जने ॥१५१४॥
नाभूवन् योजनशतमध्ये विहरति प्रभौ ।
दुर्भिक्षडमरादीनि पीडाकारीणि देहिनाम् ॥१५१५
फलपुष्पाकुला वृक्षा वसुधा सुखसञ्चरा ।
पञ्चविंशतियोजन्यामभूदेवं जिनागमे ॥१५१६॥
इत्यादिजिनमाहात्म्यं विश्वविस्मयकारकम् ।

कियदस्मादृशैस्तुच्छबुद्धिभिर्भण्यते भुवि ॥१५१७॥
यो न पल्योपमायुष्को यो न जिह्वासहस्रकः ।
स कथं वर्णयत्येतत्पुण्यमाहात्म्यमर्हताम् ॥१५१८॥
विजानाति जिनेन्द्राणां को निःशेषगुणोत्करम् ।
त एव हि विजानन्ति दिव्यज्ञानेन तं पुनः ॥१५१९॥
इत्यद्भुतैकचरितः श्रीशान्तिजिनपुङ्गवः ।
विजहार धरापीठे लोकानां हितकाम्यया ॥१५२०॥
चक्रायुधगणधरः सह शान्तिजिनेन्दुना ।
विचचार प्रकुर्वाणः शुश्रूषां तस्य भूतले ॥१५२१॥
जानन्नपि विभोः पार्श्वे चक्रे पृच्छा अनेकशः ।
प्रतिबोधकृते भव्यजीवानां भगवानसौ ॥१५२२॥
एवं शान्तिजिनेन्द्रेण पृथ्व्यां विहरता सता ।
सद्विषष्टिसहस्राणि दीक्षिता मुनिपुङ्गवाः ॥१५२३॥
एकषष्टिसहस्राणि षट्शतैरधिकानि च ।
प्रभुणा दीक्षितास्तेन श्रमण्यः शीलशोभिताः ॥१५२४॥
सत्सम्यक्त्वगुणभृतां सुश्राद्धव्रतधारिणाम् ।
जीवाजीवादिसत्तत्ववेदिनां पापभेदिनाम् ॥१५२५॥
धर्मादक्षोभणीयानां रक्षोयक्षामरादिभिः ।
अस्थिमज्जानुरागेण रक्तानां जिनशासने ॥१५२६॥
समुच्छ्रितफलहकापिहितद्वारवेश्मनाम् ।
नित्यं त्यक्तप्रवेशानां परौकोऽन्तःपुरादिषु ॥१५२७॥
जिनवाक्यमेतदर्थः परमार्थस्तथैव च ।
अनर्थं शेषमित्यग्रे सर्वलोकस्य शंसताम् ॥१५२८॥
चतुर्दश्यष्टमीराकामावास्यासु च पौषधम् ।
कुर्वतामशनाद्यैश्च प्रतिलाभयतां मुनीन् ॥१५२९॥
श्रीशान्तिजिननाथेन बोधितानामगारिणाम् ।
नवतिसहस्राण्युक्ता जाता लक्षद्वयो वरा ॥१५३०॥
( षड्भिः कुलकम् )

पूर्वोदितगुणैर्युक्ताः श्राविकास्त्रिजद्गुरोः ।
त्रिनवतिसहस्राणि त्रीणि लक्षाणि चाभवन् ॥१५३१॥
अजिनानां जिन इवातीतानागतवेदिनाम् ।
चतुर्दशपूर्वभृतां सहस्राण्यष्ट चाभवन् ॥१५३२॥
पश्यतां रूपिद्रव्याणि सङ्ख्यातान्नृभवाँस्तथा ।
सहस्रत्रितयं शान्ते-रवधिज्ञानिनामभूत् ॥१५३३॥
विदुषां समयक्षेत्रगतसंज्ञिमनोरथान् ।
मनःपर्ययवतां जाता सहस्रचतुष्टयी ॥१५३४॥
तथा चतुःसहस्राणि बभूवुस्त्रिशतानि च ।
केवलज्ञानयुक्तानां साधूनां सर्वदर्शिनाम् ॥१५३५॥
वैकुर्विकलब्धीनां षट्सहस्राणि चाभवन् ।
चतुःशताधिके द्वे तु सहस्रे वादिनां तथा ॥१५३६॥
वैयावृत्त्योद्यतो नित्यं ध्वस्तप्रत्यूहसञ्चयः ।
यक्षोऽभूद् गरुडो नाम्ना तीर्थे शान्तिजिनेशितुः ॥१५३७॥
सर्वदा कृतसान्निध्या निर्वाणी नाम विश्रुता ।
श्रीमतः शान्तिनाथस्य जज्ञे शासनदेवता ॥१५३८॥
पर्युपास्तिकरो नित्यं चक्रायुधनृपात्मजः ।
बभूव शान्तिनाथस्य राजा कोणाचलाभिधः ॥१५३९॥
चत्वारिंशद्धनुस्तुङ्गं मृगाङ्कं काञ्चनद्युतिम् ।
त्रिजगत्यप्रतिरूपं श्रीशान्तेरभवद्वपुः ॥१५४०॥
चत्वारो जन्मजा एकादश कर्मक्षयोद्भवाः ।
एकानविंशतिश्चान्ये देवसङ्घेन निर्मिताः ॥१५४१॥
चतुस्त्रिंशदतिशया एते सिद्धान्तभाषिताः ।
यथाऽन्येषां तीर्थकृतां शान्तेरपि तथाऽभवन् ॥१५४२॥
(युग्मम्)

भुवनत्रयनाथत्वसूचकानि जिनेशितुः ।
प्रातिहार्याणि तस्याष्टावशोकादीनि जज्ञिरे ॥१५४३॥

एवं त्रिभुवनश्रेयः स्थानं शान्तिरपालयत् ।
स पञ्चविंशतिवर्षसहस्राण्यनगारताम् ॥१५४४॥

ऊनान्येकेन वर्षेण तानि केवलितां पुनः ।
वर्षलक्षमनूनं च सर्वायुरभवत्प्रभोः ॥१५४५॥

निर्वाणसमयं स्वस्यासन्नं ज्ञात्वा जगद्गुरुः ।
आरुरोहच्च शिखरे संमेतस्य महीभृतः ॥१५४६॥

विज्ञातस्वामिनिर्वाणाः सुरेन्द्रा एत्य सत्वरम् ।
चक्रुस्तत्रान्त्यसमवसरणं सरणं श्रियाम् ॥१५४७॥

तत्रोपविश्य भगवांश्चक्रे पर्यन्तदेशनाम् ।
आचख्यौ सर्वभावानामनित्यत्वं महीतले ॥१५४८॥

इत्युवाच च भो भव्याः कार्यं तत्कर्म किञ्चन ।
येन स प्राप्यते मुक्तिर्मुक्त्वाऽसारां भवस्थितिम् ॥१५४९॥

अत्रान्तरे गणधरः पादप्रणतिपूर्वकम् ।
पप्रच्छैवं जिनं कीदृग्रूपा सिद्धिर्भवत्यसौ ॥१५५०॥

प्रभुः प्रोवाच सा हारहीरचन्द्रकरोज्ज्वला ।
योजनानां पञ्चचत्वारिंशल्लक्षाणि विस्तृता ॥१५५१॥

श्वेतोत्तानवरच्छत्र–समसंस्थानसंस्थिता ।
सकलस्यापि लोकस्य साऽग्रभागे प्रतिष्ठिता ॥१५५२॥

पिण्डे च योजनान्यष्टौ मध्यभागे सका पुनः ।
आयते मक्षिकापत्रतन्वी चान्ते क्रमादियम् ॥१५५३॥

यदन्त्ययोजनं तस्यान्त्यक्रोशस्य षडंशके ।
सिद्धाः प्रतिष्ठितास्तत्रानन्तसौख्यसमन्विताः ॥१५५४॥

तत्र जन्मजरामृत्युरोगशोकाद्युपद्रवाः ।
न जायन्ते कषायाश्च क्षुत्तृषाद्याश्च देहिनाम् ॥१५५५॥

सौख्यं निरुपमं तत्र [illegible] सुस्थिरं [illegible] ।
मुग्धलोक[illegible] [illegible] ॥[illegible]॥

तथाहि–श्रीसंकेतपुरस्वामी शत्रुमर्दनभूपतिः ।
विपरीततुरङ्गेण हृतः कान्तारमासदत् ॥१५५७॥
गाढश्रमवशाज्जाततृष्णापीडितविग्रहः ।
मूर्च्छयाऽतुच्छया सोऽथ पपात पृथिवीतले ॥१५५८॥
प्रत्यासन्नगिरौ तत्र वसन्ति स्म पुलीन्द्रकाः ।
कन्दमूलफलाहारास्तरुवल्कलचीवराः ॥१५५९॥
शिलायामासनं तेषां शयनं च शिलातले ।
आत्मानं सुखिनं तेऽपि मन्यमाना अदोऽवदन् ॥१५६०॥
सुलभं नैर्झरं वारि सदा सन्निहिता प्रिया ।
शुभो वासः पुलीन्द्राणां श्रूयते नाहितं वचः ॥१५६१॥
तेषां मध्यादथो कश्चित् पुलीन्द्रः समुपाययौ ।
तत्र यत्राभवद् भूपो मूर्छया पतितो भुवि ॥१५६२॥
भूषणैर्भूषिताङ्गत्वाज्ज्ञात्वा तं पृथिवीपतिम् ।
स एवं चिन्तयामास तृष्णयैष विपत्स्यते ॥१५६३॥
अस्मिँश्च संस्थिते पृथ्वी निर्नाथा सकला भवेत् ।
तदयं नीरपानेन युक्तो जीवयितुं मम ॥१५६४॥
जीवनीयमथानीय पलाशानां पुटेन सः ।
पाययामास नृपतिं ततः स्वस्थो बभूव सः ॥१५६५॥
तस्योपकारमतुलं दधानो मानसे नृपः ।
यावदस्थात् क्षणं वार्तां प्रकुर्वाणोऽमुना सह ॥१५६६॥
तावत्तत्राययुस्तस्य सैनिकास्तैश्च ढौकितम् ।
राज्ञो भक्ष्यं मोदकादि शीतलं सलिलं तथा ॥१५६७॥
पुलीन्द्रस्यापि तद्भक्ष्यं दापितं पृथिवीभुजा ।
सुखासनगतः स्वेन सहानीतः पुरे च सः ॥१५६८॥
कारयित्वा ततः स्नानं परिधाप्य सुवाससी ।
भूषणैर्भूषितश्चारुश्रीखण्डाद्यैर्विलिप्य च ॥१५६९॥

शालिदाल्यादिसद्भक्ष्यैर्भोजितश्चातिगौरवात् ।
दत्तं त्रयोदशगुणख्यातं ताम्बूलमस्य च ॥१५७०॥
शेते स्म चारुशय्यायां रम्यावासगतोऽथ सः ।
हतं तस्याशु दारिद्र्यं यस्य तुष्टो महीपतिः ॥१५७१॥
इत्थं संप्राप्तसौख्योऽपि विसस्मार वनं न सः ।
तत्र स्वैरविहारं च निजां सहचरीं च ताम् ॥१५७२॥
किंकिल्लिपल्लवाहारं सुन्दरे नन्दने वने ।
चरन्नपि स्मरत्येव करभः स्वां मरुस्थलीम् ॥१५७३॥
परं शशाक नो गन्तुं पत्तिभिः सुनियन्त्रितः ।
एवमस्थात्तत्र कालं कियन्तमसकौ तथा ॥१५७४॥
वर्षाकालेऽन्यदाऽऽयाते गर्जत्यम्बुधरेऽसकृत् ।
विद्युद्विलासे जाते च सोऽभूद्विरहपीडितः ॥१५७५॥
मेघगर्जारवो विद्युद्विलासः केकिनां स्वरः ।
दुःसहो विरहार्तानामेकैको यमदण्डवत् ॥१५७६॥
सोऽथ दध्यौ सुवस्त्रालङ्कारो यास्याम्यहं यदि ।
भाविनी व्याहृतिस्तन्मे नग्नस्यैव गतिः शुभा ॥१५७७॥
एवं विचिन्त्य वञ्चयित्वा यामिकान् स कथञ्चन ।
निःसृत्य भवनाद्रात्रौ शनैः स्वस्थानमाययौ ॥१५७८॥
अन्याकारममुं दृष्ट्वा संभ्रान्तं तत्कुटुम्बकम् ।
पप्रच्छ हन्त कोऽसि त्वं सोऽवदत्तावकोऽस्म्यहम् ॥१५७९॥
ततश्च प्रत्यभिज्ञाय पृष्टस्तन्मानुषैरयम् ।
क्वास्थाः कालमियन्तं त्वं किं वा कान्तिस्तवेदृशी ॥१५८०॥
ततस्तेन स्ववृत्तान्तः सर्वस्तेषां निवेदितः ।
कथितं चानुभूतं तद्ग्रामवासादिकं सुखम् ॥१५८१॥
शंस कीदृशरूपं तदिति भूयोऽपि पृच्छताम् ।
तत्प्रतीतोपमानेन तेषां कथयति स्म सः ॥१५८२॥

卐

